UNIVERSAL
LIBRARY

OU_184281

UNIVERSAL
LIBRARY

शांकरं
उपनिषद्भाष्यम्
॥ २ ॥

29-4-72—10,000

OSMANIA UNIVERSITY LIBRARY

S294.592 Accession No PG S210
U65U

उपनिषद्भाष्यम् Vol. 2. P

ok should be returned on or before the date last marked below

1928

POPULAR EDITION

Works of Shankaracharya

IN ORIGINAL SANSKRIT

VOL II, PART II



THE

UPANISHADBHASHYA

(BRIHADARANYAKOPANISHAD)



EDITED BY

Hari Raghunath Bhagavat, B A

Second Edition

ASHTEKAR & Co.

POONA

1928

POPULAR EDITION OF THE

Works of Shri Shankaracharya.

In Original Sanskrit

Vol I	Gitabhashya	Rs 2-0
Vol II	Upanishadbhashya, i.e., the principal ten Upanishads with Shankara's Com	Rs 10-0
Vol III	Brahmasutrabhāshya	Rs 4-0
Vol IV	Minor Works	Rs 4-0

Ashtekar & Co., Poona (India)

ॐ तत्सत् ।

श्रीशंकराचार्यविरचितग्रंथसंग्रहः ।

द्वितीये सपुटे द्वितीयो भाग ।

उपनिषद्भाष्यम्

रा. ग. हरि रघुनाथ भागवत

इत्येतेन गार्ग्यगोत्रजचित्तपावनब्राह्मणेन
पुण्यपत्तनस्थेन संशोधितम् ।

द्वितीय संस्करणम् ।

पुण्यपत्तने

अष्टेकर कंपनी

इत्येतै प्राकाश्य नीतम् ।

शालिवाहनशकाब्दा १८५०

Published by

H. R. BHAGAVAT, BHAGAVAT HOUSE, SADASHIVA PETH

POONA CITY

Printed at

THE BANGALORE PRESS, 'LAKE VIEW', MYSORE ROAD

BANGALORE CITY

3333-27

भूमिका ।

श्रीमच्छंकराचार्यविरचितग्रंथसंग्रहस्यास्मिन्द्वितीये संपुटे ईशावास्यादि-दशोपनिषद् सभाष्या संगृहीता । एता उपनिषद श्रीमदाचार्यै केन क्रमेण भाष्येणालंकृता इत्येतन्निर्णेतुं न किंचिदस्ति साधनमित्यवधार्य मयाऽकारादि-वर्णानुक्रमेणैव ता अत्र मुद्रयिता । अष्टोत्तरशतोपनिषदा मध्ये एता दशैव प्रधाना । एतासामेव भाष्य प्रस्थानत्रयीगतम । अत एतासामेवास्मिन्भागे संग्रह कृत । अन्या अपि श्वेताश्वतर जाबाल-कौपीतकि-मैत्रायणि-कैवल्य-नारायणाद्युपनिषद शंकराचार्यैस्तत्र तत्रोदाहृता दृश्यन्ते । तद्भत भाष्य तु नोपलभ्यते । श्वेताश्वतरोपनिषद्भाष्य शंकराचार्यविरचितमिति यद्यप्यानंदाश्रम-ग्रंथावल्या प्रकाशित, तथापि न सा भगवत्पादकृतिरिति मन्येऽल्पमतिरहम् । नापि श्वेताश्वतरोपनिषत्प्रस्थानत्रय्यामंतर्भूता । नचापि शृंगेरिपीठाधिपत्याज्ञया प्रकाशिताया श्रीरंगस्थवाणीविलासमुद्रणालये मुद्रिताया शांकरग्रंथावल्या श्वेता-श्वतरोपनिषद्भाष्य संगृहीतम् । अतोऽस्मिन्संग्रहे न तत्संगृहीतम् ॥

पुण्यनामक पत्तनम् ।
वर्षप्रतिपत् १८५० ।

भागवतोपाह्वो रघुनाथसूनुः हरिशर्मा ।

प्रतीकानुक्रमणिका ।

(बृहदारण्यकोपनिषत्)

अथ ह याज्ञवल्क्यस्य	४ ५	जनक ह वैदेह	४ ३
अथ ह वाचक्नव्युवाच	३ ८	तद्ध तदेव तदास	५ ४
अथ हैनमुद्दालक आरुणि	८ ७	त्रय वा इद	१ ६
अथ हैनमुषस्तश्चाक्रायण	३ ४	त्रय प्राजापत्या	५ २
अथ हैन कहोल कौषीतकेय	३ ५	दृष्ट्वाऽलाकिहानूचानो	२ १
अथ हैन गार्गो वाचक्नवी	८ ६	दृश्या ह प्राजापत्या	१ ३
अथ हैन जारत्कारव	८ २	द्वाव ब्रह्मणो रूपे	२ ३
अथ हैन भुज्युर्लाह्यायनि	८ ८	नवैह किंचनाग्र आसीत	१ २
अथ हैन विदग्ध शाकल्य	८ ८	पूर्णमद पूर्णमिद	५ १
अन्न ब्रह्मत्येक आहु	४ १८	भीमादवातः पवते	५ १४
अयमग्निर्वैश्वानरो	८ ८	मनोमयोऽय पुरुषो	५ ६
आत्मैवेदमग्र आसीत	१ ४	मन्त्रयांनि होवाच	२ ४
आप एवेदमग्र आसु	५ ५	यत्समप्राक्षीनि मेक्षया	१ ५
इय पृथिवी सर्वेषा	८ ८	यदा वै पुरुषोऽस्मात्	५ १०
उक्थ प्राणो वा उक्थ	५ १८	या ह व ज्येष्ठ च	६ १
उषा वा अश्वस्य	१ १	यो ह व शिशु	२ २
एतद्वै परम तपो	४ ११	वाच धेनुमुपासीत	५ ८
एष प्रजापतिर्यत	४ ३	विद्युद्ब्रह्मेत्याहु	५ ७
एषा वै भूताना पृथिवी	६ ४	श्वेतकेतुर्ह वा आरुणय	६ २
जनको ह वैदेहो	३ १	स यत्रायमात्मा	४ ४
जनको ह वैदेह आसाचक्रे	४ १	स य कामयेत	६ ३
जनको ह वैदेह कुर्चात	४ २	हिरण्मयेन पात्रेण	५ ५

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

बृहदारण्यकोपनिषत् ।



ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्य ॥

॥ प्रथमोऽध्याय ॥

"उषा वा अश्वस्य" इत्येवमाद्या वाजसनेयिब्राह्मणोपनिषत् । तस्या इयमत्यल्पया वृत्तिरारभ्यते संसारव्याविवृत्सुभ्य संसारहेतुनिवृत्तिसाधन-ब्रह्मात्मैकत्वविद्याप्रतिपत्तये । सेय ब्रह्मविद्या उपनिषच्छब्दवाच्या तत्पराणा संहेतो संसारस्यात्यन्तावसादनात् । उपनिपूर्वस्य सदेस्तदर्थत्वात् । तादर्थ्यात् ग्रन्थोऽप्युपनिषदुच्यते ॥

सेय षडध्यायी अरण्येऽनूच्यमानत्वादारण्यकम् । बृहत्त्वात्परिमाणतो बृहदारण्यकम् । तस्यास्य कर्मकाण्डेन सबन्धोऽभिधीयते । सबोऽप्ययं वेद प्रत्यक्षानुमानाभ्या अनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपर सर्वपुरुषाणा निसर्गत एव तत्प्राप्तिपरिहारयोरिष्टत्वात् । दृष्टविषये चेष्टानिष्टप्राप्तिपरिहारो-पायज्ञानस्य प्रत्यक्षानुमानाभ्यामेव सिद्धत्वान्नागमान्वेषणा । न चासति जन्मान्तर-सबन्धात्मास्तित्वविज्ञाने जन्मान्तरेष्टानिष्टप्राप्तिपरिहारेच्छा स्यात् । स्वभाव-वादिदर्शनात् । तस्माज्जन्मान्तरसबन्धात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहारो-पायविशेषे च शास्त्र प्रवर्तते । 'येय प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके' इत्युपक्रम्य 'अस्तीत्येवोपलब्धव्य' इत्येवमादिनिर्णयदर्श-नात् । 'यथा च मरण प्राप्य' इत्युपक्रम्य 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिन । स्थाणुमन्येऽनुसयन्ति यथाकर्म यथाश्रुतम् ॥' इति च । 'स्वयं ज्योति' इत्युपक्रम्य 'त विद्याकर्मणा समान्वारभेते' 'पुण्यो वै पुण्येन कर्मणा भवति पाप पापेन' इति च । 'ज्ञपयिष्यामि' इत्यु-

पक्रम्य 'विज्ञानमय' इति च व्यतिरिक्तात्मास्तित्वम् । तत्प्रत्यक्षविषयमेवेति चेत । न । वादिविप्रतिपत्तिदर्शनात । नहि देहातरसबधिन आत्मन प्रत्यक्षेणास्तित्वविज्ञान लोकायतिका बौद्धाश्च न प्रतिकूला स्युर्नास्त्यात्मेति वदन्त । न हि घटादौ प्रत्यक्षविषये कश्चिद्विप्रतिपद्यते नास्ति घट इति । स्थाण्वादौ पुरुषादिदर्शनान्नेति चेत । न । निरूपितेऽभावात । न हि प्रत्यक्षेण निरूपिते स्थाण्वादौ विप्रतिपत्तिर्भवति । वैनाशिकास्त्वहमिति प्रत्यये जायमानेऽपि देहातरव्यतिरिक्तस्य नास्तित्वमेव प्रतिजानते । तस्मात्प्रत्यक्षविषयवैलक्षण्यात प्रत्यक्षात नात्मास्तित्वसिद्धि । तथानुमानादपि । श्रुत्या आत्मास्तित्वे लिगस्य दर्शितत्वाल्लिगस्य च प्रत्यक्षविषयत्वान्नेति चेत । न । जन्मातरसबधस्याग्रहणात् । आगमेन त्वात्मास्तित्वेऽवगते वेदप्रदर्शितलौकिकलिगविशेषेश्च तदनुसारिणो मीमासकास्तार्किकाश्च अहप्रत्ययलिगानि च वैदिकान्येव स्वमतिप्रभवाणीति कल्पयन्तो वदन्ति प्रत्यक्षश्चानुमेयश्चात्मेति ॥

सर्वथाप्यस्त्यात्मा देहातरसबधीत्यव प्रतिपत्तुर्देहातरगतेष्टानिष्टप्राप्तिपरिहारोपायाविशेषार्थिनस्तद्विशेषज्ञापनाय कर्मकाडमारब्धम् । न त्वात्मन इष्टानिष्टप्राप्तिपरिहारेच्छाकारण आत्मविषयमज्ञान कर्तृभोक्तृस्वरूपाभिमानलक्षण तद्विपरीतब्रह्मात्मस्वरूपविज्ञानेनापनीतम । यावद्धि तन्नापनीयते तावदय कर्मफलरागद्वेषादिस्वाभाविकदोषप्रयुक्त शास्त्रविहितप्रतिषिद्धातिक्रमेणापि प्रवर्तमानो मनोवाक्कायैरिष्टाद्दृष्टानिष्टसाधनानि अधर्मसज्ञकानि कर्माण्युपचिनोति बाहुल्येन, स्वाभाविकदोषबलीयस्त्वात् । तत स्थावरान्तायोगति । कदाचिच्छास्त्रकृतसस्कारबलीयस्त्वम् । ततो मनआदिभिरिष्टसाधन बाहुल्येनोपचिनोति धर्माख्यम । तत् द्विविधम— ज्ञानपूर्वक केवल च । तत्र केवल पितृलोकादिप्राप्तिफलम् । ज्ञानपूर्वकं देवलोकादि ब्रह्मलोकातप्राप्तिफलम । तथाच शास्त्र "आत्मयाजी श्रेयान्देवयाजिन" इत्यादि । स्मृतिश्च "द्विविध कर्म वैदिकम्" इत्याद्या । साम्ये च धर्माधर्मयो मनुष्यत्वप्राप्ति । एव ब्रह्माद्या स्थावरान्ता स्वाभाविकाविद्यादिदोषवतां धर्माधर्मसाधनकृता ससारगतिर्नामरूपकर्माश्रया तदेवेद व्याकृत साध्यसाधनरूप जगत्प्रागुत्पत्तेरव्याकृतमासीत । स एष बीजाकुरादिवदविद्याकृत संसार आत्मनि क्रियाकारकफलाध्यारोपलक्षण अनादिरनतोऽनर्थ इत्येतस्माद्विरक्त्याविद्यानिवृत्तये तद्विपरीत-

ब्रह्मविद्याप्रतिपत्त्यर्थोपनिषदारभ्यते ॥

अस्य त्वश्वमेधकर्मसबधिनो विज्ञानस्य प्रयोजन— येषामश्वमेधे नाधिकारस्तेषामस्मादेव विज्ञानात्फलप्राप्ति । 'विद्यया वा कर्मणा वा" "तद्धैतल्लोकजिदेव" इत्येवमादिश्रुतिभ्य । कर्मविषयत्वमेव विज्ञानस्येति चेत् । न । "योऽश्वमेधेन यजते य उ चैनमेव वेद" इति विकल्पश्रुते । विद्याप्रकरणे चान्नानात् कर्मान्तरे च सपादनदर्शनात् विज्ञानात्तत्फलप्राप्तिरस्तीत्यवगम्यते । सर्वेषा च कर्मणा पर कर्माश्वमेध । समष्टिव्यष्टिप्राप्तिफलत्वात् । तस्य चेह ब्रह्मविद्याप्रारंभ आम्नान सर्वकर्मणा ससारविषयत्वप्रदर्शनार्थम् । तथाच दर्शयिष्यति फलमशनायामृत्युभावम् । न नित्याना ससारविषयफलत्वमिति चेत् । न । सर्वकर्मफलोपसंहारश्रुते. । सर्व हि पत्नीसबद्ध कर्म । 'जाया मे स्यादेतावान्वै काम' इति निसर्गत एव सर्वकर्मणा काम्यत्व दर्शयित्वा, पुत्रकर्मापरविद्याना च 'अय लोक पितृलोको देवलोक' इति फल दर्शयित्वा, त्रयात्मकता चाते उपसंहरिष्यति 'त्रय वा इद नाम रूप कर्म' इति । सर्वकर्मणा फल व्याकृत ससार एवेति । इदमेव त्रयं प्रागुत्पत्तेस्तर्ह्यव्याकृतमासीत् । तदेव पुन सर्वप्राणिकर्मवशाद्व्याक्रियते बीजादिव वृक्ष । सोऽय व्याकृताव्याकृतरूप ससारोऽविद्याविषय क्रियाकारकफलात्मकतया आत्मरूपत्वेनाध्यारोपित अविद्ययैव मूर्तामूर्ततद्वासनात्मक । अतो विलक्षणोऽनामरूपकर्मात्मकोऽद्वयो नित्यशुद्धबुद्धमुक्तस्वभावोपि क्रियाकारकफलभेदादिविपर्ययेणावभासते । अतोऽस्माक्रियाकारकफलभेदस्वरूपात् एतावदिदमिति साध्यसाधनरूपाद्विरक्तस्य कामादिदोषकर्मबीजभूताविद्यानिवृत्तये रज्ज्वामिव सर्पविज्ञानापनयाय ब्रह्मविद्या आरभ्यते ॥

तत्र तावदश्वमेधविज्ञानाय 'उषा वा अश्वस्य' इत्यादि । तत्राश्वविषयमेव दर्शनमुच्यते प्राधान्यादश्वस्य । प्राधान्य च तन्नामाकितत्वात्क्रतो प्राजापत्यत्वाच्च ॥

ॐ । उषा वा अश्वस्य मेध्यस्य शिरः । सूर्यश्चक्षुर्वात प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य । द्यौः पृष्ठमंतरिक्षमुदरं पृथिवी पाजस्य दिशः पार्श्वे अवांतरदिशः पर्शव ऋतवोऽगानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मांसानि । ऊवध्यं सिकताः

सिधवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचन्नधनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥१॥

उषा इति, ब्राह्मो मुहूर्त उषा । वैशब्द स्मारणार्थ, प्रसिद्ध काल स्मारयति । शिर प्राधान्यात् । शिरश्च प्रधान शरीरावयवानाम् । अश्वस्य मेध्यस्य मेधार्हस्य यज्ञियस्योषा शिर इति सबध । कर्मागस्य पशो सस्कर्तव्यत्वात्कालादिदृष्टय शिरआदिषु क्षिप्यन्ते । प्राजापत्यत्व च प्रजापतिदृष्टयध्यारोपणात् । काललोकदेवतात्वाध्यारोपण च प्रजापतित्वकरण पशो । एवरूपो हि प्रजापति । विष्णुत्वादिकरणमिव प्रतिमादौ । सूर्यश्चक्षु शिरसोऽनतरत्वात्सूर्याधिदैवतत्वाच्च । वात प्राणो वायुस्वाभाव्यात् । व्यात्त विवृत मुखमग्निर्वैश्वानर । वैश्वानर इत्यग्निर्विशेषणम् । वैश्वानरो नामाग्निर्विवृत मुखमित्यर्थो, मुखस्याग्निर्दैवतत्वात् । सवत्सर आत्मा । सवत्सरो द्वादशमासस्त्रयोदशमासो वा । आत्मा शरीरम् । कालावयवाना च सवत्सर शरीर, शरीर चात्मा, 'मध्य ह्येषामगानामात्मा' इति श्रुते । अश्वस्य मेध्यस्येति सर्वत्रानुषगार्थ पुनर्वचनम् । द्यौ पृष्ठ ऊर्ध्वत्वसामान्यात् । अतरिक्षमुदर सुषिरत्वसामान्यात् । पृथिवी पाजस्य पादस्य, पाजस्यमिति वर्णव्यत्ययेन, पादासनस्थानमित्यर्थ । दिशश्चतस्रोऽपि पार्श्वे पार्श्वेन दिशा सबधात् । पार्श्वयोर्दिशा च संख्यावैषम्यादयुक्तमिति चेत् । न । सर्वमुखत्वोपपत्तेरश्वस्य पार्श्वाभ्यामेव सर्वदिशा सबंधाददोष । अवातरदिश आग्नेय्याद्या पर्शव पार्श्वास्थीनि । ऋतवोऽगानि सवत्सरावयवत्वादगमार्थत्वात् । मासार्धमासाश्च पर्वाणि सवय सविसामान्यात् । अहोरात्राणि प्रतिष्ठा । बहुवचनात्प्राजापत्यदैवपित्र्यमानुषाणि, प्रतिष्ठा पादा प्रतितिष्ठन्त्येतैरिति । अहोरात्रैर्हि कालात्मा प्रतितिष्ठत्यश्वश्च पादै । नक्षत्राण्यस्थीनि शुक्लत्वसामान्यात् । नभो नभस्था मेघा अतरिक्षस्योदरत्वोक्ते, मामान्युदकरुधिरसेचनसामान्यात् । ऊवध्य उदरस्थमर्धजीर्णमशन सिक्ता विश्लिष्टावयवत्वसामान्यात् । सिंधव स्यदनसामान्यान्नद्यो गुदा नाड्यो बहुवचनाच्च । यकृच्च क्लोमानश्च हृदयस्याधस्ताद्दक्षिणोत्तरौ मासखडौ । क्लोमान इति नित्य बहुवचनमेकस्मिन्नेव । पर्वता कठिन्यादुच्छ्रितत्वाच्च । ओषधयश्च क्षुद्रा स्थावरा, वनस्पतयो महान्तो, लोमानि केशाश्च यथासभवम् । उद्यन्नुद्गच्छन्भवति सविता

आमध्याह्नादश्वस्य पूर्वार्धो नाभेरूर्ध्वमित्यर्थ । निम्लोचन्नस्त यन्नामध्याह्नाज्जघनार्धोऽपरार्ध पूर्वापरत्वसाधर्म्यात्। यद्विजृंभते गात्राणि विनामयति विश्रिपति तद्विद्योतते विद्योतनं मुखघनविदारणसामान्यात्। यद्विधूनुते गात्राणि कंपयति तत्स्तनयति गर्जनशब्दसामान्यात्। यन्मेहति मूत्रं करोत्यश्वस्तद्वर्षति वर्षणं तत् सेचनसामान्यात्। वागेव शब्द एवास्याश्वस्य वागिति, नात्र कल्पनेत्यर्थ ॥

अहर्वा अश्व पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेन पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावाभित सबभूवतु. । हयो भूत्वा देवानवहद्वाजी गधर्वानर्वासुरानश्वो मनुष्यान्समुद्र एवास्य बधु समुद्रो योनि ॥२॥ इति प्रथमं ब्राह्मणम् ॥

अहर्वा इति सौवर्णराजतौ महिमाख्यौ ग्रहावश्वस्याग्रत पृष्ठतश्च स्थाप्येते तद्विषयामिदं दर्शनम्। अह सौवर्णो ग्रहो दीप्तिसामान्याद्वै । अहरश्वं पुरस्तान्महिमान्वजायतेति कथम्? अश्वस्य प्रजापतित्वात्। प्रजापतिर्ह्यादित्यादिलक्षणोऽद्धा लक्ष्यते । अश्व लक्षयित्वाऽजायत सौवर्णो महिमा ग्रहो, वृक्षमनु विद्योतते विद्युदिति यद्वत्। तस्य ग्रहस्य पूर्वे पूर्व समुद्रे समुद्रो योनिर्विभक्तिव्यत्ययेन। योनिरित्यासादनस्थानम्। तथा रात्री राजतो ग्रहो वर्णसामान्याज्जघन्यत्वसामान्याद्वा । एनमश्व पश्चात्पृष्ठतो महिमाऽन्वजायत, तस्यापरे समुद्रे योनि । महिमा महत्त्वात्। अश्वस्य हि विभूतिरेषा यत्सौवर्णो राजतश्च ग्रहावुभयत स्थाप्येते। तावेतौ वै महिमानौ महिमाख्यौ ग्रहावश्वमभित संबभूवतुरुक्तलक्षणावेव संभूतौ। इत्थमसावश्वो महत्त्वयुक्त इति पुनर्वचनं स्तुत्यर्थम्। तथा च हयो भूत्वेत्यादि स्तुत्यर्थमेव। हयो हिनोतेर्गतिकर्मणो विशिष्टगतिरित्यर्थ । जातिविशेषो वा। देवानवहत् देवत्वमगमयत्प्रजापतित्वात्। देवाना वोढाऽभवत्। ननु निदैव वाहनत्वम्। नैष दोष । वाहनत्वं स्वाभाविकमश्वस्य स्वाभाविकत्वादुच्छ्वायप्राप्तिर्देवादिसंबंधोऽश्वस्येति स्तुतिरेवैषा। तथा वाज्यादयो जातिविशेषा । वाजी भूत्वा गंधर्वानवहदित्यनुषंग । तथाऽर्वा भूत्वाऽसुरान् । अश्वो भूत्वा मनुष्यान् । समुद्र एवेति परमात्मा बंधुर्बधनं बध्यतेऽस्मिन्निति। समुद्रो योनि कारणमुत्पत्तिं प्रति। एवमसौ शुद्धयोनि· शुद्धस्थितिरिति स्तूयते। "अप्सुयोनिर्वा अश्व" इति श्रुते प्रसिद्ध

एव वा समुद्रो योनि ॥ इति प्रथम ब्राह्मणम् ॥ १ १ —

नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत्। अशनायया ऽशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति। सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्व क ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्व वेद ॥१॥

अथाग्नेरश्वमेधोपयोगिकस्योत्पत्तिरुच्यते। तद्विषयदर्शनाविवक्षयैवोत्पत्तिस्तुत्यर्था। नैवेह किंचनाग्र आसीत्। इह संसारमंडले किंचन किंचिदपि नामरूपप्रविभक्तविशेषं नैवासीत न बभूव। अग्रे प्रागुत्पत्तेर्मनआदेः ॥

किं शून्यमेव बभूव? शून्यमेव स्यात् नेहेव किंचन इति श्रुतेः। न कार्यकारणवासात् उत्पत्तेश्च। उत्पद्यते हि घटः। अतः प्रागुत्पत्तेर्घटस्य नास्तित्वम्। ननु कारणस्य न नास्तित्वं मृत्पिंडादिदर्शनात्। यन्नोपलभ्यते तस्यैव नास्तिता। अस्तु कार्यस्य न तु कारणस्य उपलभ्यमानत्वात्। न। प्रागुत्पत्तेः सर्वानुपलभात्। अनुपलब्धेश्चेदभावहेतुः सर्वस्य जगतः प्रागुत्पत्तेर्न कारणं कार्यं वोपलभ्यते। तस्मात्सर्वस्यैवाभावोऽस्तु। न 'मृत्युनैवेदमावृतमासीत्' इति श्रुतेः। यदि हि किंचिदपि नासात् येनावियते यच्चावियते तदा नावक्ष्यत् 'मृत्युनैवेदमावृत' इति। न हि भवति गगनकुसुमच्छन्नो वंध्यापुत्र इति। ब्रवीति च 'मृत्युनैवेदमावृतमासीत्' इति। तस्माद्येनावृत कारणेन, यच्चावृतं कार्यं, प्रागुत्पत्तेस्तदुभयमासीत श्रुतेः प्रामाण्यादनुमेयत्वाच्च। अनुमीयते च प्रागुत्पत्तेः कार्यकारणयोरस्तित्वम्। कार्यस्य हि सतो जायमानस्य कारणे सत्युत्पत्तिदर्शनात्, असति चादर्शनात्, जगतोऽपि प्रागुत्पत्तेः कारणास्तित्वमनुमीयते घटादिकारणास्तित्ववत्। घटादिकारणस्याप्यसत्त्वमेव अनुपमृद्य मृत्पिंडादिकं घटाद्यनुत्पत्तेरिति चेत्। न। मृदादेः कारणत्वात्। मृत्सुवर्णादि हि तत्र कारणं घटरुचकादेः, न पिंडाकारविशेषः। तदभावे भावात्। असत्यपि पिंडाकारविशेषे मृत्सुवर्णादिकारणद्रव्यमात्रादेव घटरुचकादिकार्योत्पत्तिर्दृश्यते। तस्मान्न पिंडाकारविशेषो घटरुचकादिकारणम्। असति तु मृत्सुवर्णादिद्रव्ये घटरुचकादिर्न जायत इति मृत्सुवर्णादिद्रव्यमेव कारणं, नतु पिंडाकारविशेषः। सर्वं हि कारणं कार्यमुत्पादयत्पूर्वोत्पन्नस्यात्मकार्यस्य तिरोधानं कुर्वत्कार्यान्तरमुत्पादयति। एकस्मिन्कारणे युगपदनेककार्यविरोधात्।

न च पूर्वकार्योपमर्दे कारणस्य स्वात्मोपमर्दो भवति । तस्मात्पिडाद्युपमर्दे कार्योत्पत्तिदर्शनमहेतु प्रागुत्पत्ते कारणासत्त्वे । पिडादिव्यतिरेकेण मृदादेरसत्त्वादयुक्तमिति चेत् । पिडादिपूर्वकार्योपमर्दे मृदादिकारण नोपमृद्यते, घटादिकार्यान्तरेऽप्यनुवर्तते, इत्येतदयुक्तम् । पिडघटादिव्यतिरेकेण मृदादिकारणस्यानुपलंभादिति चेत् । न । मृदादिकारणाना घटाद्युत्पत्तौ पिडादिनिवृत्तावनुवृत्तिदर्शनात् । सादृश्यादन्वयदर्शन न कारणानुवृत्तेरिति चेन्न । पिंडादिगताना मृदाद्यवयवानामेव घटादौ प्रत्यक्षत्वेऽनुमानाभासात्सादृश्यादिकल्पनानुपपत्ते । न च प्रत्यक्षानुमानयोर्विरुद्धा व्यभिचारिता । प्रत्यक्षपूर्वकत्वादनुमानस्य सर्वत्रैवानाश्वासप्रसंगात् । यदि च क्षणिकं सर्व तदेवेदमिति गम्यमानं तद्बुद्धेरप्यन्यद्बुद्धयपेक्षत्वे तस्या अप्यन्यतद्बुद्धयपेक्षत्वमित्यनवस्थाया तत्सदृशमिदमित्यस्या अपि बुद्धेर्मृषात्वात्सर्वत्रानाश्वासतैव । तदिदबुद्धयोरपि कर्त्रभावे सबधानुपपत्ति । सादृश्यात्तत्सबध इति चेन्न । तदिदबुद्ध्योरितरेतरविषयत्वानुपपत्ते । असति चेतरेतरविषयत्वे सादृश्यग्रहणानुपपत्ति । असत्येव सादृश्ये तद्बुद्धिरिति चेन्न । तदिदंबुद्ध्योरपि सादृश्यबुद्धिवदसद्विषयत्वप्रसगात् । असद्विषयत्वमेव सर्वबुद्धीनामास्तिवति चेन्न । बुद्धिबुद्धेरप्यसद्विषयत्वप्रसगात् । तदप्यस्तिवति चेन्न । सर्वबुद्धीना मृषात्वेऽसत्यबुद्ध्यनुपपत्ते । तस्मादसदेतत्सादृश्यात्तद्बुद्धिरिति । अतः सिद्ध प्राक्कार्योत्पत्ते कारणसद्भाव ॥

कार्यस्य चाभिव्यक्तिलिगत्वात् । कार्यस्य च सद्भाव प्रागुत्पत्ते सिद्ध । कथमभिव्यक्तिलिगत्वादभिव्यक्तिलिगमस्येति । आभिव्यक्ति साक्षाद्विज्ञानालबनत्वप्राप्ति । यद्धि लोके प्रावृत तमआदिना घटादिवस्तु तदालोकादिना प्रावरणातिरस्कारेण विज्ञानविषयत्व प्राप्नुवत्प्राक्सद्भाव न व्यभिचरति । तथेदमपि जगत्प्रागुत्पत्तेरित्यवगच्छाम । न ह्यविद्यमानो घट उदितेऽप्यादित्ये उपलभ्यते । न, तेऽविद्यमानत्वाभावादुपलभ्येतैवेति चेत् । न हि तव घटादिकार्य कदाचिदप्यविद्यमानमित्युदिते आदित्ये उपलभ्येतैव । मृत्पिडेऽसंनिहिते तमआद्यावरणे चासति विद्यमानत्वादिति चेत् । न । द्विविधत्वादावरणस्य । घटादिकार्यस्य द्विविधं ह्यावरणं, मृदादेरभिव्यक्तस्य तमःकुड्यादि प्राङ्मृदोऽभिव्यक्तेर्मृदाद्यवयवाना पिडादिकार्यान्तररूपेण संस्थानम् । तस्मात्प्रागुत्पत्तेर्विद्यमानस्यैव घटादिकार्यस्य आवृतत्वात् अनुपलब्धि । नष्टोत्पन्नभावाभावशब्दप्रत्ययभेदस्तु

अभिव्यक्तितिरोभावयोर्द्विविधत्वापेक्ष । पिंडकपालादेरावरणवैलक्षण्यादयुक्तमिति चेत् । तम कुड्यादि हि घटाद्यावरण घटादिभिन्नदेश दृष्ट, न तथा घटादिभिन्नदेशे दृष्टे पिंडकपाले । तस्मात्पिडकपालमस्थानयोर्विद्यमानस्यैव घटस्यावृतत्वात् अनुपलब्धिरित्ययुक्त आवरणधर्मवैलक्षण्यादिति चेत् । न । क्षारोदकादेक्षीराद्यावरणेनैकदेशत्वदर्शनात् । घटादिकार्य कपालचूर्णाद्यवयवाना अतर्भावादनावरणत्वमिति चेत् । न । विभक्ताना कार्यान्तरत्वादावरणत्वापपत्ते । आवरणाभावे एव यत्न कर्तव्य इति चेत् । पिडकपालावस्थयोर्विद्यमानमेव घटादिकार्यमावृतत्वान्नोपलभ्यत इति चेत् । घटादिकार्यार्थिना तदावरणविनाशे एव यत्न कर्तव्यो न घटाद्युत्पत्तौ । न चेतदस्ति । तस्मादयुक्त, विद्यमानस्यैवावृतत्वादनुपलब्धि इति चेत् । न । अनियमात् । न हि विनाशमात्रप्रयत्नादेव घटाद्यभिव्यक्तिनियता । तमआद्यावृते घटादौ प्रदीपाद्युत्पत्तौ प्रयत्नदर्शनात । सोऽपि तमोनाशायैवेति चेत् । दीपाद्युत्पत्तावपि य प्रयत्न सोऽपि तमास्तिरस्करणाय तस्मिन्नष्टे घट स्वयमेवोपलभ्यते । न हि घटे किचिदावार्यते इति चेत् । न । प्रकाशवतो घटस्योपलभ्यमानत्वात् । यथा प्रकाशविशिष्टो घट उपलभ्यते प्रदीपकरणे तथा प्राक्प्रदीपकरणात् । तस्मान्न तमास्तिरस्कारायैव प्रदीपकरण, कि तर्हि प्रकाशवत्त्वाय । प्रकाशवत्त्वेनैवोपलभ्यमानत्वात् । क्वचिदावरणविनाशेऽपि यत्न स्यात् । यथा कुड्यादिविनाशे । तस्मान्न नियमोऽस्त्यभिव्यक्त्यर्थिनावरणविनाश एव यत्न कार्य इति । नियमार्थवत्त्वाच्च । कारणे वर्तमान कार्य कार्यान्तराणामावरणमित्यवोचाम । तत्र यदि पूर्वाभिव्यक्तस्य कार्यस्य पिडस्य व्यवहितस्य वा कपालस्य विनाशे एव यत्न क्रियेत, तदा विदलचूर्णाद्यपि कार्य जायेत । तेनाप्यावृतो घटो नोपलभ्यत इति पुन प्रयत्नान्तरापेक्षैव । तस्मात् घटाद्यभिव्यक्त्यर्थिनो नियत एव कारकव्यापारोऽर्थवान् । तस्मात्प्रागुत्पत्तेरपि सदेव कार्यम् । अतीतानागतप्रत्ययभेदाच्च । अतीतो घटोऽनागतो घट इत्येतयोश्च प्रत्यययोर्वर्तमानघटप्रत्ययवन्न विविषयत्व युक्तम् । अनागतार्थिप्रवृत्तेश्च । न ह्यसत्यर्थितया प्रवृत्तिर्लोके दृष्टा । योगिना चातीतानागतज्ञानस्य सत्यत्वात् । असश्चेद्भविष्यद्घट ऐश्वर भविष्यद्घटविषयं प्रत्यक्षज्ञानं मिथ्या स्यात् । न च प्रत्यक्षमुपचर्यते । घटसद्भावे ह्यनुमानमवोचाम । विप्रतिषेधाच्च । यदि घटो भविष्यतीति कुलालादिषु व्याप्रियमाणेषु घटार्थं

प्रमाणेन निश्चित, येन च कालेन घटस्य संबंधो भविष्यतीत्युच्यते, तस्मिन्नेव काले घटोऽसन्निति विप्रतिषिद्धमभिधीयते । भविष्यन्घटोऽसन्निति, न भविष्यतीत्यर्थ । अय घटो न वर्तत इति यद्वत् । अथ प्रागुत्पत्तेर्घटोऽसन्नित्युच्येत, घटार्थं प्रवृत्तेषु कुलालादिषु तत्र यथा व्यापाररूपेण वर्तमानास्तावत्कुलालादय., तथा घटो न वर्तत इत्यसच्छब्दस्यार्थश्चेन्न विरुध्यते । कस्मात् । स्वेन हि भविष्यद्रूपेण घटो वर्तते । न हि पिंडस्य वर्तमानता कपालस्य वा घटस्य भवति । न च तयोर्भविष्यत्ता घटस्य । तस्मात्कुलालादिव्यापारवर्तमानताया प्रागुत्पत्तेर्घटोऽसन्निति न विरुध्यते । यदि घटस्य यस्त्वं भविष्यत्ताकार्यरूप तत्प्रतिषिध्येत, तत्प्रतिषेधे विरोध स्यात् । नतु तद्भवान्प्रतिषेधति । न च सर्वेषा क्रियावतामेकैव वर्तमानता भविष्यत्त्व वा । अपिच चतुर्विधानामभावाना घटस्येतरेतराभावो घटादन्यो द्रष्टो, यथा घटाभाव पटादिरेव न घटस्वरूपमेव । न च घटाभाव सन्पटोऽभावात्मक , कि तर्हि भावरूप एव । एव घटस्य प्राक्प्रध्वसात्यताभावानामपि घटादन्यत्व स्यात् । घटेन व्यपदिश्यमानत्वात् घटस्येतरेतराभाववत् । तथैव भावात्मकताऽभावानाम् । एव च सति घटस्य प्रागभाव इति न घटस्वरूपमेव प्रागुत्पत्तेर्नास्ति । अथ घटस्य प्रागभाव इति घटस्य यत्स्वरूप तदेवाच्येत । घटस्येतिव्यपदेशानुपपत्ति । अथ कल्पयित्वा व्यपदिश्येत शिलापुत्रकस्य शरीरमिति यद्वत् । तथापि घटस्य प्रागभाव इति कल्पितस्यैवाभावस्य घटेन व्यपदेशो, न घटस्वरूपस्यैव । अथार्थान्तर घटात् घटस्याभाव इति, उक्तोत्तरमेतत् । किंचान्यत्प्रागुत्पत्ते शशविषाणवदभावभूतस्य घटस्य स्वकारणसत्तासंबधानुपपत्ति । द्विनिष्ठत्वात्सबधस्य । अयुतसिद्धानामदोष इति चेत् । न । भावाभावयोरयुतसिद्धत्वानुपपत्ते । भावभूतयोर्हि युतसिद्धताऽयुतसिद्धता वा स्यान्न तु भावाभावयोरभावयोर्वा । तस्मात्सदेव कार्यं प्रागुत्पत्तेरिति सिद्धम् ॥

किंलक्षणेन मृत्युनाऽऽवृतमित्यत आह— अशनायया अशितुमिच्छा अशनाया सैव मृत्योर्लक्षणं तया लक्षितेन मृत्युनाऽशनायया । कथमशनाया मृत्युरिति । उच्यते— अशनाया हि मृत्यु । हिशब्देन प्रसिद्धं हेतुमवद्योतयति । यो ह्यशितुमिच्छति सोऽशनायानन्तरमेव हन्ति जतून् । तेनासावशनायया लक्ष्यते मृत्युरित्यशनाया हीत्याह । बुद्ध्यात्मनाऽशनाया धर्म इति स एष

बुद्ध्यवस्थो हिरण्यगर्भो मृत्युरित्युच्यते । तेन मृत्युनेदं कार्यमावृतमासीत् । यथा पिंडावस्थया मृदा घटादय आवृता स्युरिति तद्वत् । तन्मनोऽकुरुत । तदिति मनसो निर्देश । स प्रकृतो मृत्युर्वक्ष्यमाणकार्यसिसृक्षया तत्कार्यालोचनक्षम मन शब्दवाच्य संकल्पादिलक्षणमत करणमकुरुत कृतवान् । केनाभिप्रायेण मनोऽकरोदिति उच्यते— आत्मन्वी आत्मवान्स्या भवेयम् । अहमनेनात्मना मनसा मनस्वी स्यामित्यभिप्राय । स प्रजापतिरभिव्यक्तेन मनसा समनस्क सन्नर्चन्नर्चयन्पूजयन् आत्मानमेव कृतार्थोऽस्मीत्यचरच्चरणमकरोत् । तस्य प्रजापतेरर्चत पूजयत आपो रसात्मिका पूजागभूता अजायन्तोत्पन्ना । अत्राकाशप्रभृतीना त्रयाणामुत्पत्त्यनंतरमिति वक्तव्यं, श्रुत्यतरसामर्थ्याद्विकल्पासभवाच्च सृष्टिक्रमस्य । अर्चते पूजा कुर्वते वै मे मह्य कमुदकमभूदित्येवमन्यत यस्मान्मृत्यु , तदेव तस्मादेव हेतोरर्कस्य अग्नेरश्वमेधकर्त्वोपयोगिकस्यार्कत्व अर्कत्वे हेतुरित्यर्थ । अग्नेरर्कनामनिर्वचनमेतत् । अर्चनात्सुखहेतुपूजाकरणात् अर्सबधाच्च अग्नेरेतद्रौण नामार्क इति । य एव यथोक्तमर्कस्यार्कत्व वेद जानाति । कमुदक सुख वा नामसामान्यात् । ह वा इत्यवधारणार्थौ । भवत्येवेति । अस्मा एवंविदे एवंविदर्थ भवति ॥

आपो वा अर्कस्तद्यदपा शर आसीत्तत्समहन्यत । सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्तताग्निः ॥२॥

आपो वा अर्क । क पुनरसावर्क इति । उच्यते— आपो वै या अर्चनागभूतास्ता एवार्कोऽग्नेरर्कस्य हेतुत्वात् । अप्सु चाग्नि प्रतिष्ठित इति । न पुन साक्षादेवार्कस्ता , तासामप्रकरणात् । अग्नेश्च प्रकरणम् । वक्ष्यति च 'अयमग्निरर्क' इति । तत्तत्र यदपा शर इव शरो दग्ध इव मंडभूतमासीत्तत्समहन्यत सघातमापद्यत तेजसा बाह्यान्त पच्यमान, लिंगव्यत्ययेन वा योऽपा शर स समहन्यतेति । सा पृथिव्यभवत्स संघातो येयं पृथिवी साभवत् । ताभ्योऽद्भ्यो अंडमभिनिर्वृत्तमित्यर्थ । तस्या पृथिव्यामुत्पादिताया स मृत्यु प्रजापतिरश्राम्यच्छ्रमयुक्तो बभूव । सर्वो हि लोक कार्य कृत्वा श्राम्यति । प्रजापतेश्च तन्महत्कार्यं यत्पृथिवीसर्ग । किं तस्य श्रान्तस्येत्युच्यते— तस्य श्रान्तस्य तप्तस्य खिन्नस्य तेजोरसस्तेज एव रसस्तेजोरसो, रसः सारो, निरवर्तत प्रजापतिशरीरान्निष्क्रात इत्यर्थ । कोऽसौ निष्क्रात' । अग्नि सोऽण्डस्या-

न्तर्विराटप्रजापति प्रथमज कार्यकरणसघातवान जात । "स वै शरीरी प्रथम " इति स्मरणात् ॥

स त्रेधात्मान व्यकुरुतादित्य तृतीय वायु तृतीय स एष प्राणस्त्रेधा विहित । तस्य प्राची दिक्शिरोऽसौ चासौ चेमौ । अथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्व द्यौ पृष्ठमतरिक्षमुदरमियमुर. स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येव विद्वान् ॥३॥

स च जात प्रजापतिस्त्रेधा त्रिप्रकारमात्मान स्वयमेव कार्यकरणसंघातं व्यकुरुत व्यभजदित्येतत् । कथ त्रेधेत्याह— आदित्य तृतायमग्निवाग्व्यपेक्षया त्रयाणा पूरण अकुरुतेत्यनुवर्तते । तथाग्न्यादित्यापेक्षया वायु तृतीयम् । तथा वाग्वादित्यापेक्षयाग्नि तृतीयामिति द्रष्टव्यम् । सामर्थ्यस्य तुल्यत्वान्त्रयाणा सख्यापूरणत्वे । स एष प्राण सर्वभूतानामात्मापि अग्निवाग्वादित्यरूपेण विशेषत स्वेनैव मृत्यवात्मना त्रेधा विहितो विभक्तो न विराटस्वरूपोपमर्दनेन । तस्यास्य प्रथमजस्य अग्ने अश्वमेधोपयोगिकस्यार्कस्य विराजश्चित्यात्मकस्य अश्वस्येव दर्शनमुच्यते । सर्वा हि पूर्वोक्तोत्पत्तिरस्य स्तुत्यर्थत्वोचाम— इत्थमसौ शुद्धजन्मेति । तस्य प्राची दिक्शिरो विशिष्टत्वसामान्यात् । असौ चासौ चैशान्याग्नेय्यौ ईमौ बाहू । ईरयतेर्गतिकर्मण । अथास्याग्ने प्रतीची दिक्पुच्छ जघन्यो भाग. । प्राङ्मुखस्य प्रत्यग्दिक्सबधात् । असौ चासौ च वायव्यनर्क्रत्यौ सक्थ्यौ सक्थिनी पृष्ठकोणत्वसामान्यात् । दक्षिणा चोदीची च पार्श्वे उभयदिक्संबंधसामान्यात् । द्यौ पृष्ठमंतरिक्षमुदरमिति पूर्ववत् । इयमुर अधोभागसामान्यात् । स एषोऽग्नि प्रजापतिरूपो लोकात्मकोऽग्निरप्सु प्रतिष्ठित । 'एवमिमे लोका अन्वखत' इति श्रुते । यत्र क्व च यस्मिन्कस्मिश्चिदेति गच्छति तदेव तत्रैव प्रतितिष्ठति स्थिति लभते । कोऽसौ? एवं यथोक्तमप्सु प्रतिष्ठितत्वमग्नेर्विद्वान्विजानन् । गुणफलमेतत् ॥

सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुनं समभवदशनाया मृत्युस्तद्रेत आसीत्स सवत्सरोऽभवत् । न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभ । यावान्सवत्सरस्तमेतावतः कालस्य परस्तादसृजत । तं जातमभिव्याददात्स भाणकरोत्सैव वागभवत् ॥४॥

सोऽकामयत योऽसौ मृत्यु सोऽबादिक्रमेणात्मनात्मानं अडस्यात कार्यकरणसंघातवन्त विराजमग्निमसृजत, त्रेधा चात्मानमकुरुतेत्युक्तम्। स किव्यापार सन्नसृजेतेति। उच्यते— स मृत्युरकामयत कामितवान्। किम्। द्वितीयो मे ममात्मा शरीर येनाह शरीरी स्या स जायेतोत्पद्येत इत्येवमेतदकामयत। स एवं कामयित्वा, मनसा पूर्वोत्पन्नेन वाच त्रयीलक्षणा मिथुनं द्वंद्वभाव समभवत्सभवनं कृतवान्मनसा त्रयीमालोचितवान्। त्रयीविहित सृष्टिक्रमं मनसान्वालोचयदित्यर्थ। कोऽसौ? अशनायया लक्षितो मृत्यु। अशनाया मृत्युरित्युक्तम्। तमेव परामृशत्यन्यत्र प्रसगो मा भूदिति। तद्वेत आसीत्। तत्तत्र मिथुने यद्रेत आसीत्प्रथमशरीरिण प्रजापतेरुत्पत्तौ कारणं रेतो बीज ज्ञानकर्मरूप त्रय्यालोचनाया यत् दृष्टवानासीज्जन्मातरकृतम्। तद्भावभावितोऽप सृष्ट्वा तेन रेतसा बीजेनात्मनुप्राविश्य अंडरूपेण गर्भीभूत स सवत्सरोऽभवत्संवत्सरकालनिर्माता सवत्सर प्रजापतिरभवत्। न ह पुरा पूर्व ततस्तस्मात्सवत्सरकालनिर्मातु प्रजापते, सवत्सर कालो नाम, नास न बभूव ह। त सवत्सरकालनिर्मातारमतर्गर्भ प्रजापति यावानिह प्रसिद्ध काल एतावन्तमेतावत्सवत्सरपरिमाण कालमबिभ भृतवान्मृत्यु। यावान्सवत्सर इह प्रसिद्धस्तत परस्तात्किं कृतवान्। तमेतावत कालस्य सवत्सरमात्रस्य परस्तादूर्वमसृजत सृष्ट्वानडमभिनदित्यर्थ। तमेवं कुमारं जातमग्नि प्रथमशरीरिणमशनायावत्त्वान्मृत्यु अभिव्याददान्मुखविदारण कृतवानत्तुम्। स च कुमारो भीत स्वाभाविक्याऽविद्यया युक्तो भाणित्येवं शब्दमकरोत्। सैव वागभवद्वाक्शब्दोऽभवत्॥

स ऐक्षत यदि वा इममभिमस्ये कनीयोऽन्न करिष्य इति स तया वाचा तेनात्मनेद सर्वमसृजत यदिद किंचर्चो यजूषि सामानि छदांसि यज्ञान्प्रजाः पशून्। स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्व वा अत्तीति तददितेरदितित्व सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद॥५॥

स ऐक्षत, स एवं भीतं कृतरव कुमारं दृष्ट्वा मृत्युरैक्षतेक्षितवान् अशनायावानपि—यदि कदाचिद्वा इमं कुमारमभिमंस्ये। अभिपूर्वो मन्यतिर्हिंसार्थ। हिंसिष्य इत्यर्थ। कनीयोऽन्न करिष्ये कनीयोऽल्पमन्नं करिष्य इति। एवमी-

क्षित्वा तद्भक्षणादुपरराम । बहु ह्यन्नं कर्तव्य दीर्घकालभक्षणाय न कनीय । तद्भक्षणे हि कनीयोऽन्न स्याद्बीजभक्षण इव सस्याभाव । स एवप्रयोजनमन्नबाहुल्यमालोच्य तयैव त्रय्या वाचा पूर्वोक्तया तेनैव चात्मना मनसा मिथुनीभावमालोचनमुपगम्योपगम्येद सर्व स्थावर जगम चासृजत यदिदं किंच यत्किंचेदम् । कि तत् । ऋचो यजूंषि सामानि च्छंदासि च सप्त गायत्र्यादीनि स्तोत्रशस्त्रादिकर्मांगभूतान्त्रिविधान्मन्त्रान्गायत्र्यादिच्छंदोविशिष्टान्यज्ञाश्च तत्साध्यान्प्रजास्तत्कर्त्री पशूंश्च ग्राम्यानारण्यान्कर्मसाधनभूतान् । ननु त्रय्या मिथुनीभूतयाऽसृजतेत्युक्त, ऋगादीनाह कथमसृजतेति । नैष दोष । मनसस्त्वव्यक्तोऽय मिथुनीभावस्त्रय्या, बाह्यस्तु ऋगादीना विद्यमानानामेव कर्मसु विनियोगभावेन व्यक्तीभाव सर्ग इति । स प्रजापतिरेवमन्नवृद्धि बुद्धा यद्यदेव क्रिया क्रियासाधनं फलं वा किंचिदसृजत तत्तदत्तु भक्षयितुमाप्रियत धृतवान्मन । सर्वं कृत्स्न वै यस्मादत्तीति तत्तस्माददितेरदितिनाम्नो मृत्योरदितित्व प्रसिद्धम् । तथाच मन्त्र "अदितिद्यौरदितिरन्तरिक्षमदितिर्माता स पिता" इत्यादि । सर्वस्यैतस्य जगतोऽन्नभूतस्यात्ता सर्वात्मनैव भवत्यन्यथा विरोधात् । न हि कश्चित्सर्वस्यैकोऽत्ता दृश्यते तस्मात्सर्वात्मा भवतीत्यर्थ । सर्वमस्यान्न भवति अत एव सर्वात्मनो ह्यत्तु सर्वमन्न भवतात्युपपद्यते । य एवमेतद्यथोक्तमदितेर्मृत्यो प्रजापते सर्वस्य अदनाददितित्व वेद तस्यैतत्फलम् ॥

सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति । सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रांतस्य तप्तस्य यशो वीर्यमुदक्रामत् । प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रांतेषु शरीर श्वयितुमाध्रियत तस्य शरीर एव मन आसात् ॥६॥

सोऽकामयतेत्यश्वाश्वमेधयो निर्वचनार्थमिदमाह । भूयसा महता यज्ञेन भूय पुनरपि यजेयेति । जन्मातरकरणापेक्षया भूय शब्द । स प्रजापति जन्मातरेऽश्वमेधेनायजत । स तद्भावभावित एव कल्पादौ व्यावर्तत । सोऽश्वमेधक्रियाकारकफलात्मत्वेन निर्वृत्त सन्नकामयत भूयसा यज्ञेन भूयो यजेयेति । एव महत्कार्य कामयित्वा लोकवदश्राम्यत् । स तपोऽतप्यत । तस्य श्रान्तस्य तप्तस्येति पूर्ववत् । यशो वीर्यमुदक्रामदिति स्वयमेव पदार्थमाह— प्राणाश्चक्षुरादयो वै यशो, यशोहेतुत्वात् तेषु हि सत्सु ख्यातिर्भवति । तथा वीर्यं बलमस्मिञ्शरीरे । न ह्युत्क्रान्तप्राणो यशस्वी बलवान्वा

भवति । तस्मात्प्राणा एव यशो वीर्यं चास्मिञ्शरीरे । तदेवं प्राणलक्षण यशो वीर्यमुदक्रामदुत्क्रान्तवत् । तदेव यशोवीर्यभूत प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीर प्रजापते श्वयितुमुच्छूनभावं गंतुमध्रियतामेध्य चाभवत् । तस्य प्रजापते शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत् । यथा कस्यचित्प्रिये विषये दूर गतस्यापि मनो भवति तद्वत् ॥

सोऽकामयत मेध्य म इद स्यादात्मन्यनेन स्यामिति । ततोऽश्व समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् । एष ह वा अश्वमेध वेद य एनमेवं वेद । तमनवरुध्यैवामन्यत । त सवत्सरस्य परस्तादात्मन आलभत । पशून्देवताभ्य प्रत्यौहत् । तस्मात्सर्वदेवत्य प्रोक्षितं प्राजापत्यमालभन्ते । एष ह वा अश्वमेधो य एष तपति तस्य सवत्सर आत्मायमग्निरर्कस्तस्येमे लोका आत्मानस्तावेतावर्काश्वमेधौ । सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्यु जयति नैन मृत्युराप्नोति मृत्युरस्यात्मा भवत्येतासा देवतानामेको भवति ॥७॥ इति द्वितीय ब्राह्मणम् ॥

स तस्मिन्नेव शरीरे गतमना सन्किमकरोदिति उच्यते— सोऽकामयत, कथ, मेध्य मेधार्हं यज्ञियं मे ममेद शरीर स्यात् । किंच आत्मन्यात्मवाश्वानेन शरीरेण शरीरवान्स्यामिति, प्रविवेश । यस्मात्तच्छरीर तद्वियोगाद्गतयशोवीर्य सदश्वदश्वयत् ततस्तस्मादश्व समभवत् । ततोऽश्वनामा प्रजापतिरेव साक्षादिति स्तूयते । यस्माच्च पुनस्तत्प्रवेशाद्गतयशोवीर्यत्वादमेध्यं सन्मेध्यमभूत्तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्न क्रतोरश्वमेधत्वं अश्वमेधनामलाभ । क्रियाकारकफलात्मको हि क्रतु । स च प्रजापतिरेवेति स्तूयते ॥

क्रतुनिर्वर्तकस्याश्वस्य प्रजापतित्वमुक्त 'उषा वा अश्वस्य मेध्यस्य' इत्यादिना । तस्यैवाश्वस्य मेध्यस्य प्रजापतिस्वरूपम्याग्नेश्च यथोक्तस्य क्रतुफलात्मरूपतया समस्योपासन विधातव्यमित्यारभ्यते । पूर्वत्र क्रियापदस्य विधायकस्याश्रुतत्वात् क्रियापदापेक्षत्वाच्च प्रकरणस्य अयमर्थोऽवगम्यते । **एष ह वा अश्वमेधं क्रतुं वेद य एनमेव वेद, य कश्चिदेनमश्वमग्निरूपमर्कं च यथोक्तमेव वक्ष्यमाणेन समासेन प्रदर्श्यमानेन विशेषणेन विशिष्टं वेद, स एषोऽश्वमेधं वेद नान्य । तस्मादेवं वेदितव्य इत्यर्थ । कथं, तत्र पशुविषयमेव तावद्दर्शनमाह । तत्र प्रजापतिर्भूयसा यज्ञेन भूयो यजेयेति कामयित्वा आत्मानमेव पशुं मेध्य**

कल्पयित्वा त पशु अनवरुध्यैवोत्सृष्ट पशुमवरोधमकृत्वैव मुक्तप्रग्रहममन्यताचितयत् । त सवत्सरस्य पूर्णस्य परस्तादूर्ध्वमात्मने आत्मार्थमालभत । प्रजापतिर्देवताकल्पेनेत्येतत् आलभतालभ कृतवान् । पशूनन्यान्ग्राम्यानारण्याश्च देवताभ्यो यथादैवत प्रत्यौहत्प्रतिगमितवान् । यस्माच्चैव प्रजापतिरमन्यत तस्मादेवमन्योऽप्युक्तेन विधिनात्मान पशुमश्वं मेध्य कल्पयित्वा— सर्वदेवत्योऽहं प्रोक्ष्यमाण आलभ्यमानस्त्वहं मद्देवत्य एव स्याम्, अन्य इतरे पशवो ग्राम्यारण्या यथादैवतमन्याभ्यो देवताभ्य आलभ्यन्ते मदवयवभूताभ्य एव— इति विद्यात् । अत एवेदानीं सर्वदेवत्य प्रोक्षित प्राजापत्यमालभन्ते याज्ञिका । एवमेष ह वा अश्वमेधो य एष तपति । यस्त्वेव पशुसाधनक क्रतु स एष साक्षात्फलभूतो निर्दिश्यत एष ह वा अश्वमेध । कोऽसौ । य एष सविता तपति जगदवभासयति तेजसा । तस्यास्य क्रतुफलात्मन सवत्सर कालविशेष, आत्मा शरीरं तन्निर्वर्त्यत्वात्सवत्सरस्य । तस्यैव क्रत्वात्मन । अग्निसाध्यत्वाच्च फलस्य क्रतुत्वरूपेणैव निर्देश । अय पार्थिवोऽग्निरर्क साधनभूत । तस्य चार्कस्य क्रतौ चित्यस्येमे लोकास्त्रयोऽप्यात्मान शरीरावयवा । तथाच व्याख्यात 'तस्य प्राची दिक्' इत्यादिना । तावग्न्यादित्यावेतौ यथाविशेषितावर्काश्वमेधौ क्रतुफले । अर्को य पार्थिवोऽग्नि स साक्षात्क्रतुरूप क्रियात्मक । क्रतोरग्निसाध्यत्वात्तद्रूपेणैव निर्देश । क्रतुसाध्यत्वाच्च फलस्य क्रतुरूपेणैव निर्देश आदित्योऽश्वमेध इति । तौ साध्यसाधनौ क्रतुफलभूतावग्न्यादित्यौ, सा उ पुनर्भूय एकैव देवता भवति । का सा, मृत्युरेव । पूर्वमग्नेयैकैवासीत्क्रियासाधनफलभेदाय विभक्ता । तथा चोक्तम् 'स त्रेधात्मानं व्यकुरुत' इति । सा पुनरपि क्रियानिर्वृत्त्युत्तरकालमेकैव देवता भवति मृत्युरेव फलरूप । य पुनरेवमेनमश्वमेधं मृत्युमेका देवता वेद अहमेव मृत्युरस्म्यश्वमेध एका देवता मद्रूपा अश्वाग्निसाधनसाध्येति । सोऽपजयति पुनर्मृत्यु पुनर्मरणं, सकृन्मृत्वा पुनर्मरणाय न जायत इत्यर्थ । अपजितोऽपि मृत्युरेनं पुनराप्नुयादित्याशंक्याह— नैनं मृत्युराप्नोति । कस्मात् मृत्युरस्यैवंविद आत्मा भवति । किच मृत्युरेव फलरूप सन्नेतासा देवतानामेको भवति । तस्यैतत्फलम् ॥ इति द्वितीयं ब्राह्मणम् ॥ १२.—

द्वया हेत्याद्यस्य क संबंध कर्मणां ज्ञानसहितानां परा गतिरुक्ता ।

मृत्व्वात्मभावोऽश्वमेधगत्युक्त्या । अथेदानीं मृत्व्वात्मभावसाधनभूतयो कर्मज्ञानयोर्यत उद्भव तत्प्रकाशनार्थमुद्गीथब्राह्मणमारभ्यते ॥

ननु मृत्व्वात्मभाव. पूर्वत्र ज्ञानकर्मणो फलमुक्तम् । उद्गीथज्ञानकर्मणोस्तु मृत्व्वात्मभावातिक्रमण फल वक्ष्यति । अतो भिन्नविषयत्वात्फलस्य न पूर्वकर्मज्ञानोद्भवप्रकाशनार्थमिति चेत् । नायं दोष । अग्न्यादित्यात्मभावत्वादुद्गीथफलस्य । पूर्वत्राप्येतदेव फलमुक्त 'एतासा देवतानामेको भवति' इति । ननु 'मृत्युमतिक्रान्त' इत्यादि विरुद्धम् । न । स्वाभाविकपाप्मासंगविषयत्वादतिक्रमणस्य । कोऽसौ स्वाभाविक पाप्मासंगो मृत्यु ? कुतो वा तस्योद्भव ? केन वा तस्यातिक्रमणम् ? कथ वा ? इत्येतस्यार्थस्य प्रकाशनायाख्यायिकारभ्यते । कथम्—

द्वया ह प्राजापत्या देवाश्चासुराश्च । तत कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥

द्वया द्विप्रकारा । हेति पूर्ववृत्तावद्योतको निपात । वर्तमानप्रजापते पूर्वजन्मनि यत् वृत्त तदवद्योतयति हशब्देन । प्राजापत्या प्रजापतेर्वृत्तजन्मावस्थस्यापत्यानि प्राजापत्या । के ते । दवाश्चासुराश्च । तस्यैव प्रजापते प्राणा वागादय । कथ पुनस्तेषा देवासुरत्वम् । उच्यते— शास्त्रजनितज्ञानकर्मभाविता द्योतनाद्देवा भवन्ति । त एव स्वाभाविकप्रत्यक्षानुमानजनितदृष्टप्रयोजनकर्मज्ञानभाविता असुरा. । स्वेष्वेवासुषु रमणात् सुरेभ्यो वा देवेभ्योऽन्यत्वात् । यस्माच्च दृष्टप्रयोजनज्ञानकर्मभाविता असुरा , ततस्तस्मात्कानीयसा , कनीयास एव कानीयसा , स्वार्थेऽपि वृद्धि । कनीयासोऽल्पा एव देवा । ज्यायसा असुरा ज्यायासोऽसुरा । स्वाभाविकी हि कर्मज्ञानप्रवृत्तिर्महत्तरा प्राणाना शास्त्रजनिताया कर्मज्ञानप्रवृत्ते । दृष्टप्रयोजनत्वात् । अत एव कनीयस्त्वं देवाना शास्त्रजनितप्रवृत्तेरल्पत्वात् । अत्यंतयत्नसाध्या हि सा । ते देवाश्चासुराश्च प्रजापतिशरीरस्था एषु लोकेषु निमित्तभूतेषु स्वाभाविकेतरकर्मज्ञानसाध्येषु अस्पर्धन्त स्पर्धां कृतवन्त । देवाना चासुराणा च वृत्युद्भवाभिभवौ स्पर्धा । कदाचिच्छास्त्रजनितकर्मज्ञानभावनारूपा वृत्ति प्राणानामुद्भवति । यदा चोद्भवति तदा दृष्टप्रयोजना प्रत्यक्षानुमानजनितकर्मज्ञानभावनारूपा तेषामेव प्राणाना वृत्तिरासुर्यभिभूयते ।

स देवाना जयोऽसुराणा पराजय । कदाचित्तद्विपर्ययेण देवाना वृत्तिरभिभूयत, आसुर्या उद्भव । सोऽसुराणा जयो देवाना पराजय । एवं देवाना जये धर्मभूयस्त्वादुत्कर्ष आ प्रजापतित्वप्राप्ते । असुरजयेऽधर्मभूयस्त्वादपकर्ष आ स्थावरत्वप्राप्ते । उभयसाम्ये मनुष्यत्वप्राप्ति । त एव कनीयस्त्वादभिभूयमाना असुरैर्देवा बाहुल्यादसुराणा किं कृतवन्त इत्युच्यते— ते देवा असुरैरभिभूयमाना ह किलोचुरुक्तवन्त । कथम् । हन्तेदानीं अस्मिन्यज्ञे ज्योतिष्टोमे, उद्गीथनोद्गीथकर्मपदार्थकर्तृस्वरूपाश्रयणेन अत्ययामातिगच्छाम । असुरानभिभूय स्व देवभाव शास्त्रप्रकाशित प्रतिपद्यामह इत्युक्तवन्तोऽन्योन्यम् । उद्गीथ कर्मपदार्थकर्तृस्वरूपाश्रयणं च ज्ञानकर्मभ्याम् । कर्म वक्ष्यमाण मंत्रजपलक्षणं विधित्स्यमान "तदेतानि जपेत्' इति । ज्ञान त्विदमेव निरूप्यमाणम् ॥

ननु इदमभ्यारोहजपविधिशेषोऽर्थवादो, न ज्ञाननिरूपणपरम् । न । 'य एव वेद' इति वचनात् । उद्गीथप्रस्तावे पुराकल्पश्रवणादुद्गीथविधिपरामिति चेत् । न । अप्रकरणात् । उद्गीथस्य चान्यत्र विहितत्वात् । विद्याप्रकरणत्वाच्चास्य । अभ्यारोहजपस्य चानित्यत्वात् । एवंविद्प्रयोज्यत्वात् । विज्ञानस्य च नित्यवच्छ्रवणात् । 'तद्धैतल्लोकजिदेव' इति च श्रुते । प्राणस्य वागादीना च शुद्धयशुद्धिवचनात् । न ह्युपास्यत्वे प्राणस्य शुद्धिवचन वागादीना च सहोपन्यस्तानामशुद्धिवचन, वागादिनिदया मुख्यप्राणस्तुतिश्चाभिप्रेता उपपद्यते । 'मृत्युमतिक्रान्तो दीप्यते' इत्यादि फलवचनं च । प्राणस्वरूपापत्तेर्हि फलं तद्यद्वागाद्यन्यादिभाव ॥

भवतु नाम प्राणस्योपासनं, न तु विशुद्ध्यादिगुणवत्तेति । ननु स्यात् श्रुतत्वात् । न स्यादुपास्यत्वे स्तुत्यर्थत्वोपपत्ते । न । अविपरीतार्थप्रतिपत्ते श्रेय प्राप्त्युपपत्तेर्लोकवत् । यो ह्यविपरीतमर्थ प्रतिपद्यते लोके स इष्टं प्राप्नोत्यनिष्टाद्वा निवर्तते, न विपरीतार्थप्रतिपत्त्या । तथेहापि श्रौतशब्दजनितार्थप्रतिपत्तौ श्रेय प्राप्तिरुपपन्ना न विपर्यये । न चोपासनार्थश्रुतशब्दोत्थविज्ञानविषयस्य अयथार्थत्वे प्रमाणमस्ति । न च तद्विज्ञानस्यापवाद श्रूयते । तत श्रेय प्राप्तिदर्शनाद्यथार्थता प्रतिपद्यामहे । विपर्यये चानर्थप्राप्तिदर्शनात् । यो हि विपर्ययेणार्थं प्रतिपद्यते लोके, पुरुषं स्थाणुरित्यामित्रं मित्रमिति वा, सोऽनर्थं प्राप्नुवन्दृश्यते । आत्मेश्वरदेवतादीनामपि अयथार्थानामेव चेत् ग्रहणं श्रुतित ,

अनर्थप्राप्त्यर्थं शास्त्रमिति ध्रुवं प्राप्नुयाल्लोकवदेव, न चैतदिष्टम् । तस्माद्यथाभूतानेव आत्मेश्वरदेवतादीन् ग्राहयत्युपासनार्थं शास्त्रम् । नामादौ ब्रह्मदृष्टिदर्शनादयुक्तमिति चेत्स्फुटं नामादेरब्रह्मत्वं, तत्र ब्रह्मदृष्टिं स्थाण्वादाविव पुरुषदृष्टिं विपरीता ग्राहयच्छास्त्रं दृश्यते । तस्माद्यथार्थमेव शास्त्रत प्रतिपत्ते श्रेय इत्ययुक्तमिति चेत् । न । प्रतिमावद्भेदप्रतिपत्ते । नामादौ अब्रह्मणि ब्रह्मदृष्टिं विपरीता ग्राहयति शास्त्रं स्थाण्वादाविव पुरुषदृष्टि, इति नैतत्साध्ववोच । कस्मात् । भेदेन हि ब्रह्मणो नामादिवस्तुप्रतिपन्नस्य नामादौ विधीयते ब्रह्मदृष्टि , प्रतिमादाविव विष्णुदृष्टि । आलंबनत्वेन हि नामादिप्रतिपत्ति प्रतिमादिवदेव, न तु नामाद्येव ब्रह्मेति । यथा स्थाणावनिर्ज्ञाते न स्थाणुरिति, पुरुष एवायमिति प्रतिपद्यते विपरीतम्, न तु तथा नामादौ ब्रह्मदृष्टिर्विपरीता । ब्रह्मदृष्टिरेव केवला नास्ति ब्रह्मेति चेत् । एतेन प्रतिमाब्राह्मणादिषु विष्ण्वादिदेवपित्रादिदृष्टीना तुल्यता । न । ऋगादिषु पृथिव्यादिदृष्टिदर्शनात् । विद्यमानपृथिव्यादिवस्तुदृष्टीनामेव ऋगादिविषये क्षेपदर्शनात् । तस्मात्तत्सामान्यान्नामादिषु ब्रह्मादिदृष्टीना विद्यमानब्रह्मादिविषयत्वसिद्धि ॥

एतेन प्रतिमाब्राह्मणादिषु विष्ण्वादिदेवपित्रादिबुद्धीना च सत्यवस्तुविषयत्वसिद्धि । मुख्यापेक्षत्वाच्च गौणत्वस्य । पंचाग्न्यादिषु चाग्नित्वादेर्गौणत्वात् मुख्याग्न्यादिसद्भाववन्नामादिषु ब्रह्मत्वस्य गौणत्वान्मुख्यब्रह्मसद्भावोपपत्ति ॥

क्रियार्थैश्चाविशेषाद्विद्यार्थानाम् । यथा च दर्शपौर्णमासादिक्रियेदफला विशिष्टेतिकर्तव्यताका एवक्रमप्रयुक्तागा च इत्येतदलौकिकं वस्तु प्रत्यक्षाद्यविषयं तथाभूतं च वेदवाक्यैरेव ज्ञाप्यते । तथा, परमात्मेश्वरदेवतादिवस्तु अस्थूलादिधर्मकमशनायाद्यतीतं चेत्येवमादिविशिष्टमिति वेदवाक्यैरेव ज्ञाप्यते, इत्यलौकिकत्वात्तथाभूतमेव भावितुमर्हतीति । न च क्रियार्थैर्वाक्यैर्ज्ञानवाक्यानां बुद्धयुत्पादकत्वे विशेषोऽस्ति । न चानिश्चिता विपर्यस्ता वा परमात्मादिवस्तुविषया बुद्धिरुत्पद्यते । अनुष्ठेयाभावादयुक्तमिति चेत् क्रियार्थैर्वाक्यैस्त्र्यशा भावनानुष्ठेया ज्ञाप्यतेऽलौकिक्यपि । न तथा परमात्मेश्वरादिविज्ञानेऽनुष्ठेयं किंचिदस्ति । अत क्रियार्थै साधर्म्यमित्ययुक्तामिति चेत् । न । ज्ञानस्य तथाभूतार्थविषयत्वात् । न ह्यनुष्ठेयस्य त्र्यंशस्य भावनाख्यस्यानुष्ठेयत्वात् तथात्वं,

कि तर्हि प्रमाणसमधिगतत्वात् । न च तद्विषयाया बुद्धे अनुष्ठेयविषयत्वात्तथार्थत्वं, कि तर्हि, वेदवाक्यजनितत्वादेव । वेदवाक्याधिगतस्य वस्तुनस्तथात्वे सत्यनुष्ठेयत्वविशिष्ट चेदनुतिष्ठति । नो चेदनुष्ठेयत्वविशिष्ट नानुतिष्ठति । अननुष्ठेयत्वे वाक्यप्रमाणत्वानुपपत्तिरिति चेत् । न ह्यनुष्ठेयेऽसति पदाना सहतिरुपपद्यते । अनुष्ठेयत्वे तु सति तादर्थ्येन पदानि संहन्यन्ते । तत्रानुष्ठेयनिष्ठं वाक्य प्रमाण भवति इदमनेनैव कर्तव्यमिति । न त्विदमनेनैवमित्येवंप्रकाराणा पदशतानामपि वाक्यत्वमस्ति । "कुर्याक्रियेत कर्तव्य भवेत्स्यादिति पंचमम्" इत्येवमादीनामन्यतमेऽसति । अत परमात्मेश्वरादीनामवाक्यप्रमाणत्वम् । पदार्थत्वे च प्रमाणान्तरविषयत्वम् । अतोऽमदेतदिति चेत् । न । अस्ति "मेरुर्वर्णचतुतुष्टयोपेत" इत्येवमाद्यननुष्ठेयेऽपि वाक्यदर्शनात् । न च "मेरुर्वर्णचतुष्टयोपेत" इत्येवमादिवाक्यश्रवणे मेर्वादावनुष्ठेयत्वबुद्धिरुत्पद्यते । तथा अस्तिपदसहिताना परमात्मेश्वरादिप्रतिपादकवाक्यपदाना विशेषणविशेष्यभावेन संहति केन वार्यते । मेर्वादिज्ञानवत्परमात्मज्ञाने प्रयोजनाभावादयुक्तामिति चेत् । न । 'ब्रह्मविदाप्नोति परम्' 'भिद्यते हृदयग्रंथि' इति फलश्रवणात् । ससारबीजाविद्यादिदोषानिवृत्तिदर्शनाच्च । अनन्यशेषत्वाच्च तज्ज्ञानस्य, जुह्वामिव फलश्रुतेरर्थवादत्वानुपपत्ति ॥

प्रतिषिद्धानिष्टफलसबंधश्च वेदादेव विज्ञायते । न चानुष्ठेय स । न च प्रतिषिद्धविषये प्रवृत्तक्रियस्य अकरणादन्यदनुष्ठेयमस्ति । अकर्तव्यताज्ञाननिष्ठतैव हि परमार्थत प्रतिषेधविधीना स्यात् । क्षुधार्तस्य प्रतिषेधज्ञानसंस्कृतस्य अभक्ष्येऽभोज्ये वा प्रत्युपस्थिते कलंजाभिशस्ताज्ञादौ इद भक्ष्यमदो भोज्यमिति वा ज्ञानमुत्पन्नं, तद्विषयया प्रतिषेधज्ञानस्मृत्या बाध्यते । मृगतृष्णिकायामिव पेयज्ञानं तद्विषययाथात्म्यविज्ञानेन । तस्मिन्बाधिते स्वाभाविकविपरीतज्ञानेऽनर्थकरी तद्भक्षणभोजनप्रवृत्तिर्न भवति । विपरीतज्ञाननिमित्ताया प्रवृत्तेर्निवृत्तिरेव, न पुनर्यत्न कार्यस्तदभावे । तस्मात्प्रतिषेधविधीना वस्तुयाथात्म्यज्ञाननिष्ठतैव, न पुरुषव्यापारनिष्ठतागंधोऽप्यस्ति । तथेहापि परमात्मादियाथात्म्यज्ञानविधीना तावन्मात्रपर्यवसानतैव स्यात् । तथा तद्विज्ञानसंस्कृतस्य तद्विपरीतार्थज्ञाननिमित्ताना प्रवृत्तीनामनर्थार्थत्वेन ज्ञायमानत्वात् परमात्मादियाथात्म्यज्ञानस्मृत्या स्वाभाविके तन्निमित्तविज्ञाने बाधितेऽभाव स्यात् ॥

ननु कलंजादिभक्षणादे अनर्थार्थत्ववस्तुयाथात्म्यज्ञानस्मृत्या स्वाभाविके तद्भक्ष्यत्वादिविपरीतज्ञाने निवर्तिते तद्भक्षणाद्यनर्थप्रवृत्त्यभाववत् अप्रतिषेधविषयत्वात् शास्त्रविहितप्रवृत्त्यभावो न युक्त इति चेत् । न । विपर्यातज्ञाननिमित्तत्वानर्थार्थत्वाभ्या तुल्यत्वात् । कलजभक्षणादिप्रवृत्ते मिथ्याज्ञाननिमित्तत्व अनर्थार्थत्व च यथा, तथा शास्त्रविहितप्रवृत्तानामपि । तस्मात्परमात्मयाथात्म्यविज्ञानवत शास्त्रविहितप्रवृत्तीनामपि मिथ्याज्ञाननिर्मित्तत्वेन अनर्थार्थत्वेन च तुल्यत्वात् परमात्मज्ञानेन विपरीतज्ञाने निवर्तिते युक्त एवाभाव ॥

ननु तत्र युक्तो, नित्याना तु केवलशास्त्रनिमित्तत्वात् अनर्थार्थत्वाभावाच्चाभावो न युक्त इति चेत् । न । अविद्यारागद्वेषादिदोषवतो विहितत्वात् । यथा स्वर्गकामादिदोषवतो दर्शपूर्णमासादीनि काम्यानि कर्माणि विहितानि तथा सर्वानर्थबीजाविद्यादिदोषवत तज्जनितेष्टानिष्टप्राप्तिपरिहाररागद्वेषादिदोषवतश्च तत्प्रेरिताविशेषप्रवृत्तेरिष्टानिष्टप्राप्तिपरिहारार्थिनो नित्यानि कर्माणि विधीयन्ते, न केवलं शास्त्रनिमित्तान्येव । न चाग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुबधसोमाना कर्मणा स्वत काम्यनित्यत्वाविवेकोऽस्ति । कर्तृगतेन हि स्वर्गादिकामदोषेण कामार्थता । तथा अविद्यादिदोषवत स्वभावप्राप्तेष्टानिष्टप्राप्तिपरिहारार्थिन तदर्थान्येव नित्यानि इात युक्त, त प्रति विहितत्वात् । न परमात्मयाथात्म्यविज्ञानवत शमोपायव्यतिरेकेण किचित्कर्म विहितमुपलभ्यते । कर्मनिर्मित्तदेवतादिसर्वसाधनविज्ञानोपमर्देन ह्यात्मज्ञान विधीयते न चोपमर्दितक्रियाकारकादिविज्ञानस्य कर्मप्रवृत्तिरुपपद्यते । विशिष्टक्रियासाधनादिज्ञानपूर्वकत्वात्क्रियाप्रवृत्ते । न हि देशकालाद्यनवच्छिन्नास्थूलाद्वयादिब्रह्मप्रत्ययधारिणः कर्मावसरोऽस्ति । भोजनादिप्रवृत्त्यवसरवत्स्यादिति चेत् । न । अविद्यादिकेवलदोषनिमित्तत्वाद्भोजनादिप्रवृत्तेरावश्यकत्वानुपपत्ते । न तु तथाऽनियतं कदाचित्क्रियते कदाचिन्न क्रियते चेति नित्यं कर्मोपपद्यते । केवलदोषनिमित्तत्वात्तु भोजनादिकर्मणोऽनियतत्वं स्यात् । दोषोद्भवाभिभवयो अनियतत्वात् कामानामिव काम्येषु । शास्त्रनिमित्तकालाद्यपेक्षत्वाच्च नित्यानामनियतत्वानुपपत्ति । दोषनिमित्तत्वे सत्यपि, यथा काम्याग्निहोत्रस्य शास्त्रविहितत्वात्सायंप्रात कालाद्यपेक्षत्वं, एवम् । तद्भोजनादिप्रवृत्तौ नियमवत्स्यादिति चेत् । न । नियमस्याक्रियात्वात् क्रियायाश्चाप्रयोजकत्वान्नासौ ज्ञानस्यापवादकर । तस्मात्

परमात्मयाथात्म्यज्ञानविधेरपि तद्विपरीतस्थूलद्वैतादिज्ञाननिवर्तकत्वात् सामर्थ्यात्सर्वकर्मप्रतिषेधविधैयर्थ्यं सपद्यते । कर्मप्रवृत्त्यभावस्य तुल्यत्वात् । यथा प्रतिषेधविषये । तस्मात् प्रतिषेधविधिवच्च वस्तुप्रतिपादन तत्परत्वं च सिद्धं शास्त्रस्य ॥

ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायत् । यो वाचि भोगस्त देवेभ्य आगायद्यत्कल्याण वदति तदात्मने । ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्स य स पाप्मा यदेवेदमप्रतिरूप वदति स एव स पाप्मा ॥२॥

ते देवा, हैव विनिश्चित्य, वाचं वागभिमानिनी देवतामूचुरुक्तवन्त । त्वं नोऽस्मभ्यमुद्गायौद्गात्र कर्म कुरुष्व । वाग्देवतानिर्वर्त्यमौद्गात्रं कर्म दृष्टवन्त, तामेव च देवता जपमंत्राभिधेया 'असतो मा सद्गमय' इति । अत्र चोपासनाया कर्मणश्च कर्तृत्वेन वागादय एव विवक्ष्यन्ते । कस्मात्? यस्मात्परमार्थत तत्कर्तृक तद्विषय एव च सर्वो ज्ञानकर्मसव्यवहार । वक्ष्यति हि 'ध्यायतीव लेलायतीव' इत्यात्मकर्तृकत्वाभाव विस्तरत षष्ठे । इहापि चाध्यायान्ते उपसहरिष्यति अव्याकृतादिक्रियाकारकफलजातं 'त्रयं वा इद नाम रूप कर्म' इति अविद्याविषयम् । अव्याकृतात्तु यत्परं परमात्माख्य विद्याविषयं अनामरूपकर्मात्मकं 'नेति नेति' इति इतरप्रत्याख्यानेनोपसहरिष्यति पृथक् । यस्तु वागादिसमाहारोपाधिपरिकल्पित संसार्यात्मा त च वागादिसमाहारपक्षपातिनमेव दर्शयिष्यति 'एतेभ्यो भूतेभ्य समुत्थाय तान्येवानुविनश्यति' इति । तस्माद्युक्ता वागादीनामेव ज्ञानकर्मकर्तृत्वफलप्राप्तिविवक्षा ॥

तथेति तथास्त्विति देवैरुक्ता वाक्तेभ्योऽर्थिभ्योऽर्थाय उदगायदुद्गान कृतवती । कः पुनरसौ देवेभ्योऽर्थाय उद्गानकर्मणा वाचा निर्वर्तित कार्यविशेष इति? उच्यते— यो वाचि, निमित्तभूताया, वागादिसमुदायस्य य उपकारो निष्पद्यते वदनादिव्यापारेण, स एव । सर्वेषा ह्यसौ वाग्वदनाभिनिर्वृत्तो भोग फलम् । तं भोगं सा त्रिषु पवमानेषु कृत्वा अवशिष्टेषु नवसु स्तोत्रेषु वाचनिकमार्त्विज्यं फलं— यत्कल्याण शोभनं वदति वर्णानाभिनिर्वर्तयति तत्— आत्मने मह्यमेव । तद्धयसाधारणं वाग्देवताया कर्म यत्सम्यग्वर्णानामुच्चारणम् । अतस्तदेव विशेष्यते यत्कल्याणं वदतीति । यत्तु वदनकार्यं सर्वसंघातोपकारा-

त्मकं तद्याजमानमेव । तत्र कल्याणवदनात्मसंबंधासंगावसरं देवताया रंध्र प्रतिलभ्य ते विदुरसुरा , कथं, अनेनोद्गात्रा नोऽस्मान्स्वाभाविकं ज्ञानं कर्म चाभिभूयातीत्य शास्त्रजनितकर्मज्ञानरूपेण ज्योतिषोद्गात्रात्मना अत्येष्यन्त्यतिगमिष्यन्ति । इत्येवं विज्ञाय तमुद्गातारमभिद्रुत्याभिगम्य स्वेन असंगलक्षणेन पाप्मनाऽविध्यंस्ताडितवन्त संयोजितवन्त इत्यर्थ । स य स पाप्मा प्रजापते पूर्वजन्मावस्थस्य वाचि क्षिप्त स एष प्रत्यक्षीक्रियते । कोऽसौ । यदेवेदमप्रतिरूपमननुरूप शास्त्रप्रतिषिद्ध वदति येन प्रयुक्तोऽसभ्यबीभत्सानृतायनिच्छन्नपि वदति । अनेन कार्येणाप्रतिरूपवदनेन अनुगम्यमान प्रजापते कार्यभूतासु प्रजासु वाचि वर्तते । स एवाप्रतिरूपवदनेनानुमित स प्रजापतेर्वाचि गत पाप्मा, कारणानुविधायि हि कार्यमिति ॥

अथ ह प्राणमूचुस्त्व न उद्गायेति तथेति तेभ्य प्राण उदगायद्य· प्राणे भोगस्त देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने । ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्स य. स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥३॥ अथ ह चक्षुरूचुस्त्व न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायत् । यश्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याण पश्यति तदात्मने । ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्स य स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥४॥ अथ ह श्रोत्रमूचुस्त्व न उद्गायेति तथेति तेभ्य श्रोत्रमुदगायद्य श्रोत्रे भोगस्त देवेभ्य आगायद्यत्कल्याण शृणोति तदात्मने । ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूप शृणोति स एव स पाप्मा ॥५॥ अथ ह मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्त देवेभ्य आगायद्यत्कल्याण संकल्पयति तदात्मने । ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्स य स पाप्मा यदेवेदमप्रतिरूपं संकल्पयति स एव स पाप्मैवमु खल्वेता देवता पाप्मभिरुपासृजन्नेवमेना· पाप्मनाविध्यन् ॥६॥

तथैव घ्राणादिदेवता उद्गीथनिर्वर्तकत्वाज्जपमंत्रप्रकाश्या उपास्याश्चेति क्रमेण परीक्षितवन्त । देवाना चैतन्निश्चितमासीत् । वागादिदेवता क्रमेण परीक्ष्यमाणा कल्याणविषयविशेषात्मसंबंधासंगहेतो· आसुरपाप्मससर्गात् उद्गीथ-

निर्वर्तनासमर्था । अतोऽनभिधेया 'असतो मा सद्गमय' इत्यनुपास्याश्च । अशुद्धत्वादितराव्यापकत्वाच्चेति । एवमु खल्वनुक्ता अप्येतास्त्वगादिदेवता कल्याणाकल्याणकार्यदर्शनादेव वागादिवदेव, एना पाप्मनाविध्यन्पाप्मना विद्धवन्त इति यदुक्त तत्पाप्माभिरुपासृजन्पाप्माभि संसर्ग कृतवन्त इत्येतत् ॥

वागादिदेवता उपासीना अपि मृत्व्यतिगमनायाशरणा सन्तो देवा क्रमेण—

अथ हेममासन्य प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविव्यत्सन्स यथाश्मानमृत्वा लोष्टो विध्वसेतैव हैव विध्वसमाना विष्वचो विनेशुस्ततो देवा अभवन्पराऽसुरा भवत्यात्मना पराऽस्य द्विषन्भ्रातृव्यो भवति य एव वेद ॥७॥

अथानतरं ह इममित्यभिनयप्रदर्शनार्थम् । आसन्यमास्ये भवमासन्य मुखान्तर्बिलस्थ प्राणमूचुस्त्व न उद्गायेति । तथेत्येव शरणमुपगतेभ्य स एष प्राणो मुख्य उदगायदित्यादि पूर्ववत् । पाप्मनाऽविव्यत्सन्वेधन कर्तुमिष्टवन्तस्ते च दोषासमर्गिण सन्तं मुख्यं प्राणम् । स्वेन आसंगदोषेण वागादिषु लब्धप्रसरा तदभ्यासानुवृत्त्या संलक्ष्यमाणा विनेशुर्विनष्टा विध्वस्ता । कथमिवेति दृष्टान्त उच्यते— स यथा स दृष्टान्तो यथा, लोकेऽश्मानं पाषाणमृत्वा गत्वा प्राप्य, लोष्ट पासुपिड पाषाणचूर्णनायाश्मनि निक्षिप्त स्वयं विध्वसेत विसंसेत विचूर्णाभवेत्, एव हैव यथायं दृष्टान्त एवमेव, विध्वसमाना विशेषेण ध्वसमाना, विष्वचो नानागतयो, विनेशुर्विनष्टा यत , ततस्तस्मादासुरविनाशादेवत्वप्रतिबंधभूतेभ्य स्वाभाविकासगजनितपाप्मभ्यो वियोगात् असंसर्गधार्मिमुख्यप्राणाश्रयबलादेवा वागादय प्रकृता अभवन् । किमभवन् । स्व देवतारूपमन्याद्यात्मकं वक्ष्यमाणम् । पूर्वमप्यन्याद्यात्मान एव सन्त स्वाभाविकेन पाप्मना तिरस्कृतविज्ञाना पिंडमात्राभिमाना आसन् । ते तत्पाप्मवियोगादुज्झित्वा पिंडमात्राभिमानं शास्त्रसमर्पितवागाद्यन्याद्यात्माभिमाना बभूवुरित्यर्थ । किंच ते प्रतिपक्षभूता असुरा पराऽभवन्नित्यनुवर्तते । पराभूता विनष्टा इत्यर्थ । यथा पुराकल्पेन वर्णित पूर्वयजमानोऽतिक्रान्तकालिक एतामेवाख्यायिकारूपा श्रुति दृष्ट्वा तेनैव क्रमेण वागादिदेवता परीक्ष्य, ताश्चापोह्यासंगपाप्मास्पद-

दोषवत्त्वेनादोषास्पदं मुख्यं प्राणमात्मत्वेनोपगम्य वागाद्याध्यात्मिकपिंडमात्रपरिच्छिन्नात्माभिमानं हित्वा वैराजपिंडाभिमान वागाद्यन्याद्यात्मविषय वर्तमानप्रजापतित्वं शास्त्रप्रकाशित प्रतिपन्न, तथैवाय यजमानस्तेनैव विधिना भवति प्रजापतिस्वरूपेणात्मना। परा चास्य प्रजापतित्वप्रतिपक्षभूत. पाप्मा द्विषन्भ्रातृव्यो भवति। यतोऽद्वेष्टापि भवति कश्चित् भ्रातृव्यो भरतादितुल्यो, यस्त्वद्वियविषयासंगजनित पाप्मा भ्रातृव्यो द्वेष्टा च। पारमार्थिकात्मस्वरूपतिरस्करणहेतुत्वात्। स च पराभवति विशीर्यते लोष्टवत्प्राणपरिष्वगात्। कस्यैतत्फलमित्याह— य एवं वेद। यथोक्तं प्राणमात्मत्वेन प्रतिपद्यते पूर्वयजमानवदित्यर्थ॥

फलमुपसंहृत्याधुनाख्यायिकारूपमेवाश्रित्याह। कस्माच्च हेतोर्वागादीन्मुक्त्वा मुख्य एव प्राण आत्मत्वेनाश्रयितव्य इति तदुपपत्तिनिरूपणाय यस्मादय वागादीना पिंडादीना च साधारण आत्मा, इत्येतमर्थमाख्यायिकया दर्शन्याह श्रुति —

ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आंगिरसोऽगाना हि रस.॥८॥

ते प्रजापतिप्राणा मुख्येन प्राणेन परिप्रापितदेवस्वरूपा होचुरुक्तवन्त फलावस्था। किमित्याह— क्व न्विति वितर्के। क्व नु कस्मिन्नु सोऽभूत्। क। यो नोऽस्मानित्थमेवमसक्त सजितवान्देवभावमात्मत्वेनोपगमितवान्। स्मरन्ति हि लोके केनचिदुपकृता उपकारिण, लोकवदेव स्मरन्तो विचारयमाणा कार्यकरणसंघाते आत्मन्येवोपलब्धवन्त। कथम्, अयमास्येऽन्तरिति, आस्ये मुखे य आकाशस्तस्मिन्नंतरय प्रत्यक्षो वर्तत इति। सर्वो हि लोको विचार्याध्यवस्यति। तथा देवा। यस्मादयमतराकाशे वागाद्यात्मत्वेन विशेषमनाश्रित्य वर्तमान उपलब्धो देवै, तस्मात्स प्राणोऽयास्यो विशेषानाश्रयाच्च असक्त संजितवान्वागादीन्। अत एवागिरस आत्मा कार्यकरणानाम्। कथमागिरस[1] प्रसिद्ध ह्येतदगाना कार्यकरणलक्षणाना रस सार आत्मेत्यर्थ। कथं पुनरगरसत्व[2] तदपाये शोषप्राप्तेरिति वक्ष्याम। यस्माच्चायमंगरसत्वाद्विशेषानाश्रितत्वाच्च कार्यकरणाना साधारण आत्मा विशुद्धश्च, तस्माद्वागादीनपास्य प्राण एवात्मत्वेनाश्रयितव्य इति वाक्यार्थ। आत्मा ह्यात्मत्वेनोपगंतव्योऽविपरीतबोधाच्छ्रेयःप्राप्ते, विपर्यये चानिष्टप्राप्तिदर्शनात्॥

सा वा एषा देवता दूर्नाम दूर ह्यस्या मृत्युर्दूर ह वा अस्मान्मृत्युर्भवति य एव वेद ॥९॥

स्यान्मत प्राणस्य विशुद्धिरसिद्धेति । ननु परिहृतमेतद्वागादीना कल्याणवदनाद्यासंगवत्प्राणस्य आसंगास्पदत्वाभावेन । बाढम्, किं त्वागिरसत्वेन वागादीनामात्मस्वोक्त्या वागादिद्वारेण शवस्पृष्टितत्स्पृष्टेरिवाशुद्धता शंक्यत इत्याह— शुद्ध एव प्राण । कुत, सा वा एषा देवता दूर्नाम यं प्राणं प्राप्याऽमानमिव लोष्टवद्विध्वस्ता असुरा । त परामृशति सेति । सैवैषा येयं वर्तमानयजमानशरीरस्था देवैर्निर्धारिता 'अयमास्येऽन्त ' इति । देवता च सा स्यात् । उपासनक्रियाया कर्मभावेन गुणभूतत्वात् । यस्मात्सा दूर्नाम दूरित्येव ख्याता । नामशब्द ख्यापनपर्याय । तस्मात्प्रसिद्धास्या विशुद्धिर्दूर्नामत्वात् । कुत पुनर्दूर्नामत्वमित्याह— दूरं दूरे हि यस्मादस्या प्राणदेवताया मृत्युरासंगलक्षण पाप्मा । असंश्लेषधर्मित्वात्प्राणस्य समीपस्थस्यापि दूरता मृत्योस्तस्मात् दूरित्येवं ख्याति, एवं प्राणस्य विशुद्धिर्ज्ञापिता । विदुष फलमुच्यते— दूरं ह वा अस्मान्मृत्युर्भवति । अस्मादेवंविदो, य एवं वेद तस्मादेवमिति—प्रकृतं विशुद्धिगुणोपेत प्राणमुपास्त इत्यर्थ । उपासनं नाम उपास्यार्थवादे यथा देवतादिस्वरूप श्रुत्या ज्ञाप्यते तथा मनसोपगम्य आसनं चिंतन लौकिकप्रत्ययाव्यवधानेन यावत्तद्देवतादिस्वरूपात्माभिमानाभिव्यक्तिरिति लौकिकात्माभिमानवत् । 'देवो भूत्वा देवानप्येति' 'किंदेवतोऽस्या प्राच्या दिश्यसि' इत्येवमादिश्रुतिभ्य ॥

सा वा एषा देवता दूर ह वा अस्मान्मृत्युर्भवतीत्युक्तम् । कथं पुनरेवंविदो दूरं मृत्युर्भवतीति । उच्यते । एवंवित्त्वविरोधात् । इंद्रियविषयसंसर्गसंगजो हि पाप्मा प्राणात्माभिमानिनो हि विरुध्यते । वागादिविशेषात्माभिमानहेतुत्वात् स्वाभाविकाज्ञानहेतुत्वाच्च । शास्त्रजनितो हि प्राणात्माभिमानः । तस्मादेवविद पाप्मा दूर भवतीति युक्तं विरोधात् । तदेतत्प्रदर्शयति—

सा वा एषा देवतैतासां देवताना पाप्मान मृत्युमपहत्य यत्रासां दिशामंतस्तद्गमयांचकार तदासां पाप्मनो विन्यदधात्तस्माद्न जनमियाद्नांतमियाद्नेत्पाप्मानं मृत्युमन्ववायानीति ॥ १० ॥

सा वा एषा देवतेत्युक्तार्थम् । एतासा वागादीना देवताना पाप्मानं मृत्युं स्वाभाविकाज्ञानप्रयुक्तेंद्रियविषयसंसर्गासंगजनितेन हि पाप्मना सर्वो

म्रियते, स ह्यतो मृत्यु , तं प्राणात्माभिमानरूपाभ्यो देवताभ्योऽपच्छिद्यापहत्य, प्राणात्माभिमानमात्रतयैव प्राणोऽपहतेत्युच्यते । विरोधादेव तु पाप्मैवंविदो दूर गतो भवति । कि पुनश्चकार देवताना पाप्मानं मृत्युमपहत्येति, उच्यते— यत्र यस्मिन्नासा प्राच्यादीना दिशामंतोऽवसानं तत्तत्र गमयाचकार गमन कृतवानित्येतत् । ननु नास्ति दिशामंत कथमंतं गमितवानिति । उच्यते— श्रौतविज्ञानवत् जनावधिनिमित्तकल्पितत्वाद्दिशा तद्विरोधिजनाध्युषित एव देशो दिशामतो, देशातोऽरण्यमिति यद्वदित्यदोष । तत्तत्र गमयित्वा आसा देवताना, पाप्मन इति द्वितीयाबहुवचनं, विन्यदधाद्विविध न्यग्भावेनादधात्स्थापितवती प्राणदेवता । प्राणात्माभिमानशून्येषु अंत्यजनेष्विति सामर्थ्यात् । इन्द्रियसंसर्गजो हि स इति प्राण्याश्रयतावगम्यते । तस्मात्तमंत्यं जनं नेयान्न गच्छेत्सभाषणदर्शनादिभिर्न संसृजेत् । तत्संसर्गे पाप्मना संसर्ग कृत स्यात्पाप्माश्रयो हि स । तज्जननिवासं चात दिगतशब्दवाच्य नेयाज्जनशून्यमपि, जनमपि तद्देशवियुक्तमित्यभिप्राय । नेदिति परिभयार्थे निपातः । इत्थं जनसंसर्गे पाप्मानं मृत्युमन्ववायानीति । अनु अव अयानीत्यनुगच्छेयमिति । एवं भीतो न जनमत चेयादिति पूर्वेण सबंध ॥

सा वा एषा देवतैतासां देवतानां पाप्मान मृत्युमपहत्याथैना मृत्युमत्यवहत् ॥ ११ ॥

सा वा एषा देवता, तदेतत्प्राणात्मज्ञानकर्मफलं वागादीना अग्न्याद्यात्मत्वमुच्यते । अथैना मृत्युमत्यवहत् । यस्मादाध्यात्मिकपरिच्छेदकर पाप्मा मृत्यु प्राणात्मविज्ञानेनापहत तस्मात्स प्राणोऽपहन्ता पाप्मनो मृत्यो । तस्मात्स एव प्राण एना वागादिदेवता प्रकृतं पाप्मानं मृत्युमतीत्य अवहत्प्रापयत्स्वं स्वमपरिच्छिन्नमग्न्यादिदेवतात्मरूपम् ॥

स वै वाचमेव प्रथमामत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १२ ॥

स वै वाचमेव प्रथमामत्यवहत् । स प्राणो वाचमेव प्रथमा प्रधानामित्येतत् । उद्गीथकर्मणीतरकरणापेक्षया साधकतमत्वं प्राधान्यं तस्या । ता प्रथमामत्यवहद्वहनं कृतवान् । तस्या पुनर्मृत्युमतीत्योढाया किं रूपमित्युच्यते— सा वाग्यदा यस्मिन्काले पाप्मान मृत्यु अत्यमुच्यतातीत्यामुच्यत मोचिता स्वय-

मेव, तदा सोऽग्निरभवत् सा वाक्पूर्वमप्याग्निरेव सती मृत्युवियोगेऽप्याग्निरेवाभवत् । एतावास्तु विशेषो मृत्युवियोगे । सोऽयमतिक्रान्तोऽग्नि परेण मृत्यु परस्तान्मृत्योर्दीप्यते । प्राङ्मोक्षान्मृत्युप्रतिबद्धो अध्यात्मवागात्मना नेदानीमिव दीप्तिमानासीदिदानी तु मृत्युं परेण दीप्यते मृत्युवियोगात् ॥

अथ प्राणमत्यवहत्स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽय वायुः परेण मृत्युमतिक्रान्त पवते ॥ १३ ॥

तथा प्राणो घ्राण वायुरभवत् । स तु पवते मृत्युं परेणातिक्रान्त । सर्वमन्यदुक्तार्थम् ॥

अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत्सोऽसावादित्य. परेण मृत्युमतिक्रान्तस्तपति ॥ १४ ॥

तथा चक्षुरादित्योऽभवत्स तु तपति ॥

अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवस्ता इमा दिश परेण मृत्युमतिक्रान्ता ॥ १५ ॥

तथा श्रोत्र दिशोऽभवत् । दिश प्राच्यादिविभागेनावस्थिता ॥

अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चंद्रमा अभवत्सोऽसौ चंद्र. परेण मृत्युमतिक्रान्तो भात्येवं ह वा एनमेषा देवता मृत्युमतिवहति य एव वेद ॥ १६ ॥

मनश्चंद्रमा भाति । यथा पूर्वयजमान वागाद्यग्न्यादिभावेन मृत्युमत्यवहत्, एवमेनं वर्तमानयजमानमपि ह वा एषा प्राणदेवता मृत्युमतिवहति वागाद्यग्न्यादिभावेन । एवं यो वागादिपंचकविशिष्टं प्राण वेद । 'तं यथा यथोपासेत तदेव भवति' इति श्रुते ॥

अथात्मनेऽन्नाद्यमागायद्यद्धि किचान्नमद्यतेऽनेनैव तदद्यत इह प्रतितिष्ठति ॥ १७ ॥

अथात्मने । यथा वागादिभिरात्मार्थमागान कृतं तथा मुख्योऽपि प्राण सर्वप्राणसाधारणं प्राजापत्यफलमागानं कृत्वा त्रिषु पवमानेषु, अथानंतरं शिष्टेषु नवसु स्तोत्रेषु, आत्मने आत्मार्थमन्नाद्यमन्न च तदाद्यं चान्नाद्यमागायत् । कर्तु. कामसंयोगो वाचनिक इत्युक्तम् । कथं पुनस्तदन्नाद्य प्राणेनात्मार्थमागीतमिति गम्यत इत्यत्र हेतुमाह—यत्किंचेति, सामान्यान्नमात्रपरामर्शार्थ । हीति

हेतौ'। यस्माल्लोके प्राणिभिर्यत्किंचिदन्नमद्यते भक्ष्यते तदनेनैव। अन इति प्राणस्याख्या प्रसिद्धा। अन. शब्द सान्त शकटवाची, यस्त्वन्य स्वरान्त स प्राणपर्याय। प्राणेनैव तदद्यत इत्यर्थ। किंच न केवल प्राणेनाद्यत एवान्नाद्य, तस्मिञ्छरीराकारपरिणतेऽन्नाद्य इह प्रतितिष्ठति प्राण। तस्मात्प्राणेनात्मन प्रतिष्ठार्थमागीतमन्नाद्यम्। यदपि प्राणेनान्नादन तदपि प्राणस्य प्रतिष्ठार्थमेवेति न वागादिष्विव कल्याणासगजपाप्मसभव प्राणेऽस्ति॥

ते देवा अब्रुवन्नेतावद्वा इद सर्वं यदन्न तदात्मन आगार्सीरनु नोऽस्मिन्नन्न आभजस्वेति ते वै माभिसविशतेति तथेति त समन्त परिण्यविशन्त। तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्त्येव ह वा एन स्वा अभिसविशन्ति भर्ता स्वाना श्रेष्ठ पुर एता भवत्यन्नादोऽधिपतिर्य एव वेद य उ हैवंविदं स्वेषु प्रति प्रतिबुभूषति न हैवाल भार्येभ्यो भवत्यथ य एवैतमनु भवति यो वैतमनु भार्यान्बुभूषति स हैवाल भार्येभ्यो भवति॥१८॥

ते देवा। नन्ववधारणमयुक्त 'प्राणेनैव तदद्यत' इति। वागादानामपि अन्ननिमित्तोपकारदर्शनात्। नैष दोष। प्राणद्वारत्वात्तदुपकारस्य। कथ प्राणद्वारकोऽन्नकृतो वागादीनामुपकार इत्येतमर्थ प्रदर्शयन्नाह— ते वागादयो देवा, स्वविषयद्योतनाद्देवा, अब्रुवन्नुक्तवन्तो मुख्य प्राण इदमेतावन्नातोऽधिकमस्ति। वा इति स्मरणार्थ। इद तत्सर्वमेतावदेव, कि, यदन्न प्राणस्थितिकरमद्यते लोकै तत्सर्वमात्मन आत्मार्थमागासी आगीतवानसि आगानेनात्मसात्कृतमित्यर्थ। वय चान्नमंतरेण स्थातुं नोत्सहामहे। अतोऽनु पश्चान्नोऽस्मानस्मिन्नन्ने आत्मार्थे तवान्ने आभजस्व आभाजयस्व। णिचोऽश्रवणं छादसम्। अस्माश्चान्नभागिन कुरु। इतर आह— ते यूय यद्यन्नार्थिनो वै, मा मामाभिसंविशत समंततो मामाभिमुख्येन निविशत। इत्येवमुक्तवति प्राणे तथेत्येवमिति, तं प्राणं परिसमंतं परिसमंतान्न्याविशन्त निश्चयेनाविशन्त, तं प्राणं परिवेष्टय निविष्टवन्त इत्यर्थ। तथा निविष्टाना प्राणानुज्ञया तेषा प्राणेनैवाद्यमानं प्राणस्थितिकरं सदन्नं तृप्तिकर भवति न स्वातंत्र्येणान्नसंबधो वागादीनाम्। तस्माद्युक्तमेवावधारण अनेनैव तदद्यत इति। तदेव चाह— तस्माद्यस्मात्प्राणाश्रयतयैव प्राणानुज्ञयाभिसंनिविष्टा वागादिदेवताः तस्माद्यदन्नमनेन प्राणेनात्ति लोकस्तेनान्नेनैता वागाद्यास्तृप्यन्ति। वागाद्याश्रयं प्राण यो

वेद 'वागादयश्च पच प्राणाश्रया' इति तमप्येवमेव ह वै स्वा ज्ञातय अभिसविशन्ति वागादय इव पाणम् । ज्ञातीनामाश्रयणीयो भवतीत्यभिप्राय । अभिसन्निविष्टाना च स्वाना प्राणवदेव वागादीना स्वान्नेन भर्ता भवति । तथा श्रेष्ठ पुरोऽग्रत एता गन्ता भवति वागादीनामिव प्राण । तथान्नादोऽनामयावीत्यर्थ । अधिपतिरधिष्ठाय च पालयिता स्वतन्त्र पति प्राणवदेव वागादीनाम् । य एवं प्राण वेद तस्यैतद्ययोक्त फल भवति । किच य उ हैवविदं प्राणविदं प्रति स्वेषु ज्ञातीना मध्ये प्रति प्रतिकूलो बुभूषति प्रतिस्पर्धीभवितुमिच्छति, सोऽसुरा इव प्राणप्रतिस्पर्धिनौ न हैवाल न पर्याप्तो भार्येभ्यो भरणीयेभ्यो भवति भर्तुमित्यर्थ । अथ पुनर्य एव ज्ञातीना मध्ये एतमेवंविद वागादय इव प्राण अनु अनुगतो भवति, यो वेतमेवविदमन्ववानुवर्तयन्नेव आत्मीयान्भार्यान्बुभूर्षति, भर्तुमिच्छति, यथैव वागादय प्राणानुवृत्त्यात्मबुभूर्षव आसन । स हैवाल पर्याप्तो भार्येभ्यो भरणीयेभ्यो भवति भर्तु नेतर स्वतन्त्र । सर्वमेतत्प्राणगुणविज्ञानफलमुक्तम् ॥

कायकरणानामात्मत्वप्रतिपादनाय प्राणस्यागिरसत्वमुपन्यस्त सोऽयास्य आगिरस इति । अस्माद्धेतोरयमागिरस इत्यागिरसत्वे हेतुर्नोक्त । तद्धेतुसिद्ध्यर्थमारभ्यते । तद्धेतुसिद्धयायत्त हि कार्यकरणात्मत्व प्राणस्य । अनंतर च वागादीना प्राणाधीनतोक्ता । सा च कथमुपपादनीयेत्याह—

सोऽयास्य आगिरसोऽगाना हि रस प्राणो वा अगानां रस प्राणो हि वा अगाना रसस्तस्माद्यस्मात्कस्माच्चागात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अंगाना रस ॥१९॥

सोऽयास्य आगिरस इत्यादि यथोपन्यस्तमेवोपादीयते उत्तरार्थम् । प्राणो वा अगाना रस इत्येवमत वाक्यं यथाव्याख्यातार्थमेव पुन स्मारयति । कथ, प्राणो वा अगाना रस इति । प्राणो हि । हिशब्द प्रसिद्धौ । अंगाना रस । प्रसिद्धमेतत्प्राणस्यागरसत्वं न वागादीनाम् । तस्माद्युक्त प्राणो वा इति स्मारणम् । कथं पुन प्रसिद्धत्वमित्यत आह । तस्माच्छब्द उपसहारार्थ उपरित्वेन संबध्यते । यस्माद्यतोऽवयवात्कस्मादनुक्तविशेषात् । यस्मात्कस्माद्यत कुतश्चिच्च अंगाच्छरीरावयवादविशेषितात्प्राण उत्क्रामत्यपसर्पति तदेव तत्रैव तदंगं शुष्यति नीरस भवति शोषमुपैति । तस्मादेष हि वा अंगानां रस

इत्युपसंहार । अत कार्यकरणानामात्मा प्राण इत्येतत्सिद्धम् । आत्मापाये हि शोषो मरण स्यात्तस्मात्तेन जीवन्ति प्राणिन सर्वे । तस्मादपास्य वागादीन्प्राण एवोपास्य इति समुदायार्थ ॥

एष उ । न केवल कार्यकरणयोरेवात्मा प्राणो रूपकर्मभूतयो । किं तर्हि, ऋग्यजु साम्ना नामभूतानामात्मेति सर्वात्मकतया प्राणं स्तुवन्महाकरोत्युपास्यत्वाय—

एष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पति ॥२०॥

एष उ एव प्रकृत आगिरसो बृहस्पति । कथ बृहस्पतिरिति । उच्यते— वाग्वै बृहती बृहतीछद षट्त्रिशदक्षरा । अनुष्टुप्च वाक् । कथम् । 'वाग्वा अनुष्टुप्' इति श्रुते । सा च वागनुष्टुब्बृहत्या छदस्यंतर्भवति । अतो युक्तं वाग्वै बृहतीति प्रसिद्धवद्वक्तुम् । बृहत्या च सर्वा ऋचोऽन्तर्भवन्ति प्राणसस्तुतत्वात् । 'प्राणे बृहती प्राण ऋच इत्येव विद्यात्' इति श्रुत्यंतरात् । वागात्मत्वाच्चर्चां प्राणेऽन्तर्भाव । तत्कथमित्याह— तस्या वाचो बृहत्या ऋच एष प्राण पति । तस्या निर्वर्तकत्वात् । कौष्ठ्याग्निप्रेरितमारुतनिर्वर्त्या हि ऋक् । पालनाद्वा वाच पति । प्राणेन हि पात्यते वाक् । अप्राणस्य शब्दोच्चारणसामर्थ्याभावात् । तस्मादु बृहस्पतिर्ऋचा प्राण आत्मेत्यर्थ ॥

एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः ॥२१॥

तथा यजुषाम् । कथम्, एष उ एव ब्रह्मणस्पति । वाग्वै ब्रह्म, ब्रह्म यजु, तच्च वाग्विशेष एव । तस्या वाचो यजुषो ब्रह्मण एष पतिस्तस्मादु ब्रह्मणस्पति पूर्ववत् ॥

कथं पुनरेतदवगम्यते बृहतीब्रह्मणोर्ऋग्यजुष्ट्वं न पुनरन्यार्थत्वमिति । उच्यते— वाचोऽन्ते सामसामानाधिकरण्यनिर्देशात् 'वाग्वै साम' इति । तथा च 'वाग्वै बृहती' 'वाग्वै ब्रह्म' इति च वाक्समानाधिकरणयोर्ऋग्यजुष्ट्वं युक्तम् । परिशेषाच्च । साम्नि अभिहिते ऋग्यजुषी एव परिशिष्टे । वाग्विशेषत्वाच्च वाग्विशेषौ हि ऋग्यजुषी । तस्मात् तयो वाचा समानाधिकरणता युक्ता । अविशेषप्रसंगाच्च । सामोद्गीथ इति च स्पष्टं विशेषाभिधानत्वम् । तथा

बृहतीब्रह्मशब्दयोरपि विशेषाभिधानत्व युक्तम् । अन्यथा अनिर्धारितविशेषयो आनर्थक्यापत्तेश्च विशेषाभिधानस्य वाङमात्रत्वे चोभयत्र पौनरुक्त्यात् । ऋग्यजु.सामोद्गीथशब्दाना च श्रुतिष्वेवंक्रमदर्शनात् ॥

एष उ एव साम वाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वम् । यद्वेव सम प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकै. समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्न सायुज्यं सलोकतां य एवमेतत्साम वेद ॥२२॥

एष उ एव साम । कथमित्याह— वाग्वै सा यत्किंचित्स्त्रीशब्दाभिधेय सा वाक् । सर्वस्त्रीशब्दाभिधेयवस्तुविषयो हि सर्वनाम--सा--शब्द । तथा अम एष प्राण· । सर्वपुंशब्दाभिधेयवस्तुविषयोऽम शब्द । "केन मे पौस्नानि नामान्याप्नोषीति, प्राणेनेति ब्रूयात्केन मे स्त्रीनामानीति वाचा" इति श्रुत्यंतरात् । वाक्प्राणाभिधानभूतोऽयं सामशब्द· । तथा प्राणनिर्वर्त्यस्वरादिसमुदायमात्रं गीति सामशब्देनाभिधीयते । अतो न प्राणवाग्व्यतिरेकेण सामनामास्ति किंचित्स्वरवर्णादेश्च प्राणनिर्वर्त्यत्वात्प्राणतंत्रत्वाच्च । एष उ एव प्राण साम यस्मात्साम सामेति वाक्प्राणात्मकं सा चामश्चेति, तत्तस्मात्साम्नो गीतिरूपस्य स्वरादिसमुदायस्य सामत्वं तत्प्रगीतं भुवि ॥

यत् उ एव समस्तुल्य सर्वेण वक्ष्यमाणेन प्रकारेण, तस्माद्वा सामेत्यनेन सबंध । वाशब्द सामशब्दलाभानिमित्तप्रकारान्तरनिर्देशसामर्थ्यलभ्य । केन पुन प्रकारेण प्राणस्य तुल्यत्वमित्युच्यते— सम प्लुषिणा पुत्तिकाशरीरेण, समो मशकेन मशकशरीरेण, समो नागेन हस्तिशरीरेण, सम एभिस्त्रिभिर्लोकैस्त्रैलोक्यशरीरेण प्राजापत्येन, समोऽनेन जगद्रूपेण हैरण्यगर्भेण । पुत्तिकादिशरीरेषु गोत्वादिवत्कात्स्न्येंन परिसमाप्त इति समत्व प्राणस्य । न पुन शरीरमात्रपरिमाणेनैव, अमूर्तत्वात्सर्वगतत्वाच्च । न च घटप्रासादादिप्रदीपवत्संकोचविकासितया शरीरेषु तावन्मात्रं समत्वम् । "त एते सर्व एव समा सर्वेऽनंता" इति श्रुते । सर्वगतस्य तु शरीरेषु शरीरपरिमाणवृत्तिलाभो न विरुध्यते । एवं समत्वात्सामाख्यं प्राणं वेद य श्रुतिप्रकाशितमहत्त्व तस्यैतत्फलं— अश्नुते व्याप्नोति साम्न प्राणस्य सायुज्यं सयुग्भावं समानदेहेंद्रियाभिमानत्वं, सालोक्यं समानलोकता वा भावनाविशेषतो, य एवमेतद्य-

थोक्त साम प्राणं वेद। आ प्राणात्माभिमानाभिव्यक्तेरुपास्ते, इत्यर्थ ॥

एष उ वा उद्गीथ प्राणो वा उत्प्राणेन हीद सर्वमुत्तब्ध वागेव गीथोच्च गीथा चेति स उद्गीथ ॥२३॥

एष उ वा उद्गीथ। उद्गीथो नाम सामावयवो भक्तिविशेषो नोद्गानम्। सामाधिकारात्। कथमुद्गीथ प्राण। प्राणो वा उत्प्राणेन हि यस्मादिद सर्व जगदुत्तब्धमूर्ध्व स्तब्धमुत्तभितं विधृतमित्यर्थ। उत्तब्धार्थावद्योतकोऽयमुच्छब्द प्राणगुणाभिधायक। तस्मादुत्प्राण। वागेव गीथा शब्दविशेषत्वादुद्गीथभक्ते। गायते शब्दार्थत्वात्सा वागेव। न ह्युद्गीथभक्ते शब्दव्यतिरेकेण किंचिद्रूपमुत्प्रेक्ष्यते। तस्माद्युक्तमवधारण वागेव गीथेति। उच्च प्राणो गीथा च प्राणतन्त्रा वागित्युभयमेकेन शब्देनाभिधीयते स उद्गीथ ॥

तद्धापि ब्रह्मदत्तश्चैकितानेयो राजान भक्षयन्नुवाचाय त्यस्य राजा मूर्धानं विपातयताद्यदितोऽयास्य आगिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन चोदगायदिति ॥२४॥

तद्धापि तत्तत्रैतस्मिन्नुक्तेऽर्थे ह्याख्यायिकापि श्रूयते ह स्म। ब्रह्मदत्तो नामत। चैकितानस्यापत्य चैकितानस्तदपत्य युवा चैकितानेयो, राजानं यज्ञे सोम भक्षयन्नुवाच। किम्। अय चमसस्थो मया भक्ष्यमाणो राजा त्यस्य तस्य ममानृतवादिनो मूर्धानं शिरो विपातयताद्विस्पष्ट पातयतु। तोरय तातङादेश आशिषि लोट् विपातयतादिति। यद्यहमनृतवादी स्यामित्यर्थ। कथं पुनरनृतवादित्वप्राप्तिरिति। उच्यते— यद्यदीतोऽस्मात्प्रकृतात प्राणाद्वाक्संयुक्तात् अयास्यो मुख्यप्राणाभिधायकेन अयास्यागिरसशब्देनाभिधीयते विश्वसृजा पूर्वर्षीणा मत्रे उद्गाता। सोऽन्येन देवतान्तरेण वाक्प्राणव्यतिरिक्तेनोदगायदुद्गान कृतवान्। ततोऽहमनृतवादी स्या, तस्य मम देवता विपरीतप्रतिपत्तुर्मूर्धान विपातयतु। इत्येवं शपथ चकारेति विज्ञाने प्रत्ययदार्ढ्यकर्तव्यता दर्शयति। तमिममाख्यायिकानिर्धारितमर्थ स्वेन वचसोपसंहरति श्रुति— वाचा च प्राणप्रधानया प्राणेन च स्वस्यात्मभूतेन सोऽयास्य आगिरस उद्गातोदगायदित्येषोऽर्थो निर्धारित शपथेन ॥

तस्य हैतस्य साम्नो य स्वं वेद भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत तया वाचा स्वरसंपन्नयार्त्विज्यं

कुर्यात्तस्माद्यज्ञे स्वरवन्त दिदृक्षन्त एव । अथो यस्य स्व भवति भवति हास्य स्वं य एवमेतत्साम्न स्व वेद ॥२५॥

तस्य हैतस्य । तस्येति प्रकृतं प्राणमभिसबध्नाति । हैतस्येति मुख्यं व्यपदिशत्यभिनयेन । साम्न सामशब्दवाच्यस्य प्राणस्य य स्व धनं वेद, तस्य ह किं स्यात् । भवति हास्य स्वम् । फलेन प्रलोभ्याभिमुखीकृत्य शुश्रूषवे आह — तस्य वै साम्न स्वर एव स्वम् । स्वर इति कठगत माधुर्यं तदेवास्य स्व विभूषणम् । तेन हि भूषितमृद्धिमल्लक्ष्यत उद्गानम् । यस्मादेवं तस्मादार्त्विज्य ऋत्विक्कर्मोद्गान करिष्यन्वाचि विषये वाचि वागाश्रित स्वरमिच्छेत इच्छेत् साम्नो धनवत्ता स्वरेण चिकीर्षुरुद्गाता । इदं तु प्रासगिकं विधीयते साम्न सौस्वर्यण स्वरवत्त्वप्रत्यये कर्तव्ये इच्छामात्रेण सौस्वर्यं न भवतीति, दतधावनतैलपानादि सामर्थ्यात्कर्तव्यमित्यर्थ । तयैव सस्कृतया वाचा स्वरसंपन्नयार्त्विज्यं कुर्यात् । तस्माद्यस्मात्साम्न स्वभूत स्वरस्तेन स्वेन भूषित साम । अतो यज्ञे स्वरवन्तमुद्गातार दिदृक्षन्त एव द्रष्टुमिच्छन्त एव धनिनमिव लौकिका । प्रसिद्ध हि लोकेऽर्थो अपि यस्य स्व धन भवति तं धनिन दिदृक्षन्ते इति । सिद्धस्य गुणविज्ञानफलसबधस्य उपसंहार क्रियते— भवति हास्य स्वं य एवमेतत्साम्न स्व वेदेति ॥

तस्य हैतस्य साम्नो य सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्न सुवर्णं वेद ॥२६॥

अथान्यो गुण सुवर्णवत्तालक्षणो विधीयते । असावपि सौस्वर्यमेव । एतावान्विशेष । पूर्व कठगतमाधुर्यमिद तु लाक्षणिकं सुवर्णशब्दवाच्यम् । तस्य हैतस्य साम्नो य सुवर्ण वेद भवति हास्य सुवर्णम् । सुवर्णशब्दसामान्यात्स्वरसुवर्णयो । लौकिकमेव सुवर्ण गुणविज्ञानफल भवतीत्यर्थ । तस्य वै स्वर एव सुवर्णम् । भवति हास्य सुवर्ण य एवमेतत्साम्न सुवर्ण वेदेति पूर्ववत्सर्वम् ॥

तस्य हैतस्य साम्नो य प्रतिष्ठा वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष एतत्प्राण प्रतिष्ठितो गीयतेऽन्न इत्थु हैक आहुः ॥२७॥

तथा प्रतिष्ठागुणं विधित्सन्नाह— तस्य हैतस्य साम्नो य प्रतिष्ठां वेद । प्रतितिष्ठत्यस्यामिति प्रतिष्ठा वाक्ता प्रतिष्ठा साम्नो गुणं यो वेद स प्रतितिष्ठति

ह । 'तं यथा यथोपासते' इति श्रुतेस्तद्गुणत्वं युक्तम् । पूर्ववत्फलेन प्रतिलोभिताय का प्रतिष्ठेति शुश्रूषवे आह— तस्य वै साम्नो वागेव । वागिति जिह्वामूलीयादीना स्थानानामाख्या । सैव प्रतिष्ठा । तदाह-- वाचि हि जिह्वामूलीयादिषु हि यस्मात्प्रतिष्ठित सन्नेष प्राण एतद्गान गीयते गीतिभावमापद्यते तस्मात्साम्न प्रतिष्ठा वाक् । अन्ने प्रतिष्ठितो गीयत इत्यु हैकेऽन्ये आहु । इह प्रतितिष्ठतीति युक्तम् । अनिदितत्वादेकीयपक्षस्य विकल्पेन प्रतिष्ठागुणविज्ञान कुर्यात् वाग्वा प्रतिष्ठान्न वेति ॥

अथात. पवमानानामेवाभ्यारोह. स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेत् । असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्मामृत गमयामृत मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृत मृत्योर्मामृत गमयामृत मा कुर्वित्येवैतदाह मृत्योर्मामृतं गमयेति नात्र तिरोहितमिवास्ति । अथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वर वृणीत य कामं कामयेत त स एष एवविदुद्गातात्मने वा यजमानाय वा य काम कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्यताया आशास्ति य एवमेतत्साम वेद ॥२८॥ इति तृतीय ब्राह्मणम् ॥

एवं प्राणविज्ञानवतो जपकर्म विधित्स्यते । यद्विज्ञानवतो जपकर्मण्यधिकारस्तद्विज्ञानमुक्तम् । अथानतर यस्माच्चैव विदुषा प्रयुज्यमान देवभावाया अभ्यारोहफल जपकर्म, अतस्तस्मात्तद्विधीयत इह । तस्य चोद्गीथसबधात्सर्वत्र प्राप्तौ पवमानानामिति वचनात् । पवमानेषु त्रिष्वपि कर्तव्यताया प्राप्ताया पुन कालसंकोचं करोति— स वै खलु प्रस्तोता साम प्रस्तौति । स प्रस्तोता यत्र यस्मिन्काले साम प्रस्तुयात्प्रारभेत तस्मिन्काल एतानि जपेत् । अस्य च जपकर्मण आख्या अभ्यारोह इति । आभिमुख्येनारोहत्यनेन जपकर्मणैववित् देवभावमात्मान इत्यभ्यारोह । एतानीति बहुवचनात्त्रीणि यजूंषि । द्वितीयानिर्देशात् ब्राह्मणोत्पन्नत्वाच्च यथापठित एव स्वर प्रयोक्तव्यो न मात्र । याजमान जपकर्म ॥

एतानि तानि यजूंषि— 'असतो मा सद्गमय' 'तमसो मा ज्योतिर्गमय'

'मृत्योर्मामृतं गमय' इति । मंत्राणामर्थस्तिरोहितो भवतीति स्वयमेव व्याचष्टे ब्राह्मण मन्त्रार्थम् । स मन्त्रो यदाह यदुक्तवान्कोऽसावर्थ इत्युच्यते 'असतो मा सद्गमय' इति । मृत्युर्वा असत् स्वाभाविककर्मविज्ञाने मृत्युरित्युच्येते । असत् अत्यताधोभावहेतुत्वात् । सदमृत, सच्छास्त्रीयकर्मविज्ञाने । अमरणहेतुत्वादमृतम् । तस्मादसतो असत्कर्मणोऽज्ञानाच्च मा मा सच्छास्त्रीयकर्मविज्ञाने गमय देव-भावसाधनात्मभावमापादयेत्यर्थ । तत्र वाक्यार्थमाह-अमृत मा कुर्विलेवैतदाहेति । तथा तमसो मा ज्योतिर्गमयेति । मृत्युर्वै तम सर्व ह्यज्ञानमावरणात्मकत्वात्तम तदेव च मरणहेतुत्वान्मृत्यु । ज्योतिरमृत पूर्वोक्तविपरीत दैव स्वरूपम् । प्रकाशात्मकत्वाज्ज्ञानं ज्योति , तेदवामृतमविनाशात्मकत्वात् । तस्मात्तमसो मा ज्योतिर्गमयेति । पूर्ववन्मृत्योर्मामृत गमयेत्यादि । अमृत मा कुर्विलेवैतदाह दैव प्राजापत्य फलभावमापादयेत्यर्थ । पूर्वो मन्त्रोऽसाधनस्वभावात् साधन-भावमापादयेति । द्वितीयस्तु साधनभावादपि अज्ञानरूपात् साध्यभावमापादयेति । मृत्योर्मामृत गमयेति पूर्वयोरेव मन्त्रयो समुच्चितोऽर्थस्तृतीयेन मन्त्रेणोच्यत इति प्रसिद्धार्थतैव । नात्र तृतीये मन्त्रे तिरोहितमतर्हितमिवार्थरूप पूर्वयोरिव मन्त्रयो-रस्ति, यथाश्रुत एवार्थ ॥

याजमानमुद्गानं कृत्वा पवमानेषु त्रिषु, अथानंतरं यानातराणि शिष्टानि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत् । प्राणाविदुद्गाता प्राणभूत प्राणवदेव । यस्मात्स एष उद्गातैव प्राण यथोक्त वेत्ति, अत प्राणवदेव त काम साधयितु समर्थ । तस्माद्यजमानस्तेषु स्तोत्रेषु प्रयुज्यमानेषु वरं वृणीत, यं काम काम-येत त काम वर वृणीत प्रार्थयेत । यस्मात्स एष एवविदुद्गातेति तस्माच्छब्दा-दप्रागेव सबध्यते । आत्मने वा यजमानाय वा य काम कामयते इच्छत्युद्गाता तमागायत्यागानेन साधयति ॥

एव तावज्ज्ञानकर्मभ्या प्राणात्मापत्तिरित्युक्तम् । तत्र नास्त्याशकासंभव । अत कर्मापाये प्राणापत्तिर्भवति वा न वेत्याशक्यते । तदाशंकानिवृत्त्यर्थमाह— तद्धैतल्लोकजिदेवेति । तद्ध तदेतत्प्राणदर्शन कर्मवियुक्त केवलमपि, लोकजिदेवेति लोकसाधनमेव । न ह एवालोक्यतायै अलोकार्हत्वाय आशा आशंसनं प्रार्थनं नैवास्ति ह । न हि प्राणात्मनि उत्पन्नात्माभिमानस्य तत्प्राप्त्याशंसनं संभवति । न हि ग्रामस्थ कदा ग्रामं प्राप्नुयामित्यरण्यस्थ इवाशास्ते ।

असन्निकृष्टविषये ह्यनात्मन्याशासन, न तत्स्वात्मनि संभवति । तस्मान्नाशास्ति कदाचित्प्राणात्मभाव न प्रपद्येयमिति ॥

कस्यैतत् । य एवमेतत्साम प्राण यथोक्त निर्धारितमहिमान वेद— अहमस्मि प्राण इद्रियविषयासगैरासुरै पाप्मभिरधर्षणीयो विशुद्धो, वागादिपचक च मदाश्रयत्वादन्याद्यात्मरूप स्वाभाविकविज्ञानोत्थेद्रियविषयासगजनितासुरपाप्मदोषवियुक्त, सर्वभूतेषु च मदाश्रयान्नाद्योपयोगबधन, आत्मा चाह सर्वभूतानामागिरसत्वात, ऋग्यजु सामोद्गीथभूतायाश्च वाच आत्मा तद्व्याप्तेस्तन्निर्वर्तकत्वाच्च, मम साम्नो गीतिभावमापद्यमानस्य बाह्य धन भूषण सौस्वर्य, ततोऽप्यान्तरं सौवर्ण्य लाक्षणिक सौस्वर्य, गीतिभावमापद्यमानस्य मम कठादिस्थानानि प्रतिष्ठा । एवगुणोऽह पुत्तिकादिशरीरेषु कात्स्न्येन परिसमाप्तोऽमूर्तत्वात्सर्वगतत्वाच्च— इति आ एवमभिमानाभिव्यक्तेर्वेदोपास्त इत्यर्थ ॥ इति तृतीय ब्राह्मणम् ॥ १३ —

आत्मैवेदमग्र आसीत्पुरुषविध सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहनामाभवत्तस्मादप्येतर्ह्यामत्रितोऽहमयमित्येवाग्र उक्त्वाथान्यन्नाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष ओषति ह वै स त योऽस्मात्पूर्वो बुभूषति य एव वेद ॥१॥

आत्मैवेदमग्र आसीत् । ज्ञानकर्मभ्या समुच्चिताभ्या प्रजापतित्वप्राप्तिर्व्याख्याता । केवलप्राणदर्शनेन च 'तद्धैतल्लोकजिदेव' इत्यादिना । प्रजापते फलभूतस्य सृष्टिस्थितिसहारेषु जगत स्रातव्यादिविभूत्युपवर्णनेन ज्ञानकर्मणोर्वैदिकयो फलोत्कर्षो वर्णयितव्य इत्येवमर्थमारभ्यते । तेन च कर्मकाडविहितज्ञानकर्मस्तुति कृता भवेत्सामर्थ्यात् विवक्षित त्वेतत्— सर्वमप्येतज्ज्ञानकर्मफल ससार एव, भयारत्यादियुक्तत्वश्रवणात् कार्यकरणलक्षणत्वाच्च स्थूलव्यक्तानित्यविषयत्वाच्चेति । ब्रह्मविद्याया केवलाया वक्ष्यमाणाया मोक्षहेतुत्वमित्युत्तरार्थं चेति । न हि संसारविषयात्साध्यसाधनादिभेदलक्षणात् अविरक्तस्य आत्मैकत्वज्ञानविषयेऽधिकार अतृषितस्येव पाने । तस्माज्ज्ञानकर्मफलोत्कर्षोपवर्णनमुत्तरार्थम् । तथाच वक्ष्यति— 'तदेतत्पदनीयमस्य' 'तदेतत्प्रेयः पुत्रात्' इत्यादि ॥

आत्मैवात्मेति प्रजापति प्रथमोऽण्डज शरीर्यभिधीयते । वैदिकज्ञान-

कर्मफलभूत स एव । किं इदं शरीरभेदजातं तेन प्रजापतिशरीरेणाविभक्त आत्मैवासीदग्रे प्राक्शरीरान्तरोत्पत्ते । स च पुरुषविध पुरुषप्रकार शिर-पाण्यादिलक्षणो विराट् स एव प्रथम सभूतोऽनुवीक्ष्यान्वालोचनं कृत्वा, कोऽहं किंलक्षणो वास्मीति, नान्यद्वस्त्वंतर आत्मन प्राणापिडात्मकात्कार्यकरणरूपान्न अपश्यन्न ददर्श । केवल त्वात्मानमेव सर्वात्मानमपश्यत् । तथा पूर्वजन्मश्रौत-विज्ञानसस्कृत , सोऽह प्रजापति सर्वात्माहमस्मीत्यग्रे व्याहरद्व्याहृतवान् । तत-स्तस्माद्यत पूर्वज्ञानसस्कारात् आत्मानमेवाहमित्यभ्यधादग्रे तस्मादहनामाभवत् । तस्योपनिषदहमिति श्रुतिप्रदर्शितमेव नाम वक्ष्यति । तस्माद्यस्मात्कारणे प्रजा-पतावेव वृत्तं तस्मात्, तत्कार्यभूतेषु प्राणिषु एतर्ह्येतस्मिन्नपि काल आमन्त्रित कस्त्वामित्युक्त सन्नहमयमित्येवाग्र उक्त्वा कारणात्माभिधानेन आत्मानमभिधा-यात्रे पुनर्विशेषनामजिज्ञासायेऽभ्यानतर विशेषपिडाभिधान देवदत्तो यज्ञदत्तो वेति प्रश्नूते कथयति यन्नामास्य विशेषपिडस्य मातापितृकृत भवति तत्कथयति ॥

स च प्रजापतिरतिक्रान्तजन्मनि सम्यक्कर्मज्ञानभावनानुष्ठानै साधकाव-स्थाया यद्यस्मात्कर्मज्ञानभावनानुष्ठानै प्रजापतित्व प्रतिपित्सूना पूर्व प्रथम सन् अस्मात्प्रजापतित्वप्रतिपित्सुसमुदायात्सर्वस्मात् आदौ औषददहत् । किं आसगाज्ञानलक्षणान्सर्वान्पाप्मन प्रजापतित्वप्रतिबधकारणभूतान् । यस्मादेवं तस्मात्पुरुष , पूर्वमौषदिति पुरुष । यथाय प्रजापतिरौषित्वा प्रतिबंधकान्पा-प्मन सर्वान्पुरुष । प्रजापतिरभवत्, एवमन्योऽपि ज्ञानकर्मभावनानुष्ठानवह्निना केवल ज्ञानबलाद्दहति भस्मीकरोति ह वै स त, क, योऽस्माद्विदुष पूर्व प्रथम प्रजापतिर्बुभूषति भवितुमिच्छति तमित्यर्थ । तं दर्शयति य एवं वेदेति । सामर्थ्याज्ज्ञानभावनाप्रकर्षवान् । नन्वनर्थाय प्राजापत्यप्रतिपित्सा, एवविदा चेद्द-ह्यते । नैष दोष । ज्ञानभावनोत्कर्षाभावात्प्रथम प्रजापतित्वप्रतिपत्त्यभावमात्र-त्वाद्दाहस्य । उत्कृष्टसाधन प्रथम प्रजापतित्व प्राप्नुवन् न्यूनसाधनो न प्राप्नो-तीति, स तं दहतीत्युच्यते । न पुन प्रत्यक्षमुत्कृष्टसाधनेन इतरो दह्यते । यथा लोके आजिसृता य प्रथममाजिमुपसर्पति तेनेतरे दग्धा इवापहृतसामर्थ्या भवन्ति तद्वत् ॥

यदिदं तुष्टूषितं कर्मकाडविहितज्ञानकर्मफलं प्राजापत्यलक्षण नैव तत्संसार-विषयमत्यक्रामदितीममर्थं प्रदर्शयिष्यन्नाह—

सोऽबिभेत्तस्मादेकाकी बिभेति स हायमीक्षां चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भय वीयाय कस्माद्ध्यभेष्यद्द्वितीयाद्वै भय भवति ॥२॥

सोऽबिभेत्स प्रजापतिर्योऽय प्रथम शरीरी पुरुषविधो व्याख्यात । सोऽबिभेद्भीतवानस्मदादिवदेवेत्याह । यस्मादय पुरुषविध शरीरकरणवान् आत्मनाशविपरीतदर्शनवत्त्वात् अबिभेत् । तस्मात्तत्सामान्यादद्यत्वेऽप्येकाकी बिभेति । किचास्मदादिवदेव भयहेतुविपरीतदर्शनापनोदकारण यथाभूतात्मदर्शनम् । सोऽयं प्रजापतिरीक्षामीक्षण चक्रे कृतवान्ह । कथमित्याह— यद्यस्मान्मत्तोऽन्यदात्मव्यतिरेकेण वस्त्वतरं प्रातिद्वद्वीभूत नास्ति, तस्मिन्नात्मविनाशहेत्वभावे कस्मान्नु बिभेमाति । तत एव यथाभूतात्मदर्शनादस्य प्रजापतेर्भय वीयाय विस्पष्टमपगतवत् । तस्य प्रजापतेर्यद्भय तत्केवलाविद्यानिमित्तमेव परमार्थदर्शनेऽनुपपन्नमित्याह — कस्माद्ध्यभेष्यत् किमित्यसौ भीतवान्परमार्थनिरूपणाया भयमनुपपन्नमेवेत्यभिप्राय । यस्मात् द्वितीयाद्वस्त्वतराद्वै भयं भवति । द्वितीय च वस्त्वंतरमविद्याप्रत्युपस्थापितमेव । नह्यदृश्यमानं द्वितीय भयजन्मनो हेतु 'तत्र को मोह क शोक एकत्वमनुपश्यत ' इति मंत्रवर्णात् । यच्चैकत्वदर्शनेन भयमपनुनोदापनोदितं तद्युक्तम् । कस्मात् । द्वितीयाद्वस्त्वंतराद्वै भयं भवति, तदेकत्वदर्शनेन द्वितीयदर्शनमपनीतमिति नास्ति यत ॥

अत्र चोदयन्ति— कुत प्रजापतेरेकत्वदर्शनं जातं? को वास्मै उपदिदेश? अथानुपदिष्टमेव प्रादुरभूत्, अस्मदादेरपि तथा प्रसंग । अथ जन्मान्तरकृतसंस्कारहेतुकम् । एकत्वदर्शनानर्थक्यप्रसंग । यथा प्रजापतेरतिक्रान्तजन्मावस्थस्य एकत्वदर्शनं विद्यमानमप्यविद्याबधकारण नापनिन्ये, यतः अविद्यासंयुक्त एवाय जातोऽबिभेत्, एवं सर्वेषामेकत्वदर्शनानर्थक्य प्राप्नोति । अंत्यमेव निवर्तकमिति चेत् । न । पूर्ववत्पुन प्रसगेनानैकान्त्यात् । तस्मादनर्थकमेवैकत्वदर्शनमिति ॥

नैष दोष । उत्कृष्टहेतूद्भवत्वाल्लोकवत् । यथा पुण्यकर्मोद्भवैर्विविक्तै कार्यकरणै सयुक्ते जन्मनि सति प्रज्ञामेधास्मृतिवैशारद्यं दृष्टं, तथा प्रजापते धर्मज्ञानवैराग्यैश्वर्यविपरीतहेतुसर्वपाप्मदाहात् विशुद्धै कार्यकरणै सयुक्तमुत्कृष्ट जन्म, तदुद्भवं चानुपदिष्टमेव युक्तमेकत्वदर्शनं प्रजापते· । तथाच

स्मृति — "ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पते । ऐश्वर्यं चैव धर्मश्च सहासिद्धं चतुष्टयम् ॥" इति । सहासिद्धत्वे भयानुपपत्तिरिति चेत् । न ह्यादित्येन सह तम उदेति । न । अन्यानुपदिष्टार्थत्वात्सहासिद्धवाक्यस्य । श्रद्धातात्पर्यप्राणिपातादीना अहेतुत्वमिति चेत् । स्यान्मतम् — "श्रद्धावाँल्लभते ज्ञान तत्पर सयतेंद्रिय." "तद्विद्धि प्रणिपातेन" इत्येवमादीना श्रुतिस्मृतिविहिताना ज्ञानहेतूनामहेतुत्व, प्रजापतेरिव जन्मान्तरकृतधर्महेतुत्वे ज्ञानस्येति चेत् । न । निमित्तविकल्पसमुच्चयगुणवदगुणवत्त्वभेदोपपत्ते । लोके हि नैमित्तिकाना कार्याणा निमित्तभेदोऽनेकधा विकल्प्यते । तथा निमित्तसमुच्चय । तेषा च विकल्पिताना समुच्चिताना च पुनर्गुणवदगुणवत्त्वकृतो भेदो भवति । तद्यथा रूपज्ञान एव तावन्नैमित्तिके कार्ये तमसि विनाऽऽलोकेन चक्षूरूपसनिकर्षो नक्तचराणा रूपज्ञाने निमित्तं भवति । मन एव केवल रूपज्ञाननिमित्त योगिनाम् । अस्माक तु संनिकर्षालोकाभ्या सह तथादित्यचंद्राद्यालोकभेदै समुच्चिता निमित्तभेदा भवन्ति । तथा आलोकविशेषगुणवदगुणवत्त्वेन भेदा स्यु । एवमेव आत्मैकत्वज्ञानेऽपि क्वचिज्जन्मान्तरकृत कर्म निमित्त भवति । यथा प्रजापते । क्वचित्तपो निमित्तम् । 'तपसा ब्रह्म विजिज्ञासस्व' इति श्रुते । क्वचित् 'आचार्यवान्पुरुषो वेद' "श्रद्धावाँल्लभते ज्ञानम्" "तद्विद्धि प्रणिपातेन" 'आचार्याद्धैव' 'द्रष्टव्य श्रोतव्य' इत्यादिश्रुतिस्मृतिभ्य एकान्तज्ञानलाभनिमित्तत्वम् । श्रद्धाप्रभृतीना अधर्मादिनिमित्तवियोगहेतुत्वात् । वेदान्तश्रवणमननानिदिध्यासनाना च साक्षाज्ज्ञेयविषयत्वात् । पापादिप्रतिबधक्षये चात्ममनसो भूतार्थज्ञाननिमित्तस्वाभाव्यात् । तस्मादहेतुत्व न जातु ज्ञानस्य श्रद्धाप्राणिपातादीनामिति ॥

स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् । स हैतावानास यथा स्त्रीपुमांसौ सपरिष्वक्तौ स इममेवात्मान द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवता तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव तां समभवत्ततो मनुष्या अजायन्त ॥३॥

इतश्च संसारविषय एव प्रजापतित्व, यत स प्रजापतिर्वै नैव रेमे रति नान्वभवत् अरत्याविष्टोऽभूदित्यर्थ , अस्मदादिवदेव यत , इदानीमपि तस्मा-

देकाकित्वादिधर्मवत्त्वादेकाकी न रमते रति नानुभवति । रतिर्नामेष्टार्थसंयोगजा क्रीडा । तत्प्रसंगिन इष्टवियोगान्मनस्याकुलीभावोऽरतिरित्युच्यते । स तस्या अरतेरपनोदाय द्वितीय अरत्यपघातममर्थं स्त्रीवस्त्वैच्छत् गृद्धिमकरोत् । तस्य चैवं स्त्रीविषय गृध्यत स्त्रिया परिष्वक्तस्येवात्मनो भावो बभूव । स तेन सत्येप्सुत्वात् एतावानेतत्परिमाण आस बभूव ह । किंपरिमाण इत्याह— यथा लोके स्त्रीपुमासौ अरत्यपनोदाय सपरिष्वक्तौ यत्परिमाणौ स्याता तथा तत्परिमाणो बभूवेत्यर्थ । स तथा तत्परिमाणमेव इममात्मान द्वेधा द्विप्रकारमपातयत्पातितवान् । इममेवेत्यवधारण मूलकारणाद्विराजो विशेषणार्थम् । न क्षीरस्य सर्वोपमर्देन दधिभावापत्तिवद्विराट् सर्वोपमर्देनैतावानास । किं तर्हि ? आत्मना व्यवस्थितस्यैव विराज सत्यसंकल्पत्वादात्मव्यतिरिक्त स्त्रीपुंसपरिष्वक्तपरिमाण शरीरान्तर बभूव । स एव च विराट् तथाभूत स हैतावानासेति सामानाधिकरण्यात् । ततस्तस्मात्पातनात्पतिश्च पत्नी चाभवतामिति दपत्यो निर्वचनं लौकिकयो । अत एव तस्मात्, यस्मादात्मन एवार्ध पृथग्भूतो येयं स्त्री, तस्मात् इद शरीरमात्मनोऽर्धबृगलमर्ध च तत् बृगल विदल च तदर्धबृगलं अर्धविदलमिवेत्यर्थ । प्राक्स्त्र्युद्बृहनात्कस्यार्धबृगलमित्युच्यते— स्व आत्मन इति । एवमाह स्मोक्तवान्किल याज्ञवल्क्यो, यज्ञस्य वल्को वक्ता यज्ञवल्कस्तस्यापत्यं याज्ञवल्क्यो देवरातिरित्यर्थ । ब्रह्मणो वापत्य यस्मादय पुरुषार्ध आकाश स्त्र्यर्थशून्य , पुनरुद्बृहनात्तस्मात्पूर्यते स्त्र्यर्थेन, पुन सपुटीकरणेनेव विदलार्ध । ता स प्रजापतिर्मन्वाख्य शतरूपाख्यामात्मनो दुहितरं पत्नीत्वेन कल्पिता ममभवन्मैथुनमुपगतवान् । ततस्तस्मात्तदुपगमनात् मनुष्या अजायन्तोत्पन्ना ॥

सो हेयमीक्षाचक्रे कथं नु मात्मन एव जनयित्वा संभवति हन्त तिरोऽसानीति सा गौरभवद्दषभ इतरस्तां समेवाभवत्ततो गावोऽजायन्त वडवेतराभवदश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्तां समेवाभवत्तत एकशफमजायताजेतरा भवद्वस्त इतरोऽविरितरा मेष इतरस्तां समेवाभवत्ततोऽजावयोऽजायन्तैवमेव यदिदं किंच मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजत ॥४॥

सा शतरूपा उ ह इयं सेयं दुहितृगमने स्मार्तं प्रतिषेधमनुस्मरन्तीक्षाचक्रे । कथं न्विदमकृत्यं यन्मा मामात्मन एव जनयित्वोत्पाद्य सभवत्युपग-

च्छति । यद्यप्ययं निर्घृणोऽहं हतेदानीं तिरोऽस्मानि जात्यंतरेण तिरस्कृता भवानि । इत्येवमीक्षित्वासौ गौरभवत् । उत्पाद्य प्राणिकर्मभिश्चोद्यमानाया पुन पुन सैव मति शतरूपाया मनोश्चाभवत् । ततश्च ऋषभ इतर । ता समेवाभ वदित्यादि पूर्ववत् । ततो गावोऽजायन्त । तथा वडवेतराभवदश्वतृष इतर । तथा गर्दभीतरा गर्दभ इतर । तत्र वडवाश्वतृषादीना सगमात्तत एकशफमेक-खुर अश्वाश्वतरगर्दभाख्य त्रयमजायत । तथा अजेतराभवद्वस्तश्छाग इतर । तथा अविरितरा मेष इतर । ता समेवाभवत् । ता तामिति वीप्सा । तामजा तामवि चेति समभवदेवेत्यर्थ । ततोऽजाश्चावयश्चाजावयोऽजायन्त । एवमेव यदिद किंच यत्किंचेदं मिथुन स्त्रीपुसलक्षण द्वद्व, आ पिपीलिकाभ्य पिपीलि-काभि सहानेनैव न्यायेन तत्सर्वमसृजत जगत्सृष्टवान् ॥

सोऽवेदह वाव सृष्टिरस्यह हीद सर्वमसृक्षीति तत सृष्टिरभवत्सृष्ट्या ह्यस्यैतस्या भवति य एव वेद ॥५॥

स प्रजापति सर्वमिदं जगत्सृष्ट्वाऽवेत् । कथम् । अह वावाहमेव सृष्टि, सृज्यते इति सृष्ट जगदुच्यते सृष्टिरिति । यन्मया सृष्ट जगन्मदभेदत्वादहमे-वास्मि न मत्तो व्यतिरिच्यते । कुत एतत । अह हि यस्मादिद सर्व जगद-सृक्षि सृष्टवानस्मि तस्मादित्यर्थ । यस्मात्सृष्टिशब्देन आत्मानमेवाभ्यवात्प्रजा-पति ततस्तस्मात्सृष्टिरभवत् सृष्टिनामाभवत् । सृष्ट्या जगति ह्यस्य प्रजापतेरेतस्या-मेतस्मिञ्जगति, स प्रजापतिवत्स्रष्टा भवति स्वात्मनोऽनन्यभूतस्य जगत । क । य एवं प्रजापतिवद्यथोक्त स्वात्मनोऽनन्यभूत जगत्साध्यात्माधिभूताधिदैव जग-दहमस्मीति वेद ॥

अथेत्यभ्यमथत्स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभय-मलोमकमंतरतोऽलोमका हि योनिरतरत । तद्यदिदमाहुरमुं यजामु यजे-त्येकैक देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा. । अथ यत्किंचेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इद सर्वमन्नं चैवान्नादश्च सोम एवान्न-माग्निरन्नादः सैषा ब्रह्मणोऽतिसृष्टि. । यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्यां ह्यस्यैतस्यां भवति य एवं वेद ॥६॥

एव स प्रजापतिर्जगदिदं मिथुनात्मकं सृष्ट्वा ब्राह्मणादिवर्णनियंत्री देवता-

सिसृक्षुरादौ । अथेति शब्दद्वयमभिनयप्रदर्शनार्थम् । अनेन प्रकारेण मुखे हस्तौ प्रक्षिप्याभ्यमंथदाभिमुख्येन मंथनमकरोत् । स मुख हस्ताभ्या मथित्वा मुखाच्च योनेर्हस्ताभ्या च योनिभ्यामग्नि ब्राह्मणजातेरनुग्रहकर्तारमसृजत सृष्टवान् । यस्मा द्दाहकस्याग्नेर्योनिरेतदुभय हस्तौ मुख च, तस्मादुभयमप्येतदलोमक लोमविवाजितम् । कि सर्वमेव । न । अतस्तोऽन्यतरत । अस्ति हि योन्या सामान्यमुभयस्यास्य । किम् । अलोमका हि योनिरतरत स्त्रीणाम् । तथा ब्राह्मणोऽपि मुखादेव जज्ञे प्रजापते । तस्मादेकयोनित्वात् ज्येष्ठेनेवानुजोऽनुगृह्यते अग्निना ब्राह्मण । तस्माद्ब्राह्मणोऽग्निदेवत्यो मुखवीर्यश्चेति श्रुतिस्मृतिसिद्धम् । तथा बलाश्रयाभ्या बाहुभ्या बलभिदादिक क्षत्रियजातिनियंतार क्षत्रिय च । तस्मादिद्र क्षत्र बाहुवीर्य चेति श्रुतौ स्मृतौ चावगतम् । तथोरुत ईहा चेष्टा तदाश्रयाद्वैश्यादिलक्षण विशो नियंतार विश च । तस्मात्कृष्यादिपरो वस्वादिदेवत्यश्च वैश्य । तथा पूषण पृथ्वीदैवत शूद्र च पद्भ्या परिचरणक्षममसृजतेति श्रुतिस्मृतिप्रसिद्धे । तत्र क्षत्रादिदेवतासर्गमिहानुक्त वक्ष्यमाणमप्युक्तवदुपसंहरति सृष्टिसाकल्यानुकीर्त्यै । यथेय श्रुतिर्व्यवस्थिता तथा प्रजापतिरेव सर्वे देवा इति निश्चितोऽर्थ । स्रष्टुरनन्यत्वात्सृष्टानाम् । प्रजापतिनैव तु सृष्टत्वाद्देवानाम् ।

अथैव प्रकरणार्थे व्यवस्थिते तत्स्तुत्यभिप्रायेणाविद्वन्मतान्तरनिदोपन्यास । अन्यनिदाऽन्यस्तुतये । तत्तत्र कर्मप्रकरणे केवलयाज्ञिका यागकाले यदिद वच आहु अमुमग्नि यजामुमिद्र यज इत्यादि नामशस्त्रस्तोत्रकर्मादिभिन्नत्वाद्भिन्नमेवाग्न्यादिदेवमेकैक मन्यमाना आहुरित्यभिप्राय । तन्न तथा विद्यात् । यस्मादेतस्यैव प्रजापते सा विसृष्टिर्देवभेद सर्व एष उ ह्येव प्रजापतिरेव प्राण सवे देवा ।

अत्र विप्रतिपद्यन्ते । पर एव हिरण्यगर्भ इत्येके । ससारीत्यपरे । पर एव तु मत्रवर्णात् । "इद्र मित्र वरुणमग्निमाहु" इति श्रुते । "एष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा" इति च श्रुते । स्मृतेश्च— "एतमेके वदन्त्यग्नि मनुमन्ये प्रजापतिम्" इति, "योऽसावतींद्रियोऽग्राह्य सूक्ष्मोऽव्यक्त सनातन । सर्वभूतमयोऽचिंत्य स एव स्वयमुद्बभौ" इति च । ससार्येव वा स्यात् । 'सर्वान्पाप्मन औषत' इति श्रुते । न ह्यससारिण पाप्मदाहप्रसगोऽस्ति ।

भयारतिसंयोगश्रवणाच्च । 'अथ यन्मर्त्यं सन्नमृतानसृजत' इति च । 'हिरण्यगर्भं पश्यत जायमानम्' इति च मंत्रवर्णात् । स्मृतेश्च कर्मविपाकप्रक्रियायाम्— "ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च । उत्तमा सात्विकीमेता गतिमाहुर्मनीषिण " इति ॥

अथैव विरुद्धार्थानुपपत्ते प्रामाण्यव्याघात इति चेत् । न । कल्पनान्तरोपपत्तेरविरोधात् । उपाधिविशेषसबधाद्विशेषकल्पनान्तरमुपपद्यते । 'आसीनो दूरं व्रजति शयानो याति सर्वत । कस्त मदामद देव मदन्यो ज्ञातुमर्हति ॥" इत्येवमादिश्रुतिन्याय उपाधिवशात्ससारित्व न परमार्थत । स्वतोऽससार्येव । एवमेकत्व नानात्व च हिरण्यगर्भस्य । तथा सर्वजीवानाम् । 'तत्त्वमसि' इति श्रुते । हिरण्यगर्भस्तु उपाधिशुद्ध्यतिशयापेक्षया प्रायश पर एवेति श्रुतिस्मृतिवादा प्रवृत्ता । संसारित्व तु क्वचिदेव दर्शयन्ति । जीवाना तु उपाधिगताशुद्धिबाहुल्यात्संसारित्वमेव प्रायशोऽभिलप्यते । व्यावृत्तकृत्सोपाधिभेदापेक्षया तु सर्व परत्वेनाभिधीयते श्रुतिस्मृतिवादै ॥

तार्किकैस्तु परित्यक्तागमबलैरस्ति नास्ति कर्ताऽकर्तेत्यादि विरुद्ध बहु तर्कयद्भिराकुलीकृत शास्त्रार्थ । तेनार्थनिश्चयो दुर्लभ । ये तु केवलशास्त्रानुसारिण शान्तदर्पास्तेषा प्रत्यक्षविषय इव निश्चित शास्त्रार्थो देवतादिविषय ॥

तत्र प्रजापतेरेकस्य देवमन्यान्नादिलक्षणो भेदो विवक्षित इति । तत्राग्निरुक्तोऽन्नादोऽन्नाद्य सोम इदानीमुच्यते । एकस्यैव प्रजापते द्विधोपास्यत्वायाग्निसर्गमुक्त्वा अन्नसर्गमाह— अथ यत्किंचेद लोक आर्द्र द्रवात्मक तद्रेतस आत्मनो बीजादसृजत । 'रेतस आप' इति श्रुते । द्रवात्मकश्च सोम । तस्माद्यदार्द्र प्रजापतिना रेतस सृष्ट तदु सोम एव । एतावद्वै एतावदेव नातोऽधिकमिद सर्वम् । कि तत् । अन्नं चैव सोमो द्रवात्मकत्वादाप्यायकम् । अन्नादश्चाग्निरौष्ण्यात् रूक्षत्वाच्च । तत्रैवमवधियते, सोम एवान्न यदद्यते तदेव सोम इत्यर्थ । य एवात्ता स एवाग्नि । अर्थबलाद्धवधारणम् । अग्निरपि क्वचित् हूयमान सोमपक्षस्यैव । सोमोऽपीज्यमानोऽग्नेरेवातृत्वात् । एवमग्नीषोमात्मक जगदात्मत्वेन पश्यन्न केनचिद्दोषेण लिप्यते । प्रजापतिश्च भवति । सैषा ब्रह्मण प्रजापतेरतिसृष्टिरात्मनोऽप्यतिशया । का सेत्याह— यच्छ्रेयस प्रशस्यतरानात्मन सकाशाद्यस्मादसृजत देवास्तस्माद्देवसृष्टिरतिसृष्टिः । कथ

पुनरात्मनोऽतिशया सृष्टिरित्यत आह— अथ यद्यस्मान्मर्त्य सन्मरणधर्मा सन्नमृतानमरणधर्मिणो देवान् कर्मज्ञानवह्निना सर्वानात्मन पाप्मन ओषित्वा ऽसृजत, तस्मादियमतिसृष्टिरुत्कृष्टज्ञानस्य फलमित्यर्थ । तस्मादेतामतिसृष्टि प्रजापतेरात्मभूता यो वेद स एतस्यामतिसृष्ट्या प्रजापतिरिव भवति प्रजापतिवदेव स्रष्टा भवति ॥

तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौनामायमिदंरूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौनामाऽयमिदरूप इति स एष इह प्रविष्ट । आ नखाग्रेभ्यो यथा क्षुर क्षुरधानेऽवहित स्याद्विश्वभरो वा विश्वभरकुलाये त न पश्यन्ति । अकृत्स्नो हि स प्राणनेव प्राणो नाम भवति । वदन्वाक्पश्यश्चक्षु श्रृण्वञ्श्रोत्र मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव । स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एक भवन्ति । तदेतत्पदनीयमस्य सर्वस्य यदयमात्मानेन ह्येतत्सर्व वेद । यथा वै पदेनानुविदेदेवं कीर्ति श्लोक विदते य एव वेद ॥७॥

तद्धेद तर्ह्यव्याकृतमासीत् सर्व वैदिक साधन ज्ञानकर्मलक्षण कर्त्राद्यनेककारकापेक्ष प्रजापतित्वफलावसान साध्यमेतावदेव यदेतद्व्याकृत जगत्ससार । अथैतस्यैव साध्यसाधनलक्षणस्य व्याकृतस्य जगतो व्याकरणात्प्राग्बीजावस्थाया ता निर्दिदिक्षत्यंकुरादिकार्यानुमितामिव वृक्षस्य, कर्मबीजोऽविद्याक्षेत्रो ह्यसौ संसारवृक्ष समूल उद्धर्तव्य इति । तदुद्धरणे हि पुरुषार्थपरिसमाप्ति । तथाचोक्त— 'ऊर्ध्वमूलोऽवाक्शाख ' इति काठके । गीतासु च "ऊर्ध्वमूलमध शाखम्" इति । पुराणे च— "ब्रह्मवृक्ष सनातन ' इति । तद्धेदं तदिति बीजावस्थ जगत्प्रागुत्पत्तेस्तर्हि तस्मिन्काले । परोक्षत्वात्सर्वनाम्नाऽप्रत्यक्षाभिधाने नाभिधीयते । भूतकालसबधित्वादव्याकृतभाविनो जगत । सुखग्रहणार्थमेतिश्चप्रयोगो हशब्द । एव ह तदा आसीदित्युच्यमाने सुख ता परोक्षामपि जगतो बीजावस्था प्रतिपद्यते युधिष्ठिरो ह किल राजासीदित्युक्ते यद्वत् । इदमिति व्याकृतनामरूपात्मक साध्यसाधनलक्षण यथावणितमभिधीयते । तदिदंशब्दयो परोक्षप्रत्यक्षावस्थजगद्वाचकयो सामानाधिकरण्यादेकत्वमेव परोक्षप्रत्यक्षावस्थस्य जगतोऽवगम्यते । तदेवेदमिदमेव च तदव्याकृतमासीदिति ।

अथैवं सति नासत उत्पत्तिर्न सतो विनाश कार्यस्येत्यवधृतं भवति । तदेवभूत जगदव्याकृत सन्नामरूपाभ्यामेव नाम्ना रूपेणैव च व्याक्रियत । व्याक्रियतेति कर्मकर्तृप्रयोगात्तत्स्वयमेवात्मैव व्याक्रियत, वि आ अक्रियत, विस्पष्ट नामरूपविशेषावधारणमर्याद व्यक्तीभावमापद्यत । सामर्थ्यादाक्षिप्तनियतृकर्तृसाधनक्रियानिमित्तम् । असौनामेति सर्वनाम्नाऽविशेषाभिधानेन नाममात्र व्यपदिशति । देवदत्तो यज्ञदत्त इति वा नामास्य इत्यसौनामाऽयम् । तथेदमिति शुक्लकृष्णादीनामविशेष । इद शुक्लमिद कृष्ण वा रूपमस्येतीदरूप । तदिदमव्याकृत वस्तु एतर्ह्येतस्मिन्नपि काले नामरूपाभ्यामेव व्याक्रियते असौनामाऽयमिदरूप इति । यदर्थ सर्वशास्त्रारभो, यस्मिन्नावेद्यया स्वाभाविक्या कर्तृक्रियाफलाध्यारोपणा कृता, य कारण सर्वस्य जगतो, यदात्मके नामरूपे सलिलादिव स्वच्छान्मलमिव फेनमव्याकृते व्याक्रियेते, यश्च ताभ्या नामरूपाभ्या विलक्षण स्वतो नित्यशुद्धबुद्धमुक्तस्वभाव स एषोऽव्याकृते आत्मभूते नामरूपे व्याकुर्वन्ब्रह्मादेस्तंबपर्यतेषु देहेष्विह कर्मफलाश्रयेष्वशनायादिमत्सु प्रविष्ट ॥

ननु अव्याकृत स्वयमेव व्याक्रियतेत्युक्त, कथमिदमिदानामुच्यते, पर एव त्वात्माऽव्याकृतं व्याकुर्वन्निह प्रविष्ट इति । नैष दोष । परस्यात्मनोऽव्याकृतजगदात्मत्वेन विवक्षितत्वात् । आक्षिप्तनियंतृकर्तृक्रियानिमित्तं हि जगदव्याकृतं व्याक्रियतेत्यवोचाम । इदशब्दसामानाधिकरण्याच्चाव्याकृतशब्दस्य । यथेद जगन्नियत्राद्यनेककारकनिमित्तादिविशेषवद्व्याकृत तथा अपरित्यक्तान्यतमविशेषवदेव तदव्याकृतम् । व्याकृताव्याकृतमात्र तु विशेष । दृष्टश्च लोके विवक्षात शब्दप्रयोगो ग्राम आगतो ग्राम शून्य इति । कदाचित् ग्रामशब्देन निवासमात्रविवक्षाया ग्राम शून्य इति शब्दप्रयोगो भवति, कदाचिन्निवासिजनविवक्षाया ग्राम आगत इति, कदाचिदुभयविवक्षायामपि ग्रामशब्दप्रयोगो भवति ग्राम च न प्रविशेदिति यथा । तद्वदिहापि जगदिद व्याकृतमव्याकृत चेत्यभेदविवक्षाया आत्मानात्मनोर्भवति व्यपदेश । तथेद जगदुत्पत्तिविनाशात्मकमिति केवलजगद्व्यपदेश । तथा 'महानज आत्मा' 'अस्थूलोऽनणु' 'स एष नेति नेति' इत्यादि केवलात्मव्यपदेश ॥

ननु परेण व्याकर्त्रा व्याकृत सर्वतो व्याप्त सर्वदा जगत् । स कथमिह प्रविष्ट परिकल्प्यते । अप्रविष्टो हि देश परिच्छिन्नेन प्रवेष्टु शक्यते । यथा

पुरुषेण ग्रामादि । नाकाशेन किंचिन्नित्यप्रविष्टत्वात् । पाषाणसर्पादिवद्धर्मान्तरेणेति चेत् । अथापि स्यात् । न पर आत्मा स्वेनैव रूपेण प्रविवेश, किं तर्हि, तत्स्थ एव धर्मान्तरेणोपजायते, तेन प्रविष्ट इत्युपचर्यते । यथा पाषाणे सहजोऽन्तस्थ सर्पो नालिकेरे वा तोयम् । न । 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुते । य स्रष्टा स भावान्तरमनापन्न एव कार्य सृष्ट्वा पश्चात्प्राविशदिति हि श्रूयते। यथा भुक्त्वा गच्छतीति भुजिगमिक्रिययो पूर्वापरकालयोरितरेतरविच्छेदोऽविशिष्टश्च कर्ता तद्वदिहापि स्यात् । नतु तत्स्थस्यैव भावान्तरोपजनन एतत्सभवति । न च स्थानान्तरेण वियुज्य स्थानान्तरसयोगलक्षण प्रवेशो निरवयवस्यापरिच्छिन्नस्य दृष्ट । सावयव एव प्रवेशश्रवणादिति चेत् । न । 'दिव्यो ह्यमूर्त पुरुष' 'निष्कलं निष्क्रिय' इत्यादिश्रुतिभ्य । सर्वव्यपदेश्यधर्मविशेषप्रतिषेधश्रुतिभ्यश्च । प्रतिबिबप्रवेशवदिति चेत् । न । वस्त्वतरेण विप्रकर्षानुपपत्तेः । द्रव्ये गुणप्रवेशवदिति चेत् । न । अनाश्रितत्वात् । नित्यपरतंत्रस्यैवाश्रितस्य गुणस्य द्रव्ये प्रवेश उपचर्यते । न तु ब्रह्मण स्वातत्र्यश्रवणात्तथा प्रवेश उपपद्यते । फले बीजवादिति चेन्न । सावयवत्ववृद्धिक्षयोत्पत्तिविनाशादिधर्मवत्त्वप्रसगात् । न चैव धर्मवत्त्व ब्रह्मण 'अजोऽजर' इत्यादिश्रुतिन्यायविरोधात् । अन्य एव संसारी परिच्छिन्न इह प्रविष्ट इति चेन्न । 'सेयं देवतैक्षत' इत्यारभ्य 'नामरूपे व्याकरवाणि' इति तस्या एव प्रवेशव्याकरणकर्तृत्वश्रुते । तथा 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'स एतमेव सीमान विदार्यैतया द्वारा प्रापद्यत" "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते" "त्व कुमार उत वा कुमारी त्वं जीर्णो दंडेन वचसि" "पुर श्वके द्विपद" 'रूपं रूपम्' इति च मत्रवर्णान्न परादन्यस्य प्रवेश । प्रविष्टानामितरेतरभेदात्परानेकत्वमिति चेत् । न । 'एको देवो बहुधा संनिविष्ट' "एक सन्बहुधा विचार" "त्वमेकोऽसि बहूननुप्रविष्ट" "एको देव सर्वभूतेषु गूढ सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादि श्रुतिभ्य । प्रवेश उपपद्यते नोपपद्यत इति, तिष्ठतु तावत् प्रविष्टाना संसारित्वात्तदनन्यत्वाच्च परस्य ससारित्वमिति चेत् । न । अशनायाद्यत्ययश्रुते । सुखित्वदु खित्वादिदर्शनान्नेति चेत् । न । 'न लिप्यते लोकदुःखेन बाह्य' इति श्रुते । प्रत्यक्षादिविरोधादयुक्तमिति चेत् । न । उपाध्याश्रयजनितविशेषविषयत्वात्प्रत्यक्षादेः । 'न दृष्टेर्द्रष्टारं पश्ये' 'विज्ञातारमरे केन विजा-

नीयात्' 'अविज्ञात विज्ञातृ' इत्यादिश्रुतिभ्यो नात्मविषयं विज्ञानम् । किं तर्हि, बुद्ध्याद्युपाध्यात्मप्रतिच्छायाविषयमेव सुखितोऽहं दु खितोऽहमित्येवमादि प्रत्यक्षविज्ञानम् । अयमहमिति विषयेण विषयिण सामानाधिकरण्योपचारात् । 'नान्यदतोऽस्ति द्रष्टृ' इत्यन्यात्मप्रतिषेधाच्च । देहावयवविशेष्यत्वाच्च सुखदु खयोर्विषयधर्मत्वम् । 'आत्मनस्तु कामाय' इत्यात्मार्थत्वश्रुतेरयुक्त इति चेन्न । 'यत्र वा अन्यदिव स्यात्' इत्यविद्याविषयात्मार्थत्वाभ्युपगमात् 'तत्केन क पश्येत्' 'नेह नानास्ति किचन' 'तत्र को मोह क शोक एकत्वमनुपश्यत ' इत्यादिना विद्याविषये तत्प्रतिषेधाच्च नात्मधर्मत्वम् । तार्किकसमयविरोधादयुक्तमिति चेन्न । युक्त्यापि आत्मनो दु खित्वानुपपत्ते न हि दु खेन प्रत्यक्षविषयेण आत्मनो विशेष्यत्वं, प्रत्यक्षाविषयत्वात् । आकाशस्य शब्दगुणत्ववदात्मनो दु खित्वामिति चेन्न । एकप्रत्ययविषयत्वानुपपत्ते । न हि सुखग्राहकेण प्रत्यक्षविषयेण प्रत्ययेन नित्यानुमेयस्यात्मनो विषयीकरणमुपपद्यते । तस्य च विषयीकरणे आत्मन एकत्वाद्विषय्यभावप्रसग । एकस्यैव विषयविषयित्वं दीपवदिति चेत् । न । युगपदसभवात् । आत्मन्यशानुपपत्तेश्च । एतेन विज्ञानस्य ग्राह्यग्राहकत्व प्रत्युक्तम् । प्रत्यक्षानुमानाविषययोश्च दु खात्मनोर्गुणगुणित्वे नानुमानम् । दु खस्य नित्यमेव प्रत्यक्षविषयत्वात् रूपादिसामानाधिकरण्याच्च । मन सयोगजत्वेऽप्यात्मनि दु खस्य सावयवत्वविक्रियावत्त्वानित्यत्वप्रसगात् । न ह्यविकृत्य सयोगि द्रव्यं गुण कश्चिदुपयन्नपयन्वा दृष्ट क्वचित् । न च निरवयव विक्रियमाण दृष्ट क्वचिदनित्यगुणाश्रय वा नित्यम् । न चाकाश आगमवादिभिर्नित्यतयाभ्युपगम्यते । न चान्यो दृष्टातोऽस्ति । विक्रियमाणमपि तत्प्रत्ययानिवृत्तेर्नित्यमेवेति चेन्न । द्रव्यस्य अवयवान्यथात्वव्यतिरेकेण विक्रियानुपपत्ते । सावयवत्वेऽपि नित्यत्वमिति चेन्न । सावयवस्यावयवसंयोगपूर्वकत्वे सति विभागोपपत्ते । वज्रादिष्वदर्शनान्नेति चेन्न । अनुमेयत्वात्संयोगपूर्वत्वस्य । तस्मान्नात्मनो दु खाद्यनित्यगुणाश्रयत्वोपपत्ति । परस्यादु खित्वेऽन्यस्य च दु.खिनोऽभावे दु खोपशमनाय शास्त्रारभानर्थक्यमिति चेन्न । अविद्याध्यारोपितदु खित्वभ्रमापोहार्थत्वात् । आत्मनि प्रकृतसंख्यापूरणभ्रमापोहवत्काल्पितदु ख्यात्माभ्युपगमाच्च ॥

जलसूर्यादिप्रतिबिबवदात्मप्रवेशश्च प्रतिबिबवद्व्याकृते कार्य उपलभ्यत्वम् ।

प्रागुत्पत्तेरनुपलब्ध आत्मा पश्चात्कार्ये च सृष्टे व्याकृते बुद्धे अतरुपलभ्यमान सूर्यादिप्रतिबिंबवज्जलादौ कार्ये सृष्ट्वा प्रविष्ट इव लक्ष्यमाणो निर्दिश्यते 'स एष इह प्रविष्ट' 'ता सृष्ट्वा तदेवानुप्राविशत्' 'स एतमेव सीमान विदार्यैतया द्वारा प्रापद्यत' 'सेयं देवतैक्षत हताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य' इत्येवमादिभि । न तु सर्वगतस्य निरवयवस्य दिग्देशकालान्तरापक्रमणप्राप्ति-लक्षण प्रवेश कदाचिदप्युपपद्यते । न च परादात्मनोऽन्योऽस्ति द्रष्टा 'नान्य-दतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ' इत्यादिश्रुतेरित्यवोचाम । उपलब्ध्यर्थ-त्वाच्च सृष्टिप्रवेशस्थित्याद्ययवाक्यानाम् । उपलब्धे पुरुषार्थत्वश्रवणात् । 'आत्मानमेवावेत्' 'तस्मात्तत्सर्वमभवत्' 'ब्रह्मविदाप्नोति परम्' 'स यो ह वै तत्परम ब्रह्म वेद ब्रह्मैव भवति' 'आचार्यवान्पुरुषो वेद' 'तस्य तावदेव चिरम्' इत्यादिश्रुति-भ्य । ''ततो मा तत्त्वतो ज्ञात्वा विशते तदनतरम्'' ''तद्धयग्रय सर्वविद्याना प्राप्यते ह्यमृत तत'' इत्यादिस्मृति-भ्यश्च । भेददर्शनापवादाच्च सृष्ट्यादिवाक्यानाम् आत्मैकत्वदर्शनार्थपरत्वोपपत्ति । तस्मात्कार्यस्थस्य उप-ल-भ्यत्वमेव प्रवेश इत्युपचर्यते ॥

आ नखाग्रे-भ्यो नखाग्रमर्यादं आत्मनश्चैतन्यमुपल-भ्यते । तत्र कथमिव प्रविष्ट इत्याह— यथा लोके क्षुरधाने क्षुरो धीयतेऽस्मिन्निति क्षुरधान तस्मि-न्नापितोपस्कारार्थाने, क्षुरोऽन्त स्थ उपल-भ्यते, अवहित प्रवेशित स्याद्यथा वा विश्वभरोऽग्नि, विश्वस्य भरणाद्विश्वभर. कुलाये नीडेऽग्नि काष्ठादाववहित स्यादित्यनुवर्तते । तत्र हि स मथ्यमान उपल-भ्यते । यथा च क्षुर क्षुरधान एकदेशेऽवस्थितो, यथा चाग्नि काष्ठादौ सर्वतो व्याप्यावस्थित, एव सामान्यतो विशेषतश्च देह संव्याप्यावस्थित आत्मा । तत्र हि स प्राणनादिक्रियावान् दर्शनादिक्रियावाश्चोपल-भ्यते । तस्मात्तत्रैव प्रविष्ट तमात्मान प्राणनादिक्रिया-विशिष्ट न पश्यन्ति नोपलभन्ते ॥

नन्वप्राप्तप्रतिषेधोऽय तं न पश्यन्तीति, दर्शनस्याप्रकृतत्वात् । नैष दोष । सृष्ट्यादिवाक्याना आत्मैकत्वप्रतिपत्त्यर्थपरत्वात्प्रकृतमेव तस्य दर्शनम् । ''रूपं रूप प्रतिरूपो बभूव तदस्य रूप प्रति चक्षणाय'' इति मंत्रवर्णात् । तत्र प्राणनादिक्रियाविशिष्टस्य दर्शने हेतुमाह— अकृत्स्नोऽपमस्तो हि यस्मात्स प्राणनादिक्रियाविशिष्ट । कुत पुनरकृत्स्नत्वमिति उच्यते— प्राणनेव प्राणन-

क्रियामेव कुर्वन्प्राणो नाम प्राणसमाख्य प्राणाभिधानो भवति । प्राणनक्रिया-कर्तृत्वाद्धि प्राण प्राणितीत्युच्यते नान्या क्रिया कुर्वन् । यथा लावक पाचक इति । तस्मात्क्रियान्तरविशिष्टस्य अनुपसंहारादकृत्स्नो हि स । तथा वदन्वदनक्रिया कुर्वन्वक्तीति वाक, पश्यंश्चक्षुश्चष्ट इति चक्षुर्द्रष्टा, शृण्वञ्शृणोतीति श्रोत्रम् । 'प्राणन्नेव प्राणो वदन्वाक्' इत्याभ्या क्रियाशक्त्युद्भव प्रदर्शितो भवति । 'पश्यश्चक्षु शृण्वञ्श्रोत्रं' इत्याभ्या विज्ञानशक्त्युद्भव प्रदर्श्यते । नाम-रूपविषयत्वाद्विज्ञानशक्ते । श्रोत्रचक्षुषी विज्ञानस्य साधने, विज्ञान तु नाम-रूपसाधनम् । न हि नामरूपव्यतिरिक्त विज्ञेयमस्ति । तयोश्चोपलंभे करणं चक्षु श्रोत्रे । क्रिया च नामरूपसाभ्या प्राणसमवायिनी । तस्या प्राणाश्रयाया अभि-व्यक्तौ वाक्करणम् । तथा पाणिपादपायूपस्थास्यानि । सर्वेषामुपलक्षणार्था वाक । एतदेव हि सर्व व्याकृतम् । 'त्रय वा इद नाम रूप कर्म' इति हि वक्ष्यति । मन्वानो मनो मनुत इति । ज्ञानशक्तिविकासाना साधारण करणं मनो मनुतेऽनेनेति । पुरुषस्तु कर्ता सन्मन्वानो मन इत्युच्यते ॥

तान्येतानि प्राणादीन्यस्यात्मन कर्मनामानि, कर्मजानि नामानि कर्म-नामान्येव, न तु वस्तुमात्रविषयाणि । अतो न कृत्स्नात्मवस्त्ववद्योतकानि । एवं ह्यसावात्मा प्राणनादिक्रियया तत्तत्क्रियाजनितप्राणादिनामरूपाभ्या व्याक्रिय-माणोऽवद्योत्यमानोऽपि । स योऽतोऽस्मात्प्राणनादिक्रियासमुदायात् एकैक प्राण चक्षुरिति वा विशिष्ट अनुपसंहृतेतरविशिष्टक्रियात्मक मनसा अयमात्मेत्यु-पास्ते चितयति, न स वेद न स जानाति ब्रह्म । कस्मात्[1] अकृत्स्नोऽसमस्तो हि यस्मादेष आत्मा अस्मात्प्राणनादिसमुदायात् । अत प्रविभक्त एकेकेन विशेषणेन विशिष्ट इतरधर्मांतरानुपसहाराद्भवति । यावदयमेवं वेद पश्यामि शृणोमि स्पृशामीति वा स्वभावप्रवृत्तिविशिष्टं वेद तावदंजसा कृत्स्नमात्मानं न वेद ॥

कथं पुनः पश्यन्वेदेत्याह— आत्मेत्येवात्मेति, प्राणादीनि विशेषणानि यान्युक्तानि तानि यस्य स आप्नुवंस्तान्यात्मेत्युच्यते । स तथा कृत्स्नविशेषो-पसंहारी सन्कृत्स्नो भवति । वस्तुमात्ररूपेण हि प्राणाद्युपाधिविशेषक्रियाजनितानि विशेषणानि व्याप्नोति । तथा च वक्ष्यति— 'ध्यायतीव लेलायतीव' इति । तस्मादात्मेत्येवोपासीत । एवं कृत्स्नो ह्यसौ स्वेन वस्तुरूपेण गृह्यमाणो भवति ।

कस्मात्कृत्स्न इत्याशङ्क्याह— अत्राऽस्मिन्नात्मनि हि यस्मान्निरुपाधिके जलसूर्य-प्रतिबिंबभेदा इवादित्ये प्राणाद्युपाधिकृता विशेषा प्राणादिकर्मजनामाभिधेया यथोक्ता ह्येते एकमभिन्नता भवन्ति प्रतिपद्यन्ते ॥

'आत्मेत्येवोपासीत' इति नापूर्वविधि । पक्षे प्राप्तत्वात् 'यत्साक्षादपरोक्षाद्ब्रह्म' 'कतम आत्मेति' 'योऽयं विज्ञानमय' इत्येवमाद्यात्मप्रतिपादनपराभिश्रुतिभिरात्मविषय विज्ञानमुत्पादितम् । तत्रात्मस्वरूपविज्ञानेनैव तद्विषयानात्माभिमानबुद्धि कारकादिक्रियाफलाध्यारोपणात्मिका अविद्या निवर्तिता । तस्या निवर्तिताया कामादिदोषानुपपत्ते अनात्मचिंतानुपपत्ति । पारिशेष्यादात्मचिंतैव । तस्मात्तदुपासनमस्मिन्पक्षे न विधातव्य, प्राप्तत्वात् ॥

तिष्ठतु तावत्पाक्षिक्यात्मोपासनप्राप्तिर्नित्या वेति । अपूर्वविधि स्यात् । ज्ञानोपासनयोरेकत्वे सत्यप्राप्तत्वात् । 'न स वेद' इति विज्ञानं प्रस्तुत्य 'आत्मेत्येवोपासीत' इत्यभिधानाद्वेदोपासनशब्दयो एकार्थताऽवगम्यते । 'अनेन ह्येतत्सर्व वेद' 'आत्मानमेवावेत्' इत्यादिश्रुतिभ्यश्च विज्ञानमुपासनम् । तस्य चाप्राप्तत्वाद्विधिरर्हत्वम् । न च स्वरूपान्वाख्याने पुरुषप्रवृत्तिरुपपद्यते । तस्मात् अपूर्वविधिरेवायम् । कर्मविधिसामान्याच्च । यथा यजेत जुहुयात् इत्यादय कर्मविधयो, न तैरस्य 'आत्मेत्येवोपासीत' 'आत्मा वा अरे द्रष्टव्य' इत्याद्यात्मोपासनविधे विशेषोऽवगम्यते । मानसक्रियात्वाच्च विज्ञानस्य । यथा 'यस्यै देवतायै हविर्गृहीत स्यात्ता मनसा ध्यायेद्वषट्करिष्यन्' इत्याद्या मानसी क्रिया विधीयते, तथा 'आत्मेत्येवोपासीत' 'मतव्यो निदिध्यासितव्य' इत्याद्या क्रियैव विधीयते ज्ञानात्मिका । तथाऽवोचाम वेदोपासनशब्दयोरेकार्थत्वमिति । भावनाशब्दयोपपत्तेश्च । यथा हि यजेत इत्यस्या भावनायां, कि केन कथं इति भाव्याद्याकाक्षापनयकारणमशब्दयमवगम्यते, तथा उपासीत इत्यस्यामपि भावनाया विधीयमानाया किमुपासीत, केनोपासीत, कथमुपासीत, इत्यस्यामाकाक्षाया आत्मानमुपासीत मनसा त्यागब्रह्मचर्यशमदमोपरमतितिक्षादीतिकर्तव्यतासंयुक्त इत्यादिशास्त्रेणैव समर्थ्यतेऽशब्दयम् । यथा च कृत्स्नस्य दर्शपूर्णमासादिप्रकरणस्य दर्शपूर्णमासादिविध्युद्देशत्वेनोपयोग । एवमौपनिषदा आत्मोपासनप्रकरणस्य आत्मोपासनविध्युद्देशत्वेनैव उपयोग । 'नेति नेति' 'अस्थूलं' 'एकमेवाद्वितीय' 'अशनायाद्यतीत' इत्येवमादिवाक्याना उपास्यात्मस्वरूपविशेषसमर्पणेनोपयोग । फल

च मोक्षोऽविद्यानिवृत्तिर्वा ॥

अपरे वर्णयन्ति उपासनेनात्मविषय विशिष्ट विज्ञानान्तर भावयेत्, तेनात्मा ज्ञायते, अविद्यानिवर्तकं च तदेव, नात्मविषय वेदवाक्यजनित विज्ञानमिति । एतस्मिन्नर्थे वचनान्यपि— 'विज्ञाय प्रज्ञा कुर्वात' 'द्रष्टव्य श्रोतव्यो मंतव्यो निदिध्यासितव्य' 'सोऽन्वेष्टव्य स विजिज्ञासितव्य' इत्यादीनि ॥ न, अर्थातराभावात् न च 'आत्मेत्येवोपासीत' इत्यपूर्वविधि । कस्मात् । आत्मस्वरूपकथनानात्मप्रतिषेधवाक्यजनितविज्ञानव्यतिरेकेण अर्थातरस्य कर्तव्यस्य मानसस्य बाह्यस्य वाऽभावात् । तत्र हि विधे साफल्य यत्र विधिवाक्यश्रवणमात्रजनितविज्ञानव्यतिरेकेण पुरुषप्रवृत्तिर्गम्यते । यथा "दर्शपूर्णमासाभ्या स्वर्गकामो यजेत" इत्येवमादौ । न हि दर्शपूर्णमासविधिवाक्यजनितविज्ञानमेव दर्शपूर्णमासानुष्ठानम् । तच्चाधिकाराद्यपेक्षानुभावि । न तु 'नेति नेति' इत्याद्यात्मप्रतिपादकवाक्यजनितविज्ञानव्यतिरेकेण दर्शपूर्णमासादिवत्पुरुषव्यापार संभवति । सर्वव्यापारोपशमहेतुत्वात् तद्वाक्यजनितविज्ञानस्य । न हि उदासीनविज्ञान प्रवृत्तिजनक, अब्रह्मानात्मविज्ञाननिवर्तकत्वाच्च 'एकमेवाद्वितीयम्' 'तत्त्वमसि' इत्येवमादिवाक्यानाम् । न च तन्निवृत्तौ प्रवृत्तिरुपपद्यते । विरोधात् । वाक्यजनितविज्ञानमात्रान्नाब्रह्मानात्मविज्ञाननिवृत्तिरिति चेन्न । 'तत्त्वमसि' 'नेति नेति' 'आत्मैवेदम्' 'एकमेवाद्वितीयम्' 'ब्रह्मैवेदममृत' 'नान्यदतोऽस्ति द्रष्टृ' 'तदेव ब्रह्म त्व विद्धि' इत्यादिवाक्याना तद्वादित्वात् । द्रष्टव्यविधे विषयसमर्पकाण्येतानीति चेन्न । अर्थातराभवादित्युक्तोत्तरत्वात् । आत्मवस्तुस्वरूपसमर्पकैरेव वाक्यै 'तत्त्वमसि' इत्यादिभि श्रवणकाल एव तद्दर्शनस्य कृतत्वात् द्रष्टव्यविधेर्नानुष्ठानान्तरं कर्तव्यमित्युक्तोत्तरमेतत् । आत्मस्वरूपान्वाख्यानमात्रेण आत्मविज्ञाने विधिमतरेण न प्रवर्तते इति चेन्न । आत्मवादिवाक्यश्रवणेन आत्मविज्ञानस्य जनितत्वात् । कि भो कृतस्य करणम् । तच्छ्रवणेऽपि न प्रवर्तत इति चेन्न । अनवस्थाप्रसंगात् । यथा आत्मवादिवाक्यार्थश्रवणे विधिमंतरेण न प्रवर्तते तथा विधिवाक्यार्थश्रवणेऽपि विधिमतरेण न प्रवर्तिष्यत इति विध्यतरापेक्षा । तथा तदर्थश्रवणेऽपीत्यनवस्था प्रसज्येत । वाक्यजनितात्मज्ञानस्मृतिसंतते श्रवणविज्ञानमात्रात् अर्थान्तरत्वामिति चेत् । न । अर्थप्राप्तत्वात् । यदैवात्मप्रतिपादकवाक्यश्रवणात् आत्मविषयं विज्ञानमुत्पद्यते, तदैव तदुत्पद्यमानं

तद्विषय मिथ्याज्ञानं निवर्तयदेवोत्पद्यते । आत्मविषयमिथ्याज्ञाननिवृत्तौ च तत्प्रभवा. स्मृतयो न भवन्ति स्वाभाविक्योऽनात्मवस्तुभेदविषया । अनर्थत्वावगतेश्च । आत्मावगतौ हि सत्यामन्यद्वस्त्वनर्थत्वेनावगम्यते । अनित्यदु खाशुद्ध्यादिबहुदोषवत्त्वात् आत्मवस्तुनश्च तद्विलक्षणत्वात् । तस्मात् अनात्मविज्ञानस्मृतीना आत्मावगतेरभावप्राप्ति । पारिशेष्यात् आत्मैकत्वविज्ञानस्मृतिसततेरर्थत एव भावान्न विधेयत्वम् । शोकमोहभयायासादिदु खदोषनिवर्तकत्वाच्च तत्स्मृते । विपरीतज्ञानप्रभवो हि शोकमोहादिदोष । तथा च 'तत्र को मोह ' 'विद्वान्न बिभेति कुतश्चन' 'अभय वै जनक प्राप्तोऽसि' 'भिद्यते हृदयग्रथि ' इत्यादिश्रुतय ॥

निरोधस्तर्ह्यर्थान्तरमिति चेत् । अथापि स्याच्चित्तवृत्तिनिरोधस्य वेदवाक्यजनितात्मविज्ञानात् अर्थान्तरत्वात् । तत्रान्तरेषु च कर्तव्यतयाऽवगतत्वाद्विधेयत्वमिति चेन्न । मोक्षसाधनत्वेनानवगमात् । न हि वेदान्तेषु ब्रह्मात्मविज्ञानात् अन्यत्परमपुरुषार्थसाधनत्वेन अवगम्यते । 'आत्मानमेवावेत्' 'तस्मात्तत्स्वयमभवत्' ' ब्रह्मविदाप्नोति परम्' 'स यो ह वै तत्परम ब्रह्म वेद ब्रह्मैव भवति' 'आचार्यवान्पुरुषो वेद' 'तस्य तावदेव चिरम्' 'अभय हि वै ब्रह्म भवति । य एवं वेद' इत्येवमादिश्रुतिशतेभ्य । अनन्यसाधनत्वाच्च निरोधस्य । न ह्यात्मविज्ञानतत्स्मृतिसतानव्यतिरेकेण चित्तवृत्तिनिरोधस्य साधनमस्ति । अभ्युपगम्येदमुक्तं, न तु ब्रह्मविज्ञानव्यतिरेकेण अन्यन्मोक्षसाधनमवगम्यते ॥

आकाक्षाभावाच्च भावनाभाव । यदुक्त यजेतेत्यादौ कि केन कथ इति भावनाकाक्षाया फलसाधनेतिकर्तव्यताभिराकाक्षापनयन यथा, तद्वदिहाप्यात्मविज्ञानविधावप्युपपद्यत इति । तदसत् । 'एकमेवाद्वितीयं' 'तत्त्वमसि' 'नेति नेति' 'अनंतरमबाह्य' 'अयमात्मा ब्रह्म' इत्यादिवाक्यार्थविज्ञानसमकालमेव सर्वाकाक्षाविनिवृत्ते । न च वाक्यार्थविज्ञाने विधिप्रयुक्त प्रवर्तते । विध्यतरप्रयुक्तौ चानवस्थादोषमवोचाम । न च 'एकमेवाद्वितीय ब्रह्म' इत्यादिवाक्येषु विधिरवगम्यते । आत्मस्वरूपान्वाख्यानेनैव अवसितत्वात् । वस्तुस्वरूपान्वाख्यानमात्रत्वात् अप्रामाण्यमिति चेत् । अथापि स्याद्यथा 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं' इत्येवमादौ वस्तुस्वरूपान्वाख्यानमात्रत्वात् अप्रामाण्यं, एवमात्मार्थवाक्यानामपीति चेन्न । विशेषात् । न वाक्यस्य वस्त्वन्वाख्यानं

क्रियान्वाख्यानं वा प्रामाण्याप्रामाण्यकारण, किं तर्हि निश्चितफलवद्विज्ञानोत्पादकत्वम् । तद्यत्रास्ति तत्प्रमाणं वाक्यं, यत्र नास्ति तदप्रमाणम् ॥

किंच भो पृच्छामस्त्वा— आत्मस्वरूपान्वाख्यानपरेषु वाक्येषु फलवन्निश्चित च विज्ञानमुत्पद्यते, न वा । उत्पद्यते चेत्कथमप्रामाण्यमिति । किंवा न पश्यसि अविद्याशोकमोहभयादिसंसारबीजदोषनिवृत्तिं विज्ञानफलम् । न शृणोषि वा कि 'तत्र को मोह क शोक एकत्वमनुपश्यत ' 'मन्त्रविदेवास्मि नात्मवित्सोऽह भगव शोचामि त मा भगवाञ्छोकस्य पार तारयतु' इत्येवमाद्युपनिषद्वाक्यशतानि[1] एव विद्यते किं सोऽरोदीदित्यादिषु निश्चित फलवच्च विज्ञानम् । न चेद्विद्यतेऽस्वप्रामाण्यम् । तदप्रामाण्ये फलवन्निश्चितविज्ञानोत्पादकस्य किमित्यप्रामाण्यं स्यात्[2] तदप्रामाण्ये च दर्शपूर्णमासादिवाक्येषु को विश्रभ । ननु दर्शपूर्णमासादिवाक्याना पुरुषप्रवृत्तिविज्ञानोत्पादकत्वात् प्रामाण्यम् । आत्मविज्ञानवाक्येषु तन्नास्तीति । सत्यमेवम् । नैष दोष । प्रामाण्यकारणोपपत्ते । प्रामाण्यकारण च यथोक्तमेव, नान्यत् । अलकारश्चायं, यत्सर्वप्रवृत्तिबीजनिरोधफलवद्विज्ञानोत्पादकत्वं आत्मप्रतिपादकवाक्याना नाप्रामाण्यकारणम् । यत्तूक्तं 'विज्ञाय प्रज्ञा कुर्वीत' इत्यादिवचनाना वाक्यार्थविज्ञानव्यतिरेकेण उपासनार्थत्वमिति, सत्यमेतत् । किंतु नापूर्वविध्यर्थता । पक्षे प्राप्तस्य नियमार्थतैव । कथ पुनरुपासनस्य पक्षप्राप्तिर्यावता पारिशेष्यादात्मविज्ञानस्मृतिसंतति नित्यैवेत्यभिहितम् । बाढम् । यद्यप्येवं शरीरारभकस्य कर्मणो नियतफलत्वात् सम्यग्ज्ञानप्राप्तावप्यवश्यभाविनी प्रवृत्तिर्वाङ्मन कायानाम् । लब्धवृत्ते. कर्मणो बलीयस्त्वात् । मुक्तेष्वादिप्रवृत्तिवत् । तेन पक्षे प्राप्तं ज्ञानप्रवृत्तिदौर्बल्यम् । तस्मात्त्यागवैराग्यादिसाधनबलावलंबेन आत्मविज्ञानस्मृतिसंततिर्नियंतव्या भवति, न त्वपूर्वा कर्तव्या, प्राप्तत्वात् इत्यवोचाम । तस्मात् प्राप्तविज्ञानस्मृतिसंताननियमविध्यर्थानि 'विज्ञाय प्रज्ञा कुर्वीत' इत्यादिवाक्यानि, अन्यार्थासंभवात् ॥

ननु अनात्मोपासनमिदं इतिशब्दप्रयोगात् । यथा प्रियमित्येतदुपासीत इत्यादौ न प्रियादिगुणा एवोपास्याः किं तर्हि प्रियादिगुणवत्प्राणाद्येवोपास्यम् । तथेहापि इतिपरात्मशब्दप्रयोगात् आत्मगुणवदनात्मवस्तूपास्यमिति गम्यते । आत्मोपास्यत्ववाक्यवैलक्षण्याच्च । परेण च वक्ष्यति 'आत्मानमेव लोकमुपासीत'

इति । तत्र च वाक्ये आत्मैवोपास्यत्वेनाभिप्रेतो द्वितीयाश्रवणादात्मानमेवेति । इह तु न द्वितीया श्रूयते इतिपरश्चात्मशब्द 'आत्मेत्येवोपासीत' इति। अतो नात्मोपास्य, आत्मगुणश्चान्य, इति त्ववगम्यते । न । वाक्यशेष आत्मन उपास्यत्वेनावगमात् । अस्यैव वाक्यस्य शेषे आत्मैवोपास्यत्वेनावगम्यते । 'तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा' 'अतरतर यदयमात्मा' 'आत्मानमेवावेत्' इति । प्रविष्टस्य दर्शनप्रतिषेधानुपास्यत्वमिति चेत् । यस्यात्मन प्रवेश उक्त तस्यैव दर्शन वार्यते 'त न पश्यन्ति' इति प्रकृतोपादानात् । तस्मादात्मनोऽनुपास्यत्वमेवेति चेन्न । अकृत्स्नत्वदोषात् । दर्शनप्रतिषेधोऽकृत्स्नत्वदोषाभिप्रायेण नात्मोपास्यत्वप्रतिषेधाय । प्राणनादिक्रियाविशिष्टत्वेन विशेषणात् । आत्मनश्चेदुपास्यत्वमनभिप्रेत प्राणनाद्येकैकक्रियाविशिष्टस्यात्मन अकृत्स्नत्ववचनमनर्थक स्यात् 'अकृत्स्नो ह्येषोऽत एकैकेन भवति' इति । अतोऽनेककविशिष्टस्त्वात्मा कृत्स्नत्वादुपास्य एवेति सिद्धम् । यस्त्वात्मशब्दस्य इतिपर प्रयोग, आत्मशब्दप्रत्ययो आत्मतत्त्वस्य परमार्थतोऽविषयत्वज्ञापनार्थम् । अन्यथा आत्मानमुपासीतेत्येवमवक्ष्यत । तथा चार्थादात्मनि शब्दप्रत्ययावनुज्ञातौ स्याताम् । तच्चानिष्टम् 'नेति नेति' 'विज्ञातारमरे केन विजानीयात्' 'अविज्ञात विज्ञातृ' 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' इत्यादिश्रुतिभ्य । यत्तु 'आत्मानमेव लोकमुपासीत' इति तदनात्मोपासनप्रसगनिवृत्तिपरत्वान्न वाक्यान्तरम् ॥

अनिर्ज्ञातत्वसामान्यादात्मा ज्ञातव्योऽनात्मा च । तत्र कस्मादात्मोपासने एव यत्न आस्थीयते 'आत्मेत्येवोपासीत' इति नेतरविज्ञान इति । अत्रोच्यते— तदेतदेव प्रकृत पदनीयं गमनीयं नान्यत् । अस्य सर्वस्येति निर्धारणार्था षष्ठी । अस्मिन्सर्वस्मिन्नित्यर्थ । यदयमात्मा यदेतदात्मतत्त्व किं न विज्ञातव्यमेवान्यत् । न । कि तर्हि, ज्ञातव्यत्वेऽपि न पृथग्ज्ञानान्तरमपेक्षत आत्मज्ञानात् । कस्मात् । अनेनात्मना ज्ञातेन हि यस्मादेतत्सर्वमनात्मजातं अन्यद्यत्तत्सर्वं समस्तं वेद जानाति । नन्वन्यज्ञानेनान्यन्न ज्ञायत इति । अस्य परिहारं दुंदुभ्यादिग्रंथेन वक्ष्याम । कथं पुनरेतत्पदनीयमिति । उच्यते— यथा हि वै लोके पदेन, गवादिखुराकितो देश पदमित्युच्यते तेन पदेन, नष्ट विविस्तितं गन्तुं पदेनान्वेषमाणोऽनुविदेद्भेत । एवमात्मनि लब्धे सर्वमनुलभत इत्यर्थः ॥

नन्वात्मनि ज्ञाते सर्वमन्यज्ज्ञायत इति ज्ञाने प्रकृते, कथं लाभोऽप्रकृत उच्यत इति । न । ज्ञानलाभयोरेकार्थत्वस्य विवक्षितत्वात् । आत्मनो ह्यलाभोऽज्ञानमेव । तस्माज्ज्ञानमेवात्मनो लाभो, नानात्मलाभवदप्राप्तप्राप्तिलक्षण आत्मलाभो, लब्धृलब्धव्ययोर्भेदाभावात् । यत्र ह्यात्मनोऽनात्मा लब्धव्यो भवति, तत्रात्मा लब्धा, लब्धव्योऽनात्मा । स चाप्राप्त उत्पाद्यादिक्रियाव्यवहितकारकविशेषोपादानेन क्रियाविशेषमुत्पाद्य लब्धव्य । स त्वप्राप्तप्राप्तिलक्षणोऽनित्यो मिथ्याज्ञानजनितकामक्रियाप्रभवत्वात् स्वप्ने पुत्रादिलाभवत् । अयं तु तद्विपरीत आत्मा । आत्मत्वादेव नोत्पाद्यादिक्रियाव्यवहित । नित्यलब्धस्वरूपत्वेऽपि सत्यविद्यामात्र व्यवधानम् । यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहण विपरीतज्ञानव्यवधानमात्र, तथा ग्रहण ज्ञानमात्रमेव, विपरीतज्ञानव्यवधानापोहार्थत्वाज्ज्ञानस्य । एवमिहाप्यात्मनोऽलाभोऽविद्यामात्रव्यवधानम् । तस्माद्विद्यया तदपोहनमात्रमेव लाभो नान्य कदाचिदप्युपपद्यते । तस्मादात्मलाभे ज्ञानादर्थान्तरसाधनस्य आनर्थक्यं वक्ष्याम । तस्मान्निराशकमेव ज्ञानलाभयोरेकार्थत्व विवक्षन्नाह— ज्ञान प्रकृत्य, अनुविदेदिति । विदतेर्लाभार्थत्वात् ॥

गुणविज्ञानफलमिदमुच्यते— यथाऽयमात्मा नामरूपानुप्रवेशेन ख्याति गत आत्मेत्यादिनामरूपाभ्या प्राणादिसंहति च श्लोकं प्राप्तवानित्येव यो वेद, स कीर्ति ख्याति श्लोक च सघातमिष्टै सह विदते लभते । यद्वा यथोक्त वस्तु यो वेद मुमुक्षूणामपेक्षितं कीर्तिशब्दितमैक्यज्ञानं तत्फलं श्लोकशब्दिता मुक्तिमाप्नोतीति मुख्यमेव फलम् ॥

तदेतत्प्रेय पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादतरतर यदयमात्मा । स योऽन्यमात्मन प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रिय प्रमायुक भवति ॥८॥

कुतश्चात्मतत्त्वमेव ज्ञेयमनाद्यत्वान्यदित्याह— तदेतदात्मतत्त्वं प्रेय प्रियतरं पुत्रात् । पुत्रो हि लोके प्रिय प्रसिद्धस्तस्मादपि प्रियतरमिति निरतिशयप्रियत्वं दर्शयति । तथा वित्ताद्धिरण्यरत्नादे , तथा अन्यस्माद्यद्यल्लोके प्रियत्वेन प्रसिद्ध तस्मात्सर्वस्मादित्यर्थ । तत्कस्मादात्मतत्त्वमेव प्रियतर न प्राणादीति.

उच्यते— अतरतरं बाह्यात्पुत्रवित्तादे प्राणपिंडसमुदायो ह्यतरोऽभ्यंतर संनिकृष्ट आत्मन । तस्मादप्यतरादतरतर यदयमात्मा यदेतदात्मतत्त्वम् । यो हि लोके निरतिशयप्रिय स सर्वप्रयत्नेन लब्धव्यो भवति । तथायमात्मा सर्वलौकिकप्रियेभ्य प्रियतम । तस्मात्तल्लाभे महान्यत्न आस्थेय इत्यर्थ । कर्तव्यताप्राप्तमप्यन्यप्रियलाभे यत्नमुज्झित्वा । कस्मात्पुन आत्मानात्मप्रिययोरन्यतरप्रियहानेन इतरप्रियोपादानप्राप्तौ आत्मप्रियोपादानेनैवेतरहान क्रियते न विपर्यय इति, उच्यते— स य कश्चिदन्यमनात्मविशेषं पुत्रादिकं प्रियतरमात्मन सकाशात् ब्रुवाण ब्रूयादात्मप्रियवादी । किम् । प्रियं तवाभिमत पुत्रादिलक्षण रोत्स्यत्यावरण प्राणसरोध प्राप्स्यति विनक्ष्यतीति । स कस्मादेवं ब्रवीति ? यस्मादीश्वर समर्थ पर्याप्तो असावेव वक्तु ह यस्मात्तस्मात्तथैव स्याद्यत्तेनोक्त प्राणसरोध प्राप्स्यति । यथाभूतवादी हि स । तस्मात्स ईश्वरो वक्तुम् । ईश्वरशब्द क्षिप्रवाचीति केचित् । भवेद्यदि प्रसिद्धि स्यात् । तस्मादुज्झित्वान्यत्प्रियमात्मानमेव प्रियमुपासीत । स य आत्मानमेव प्रियमुपास्त, आत्मैव प्रियो नान्योऽस्तीति प्रतिपद्यतेऽन्यल्लौकिक प्रियमप्यप्रियमेवेति निश्चित्य उपास्ते चितयति, न हास्यैवंविद प्रिय प्रमायुक प्रमरणशीलं भवति । नित्यानुवादमात्रमेतत् आत्मविदोऽन्यस्य प्रियस्याप्रियस्य चाभावात् । आत्मप्रियग्रहणस्तुत्यर्थ वा प्रियगुणफलविधानार्थ वा मंदात्मदर्शिन । तच्छील्यप्रत्ययोपादानात् ॥

तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते । किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥९॥

सूत्रिता ब्रह्मविद्या 'आत्मेत्येवोपासीत' इति यदर्थोपनिषत्कृत्स्नापि । तस्यैतस्य सूत्रस्य व्याचिख्यासु प्रयोजनाभिधित्सयोपोज्जिघासति — तदिति वक्ष्यमाणमनंतरवाक्येऽवद्योत्यं वस्त्वाहु ब्राह्मणा ब्रह्म विविदिषवो जन्मजरामरणप्रबंधचक्रभ्रमणकृतायासदु खोदकापारमहोदधिप्लवभूतं गुरुमासाद्य तत्तीरमुत्तितीर्षवो धर्माधर्मसाधनतत्फललक्षणात् साध्यसाधनरूपान्निर्विण्णा तद्विलक्षणनित्यनिरतिशयश्रेय प्रतिपित्सवः । किमाहुरित्याह— यद्ब्रह्मविद्यया, ब्रह्म परमात्मा तद्यया वेद्यते सा ब्रह्मविद्या तया ब्रह्मविद्यया, सर्व निरवशेषं भविष्यन्तो भविष्याम इत्येव मनुष्या यन्मन्यन्ते । मनुष्यग्रहणं विशेषतोऽधिकारज्ञापनार्थम् । मनुष्या एव हि विशेषतोऽभ्युदयनि श्रेयससाधनेऽधिकृता इत्यभिप्रायः ।

यथा कर्मविषये फलप्राप्तिं ध्रुवां कर्मभ्यो मन्यन्ते, तथा ब्रह्मविद्याया सर्वात्मभावफलप्राप्तिं ध्रुवामेव मन्यन्ते । वेदप्रामाण्यस्योभयत्राविशेषात् । तत्र विप्रतिषिद्धं वस्तु लक्ष्यतेऽत पृच्छाम — किमु तद्ब्रह्म यस्य विज्ञानात्सर्वं भविष्यन्तो मनुष्या मन्यन्ते? तत्किमवेद्यस्माद्विज्ञानात्तद्ब्रह्म सर्वमभवत्? ब्रह्म च सर्वमिति श्रूयते । तद्यद्यविज्ञाय किंचित्सर्वमभवत्तथान्येषामप्यस्तु, किं ब्रह्मविद्यया? अथ विज्ञाय सर्वमभवत् विज्ञानसाध्यत्वात्कर्मफलेन तुल्यमेवेत्यनित्यत्वप्रसग सर्वभावस्य ब्रह्मविद्याफलस्य । अनवस्थादोषश्च— तदप्यन्यद्विज्ञाय सर्वमभवत्तत पूर्वमप्यन्यद्विज्ञायेति । न तावदविज्ञाय सर्वमभवत् । शास्त्रार्थवैरूप्यदोषात् । फलानित्यत्वदोषस्तर्हि? नैकोऽपि दोषोऽर्थविशेषोपपत्ते ॥

यदि किमपि विज्ञायैव तद्ब्रह्म सर्वमभवत्पृच्छाम — किमु तद्ब्रह्मावेत् यस्मात्तत्सर्वमभवदिति । एव चोदिते सर्वदोषानागंवितं प्रतिवचनमाह—

ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत् । अहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणा तद्धैतत्पश्यन्नृषिर्वामदेव. प्रतिपेदेऽह मनुरभव सूर्यश्चेति । तदिदमप्येतर्हि य एव वेदाह ब्रह्मास्मीति स इद सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशते । आत्मा ह्येषा स भवति अथ योऽन्या देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेव स देवानाम् । यथा ह वै बहव पशवो मनुष्य भुञ्ज्युरेवमेकैक पुरुषो देवान्भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रिय भवति किमु बहुषु तस्मादेषा तन्न प्रिय यदेतन्मनुष्या विद्यु ॥१०॥

ब्रह्मापरं सर्वभावस्य साध्यत्वोपपत्ते । न हि परस्य ब्रह्मण सर्वभावापत्तिर्विज्ञानसाध्या । विज्ञानसाध्या च सर्वभावापत्तिमाह, 'तस्मात्तत्सर्वमभवत्' इति । तस्माद्ब्रह्म वा इदमग्र आसीदित्यपरं ब्रह्मेह भवितुमर्हति ॥

मनुष्याधिकाराद्वा तद्भावी ब्राह्मण स्यात् । 'सर्व भविष्यन्तो मनुष्या मन्यन्त' इति हि मनुष्या प्रकृतास्तेषा चाभ्युदयनि श्रेयससावने विशेषतोऽधिकार इत्युक्तम् । न परस्य ब्रह्मणो नाप्यपरस्य प्रजापते । अतो द्वैतैकत्वापरब्रह्मविद्यया कर्मसहितया अपरब्रह्मभावमुपसंपन्नो भोज्यादपावृत्त सर्वप्राप्त्योच्छिन्नकामकर्मबंधन परब्रह्मभावी ब्रह्मविद्याहेतोर्ब्रह्मेत्यभिधीयते । दृष्टश्च लोके

भाविनी वृत्तिमाश्रित्य शब्दप्रयोगो, यथौदन पचतीति, शास्त्रे च "परिव्राजक सर्वभूताभयदक्षिणा" इत्यादि, तथेहेति केचित् "ब्रह्म ब्रह्मभावी पुरुषो ब्राह्मण" इति व्याचक्षते ॥

तन्न। सर्वभावापत्तेरनित्यत्वदोषात्। न हि सोऽस्ति लोके परमार्थतो यो निमित्तवशाद्भावान्तरमापद्यते नित्यश्चेति। तथा ब्रह्मविज्ञाननिमित्तकृता चेत्सर्वभावापत्ति नित्या चेति विरुद्धम्। अनित्यत्वे च कर्मफलतुल्यतेत्युक्तो दोष। अविद्याकृतासर्वत्वनिवृत्ति चेत्सर्वभावापत्ति ब्रह्मविद्याफल मन्यसे, ब्रह्मभावि पुरुषकल्पना व्यर्था स्यात्। प्राग्ब्रह्मविज्ञानादपि सर्वो जन्तुर्ब्रह्मत्वान्नित्यमेव सर्वभावापन्न परमार्थत, अविद्यया त्वब्रह्मत्वमसर्वत्व चाध्यारोपित, यथा शुक्तिकाया रजत, व्योम्नि वा तलमलवत्त्वादि। तथेह ब्रह्मण्यध्यारोपितमविद्यया अब्रह्मत्वमसर्वत्व च ब्रह्मविद्यया निवर्त्यत इति मन्यसे यदि, तदा युक्त यत्परमार्थत आसीत्पर ब्रह्म ब्रह्मशब्दस्य मुख्यार्थभूत 'ब्रह्म वा इदमग्र आसात्' इत्यस्मिन्वाक्ये उच्यते इति वक्तुम्। यथाभूतार्थवादित्वाद्वेदस्य। न त्विय कल्पना युक्ता ब्रह्मशब्दार्थविपरीतो ब्रह्मभावी पुरुषो ब्रह्मेत्युच्यत इति। श्रुतहान्यश्रुतकल्पनाया अन्याय्यत्वात्। महत्तरे प्रयोजनान्तरेऽसत्यविद्याकृतव्यतिरेकेण अब्रह्मत्वमसर्वत्व च विद्यत एवेति चेत्। न। तस्य ब्रह्मविद्ययापोहानुपपत्ते। न हि क्वचित्साक्षाद्वस्तुधर्मस्यापोद्री दृष्टा कर्त्री वा ब्रह्मविद्या। अविद्यास्तु सर्वत्रैव निवर्तिका दृश्यते। तथेहाप्यब्रह्मत्वमसर्वत्व चाविद्याकृतमेव निवर्त्यता ब्रह्मविद्यया। न तु पारमार्थिक वस्तु कर्तुं निवर्तयितु वार्हति ब्रह्मविद्या। तस्माद्यथैव श्रुतहान्यश्रुतकल्पना ॥

ब्रह्मण्यविद्यानुपपत्तिरिति चेत्। न। ब्रह्मणि विद्याविधानात्। न हि शुक्तिकाया रजताध्यारोपणेऽसति शुक्तिकात्व ज्ञाप्यते चक्षुर्गोचरापन्नाया इय शुक्तिका न रजतमिति। तथा सदेवेद सर्व ब्रह्मैवेद सर्व आत्मैवेदं सर्व नेदं द्वैतमस्त्यब्रह्म इति ब्रह्मण्येकत्वविज्ञान न विधातव्य ब्रह्मण्यविद्याध्यारोपणायामसत्याम्। न ब्रूम शुक्तिकायामिव ब्रह्मण्यतद्धर्माध्यारोपणा नास्तीति, कि तर्हि, न ब्रह्म स्वात्मन्यतद्धर्माध्यारोपनिमित्तमविद्याकर्तृ चेति। भवत्येव नाविद्याकर्तृ भ्रान्तं च ब्रह्म। किंतु नैवाब्रह्म अविद्याकर्ता चेतनो भ्रान्तोऽन्य इष्यते। 'नान्योऽतोऽस्ति विज्ञाता' 'नान्यदतोऽस्ति विज्ञातृ' 'तत्त्वमसि' 'आत्मानमेवावेत्' 'अह ब्रह्मास्मि'

'अन्योऽसावन्योऽहमस्मीति न स वेद' इत्यादिश्रुतिभ्य । स्मृतिभ्यश्च—"समं सर्वेषु भूतेषु" "अहमात्मा गुडाकेश" "शुनि चैव श्वपाके च," "यस्तु सर्वाणि भूतानि" इत्यादिभ्य । 'यस्मिन्सर्वाणि भूतानि' इति च मंत्रवर्णात् । नन्वेव शास्त्रोपदेशानर्थक्यमिति । बाढमेवम्, अवगतेऽस्त्वेवानर्थक्यम् । अवगमानर्थक्यमपीति चेन्न । अनवगमनिवृत्तेर्दृष्टत्वात् । तन्निवृत्तेरप्यनुपपत्तिरेकत्व इति चेन्न । दृष्टविरोधात् । दृश्यते ह्येकत्वविज्ञानादेव अनवगमनिवृत्ति । दृश्यमानमप्यनुपपन्नमिति ब्रुवतो दृष्टविरोध स्यात् । न च दृष्टविरोध केनचिदप्यभ्युपगम्यते । न च दृष्टेऽनुपपन्न नाम दृष्टत्वादेव । दर्शनानुपपत्तिरिति चेत्तत्राप्येषैव युक्ति ॥

'पुण्यो वै पुण्येन कर्मणा भवति' 'त विद्याकर्मणी समन्वारभेते' 'मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष' इत्येवमादिश्रुतिस्मृतिन्यायेभ्य परस्माद्विलक्षणोऽन्य ससार्यवगम्यते । तद्विलक्षणश्च पर 'स एष नेति नेति' 'अशनायाद्यत्येति' 'य आत्मापहतपाप्मा विजरो विमृत्यु' 'एतस्य वा अक्षरस्य प्रशासने' इत्यादिश्रुतिभ्य । कणादाक्षपादादितर्कशास्त्रेषु च संसारिविलक्षण ईश्वर उपपत्तित साध्यते । संसारदु खापनयार्थित्वप्रवृत्तिदर्शनात्स्फुटमन्यत्वमीश्वरात्मसारिणोऽवगम्यते । 'अवाक्यनादर' "न मे पार्थास्ति" इतिश्रुतिस्मृतिभ्य । 'सोऽन्वेष्टव्य स विजिज्ञासितव्य' 'तं विदित्वा न लिप्यते' 'ब्रह्मविदाप्नोति परम्' 'एकधैवानुद्रष्टव्यमेतत्' 'यो वा एतदक्षर गार्ग्यविदित्वा' 'तमेव धीरो विज्ञाय' 'प्रणवो धनु शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते' इत्यादिकर्मकर्तृनिर्देशाच्च । मुमुक्षोश्च गतिमार्गविशेषदेशोपदेशात् । अमति भेदे कस्य कुतो गति. स्यात्तदभावे च दक्षिणोत्तरमार्गविशेषानुपपत्ति गंतव्यदेशानुपपत्तिश्चेति । भिन्नस्य तु परस्मादात्मन सर्वमेतदुपपन्नम् । कर्मज्ञानसाधनोपदेशाश्च । भिन्नश्चेद्ब्रह्मण संसारी स्यात् युक्तस्तं प्रति अभ्युदयनि.श्रेयससाधनयो कर्मज्ञानयोरुपदेशो नेश्वरस्याप्तकामत्वात् । तस्माद्युक्तं ब्रह्मेति ब्रह्मभावी पुरुष उच्यत इति चेन्न । ब्रह्मोपदेशानर्थक्यप्रसंगात् । संसारी चेद्ब्रह्मभाव्यब्रह्म सन् विदित्वात्मानमेवाहं ब्रह्मास्मीति सर्वमभवत्तस्य संसार्यात्मविज्ञानादेव सर्वात्मभावस्य फलस्य सिद्धत्वात्परब्रह्मोपदेशस्य ध्रुवमानर्थक्यं प्राप्तम् । तद्विज्ञानस्य क्वचित्पुरुषार्थसाधनेऽविनियोगात्संसारिण एवाहंब्रह्मास्मीति ब्रह्मत्वसंपादनार्थ उपदेश

इति चेत् । अनिर्ज्ञाते हि ब्रह्मस्वरूपे कि संपादयेदहं ब्रह्मास्मीति । निर्ज्ञातलक्षणे हि ब्रह्मणि शक्या संपत्कर्तुम् । 'नायमात्मा ब्रह्म' 'यत्साक्षादपरोक्षाद्ब्रह्म' 'य आत्मा' 'तत्त्वमसि' 'स आत्मा' 'ब्रह्मविदाप्नोति परम्' इति प्रकृत्य 'तस्माद्वा एतस्मादात्मन' इति सहस्रशो ब्रह्मात्मशब्दयो सामानाधिकरण्यात् एकार्थत्वमेवेत्यवगम्यते । अन्यस्य ह्यन्यत्वे संपत्क्रियते नैकत्वे । 'इदं सर्वं यदयमात्मा' इति च प्रकृतस्यैव द्रष्टव्यस्यात्मन एकत्वं दर्शयति । तस्मान्नात्मनो ब्रह्मत्वसंपदुत्पत्ति ॥

न चान्यन्यत्प्रयोजनं ब्रह्मोपदेशस्य गम्यते 'ब्रह्म वेद ब्रह्मैव भवति' 'अभय वै जनक प्राप्तोऽसि' 'अभयं हि वै ब्रह्म भवति' इति च तदापत्तिश्रवणात् । सपत्तिश्चेत्तदापत्तिर्न स्यात् । नह्यन्यस्यान्यभाव उपपद्यते । वचनात् । सपत्तेरपि तद्भावापत्ति स्यादिति चेन्न । संपत्ते प्रत्ययमात्रत्वात् । विज्ञानस्य च मिथ्याज्ञाननिवर्तकत्वव्यतिरेकेणाकारकत्वमित्यवोचाम । नच वचनं वस्तुन सामर्थ्यजनकम् । ज्ञापक हि शास्त्र न कारकमिति स्थिति । 'स एष इह प्रविष्ट' इत्यादिवाक्येषु च परस्यैव प्रवेश इति स्थितम् । तस्माद्ब्रह्मेति न ब्रह्मभाविपुरुषकल्पना साध्वी । इष्टार्थबाधनाच्च । सैन्धवघनवदनंतरमबाह्यमेकरस ब्रह्मेति विज्ञानं सर्वस्यामुपनिषदि प्रतिपिपादयिषितोऽर्थ काडद्वयेऽप्येतेऽवधारणादवगम्यते 'इत्यनुशासनं' 'एतावदरे खल्वमृतत्व' इति । तथा सर्वशाखोपनिषत्सु च ब्रह्मैकत्वविज्ञान निश्चितोऽर्थ । तत्र यदि संसारी ब्रह्मणोऽन्य आत्मानमेवावेदिति कल्प्येत, इष्टस्यार्थस्य बाधन स्यात् । तथा च शास्त्रमुपक्रमोपसहारयोर्विरोधादसमंजसं कल्पित स्यात् । व्यपदेशानुपपत्तेश्च । यदि च 'आत्मानमेवावेत्' इति संसारी कल्प्येत, ब्रह्मविद्या इति व्यपदेशो न स्यात् । आत्मानमेवावेदिति ससारिण एव वेद्यत्वोपपत्ते । आत्मेति वेदितुरन्यदुच्यत इति चेन्न । अह ब्रह्मास्मीति विशेषणात् । अन्यश्चेद्वेद्य स्यादयमसाविति वा विशेष्येत न त्वहमस्मीति । अहमस्मीति विशेषणादात्मानमेवावेदिति चावधारणान्निश्चितमात्मैव ब्रह्मेत्यवगम्यते । तथा च सत्युपपन्नो ब्रह्मविद्याव्यपदेशो नान्यथा । संसारिविद्या ह्यन्यथा स्यात् । न च ब्रह्मत्वाब्रह्मत्वे ह्येकस्योपपन्ने परमार्थत. तम प्रकाशाविव भानोर्विरुद्धत्वात् । न चोभयनिमित्तत्वे ब्रह्मविद्येति निश्चितो व्यपदेशो युक्त· । तदा ब्रह्मविद्या संसारिविद्या च स्यात् । न च वस्तुनोऽर्धजर-

तीयत्वं कल्पयितु युक्तं तत्त्वज्ञानविवक्षायाम्। श्रोतु सशयो हि तथा स्यात्। निश्चित च ज्ञान पुरुषार्थसाधनमिष्यते 'यस्य स्यादद्धा न विचिकित्साऽस्ति' "सशयात्मा विनश्यति" इति श्रुतिस्मृतिभ्याम्। अतो न संशयितो वाक्यार्थो वाच्य परहितार्थिना॥

ब्रह्मणि साधकत्वकल्पना अस्मदादिष्विव अपेशला 'तदात्मानमेवावेत्त-स्मात्तत्सर्वमभवत्' इति, इति चेन्न। शास्त्रोपालभात्। न ह्यस्मत्कल्पनेयं, शास्त्र-कृता तु, तस्माच्छास्त्रस्यायमुपालभ। न च ब्रह्मण इष्ट चिकीर्षुणा शास्त्रार्थ विपरीतकल्पनया स्वार्थपरित्याग कार्य। न चैतावत्येवाक्षमा युक्ता भवत। सर्व हि नानात्व ब्रह्मणि कल्पितमेव 'एकधैवानुद्रष्टव्यम्' 'नेह नानास्ति किचन' 'यत्र हि द्वैतमिव भवति' 'एकमेवाद्वितीयम्' इत्यादिवाक्यशतेभ्य। सर्वो हि लोकव्यवहारो ब्रह्मण्येव कल्पितो न परमार्थ सन् इत्यत्यल्पमिदमुच्यत इयमेव कल्पना अपेशलेति॥

तस्मात् यत्प्रविष्ट स्रष्टृ ब्रह्म तद्ब्रह्म। वैशब्दोऽवधारणार्थ। इद शरीरस्थ यत् गृह्यतेऽग्रे प्राक्प्रतिबोधादपि ब्रह्मैवासीत्सर्व चेदम्। कित्वप्रति-बोधात् अब्रह्मास्म्यसर्व च इत्यात्मन्यध्यारोपात्कर्ताहं क्रियावान्फलाना च भोक्ता सुखी दु खी ससारीति चाध्यारोपयति। परमार्थतस्तु ब्रह्मैव तद्विलक्षण सर्व च। तत्कथचिदाचार्येण दयालुना प्रतिबोधित नासि ससारीति आत्मानमेवा-वेत्स्वाभाविकम्। अविद्याध्यारोपितविशेषवर्जितमिति एवशब्दस्यार्थ॥

ब्रूहि कोऽसावात्मा स्वाभाविको, यमात्मान विदितवद्ब्रह्म। ननु न स्मरस्यात्मानं, दर्शितो ह्यसौ य इह प्रविश्य प्राणित्यपानिति व्यानित्युदानिति समानितीति। नन्वसौ गौरसावश्व इत्येवमसौ व्यपदिश्यते भवता, नात्मान प्रत्यक्षं दर्शयसि। एवं तर्हि द्रष्टा श्रोता मन्ता विज्ञाता स आत्मेति। नन्वत्रापि दर्शनादिक्रियाकर्तु स्वरूपं न प्रत्यक्षं दर्शयसि। न हि गमिरेव गतु स्वरूप छिदिर्वा छेत्तु। एवं तर्हि दृष्टेर्द्रष्टा श्रुते श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता स आत्मेति। नन्वत्र को विशेषो द्रष्टरि। यदि दृष्टेर्द्रष्टा यदि वा घटस्य द्रष्टा सर्वथापि द्रष्टैव। द्रष्टव्य एव तु भवान्विशेषमाह दृष्टेर्द्रष्टेति। द्रष्टा तु यदि दृष्टेर्यदि वा घटस्य, द्रष्टा द्रष्टैव। न, विशेषोपपत्ते। अस्त्यत्र विशेषो, यो दृष्टेर्द्रष्टा स दृष्टिश्चेद्भवति नित्यमेव पश्यति दृष्टि, न कदाचिदपि दृष्टिर्न दृश्यते द्रष्टा, तत्र

द्रष्टु दृष्टया नित्यया भवितव्यम्। अनित्या चेत् द्रष्टुर्दृष्टि तत्र दृश्या या दृष्टि सा कदाचिन्न दृश्येतापि, यथा अनित्यया दृष्टया घटादि वस्तु। न च तद्वत् दृष्टे द्रष्टा कदाचिदपि न पश्यति दृष्टिम् ॥

किं द्वे दृष्टी द्रष्टुर्नित्या अदृश्या, अन्याऽनित्या दृश्येति। बाढम्। प्रसिद्धा तावदनित्या दृष्टिरंधानधत्वदर्शनात्। नित्यैव चेत्सर्वोऽनध एव स्यात्। द्रष्टुस्तु नित्या दृष्टि 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुते। अनुमानाच्च। अधस्यापि घटाद्याभासविषया स्वप्ने दृष्टिरुपलभ्यते। सा तर्हीतरदृष्टिनाशे न नश्यति, सा द्रष्टुर्दृष्टि। तयाऽविपरिलुप्तया नित्यया दृष्टया स्वरूपभूतया स्वयज्योति समाख्यया इतरामनित्या दृष्टिं स्वप्नबुद्धान्तयो वासनाप्रत्ययरूपा नित्यमेव पश्यन्दृष्टेर्द्रष्टा भवति। एवं च सति दृष्टिरेव स्वरूपमस्याग्न्यौष्ण्यवन्न काणादानामिव दृष्टिव्यतिरिक्तोऽन्यश्चेतनो द्रष्टा ॥

तद्वह्म आत्मानमेव नित्यदृग्रूपमध्यारोपितानित्यदृष्ट्यादिवर्जितमेव अवेद्विदितवत्। ननु विप्रतिषिद्धं 'न विज्ञातेर्विज्ञातारं विजानीया' इति श्रुते विज्ञातुर्विज्ञानम्। न, एव विज्ञानान्न विप्रतिषेध। एव दृष्टे द्रष्टेति विज्ञायत एव। अन्यज्ञानानपेक्षत्वाच्च। न च द्रष्टुर्नित्यैव दृष्टिरित्येवं विज्ञाते द्रष्टृविषया दृष्टिमन्यामाकाक्षते। निवर्तते हि द्रष्टृविषयदृष्टयाकाक्षा तदसभवादेव। नह्यविद्यमाने विषये आकाक्षा कस्यचिदुपजायते। न च दृश्या दृष्टिर्द्रष्टार विषयीकर्तुमुत्सहते यतस्तामाकाक्षेत। न च स्वरूपविषयाकाक्षा स्वस्यैव। तस्मादज्ञानाध्यारोपणनिवृत्तिरेव आत्मानमेवावेदित्युक्तं नात्मनो विषयीकरणम् ॥

तत्कथमवेदित्याह— अह दृष्टेर्द्रष्टा आत्मा ब्रह्मास्मि भवामीति। ब्रह्मेति यत्साक्षादपरोक्षात्सर्वान्तर आत्मा अशनायाद्यतीतो नेति नेत्यस्थूलमनण्वित्येवमादिलक्षणं, तदेवाहमस्मि, नान्य ससारी यथा भवानाहेति। तस्मादेवं विज्ञानात्तद्वह्म सर्वमभवत्। अब्रह्माध्यारोपणापगमात् तत्कार्यस्यासर्वत्वस्य निवृत्त्या सर्वमभवत्। तस्माद्युक्तमेव मनुष्या मन्यन्ते यद्ब्रह्मविद्यया सर्वं भविष्याम इति। यत्पृष्टं, किमु तद्वह्मावित् यस्मात्तत्सर्वमभवदिति तन्निर्णीतं— ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदिति ॥

तत्तत्र यो यो देवाना मध्ये प्रत्यबुध्यत प्रतिबुद्धवानात्मानं यथोक्तेन

विधिना स एव प्रतिबुद्ध आत्मा तद्ब्रह्माभवत् । तथर्षीणा तथा मनुष्याणा च मध्ये । देवानामित्यादि लोकदृष्टयपेक्षया न ब्रह्मत्वबुद्धयोच्यते । पुर पुरुष आविशादिति सर्वत्र ब्रह्मैवानुप्रविष्टमित्यवोचाम । अत शरीराद्युपाधिजनित-लोकदृष्टयपेक्षया देवानामित्याद्युच्यते । परमार्थतस्तु तत्र तत्र ब्रह्मैवाग्र आसीत्प्राक्प्रतिबोधात् देवादिशरीरेष्वन्यथैव विभाव्यमानम् । तदात्मानमेवावेत्तथैव च सर्वमभवत् ॥

अस्या ब्रह्मविद्याया सर्वभावापत्ति फलमित्येतस्यार्थस्य द्रढिम्ने मन्त्रानुदाहरति श्रुति । कथम् । तत् ब्रह्म एतदात्मानमेव अहमस्मीति पश्यन्नेतस्मादेव ब्रह्मणो दर्शनाद्दर्षिर्वामदेवाख्य प्रतिपेदे ह प्रतिपन्नवान्किल । स एतस्मिन्ब्रह्मात्मदर्शनेऽवस्थित एतान्मन्त्रान्ददर्श— अहं मनुरभव सूर्यश्चेत्यादीन । तदेतद्ब्रह्म पश्यन्निति ब्रह्मविद्या परामृश्यते । अह मनुरभव सूर्यश्चेत्यादिना सर्वभावापत्ति ब्रह्मविद्याफल परामृशति । पश्यन्सर्वात्मभाव फल प्रतिपेदे इत्यस्मात्प्रयोगात् ब्रह्मविद्यासहायसाधनसाध्य मोक्ष दर्शयति । भुजानस्तृप्यतीति यद्वत् । सेय ब्रह्मविद्यया सर्वभावापत्तिरासीन्महता देवादीना वीर्यातिशयात् । नेदानीमेदयुगीनाना विशेषतो मनुष्याणा अल्पवीर्यत्वादिति स्यात्कस्यचित् बुद्धि तद्व्युत्थापनायाह— तदिद प्रकृत ब्रह्म यत्सर्वभूतानुप्रविष्ट दृष्टिक्रियादिलिग एतर्ह्येतस्मिन्नपि वर्तमानकाले य कश्चिद्व्यावृत्तबाह्यौत्सुक्य आत्मानमेवैव वेदाह ब्रह्मास्मीति, अपोह्य उपाधिजनितभ्रान्तिविज्ञानाध्यारोपितान्विशेषान् संसारधर्मानागवित अनतरमबाह्य ब्रह्मैवाहमस्मि केवलमिति, सोऽविद्याकृतासर्वत्वनिवृत्ते ब्रह्मविज्ञानादिद सर्व भवति । न हि महावीर्येषु वामदेवादिषु हीनवीर्येषु वा वार्तमानिकेषु मनुष्येषु ब्रह्मणो विशेषस्तद्विज्ञानस्य वास्ति । वार्तमानिकेषु पुरुषेषु तु ब्रह्मविद्याफले अनैकातिकता शंक्यत इत्यत आह— तस्य ह ब्रह्मविज्ञातुर्यथोक्तेन विधिना देवा महावीर्या चनापि अभूत्यै अभवनाय ब्रह्मसर्वभावस्य, नेशते न पर्याप्ता , किमुतान्ये ॥

ब्रह्मविद्याफलप्राप्तौ विघ्नंकरणे देवादय ईशत इति का शंकेति । उच्यते— देवादीन्प्रति ऋणवत्त्वान्मर्त्यानाम् । 'ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्य प्रजया पितृभ्य ' इति हि जायमानमेवर्णवन्त पुरुष दर्शयति श्रुति । पशुनिदर्शनाच्च 'अथो अयं वा' इत्यादिलोकश्रुतेश्च आत्मनो वृत्तिपरिपिपालयिषया अधमर्णानिव

देवा परतत्रान्मनुष्यान्प्रति अमृतत्वप्राप्ति प्रति विघ्न कुर्युरिति न्याय्यैवैषा शका। स्वपशून्स्वशरीराणांव च रक्षन्ति देवा.। महत्तरा हि वृत्ति कर्माधीना दर्शयिष्यति देवादीना बहुपशुसमतयैकैकस्य पुरुषस्य। 'तस्मादेषा तन्न प्रियं यदेतन्मनुष्या विद्यु' इति हि वक्ष्यति। 'यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेव हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति' इति च। ब्रह्मवित्त्वे पारार्थ्यनिवृत्तेर्न स्वलोकत्व पशुत्व च इत्यभिप्रायोऽप्रियारिष्टिवचनाभ्या अवगम्यते। तस्माद्ब्रह्मविदो ब्रह्मविद्याफलप्राप्ति प्रति कुर्युरेव विघ्न देवा। प्रभाववन्तश्च हि ते॥

नन्वेव सति अन्यास्वपि कर्मफलप्राप्तिषु देवाना विघ्नकरणं पेयपानसमम्। हंत तर्ह्यविस्रभोऽभ्युदयनि श्रेयससाधनानुष्ठानेषु। तथश्वरस्य अचिन्त्यशक्तित्वाद्विघ्नकरणे प्रभुत्वम्। तथा कालकर्ममन्त्रौषधितपसाम्। एषा हि फलसपत्तिविपत्तिहेतुत्वं शास्त्रे लोके च प्रसिद्धम्। अतोऽप्यनाश्वास शास्त्रार्थानुष्ठाने॥

न। सर्वपदार्थाना नियतनिमित्तोपादानात्। जगद्वैचित्र्यदर्शनाच्च। स्वभावपक्षे च तदुभयानुपपत्ते। सुखदु खादिफलनिमित्त कर्म इत्येतस्मिन्पक्षे स्थिते वेदस्मृतिन्यायलोकपरिगृहीते, देवेश्वरकाला तावन्न कर्मफलविपर्यासकर्तार। कर्मणा काक्षितकारकत्वात्। कर्म हि शुभाशुभ पुरुषाणा देवकालेश्वरादिकारकमनपेक्ष्य नात्मानं प्रति लभते। लब्धात्मकमपि फलदानेऽसमर्थम्। क्रियाया हि कारकाद्यनेकनिमित्तोपादानस्वाभाव्यात्। तस्मात्क्रियानुगुणा हि देवेश्वरादय इति कर्मसु तावन्न फलप्राप्ति प्रत्यविस्रभ॥

कर्मणामप्येषा वशानुगत्व क्वचित् स्वसामर्थ्यस्याप्रणोद्यत्वात्। कर्मकालदैवद्रव्यादिस्वभावाना गुणप्रधानभावस्वनियतो दुर्विज्ञेयश्चेति तत्कृतो मोहो लोकस्य। कर्मैव कारकं नान्यत्फलप्राप्ताविति केचित्। दैवमेवेत्यपरे। काल इत्येके। द्रव्यादिस्वभाव इति केचित्। सर्व एते सहता एवेत्यपरे। तत्र कर्मणः प्राधान्यमंगीकृत्य वेदस्मृतिवादा 'पुण्यो वै पुण्येन कर्मणा भवति पाप पापेन' इत्यादय। यद्यप्येषा स्वविषये कस्यचित्प्राधान्योद्भव इतरेषा तत्कालीनप्राधान्यशक्तिस्तंभ, तथापि न कर्मणः फलप्राप्ति प्रति अनैकान्तिकत्वम्। शास्त्रन्यायनिर्धारितत्वात्कर्मप्राधान्यस्य॥

न। अविद्यापगममात्रत्वात् ब्रह्मप्राप्तिफलस्य। यदुक्तं ब्रह्मप्राप्तिफलं प्रति देवा विघ्नं कुर्युरिति, तत्र न देवाना विघ्नकरणे सामर्थ्यम्। कस्मात्। विद्या-

कालानतरितत्वात् ब्रह्मप्राप्तिफलस्य । कथम् । यथा लोके द्रष्टुश्चक्षुष आलोकेन संयोगो यत्काल , तत्काल एव रूपाभिव्यक्ति , एवमात्मविषयं विज्ञानं यत्कालं, तत्काल एव तद्विषयाज्ञानतिरोभाव स्यात् । अतो ब्रह्मविद्याया सत्या अविद्या-कार्यानुपपत्ते , प्रदीपे इव तम कार्यस्य, केन कस्य विघ्नं कुर्युर्देवा यत्रात्मत्व एव देवाना ब्रह्मविद । तदेतदाह— आत्मा स्वरूपं ध्येयं यत्तत्सर्वशास्त्रैर्विज्ञेयं ब्रह्म, हि यस्मात् एषा देवाना स ब्रह्मविद्भवति । ब्रह्मविद्यासमकालमेव अविद्यामात्रव्यवधानापगमात् शुक्तिकाया इव रजताभासाया शुक्तिकात्वमित्यवोचाम । अतो नात्मन प्रतिकूलत्वे देवाना प्रयत्न सभवति । यस्य हि अनात्मभूत फल देशकालनिमित्तान्तरित, तत्रानात्मविषये सफल प्रयत्नो विघ्नाचरणाय देवानाम् । न त्विह विद्यासमकाले आत्मभूते । देशकालनिमित्तानतरिते, अवसरानुपपत्ते ॥

एव तर्हि विद्याप्रत्ययसतत्यभावात् विपरीतप्रत्ययतत्कार्ययोश्च दर्शनात् अत्य एवात्मप्रत्ययोऽविद्यानिवर्तको, न तु पूर्व इति । न । प्रथमेनानैकान्तिकत्वात् । यदि हि प्रथम आत्मविषय प्रत्ययोऽविद्या न निवर्तयति, तथाऽन्त्योपि तुल्यविषयत्वात् । एवं तर्हि सततोऽविद्यानिवर्तको न विच्छिन्न इति । न । जीवनादौ सति सतत्यनुपपत्ते । न हि जीवनादिहेतुके प्रत्यये सति विद्याप्रत्ययसंततिरुपपद्यते, विरोधात् । अथ जीवनादिप्रत्ययातिरस्करणेनैव आमरणान्ताद्विद्यासततिरिति चेन्न । प्रत्ययेयत्तासंतानानवधारणात् शास्त्रार्थानवधारणदोषात् । इयता प्रत्ययाना सततिरविद्याया निवर्तिकेत्यनवधारणात् शास्त्रार्थो नावधिर्येत । तच्चानिष्टम् । संततिमात्रत्वेऽवधारित एवेति चेत् । न । आद्यतयोरविशेषात् । प्रथमा विद्याप्रत्ययसततिर्मरणकालान्ता वेति विशेषाभावात् आद्यंतयो प्रत्ययो पूर्वोक्तौ दोषौ प्रसज्येयाताम् । एवं तर्ह्यनिवर्तक एवेति चेन्न, 'तस्मात्तत्सर्वमभवत्' इति श्रुते । 'भिद्यते हृदयग्रंथि' 'तत्र को मोह' इत्यादिश्रुतिभ्यश्च ॥

अर्थवाद इति चेन्न । सर्वशाखोपनिषदामर्थवादत्वप्रसंगात् । एतावन्मात्रार्थत्वोपक्षीणा हि सर्वशाखोपनिषद । प्रत्यक्षप्रमितात्मविषयत्वात् अस्त्येवेति चेन्न । उक्तपरिहारत्वात् । अविद्याशोकमोहभयादिदोषानिवृत्ते प्रत्यक्षत्वादिति चोक्त परिहार । तस्मादाद्योऽन्त्य संततोऽसंततश्चेत्यचोद्यमेतत् । अविद्या-

दिदोषनिवृत्तिफलावसानत्वाद्विद्याया । य एवाविद्यादिदोषनिवृत्तिफलकृत्प्रत्यय आद्योऽन्त्य संततोऽसतो वा स एव विद्येत्यभ्युपगमान्न चोद्यस्यावतारगंधोऽप्यस्ति ॥

यत्तूक्तं विपरीतप्रत्ययतत्कार्ययोश्च दर्शनादिति । न । तच्छेषस्थितिहेतुत्वात् । येन कर्मणा शरीरमारब्ध तद्विपरीतप्रत्ययदोषनिमित्तत्वात्तस्य तथाभूतस्यैव विपरीतप्रत्ययदोषसंयुक्तस्य फलदाने सामर्थ्यमिति, यावच्छरीरपात तावत्फलोपभोगागतया विपरीतप्रत्ययं रागादिदोषं च तावन्मात्रमाक्षिपत्येव । मुक्तेषुवत्प्रवृत्तफलत्वात्तद्धेतुकस्य कर्मण । तेन न तस्य निवर्तिका विद्या, अविरोधात् । कि तर्हि स्वाश्रयादेव स्वात्मविरोध्यविद्याकार्य यदुत्पित्सु तन्निरुणद्धि अनागतत्वात् । अतीत हीतरत् । किच नच विपरीतप्रत्ययो विद्यावत उत्पद्यते । निर्विषयत्वात् । अनवधृतविषयाविशेषस्वरूप हि सामान्यमात्रमाश्रित्य विपरीतप्रत्यय उत्पद्यमान उत्पद्यते । यथा शुक्तिकाया रजतमिति । स च विषयविशेषावधारणवत अशेषविपरीतप्रत्ययाश्रयस्य उपमर्दितत्वान्न पूर्ववत्सभवति । शुक्तिकादौ सम्यक्प्रत्ययोत्पत्तौ पुनरदर्शनात् । क्वचित्तु विद्याया पूर्वोत्पन्नविपरीतप्रत्ययजनितसंस्कारेभ्यो विपरीतप्रत्ययावभासा स्मृतयो जायमाना विपरीतप्रत्ययभ्राति अकस्मात्कुर्वन्ति । यथा विज्ञातदिग्विभागस्यापि अकस्माद्दिग्विपर्ययविभ्रम । सम्यग्ज्ञानवतोऽपि चेत्पूर्ववद्विपरीतप्रत्यय उत्पद्यते, सम्यग्ज्ञानेऽप्यविश्वभात् शास्त्रार्थविज्ञानादौ प्रवृत्ति असमजसा स्यात्सर्व च प्रमाणमप्रमाणं संपद्येत । प्रमाणाप्रमाणयोर्विशेषानुपपत्ते । एतेन सम्यग्ज्ञानानंतरमेव शरीरपाताभाव कस्मादित्येतत्परिहृतम् । ज्ञानोत्पत्ते प्रागूर्ध्व तत्कालजन्मान्तरसंचिताना च कर्मणामप्रवृत्तफलाना विनाशः सिद्धो भवति फलप्राप्तिविघ्ननिषेधश्रुतेरेव । 'क्षीयन्ते चास्य कर्माणि' 'तस्य तावदेव चिरम्' 'सर्वे पाप्मान. प्रदूयन्ते' 'तं विदित्वा न लिप्यते कर्मणा पापकेन' 'एतमु हैवैते न तरत ' 'नैनं कृताकृते तपत ' 'एत ह वाव न तपति' 'न बिभेति कुतश्चन' इत्यादिश्रुतिभ्यश्च । 'ज्ञानाग्नि सर्वकर्माणि भस्मसात्कुरुते' इत्यादिस्मृतिभ्यश्च ॥

यत्तु ऋणै प्रतिबध्यत इति । तन्न । अविद्यावद्विषयत्वात् । अविद्यावान्हि ऋणी । तस्य कर्तृत्वाद्युपपत्ते । 'यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत्' इति हि वक्ष्यति । अनन्यत्सद्वस्त्वात्माख्यं यत्राविद्याया सत्यामन्यदिव

स्यात्तिमिरकृताद्वितीयचंद्रवत् तत्राविद्याकृतानेककारकापेक्षं दर्शनादिकर्म तत्कृतं फलं च दर्शयति, तत्रान्योऽन्यत्पश्येदित्यादिना । यत्र पुनर्विद्याया सत्यामविद्याकृतानेकत्वभ्रमप्रहाणं 'तत्केन क पश्येत्' इति कर्मासभवं दर्शयति । तस्मादविद्यावद्विषय एव ऋणित्व कर्मसंभवान्नेतरत्र । एतच्चोत्तरत्र व्याचिख्यासिष्यमाणैरेव वाक्यैर्विस्तरेण प्रदर्शयिष्याम ॥

तद्यथेहैव तावत्— अथ य कश्चिदब्रह्मविदन्यामात्मनो व्यतिरिक्ता या काचिद्देवतामुपास्ते स्तुतिनमस्कारयागबल्युपहारप्राणिधानध्यानादिना उपास्ते तस्या गुणभावमुपगम्य आस्ते । अन्योऽसावनात्मा मत्त पृथक् अन्योऽहमस्म्यधिकृतो, मयास्मै ऋणिवत्प्रतिकर्तव्यं, इत्येवंप्रत्यय सन्नुपास्ते, न स इत्थंप्रत्ययो वेद विजानाति तत्त्वम् । न स केवलमेवंभूतोऽविद्वानविद्यादोषवानेव, कि तर्हि, यथा पशुर्गवादिर्वाहनदोहनाद्युपकारैरुपभुज्यते, एव स इज्याद्यनेकोपकारै उपभोक्तव्यत्वादेकैकेन देवादीनाम् । अत पशुरिव सर्वार्थेषु कर्मस्वधिकृत इत्यर्थ ॥

एतस्य ह्यविदुषो वर्णाश्रमादिप्रविभागवतो अधिकृतस्य कर्मणो विद्यासहितस्य केवलस्य च शास्त्रोक्तस्य कार्य मनुष्यत्वादिको ब्रह्मान्त उत्कर्ष । शास्त्रोक्तविपरीतस्य च स्वाभाविकस्य कार्य मनुष्यत्वादिक एव स्थावरान्तोऽपकर्ष । यथा चैतत्तथा 'अथ त्रयो वाव लोका' इत्यादिना वक्ष्याम कृत्स्नेनैवाध्यायशेषेण । विद्यायाश्च कार्य सर्वात्मभावापत्तिरित्येतत्सक्षेपतो दर्शितम् । सर्वा ह्यियमुपनिषत् विद्याऽविद्याविभागप्रदर्शनेनैवोपक्षीणा । यथा चैषोऽर्थ कृत्स्नस्य शास्त्रस्य तथा प्रदर्शयिष्याम ॥

यस्मादेव तस्मादविद्यावन्तं पुरुषं प्रति देवा ईशत एव विघ्नं कर्तुमनुग्रहं चेत्येतद्दर्शयति— यथा ह वै लोके बहवो गोअश्वादय पशवो मनुष्यं स्वामिनमात्मनोऽधिष्ठातार भुज्यु पालयेयुरेवं बहुपशुस्थानीय एकैकोऽविद्वान्पुरुषो देवान्— देवानिति पित्राद्युपलक्षणार्थ— भुनक्ति पालयतीति । इम इंद्रादयोऽन्ये मत्तो ममेशितारो भृत्य इवाहमेषा स्तुतिनमस्कारेज्यादिना आराधन कृत्वा अभ्युदयं नि श्रेयस च तत्प्रत्त फल प्राप्स्यामीत्येवमभिसधिः । तत्र लोके बहुपशुमतो यथैकस्मिन्नेव पशावादीयमाने व्याघ्रादिनाऽपहियमाणे महदप्रियं भवति, तथा बहुपशुस्थानाये एकस्मिन्पुरुषे पशुभावात् व्युत्तिष्ठत्यप्रियं

भवतीति, किं चित्रं, देवाना बहुपश्वपहरण इव कुटुबिन । तस्मादेषा देवाना तन्न प्रियं, कि तद्यदेतद्ब्रह्मात्मतत्त्व कथंचन मनुष्या विद्युर्विजानीयु । तथा च स्मरणमनुगीतासु भगवता व्यासस्य— "क्रियावद्भिर्हि कौन्तेय देवलोक समावृत । न चैतदिष्ट देवाना मर्त्यैरुपरि वर्तनम्" इति ॥ अतो देवा पशूनिव व्याघ्रादिभ्यो ब्रह्मविज्ञानाद्विघ्नमाचिकीर्षन्ति । अस्मदुपभोग्यत्वान्मा व्युत्तिष्ठेयुरिति । य तु मुमोचयिषन्ति त श्रद्धादिभिर्योक्ष्यन्ति विपरीतमश्रद्धादिभि । तस्मान्मुमुक्षुर्देवाराधनपर श्रद्धाभक्तिपर प्रणेयोऽप्रमादी स्याद्विद्याप्राप्ति प्रति विद्या प्रतीति वा काक्वैतत्प्रदर्शित भवति देवाप्रियवाक्येन ॥१०॥

सूत्रित शास्त्रार्थ 'आत्मेत्येवोपासीत' इति । तस्य च व्याचिख्यासितस्य सार्थवादेन 'तदाहुर्यद्ब्रह्मविद्यया' इत्यादिना सबंधप्रयोजने अभिहिते । अविद्यायाश्च ससाराधिकारकारणत्वमुक्त 'अथ योऽन्या देवतामुपास्ते' इत्यादिना । तत्राविद्वान्नृणी पशुवेद्देवादिकर्मकर्तव्यतया परतत्र इत्युक्तम् । कि पुनदेवादिकर्मकर्तव्यत्वे निमित्त[1] वर्णा आश्रमाश्च । तत्र के वर्णा इत्यत इदमार भ्यते । यन्निमित्तसबद्धेषु कर्मस्वय परतंत्र एवाविकृत ससारीत्येतस्यैवार्थस्य प्रदर्शनायाग्नेसर्गानतरमिद्रादिसर्गो नोक्त । अग्नेस्तु सर्ग प्रजापते सृष्टिपरिपूरणाय प्रदर्शित । अय च इद्रादिसर्गस्तत्रैव द्रष्टव्यस्तच्छेषत्वात् । इह तु स एवाभिधीयतेऽविदुष कर्माधिकारहेतुप्रदर्शनाय—

ब्रह्म वा इदमग्र आसीदेकमेव तदेक सन्न व्यभवत् । तच्छ्रेयोरूपमत्यसृजत क्षत्र यान्येतानि देवत्रा क्षत्राणीद्रो वरुण सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति । तस्मात्क्षत्रात्पर नास्ति तस्माद्ब्राह्मण क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म । तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनि य उ एनं हिनास्ति स्वां स योनिमृच्छति स पापीयान्भवति यथा श्रेयांस हिंसित्वा ॥११॥

ब्रह्म वा इदमग्र आसीद्यदग्निं सृष्ट्वा अग्निरूपापन्नं ब्रह्म । ब्राह्मणजात्यभिमानात् ब्रह्मेत्यभिधीयते । वै इदं क्षत्रादिजातं ब्रह्मैवाभिन्नमासीदेकमेव । नासीत्क्षत्रादिभेदः । तद्ब्रह्मैकं क्षत्रादिपरिपालयित्रादिशून्यं सन्न व्यभवन्न विभूतवत्कर्मणे नालमासीदित्यर्थ । ततस्तद्ब्रह्म ब्राह्मणोऽस्मि ममेत्थं कर्तव्यं

इति ब्राह्मणजातिनिमित्तं कर्म चिकीर्ष्वात्मन कर्मकर्तृत्वविभूत्यै श्रेयोरूपं प्रशस्तरूप अत्यसृजतातिशयेनासृजत सृष्टवत् । कि पुनस्तत्सृष्ट, क्षत्र क्षत्रियजाति, तद्व्यक्तिभेदेन प्रदर्शयति— यान्येतानि प्रसिद्धानि लोके देवत्रा देवेषु क्षत्राणीति । जात्याख्याया पक्षे बहुवचनस्मरणाद्व्यक्तिबहुत्वाद्वा भेदोपचारेण बहुवचनम् । कानि पुनस्तानीत्याह तत्राभिषिक्ता एव विशेषतो निर्दिश्यन्ते । इंद्रो देवाना राजा । वरुणो यादसाम् । सोमो ब्राह्मणानाम् । रुद्र पशूनाम् । पर्जन्यो विद्युदादीनाम् । यम पितृणाम् । मृत्यू रोगादीनाम् । ईशानो भासामित्येवमादीनि देवेषु क्षत्राणि । तदनु इद्रादिक्षत्रदेवताधिष्ठितानि मनुष्यक्षत्राणि सोमसूर्यवश्यानि पुरूरव प्रभृतीनि सृष्टान्येव द्रष्टव्यानि । तदर्थ एव हि देवक्षत्रसर्ग प्रस्तुत । यस्माद्ब्रह्मणा अतिशयेन सृष्ट क्षत्र तस्मात्क्षत्रात्परं नास्ति ब्राह्मणजातेरपि नियन्तृ । तस्माद्ब्राह्मण कारणभूतोऽपि क्षत्रियस्य क्षत्रियमधस्ताद्व्यवस्थित सन्नुपरि स्थितमुपास्ते । क्व राजसूये । क्षत्र एव तदात्मीयं यश ख्यातिरूप ब्रह्मेति दधाति स्थापयति । राजसूयाभिषिक्तेनासन्द्या स्थितेन राज्ञा आमंत्रितो ब्रह्मन्निति ऋत्विक्पुनस्त प्रत्याह— त्वं राजन्ब्रह्मासीति । तदेतदभिधीयते क्षत्र एव एतद्यशो दधातीति । सैषा प्रकृता क्षत्रस्य योनिरेव यद्ब्रह्म । तस्माद्यद्यपि राजा परमता राजसूयाभिषेकगुण गच्छत्यप्नोति ब्रह्मैव ब्राह्मणजातिमेव, अंततोऽन्ते कर्मपरिसमाप्तावुपनिश्रयत्याश्रयति स्वा योनि, पुरोहित पुरो निधत्त इत्यर्थ । यस्तु पुनर्बलाभिमानात्स्वा योनि ब्राह्मणजाति ब्राह्मण य उ एनं हिनस्ति हिसति न्यग्भावेन पश्यति, स्वामात्मीयामेव स योनिमृच्छति स्वं प्रसव विच्छिनत्ति विनाशयति। स एतत्कृत्वा पापीयान्पापतरो भवति । पूर्वमपि क्षत्रिय पाप एव क्रूरत्वादात्मप्रसवहिसया सुतराम् । यथा लोके श्रेयासं प्रशस्ततर हिंसित्वा परिभूय पापतरो भवति तद्वत् ॥

स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ॥१२॥

क्षत्रे सृष्टेऽपि स नैव व्यभवत्कर्मणे ब्रह्म तथा न व्यभवद्वित्तोपार्जयितुरभावात् । स विशमसृजत कर्मसाधनवित्तोपार्जनाय । क. पुनरसौ विट् । यान्येतानि देवजातानि । स्वार्थे निष्ठा, य एते देवजातिभेदा इत्यर्थ । गणशो गण गणमाख्यायन्ते कथ्यन्ते । गणप्राया हि विश । प्रायेण संहता हि वित्तो-

पार्जन्ये समर्था नैकैकश । वसवोऽष्टसंख्यो गण , तथैकादश रुद्रा द्वादशादित्या, विश्वे देवास्त्रयोदश विश्वाया अपत्यानि, सर्वे वा देवा मरुत सप्त सप्तगणा ॥

स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमिय वै पूषेय हीद सर्वं पुष्यति यदिद किच ॥१३॥

स परिचारकाभावात्पुनरपि नैव व्यभवत्स शौद्रं वर्णमसृजत, शूद्र एव शौद्र , स्वार्थेऽणि वृद्धि । क. पुनरसौ शूद्रो वर्णो य सृष्ट ? पूषणं पुष्यतीति पूषा । क पुनरसौ पूषेति विशेषतस्तन्निर्दिशति— इय पृथिवी पूषा । स्वयमेव निर्वचनमाह— इय हीदं सर्वं पुष्यति यदिद किच ॥

स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्र यद्धर्मस्तस्माद्धर्मात्पर नास्त्यथो अबलीयान्बलीयांसमाशसते धर्मेण यथा राज्ञैव यो वै स धर्म सत्य वै तत्तस्मात्सत्य वदन्तमाहुर्धर्म वदतीति धर्मं वा वदन्तं सत्यं वदतीत्येतद्धयेवैतदुभयं भवति ॥१४॥

स चतुर. सृष्ट्वापि वर्णान्नैव व्यभवदुग्रत्वात्क्षत्रस्यानियताशकया । तच्छ्रेयोरूपमत्यसृजत कि तत् ? धर्मं, तदेतच्छ्रेयोरूप सृष्ट क्षत्रस्य क्षत्र क्षत्रस्यापि नियन्तृ । उग्रादप्युग्रम् । यद्धर्मो यो धर्म । तस्मात्क्षत्रस्यापि नियन्तृत्वाद्धर्मात्परं नास्ति । तेन हि नियम्यन्ते सर्वे । तत्कथमिति उच्यते— अथो अप्यबलीयान्दुर्बलतरो बलीयासमात्मनो बलवत्तरमप्याशंसते कामयते जेतु धर्मेण बलेन । यथा लोके राज्ञा सर्वबलवत्तमेनापि कुटुबिक एव, तस्मात्सिद्ध धर्मस्य सर्वबलवत्तरत्वात्सर्वनियतृत्वम् । यो वै स धर्मो व्यवहारलक्षणो लौकिकैर्व्यवह्रियमाण सत्य वै तत् । सत्यमिति यथाशास्त्रार्थता । स एवानुष्ठीयमानो धर्मनामा भवति । शास्त्रार्थत्वेन ज्ञायमानस्तु सत्यं भवति । यस्मादेवं तस्मात्सत्यं यथाशास्त्रं वदन्तं व्यवहारकाल आहु समीपस्था उभयविवेकज्ञा, धर्मं वदतीति प्रसिद्ध लौकिकं न्यायं वदतीति । तथा विपर्ययेण धर्मं वा लौकिकं व्यवहारं वदन्तमाहु , सत्यं वदति शास्त्रादनपेत वदतीति । एतद्युक्तमुभयं ज्ञायमानमनुष्ठीयमानं चैतद्धर्म एव भवति । तस्मात्स धर्मो ज्ञानानुष्ठानलक्षण शास्त्रज्ञानितरांश्च सर्वानेव नियमयति । तस्मात्स क्षत्रस्यापि क्षत्रम् । अतस्तदभिमानोऽविद्वांस्तद्विशेषानुष्ठानाय ब्रह्मक्षत्रविट्शूद्रनिमित्तविशेषमभिमन्यते । तानि च निसर्गत एव कर्माधिकारनिमित्तानि ॥

तदेतद्ब्रह्म क्षत्र विट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्य शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्यां हि रूपाभ्यां ब्रह्माभवत् । अथ यो ह वा अस्माल्लोकात्स्व लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाऽननुक्तोऽन्यद्वा कर्माकृत यदिह वा अप्यनेवविन्महत्पुण्य कर्म करोति तद्धास्यान्तत क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते । अस्माद्धयेवात्मनो यद्यत्कामयते तत्तत्सृजते ॥१५॥

तदेतच्चातुर्वर्ण्य सृष्ट ब्रह्म क्षत्रं विट्शूद्र इत्युत्तरार्थ उपसहार' । यत्तत्सृष्ट ब्रह्म तदग्निनैव नान्येन रूपेण देवेषु ब्रह्म ब्राह्मणजातिरभवत् । ब्राह्मणो ब्राह्मणस्वरूपेण मनुष्येषु ब्रह्माभवदितरेषु वर्णेषु विकारान्तर प्राप्य, क्षत्रियेण क्षात्रियोऽभवदिद्रादिदेवताधिष्ठितो, वैश्येन वैश्य, शूद्रेण शूद्र । यस्मात्क्षत्रादिषु विकारापन्नमग्नौ ब्राह्मण एव चाविकृत सृष्ट ब्रह्म तस्मादग्नावेव देवेषु देवाना मध्ये लोक कर्मफलमिच्छन्त्यग्निसबद्ध कर्म कृत्वेत्यर्थ । तदर्थमेव हि तद्ब्रह्म कर्माधिकरणत्वेनाग्निरूपेण व्यवस्थितम् । तस्मात्तस्मिन्नग्नौ कर्म कृत्वा तत्फल प्रार्थयन्त इत्येतदुपपन्नम् । ब्राह्मणो मनुष्येषु मनुष्याणा पुनर्मध्ये कर्मफलेच्छाया नाग्न्यादिनिमित्तक्रियापेक्षा, कि तर्हि जातिमात्रस्वरूपप्रतिलंभेनैव पुरुषार्थसिद्धि । यत्र तु देवाधीना पुरुषार्थसिद्धि तत्रैवाग्न्यादिसंबद्धक्रियापेक्षा । स्मृतेश्च— "जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र सशय । कुर्यादन्यत्र वा कुर्यान्मैत्रो ब्राह्मण उच्यते" इति ॥ पारिव्राज्यदर्शनाच्च । तस्माद्ब्राह्मणत्व एव मनुष्येषु लोकं कर्मफलमिच्छन्ति । यस्मादेताभ्या हि ब्राह्मणाग्निरूपाभ्या कर्मकर्त्राधिकरणरूपाभ्या यत्सृष्ट ब्रह्म साक्षादभवत् ॥

अत्र तु परमात्मलोकमग्नौ ब्राह्मणे चेच्छन्तीति केचित् । तदसत् । अविद्याधिकारे कर्माधिकारार्थ वर्णविभागस्य प्रस्तुतत्वात्परेण च विशेषणात् । यदि त्यत्र लोकशब्देन पर एवात्मोच्येत, परेण विशेषणमनर्थकं स्यात् 'स्वं लोकमदृष्ट्वा' इति । स्वलोकव्यतिरिक्तश्चेदन्यधीनतया प्रार्थ्यमान प्रकृतो लोक, तत स्वं इति युक्तं विशेषण प्रकृतपरलोकनिवृत्त्यर्थत्वात् । स्वत्वेन चाव्यभिचारात्पर-

मात्मलोकस्य । अविद्याकृताना च स्वत्वव्यभिचारात् । ब्रवीति च कर्मकृताना व्यभिचारं 'क्षीयत एव' इति ॥

ब्रह्मणा सृष्टा वर्णा कर्मार्थम् । तच्च कर्म धर्माख्य सर्वानेव कर्तव्यतया नियन्तृ पुरुषार्थसाधनं च । तस्मात्तेनैव चेत्कर्मणा स्वो लोक परमात्माख्यो अविदितोऽपि प्राप्यते, किं तस्यैव पदनीयत्वेन क्रियत इत्यत आह— अथेति पूर्वपक्षविनिवृत्त्यर्थ । य कश्चिद्ध वै अस्मात्सासारिकाल्पिडग्रहणलक्षणात् अविद्याकामकर्महेतुकात् अन्यधीनकर्माभिमानतया वा ब्राह्मणजातिमात्रकर्माभिमानतया वा आगतुकादस्वभूताल्लोकात्स्व लोकमात्माख्य आत्मत्वेनाव्यभिचारित्वादद्दष्ट्वा, अहं ब्रह्मास्मीति प्रैति म्रियते । स यद्यपि स्वो लोकोऽविदितोऽविद्यया व्यवहितोऽस्व इवाज्ञात, एन— सख्यापूरण इव लौकिक आत्मान— न भुनक्ति न पालयति शोकमोहभयादिदोषापनयेन । यथा च लोके वेदोऽननुक्तोऽनधीत कर्माद्यवबोधकत्वेन न भुनक्ति, अन्यद्वा लौकिक कृष्यादि कर्माकृत स्वात्मनाऽनभिव्यजित आत्मीयफलप्रदानेन न भुनक्ति, एवमात्मा स्वो लोक स्वेनैव नित्यात्मस्वरूपेणानभिव्यंजितोऽविद्यादिप्रहाणेन न भुनक्त्येव ॥

ननु किं स्वलोकदर्शननिमित्तपरिपालनेन[1] कर्मण फलप्राप्तिर्व्रीव्यादिष्टफलनिमित्तस्य च कर्मणो बाहुल्यात्तन्निमित्त पालनमक्षय भविष्यति । तन्न । कृतस्य क्षयवत्त्वादित्येतदाह— यदिह वै संसारेऽद्भुतवत्कश्चिन्महात्माप्यनेवंवित्स्व लोकं यथोक्तेन विधिनाऽविद्वान्महद्बहु अश्वमेधादि पुण्यं कर्मेष्टफलमेव नैरतर्येण करोत्यनेनैवानत्य मम भविष्यतीति । तत्कर्म ह्यस्याविद्यावतोऽविद्याजनितकामहेतुत्वात् स्वप्नदर्शनविभ्रमोद्भूतविभूतिवदंततोऽन्ते फलोपभोगस्य क्षीयत एव । तत्कारणयो अविद्याकामयोश्चलत्वात्कृतक्षयध्रौव्योपपत्ति । तस्मान्न पुण्यकर्मफलपालनानत्याशा अस्त्येव । अत आत्मानमेव स्वं लोकं— आत्मानं इति स्वं लोकमित्यस्मिन्नर्थे, स्व लोकमिति प्रकृतत्वादिह च स्वशब्दस्याप्रयोगात्—उपासीत । स य आत्मानमेव लोकमुपास्ते । तस्य किमित्युच्यते— न ह्यस्य कर्म क्षीयते । कर्माभावादेवेति नित्यानुवाद । यथाऽविदुष. कर्मक्षयलक्षण संसारदु ख सततमेव, न तथा तदस्य विद्यत इत्यर्थ । "मिथिलाया प्रदाप्ताया न मे दह्यति किंचन" इति यद्वत् ॥

स्वात्मलोकोपासकस्य विदुषो विद्यासंयोगात्कर्मैव न क्षीयत इत्यपरे

वर्णयन्ति । लोकशब्दार्थं च कर्मसमवायिनं द्विधा परिकल्पयन्ति किल, एको व्याकृतावस्थ कर्माश्रयो लोको हैरण्यगर्भाख्य त कर्मसमवायिनं लोक व्याकृत परिच्छिन्नं य उपास्ते तस्य किल परिच्छिन्नकर्मात्मदर्शिन कर्म क्षीयते । तमेव कर्मसमवायिन लोकमव्याकृतावस्थ कारणरूपमापाद्य यस्तूपास्ते तस्यापरिच्छिन्नकर्मात्मदर्शित्वात्तस्य कर्म न क्षीयत इति ॥ भवतीय शोभना कल्पना न तु श्रौती । स्वलोकशब्देन प्रकृतस्य परमात्मनोऽभिहितत्वात् । स्व लोकमिति प्रस्तुत्य स्वशब्द विहाय आत्मशब्दप्रक्षेपेण पुनस्तस्यैव प्रतिनिर्देशा-दात्मानमेव लोकमुपासीतेति । तत्र कर्मसमवायिलोककल्पनाया अनवसर एव । परेण च केवलविद्याविषयेण विशेषणात् 'कि प्रजया करिष्यामो येषा नोऽयमा-त्माय लोक' इति । पुत्रकर्मापरविद्याकृतेभ्यो हि लोकेभ्यो विशिनष्टि 'अयमात्मा नो लोक' इति । 'न हास्य केनचन कर्मणा लोको मीयत एषोऽस्य परमो लोक' इति च। तै सविशेषणैरस्यैकवाक्यता युक्ता । इहापि स्वं लोकमिति विशेषणदर्शनात् । अस्मात्कामयत इत्ययुक्तमिति चेत् इह स्वो लोक परमात्मा, तदुपासनात्स एव भवतीति स्थिते यद्यत्कामयते तत्तदस्मादात्मन सृजत इति तदात्मप्राप्तिव्यतिरेकेण फलवचनमयुक्तमिति चेत् । न। स्वलोको-पासनस्तुतिपरत्वात् । स्वस्मादेव लोकात्सर्वमिष्टं सपद्यते इत्यर्थ । नान्यदत प्रार्थनीयमाप्तकामत्वात् । 'आत्मत प्राण आत्मत आशा' इत्यादि श्रुत्यंतरे यथा । सर्वात्मभावप्रदर्शनार्थो वा पूर्ववत् । यदि हि पर एवात्मा सपद्यते तदा युक्तो अस्माद्धेयवात्मन इत्यात्मशब्दप्रयोग , स्वस्मादेव प्रकृतादात्मनो लोकादित्येवमर्थ । अन्यथा अव्याकृतावस्थात्कर्मणो लोकादिति सविशेषणमवक्ष्यत्प्रकृतपरमात्मलोक-व्यावृत्तये व्याकृतावस्थाव्यावृत्तये च । न त्वस्मिन्प्रकृते विशेषितेऽश्रुतातरा-लावस्था प्रतिपत्तुं शक्यते ॥१५॥

अथो अय वा आत्मा । अत्राविद्वान्वर्णाश्रमाद्यभिमानो धर्मेण निय-म्यमानो देवादिकर्मकर्तव्यतया पशुवत्परतंत्र इत्युक्तम् । कानि पुनस्तानि कर्माणि यत्कर्तव्यतया पशुवत्परतन्त्रो भवति । के वा ते देवादयो येषा कर्माभि पशुव-दुपकरोतीति तदुभयं प्रपंचयति—

अथो अय वा आत्मा सर्वेषां भूताना लोक. स यज्जुहोति यद्यजते तेन देवाना लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति

यत्प्रजामिच्छते तेन पितृणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदक विदति तेन पशूना यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य उपजीवान्ति तेन तेषां लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेव हैवविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति तद्वा एतद्विदित मीमांसितम् ॥ १६॥

अथो इत्ययं वाक्योपन्यासार्थ । अय य प्रकृतो गृही कर्माधिकृतो अविद्वाञ्छरीरेन्द्रियसघातादिविशिष्ट पिड आत्मेत्युच्यते । सर्वेषा देवादीना पिपीलिकान्ताना भूताना लोको भोग्य आत्मेत्यर्थ । सर्वेषा वर्णाश्रमादिविहितै कर्मभिरुपकारित्वात् । कै पुन· कर्माविशेषैरुपकुर्वन्केषा भूतविशेषाणा लोक इत्युच्यते— स गृही यज्जुहोति यद्यजते । यागो देवतामुद्दिश्य स्वत्वपरित्याग । स एव आसेचनाधिको होमस्तेन होमयागलक्षणेन कर्मणा अवश्यकर्तव्यत्वेन देवाना पशुवत्परतंत्रत्वेन प्रतिबद्ध इति लोक । अथ यदनुब्रूते स्वाध्यायमधीतेऽहरहस्तेन ऋषीणा लोक । अथ यत्पितृभ्यो निपृणाति प्रयच्छति पिडोदकादि यच्च प्रजामिच्छते प्रजार्थमुद्यमं करोति, इच्छा चोत्पत्त्युपलक्षणार्था, प्रजा चोत्पादयतीत्यर्थ । तेन कर्मणाऽवश्यकर्तव्यत्वेन पितृणा लोक पितृणा भोग्यत्वेन परतंत्रो लोक । अथ यन्मनुष्यान्वासयते भूम्युदकादिदानेन गृहे यच्च तेभ्यो वसद्भ्योऽवसद्भ्यो वा आर्थिभ्योऽशनं ददाति तेन मनुष्याणाम् । अथ यत्पशुभ्यस्तृणोदक विदति लंभयति तेन पशूनाम् । यदस्य गृहेषु श्वापदा वयासि च पिपीलिकाभि सह कणबलिभाडक्षालनाद्युपजीवान्ति तेन तेषा लोक ॥

यस्मादयमेतानि कर्माणि ' कुर्वन्नुपकरोति देवादिभ्य , तस्मद्यथा ह वै लोके स्वाय लोकाय स्वस्मै देहायारिष्टिमविनाशं स्वत्वभावाप्रच्युतिमिच्छेत् स्वत्वभावप्रच्युतिभयात्पोषणरक्षणादिभिः सर्वत परिपालयेत् एवं हैवंविदे सर्वभूतभोग्योऽहमनेन प्रकारेण मया अवश्यमृणिवत्प्रतिकर्तव्यं, इत्येवमात्मानं परिकल्पितवते सर्वाणि भूतानि देवादीनि यथोक्तानि अरिष्टिमविनाशमिच्छन्ति स्वत्वाप्रच्युत्यै सर्वत संरक्षन्ति कुटुंबिन इव पशून् 'तस्मात् एषा तन्न प्रियं' इत्युक्तम् । तद्वा एतत्तदेतद्यथोक्ताना कर्मणा ऋणवदवश्यकर्तव्यत्वं पंचमहायज्ञप्रकरणे विदितं कर्तव्यतया मीमासितं विचारित च अवदानप्रकरणे ॥ १६॥

आत्मैवेदमग्र आसीत् । ब्रह्म विद्वाञ्चेत्तस्मात्पशुभावात्कर्तव्यताबंधनरूपा-

त्प्रतिमुच्यते । केनायं कारित कर्मबंधनाधिकारेऽवश इव प्रवर्तते, न पुनस्तद्विमोक्षणोपाये विद्याधिकार इति । ननूक्तं देवा रक्षन्तीति । बाढम् । कर्माधिकारस्वगोचरारूढानेव तेऽपि रक्षन्ति । अन्यथाऽकृताभ्यागमकृतनाशप्रसगात् । न तु सामान्यं पुरुषमात्र विशिष्टाधिकारानारूढम् । तस्माद्भवितव्य तेन येन प्रेरितोऽवश एव बहिर्मुखो भवति स्वस्माल्लोकात् । नन्वविद्या सा, अविद्यावान्हि बहिर्मुखीभूत प्रवर्तते । सापि नैव प्रवर्तिका । वस्तुस्वरूपावरणात्मिका हि सा । प्रवर्तकबीजत्व तु प्रतिपद्यतेऽन्धत्वमिव गर्तादिपतनप्रवृत्तिहेतु । एवं तर्ह्युच्यता कि तत् यत्प्रवृत्तिहेतुरिति । तदिहाभिधीयते एषणा काम स 'स्वाभाविक्याम्विद्याया वर्तमाना बाला पराच कामाननुयन्ति' इति काठकश्रुतौ । स्मृतौ च—"काम एष क्रोध एष" इत्यादि । मानवे च सर्वा प्रवृत्ति कामहेतुक्येवेति । स एषोऽर्थ सविस्तर प्रदर्श्यत इह आ अध्यायपरिसमाप्ते —

आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्त मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छश्चनातो भूयो विदेत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्त म स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैक न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्यो कृत्स्नता मन एवास्यात्मा वाग्जाया प्राण प्रजा चक्षुर्मानुष वित्त चक्षुषा हि तद्विदते श्रोत्रं दैव श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्मात्मना हि कर्म करोति स एष पांक्तो यज्ञ पाक्त पशु पांक्त पुरुष पाक्तमिदं सर्वं यदिद किच तदिदं सर्वमाप्नोति य एव वेद ॥१७॥ इति चतुर्थं ब्राह्मणम् ॥

आत्मैवेदमग्र आसीत् । आत्मैव स्वाभाविकोऽविद्वान्कार्यकरणसघातलक्षणो वर्णी अग्रे प्राग्दारसबंधादात्मेत्यभिधीयते । तस्मादात्मन पृथग्भूतं काम्यमान जायादिभेदरूप नासीत्स एवैक आसीज्जायाद्येषणाबीजभूताविद्यावानेक एवासीत् । स्वाभाविक्या स्वात्मनि कर्त्रादिकारकक्रियाफलात्मकताध्यारोपलक्षणया अविद्यावासनया वासित सोऽकामयत कामितवान् । कथम्? जाया कर्माधिकारहेतुभूता मे मम कर्तु स्यात्तया विनाऽहमनधिकृत एव कर्मणि, अत कर्माधिकारसंपत्तये भवेज्जाया । अथाह प्रजायेय प्रजारूपेणाहमेवोत्पद्येय । अथ वित्त मे स्यात्कर्मसाधनं गवादिलक्षणं, अथाहमभ्युदयनि श्रेयससाधन कर्म कुर्वीय । येनाहमनृणी भूत्वा देवादीना लोकान्प्राप्नुया तत्कर्म

कुर्वीय । काम्यानि च पुत्रवित्तस्वर्गादिसाधनानि एतावान्वै काम एतावद्विषय-परिच्छिन्न इत्यर्थ । एतावानेव हि कामयितव्यो विषयो यदुत जायापुत्रवित्तक-र्माणि साधनलक्षणैषणा । लोकाश्च त्रयो मनुष्यलोक पितृलोको देवलोक इति फलभूता साधनैषणायाश्चास्या । तदर्था हि जायापुत्रवित्तकर्मलक्षणा साधनैषणा। तस्मात्सा एकैवैषणा या लोकैषणा । सैकैव सत्येषणा साधनापेक्षेति द्विधा, अतो-ऽवधारयिष्यति 'उभे ह्येते एषणे एव' इति ॥

फलार्थत्वात्सर्वारभस्य लोकैषणार्थप्राप्ता उक्तैवेति एतावान्वा एतावानेव काम इत्यवधीयते । भोजनेऽभिहिते तृप्तिर्नहि पृथगभिधेया । तदर्थत्वाद्धो जनस्य । ते एते एषणे साध्यसाधनलक्षणे कामो येन प्रयुक्तोऽविद्वानवश एव कोशकारवदात्मान वेष्टयति, कर्ममार्ग एवात्मान प्रणिदधद्बहिर्मुखीभूतो न स्व लोक प्रतिजानाति । तथा च तैत्तिरीयके— "अग्निमुग्धो हैव धूमतान्त स्व लोक न प्रतिजानाति" इति । कथ पुनरेतावत्त्वमवधार्यते कामाना, अनत त्वात् । अनता हि कामा , इत्येतदाशक्य हेतुमाह— यस्मान्नेच्छञ्छनेच्छन्नप्य-तोऽस्मात्फलसाधनलक्षणात् भूयोऽधिकतर न विदेन्न लभेत । नहि लोके फल-साधनव्यतिरिक्त दृष्टमदृष्ट वा लब्धव्यमास्ति । लब्धव्यविषयो हि काम तस्य चैतद्व्यतिरेकेणाभावाद्युक्त वक्तुमेतावान्वै काम इति । एतदुक्त भवति— दृष्टार्थ अदृष्टार्थ वा साध्यसाधनलक्षण अविद्यावत्पुरुषाधिकारविषयमेषणाद्वय काम, अतोऽस्माद्विदुषा व्युत्थातव्यमिति ॥

यस्मादेवमविद्वानात्मा कामी पूर्व कामयामास तथा पूर्वतरोऽप्येषा लोक-स्थिति । प्रजापतेश्चैवमेष सर्ग आसीत्सोऽबिभेदविद्यया तत कामप्रयुक्त एकाक्यरममाणोऽरत्युपघाताय स्त्रियमैच्छत्ता समभवत्तत सर्गोऽयमासीदिति ह्युक्तम् । तस्मात्तत्सृष्टौ एतर्ह्येतस्मिन्नपि काल एकाकी सन्प्राग्दारक्रियात काम-यते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्युक्तार्थ वाक्यम् । स एव कामयमान संपादयश्च जायादीन्यावत्स एतेषा यथोक्ताना जायादीना-मेकैकमपि न प्राप्नोति, अकृत्स्नोऽसंपूर्णोऽहमित्येव तावदात्मानं मन्यते । पारि-शेष्यात्समस्तानेवैतान्सपादयति यदा तदा तस्य कृत्स्नता । यदा तु न शक्नोति कृत्स्नता संपादयितुं तदास्य कृत्स्नत्वसपादनायाह— तस्यो तस्याकृत्स्नत्वाभिमानिन कृत्स्नतेयमेव भवति । कथम्? अयं कार्यकरणसघात प्रविभज्यते,

तत्र मनोनुवृत्ति हि इतरत्सर्व कार्यकरणजातमिति मन प्रधानत्वादात्मेवात्मा । यथा जायादीना कुटुबपतिरात्मेव तदनुकारित्वाज्जायादिचतुष्टयस्य । एवमिहापि मन आत्मा परिकल्पते कृत्स्नतार्थे । तथा वाग्जाया मनोनुवृत्तित्व-सामान्याद्वाच । वागिति शब्दश्रोदनादिलक्षणो मनसा श्रोत्रद्वारेण गृह्यते-ऽवधार्यते प्रयुज्यते चेति मनसो जायेव वाक। ताभ्या च वाङमनसाभ्या जाया-पतिस्थानीयाभ्या प्रसूयते प्राण कर्मार्थामति प्राण प्रजेव । तत्र प्राणचेष्टादि-लक्षण कर्म चक्षुर्दृष्टवित्तसाध्य भवतीति चक्षुर्मानुष वित्तम् । तत् द्विविध वित्त मानुषमितरच्च अतो विशिनष्टीतरवित्तनिवृत्त्यर्थ मानुषमिति । गवादि हि मनु-ष्यसंबधिवित्त चक्षुर्ग्राह्य कर्मसाधन, तस्मात्तत्स्थानीयम् । तेन सबधाच्चक्षुर्मा-नुष वित्तम् । चक्षुषा हि यस्मात्तन्मानुष वित्त विदते गवाद्युपलभत इत्यर्थ । कि पुनरितरद्वित्त ? श्रोत्र दैव देवविषयत्वाद्विज्ञानस्य । विज्ञान दैव वित्त, तदिह श्रोत्रमेव सपत्तिविषयम् । कस्मात् ? श्रोत्रेण हि यस्मात्तद्देव वित्तं विज्ञान शृणोति । अत श्रोत्राधीनत्वाद्विज्ञानस्य श्रोत्रमेव तदिति । कि पुनरे-तैरात्मादिवित्तान्तैरिह निर्वर्त्य कर्मेत्युच्यते— आत्मैवात्मेति शरीरमुच्यते । कथ पुनरात्मा कर्मस्थानीय ? अस्य कर्महेतुत्वात् । कथ कर्महेतुत्वम् ? आत्मना हि शरीरेण यत कर्म करोति । तस्याकृत्स्नत्वाभिमानिन एव कृत्स्नता सपन्ना यथा बाह्या जायादिलक्षणेवम् । तस्मात्स एष पाक्त पंचभिर्निर्वृत्त पाक्तो यज्ञो दर्शनमात्रनिवृत्तोऽकर्मिणोपि । कथ पुनरस्य पचत्वसपत्तिमात्रेण यज्ञत्व ? उच्यते— यस्माद्बाह्योऽपि यज्ञः पशुपुरुषसाध्य, स च पशु पुरुषश्च पाक्त एव । यथोक्तमनआदिपचत्वयोगात् । तदाह— पाक्त पशुर्गवादि, पाक्त पुरुष, पशुत्वेऽप्यधिकृतत्वेनास्य विशेष पुरुषस्येति पृथक्पुरुषग्रहणम् । कि बहुना, पाक्तमिद सर्व कर्मसाधनं फलं च, यदिद किच यत्किचिदिदं सर्वम् । एवं पाक्तं यज्ञमात्मानं य संपादयति स तदिद सर्व जगदात्मत्वेनाप्नोति य एव वेद ॥ इति चतुर्थ ब्राह्मणम् ॥ १४ —

यत्सप्तान्नानि मेधया तपसाजनयत्पिता । एकमस्य साधारण द्वे देवा-नभाजयत् । त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् । तस्मिन्सर्वं प्रति-ष्ठितं यच्च प्राणिति यच्च न । कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा । यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन । स देवानपिगच्छति स ऊर्ज-

मुपजीवतीति श्लोका ॥१॥

यत्सप्तान्नानि मेधया । अविद्या प्रस्तुता । तत्राविद्वानन्या देवतामुपास्ते अन्योसावन्योऽहमस्मीति । स वर्णाश्रमाभिमान कर्मकर्तव्यतया नियतो जुहोत्यादिकर्माभि कामप्रयुक्तो देवादीनामुपकुर्वन्सर्वेषा भूताना लोक इत्युक्तम् । यथा च स्वकर्माभिरेकैकेन सर्वैर्भूतैरसौ लोको भोज्यत्वेन सृष्ट । एवमसावपि जुहोत्यादिपाक्तकर्माभि सर्वाणि भूतानि सर्व च जगदात्मभोज्यत्वेनासृजत । एवमेकैक स्वकर्मविद्यानुरूपेण सर्वस्य जगतो भोक्ता भोज्य च, सर्वस्य सर्व कर्ता कार्य चेत्यर्थ । एतदेव च विद्याप्रकरणे मधुविद्याया वक्ष्याम । सर्व सर्वस्य कार्य मध्वित्यात्मैकत्वविज्ञानार्थम् । यदसो जुहोतीत्यादिना पाक्तेन काम्येन कर्मणा आत्मभोज्यत्वेन जगदसृजत विज्ञानेन च, तज्जगत्सर्व सप्तधा प्रविभज्यमान कार्यकारणत्वेन सप्तान्नान्युच्यन्ते भोज्यत्वात् । तेनासौ पिता तेषामन्नानाम् । एतेषामन्नाना सविनियोगाना सूत्रभूता संक्षेपत. प्रकाशकत्वादिमे मंत्रा ॥

यत्सप्तान्नानि मेधया तपसाजनयत्पितेति मेधया हि तपसाजनयत्पिता । एकमस्य साधारणमितीदमेवास्य तत्साधारणमन्न यदिदमद्यते । स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्र ह्येतत् । द्वे देवानभाजयदिति हुत च प्रहुत च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वत्यथो आहुर्दर्शपूर्णमासाविति । तस्मान्नेष्टियाजुक. स्यात् । पशुभ्य एक प्रायच्छदिति तत्पयः । पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति तस्मात्कुमार जातं घृत वै वाग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्त्यथ वत्सं जातमाहुरतृणाद इति । तस्मिन्सर्वं प्रतिष्ठित यच्च प्राणिति यच्च नेति पयसि हीद सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । तद्यदिदमाहु. सवत्सर पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येव विद्वान्सर्वं हि देवेभ्योऽन्नाद्य प्रयच्छति । कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति पुरुषो वा अक्षितिः स हीदमन्न पुनः पुनर्जनयते । यो वैतामक्षितिं वेदेति पुरुषो वा अक्षितिं स हीदमन्न धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुख प्रतीकं मुखेनेत्येतत् । स देवानपिगच्छति स ऊर्जमुपजीवतीति प्रशंसा ॥२॥

यत्सप्तान्नानि, यत् अजनयदिति क्रियाविशेषणं, मेधया प्रज्ञया विज्ञानेन तपसा च कर्मणा। ज्ञानकर्मणी एव हि मेधातप शब्दवाच्ये तयोः प्रकृतत्वान्नेतरे मेधातपसी अप्रकरणात्। पाक्तं हि कर्म जायादिसाधनं, 'य एवं वेद' इति चानंतरमेव ज्ञानं प्रकृतम्। तस्मान्न प्रसिद्धयोर्मेधातपसोराशंका कार्या। अतो यानि सप्तान्नानि ज्ञानकर्मभ्या जनितवान्पिता तानि प्रकाशयिष्याम इति वाक्यशेष। तत्र मंत्राणामर्थस्तिरोहितत्वात्प्रायेण दुर्विज्ञेयो भवतीति तदर्थव्याख्यानाय ब्राह्मणं प्रवर्तते। तत्र यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेत्यस्य कोऽर्थ ? उच्यत इति हि शब्देनैव व्याचष्टे प्रसिद्धार्थावद्योतकेन। प्रसिद्धो ह्यस्य मत्रस्यार्थ इत्यर्थ। यदजनयदिति चानुवादस्वरूपेण मत्रेण प्रसिद्धार्थतैव प्रकाशिता। अतो ब्राह्मणमविशकयैवाह— मेधया हि तपसाऽजनयत्पितेति।

ननु कथं प्रसिद्धताऽस्यार्थस्येति, उच्यते— जायादिकर्मान्तानां लोकफलसाधनानां पितृत्वं तावत्प्रत्यक्षमेव, अभिहितं च 'जाया मे स्यात्' इत्यादिना। तत्र च दैव वित्तं विद्या कर्म पुत्रश्च फलभूतानां लोकानां साधनं स्रष्टृत्व प्रतीत्याभिहितम्। वक्ष्यमाण च प्रसिद्धमेव। तस्माद्युक्तं वक्तु मेधयेत्यादि। एषणा हि फलविषया प्रसिद्धैव च लोके। एषणा च जायादीत्युक्तं 'एतावान्वै काम इत्यनेन। ब्रह्मविद्याविषये च सर्वैकत्वात्कामानुपपत्ते। एतेनाशास्त्रीयप्रज्ञातपोभ्या स्वाभाविकाभ्या जगत्स्रष्टृत्वमुक्तमेव भवति। स्थावरान्तस्य चानिष्टफलस्य कर्मविज्ञाननिमित्तत्वात्। विवक्षितस्तु शास्त्रीय एव साध्यसाधनभावो ब्रह्मविद्याविधित्सया तद्वैराग्यस्य विवक्षितत्वात्। सर्वो ह्ययं व्यक्ताव्यक्तलक्षण ससारोऽशुद्धोऽनित्य साध्यसाधनरूपो दुःखोऽविद्याविषय इत्येतस्माद्विरक्तस्य ब्रह्मविद्या आरब्धव्येति॥

तत्रान्नाना विभागेन विनियोग उच्यते— एकमस्य साधारणमिति मत्रपद तस्य व्याख्यानं इदमेवास्य तत्साधारणमन्नमित्युक्तम्। अस्य भोक्तृसमुदायस्य, किं तद्यदिदमद्यते भुज्यते सर्वैं प्राणिभिरहन्यहनि तत्साधारणं सर्वभोक्त्रर्थमकल्पयत्पिता सृष्ट्वान्नम्। स य एतत्साधारण सवप्राणभृत्स्थितिकरं भुज्यमानमन्नमुपास्ते तत्परो भवतीत्यर्थ। उपासनं हि नाम तात्पर्यं दृष्टं लोके गुरुमुपास्ते राजानमुपास्त इत्यादौ। तस्माच्छरीरस्थित्यर्थान्नोपभोगप्रधानो

नादृष्टार्थकर्मप्रधान इत्यर्थ । स एवभूतो न पाप्मनोऽधर्माद्यावर्तते न विमुच्यत इत्येतत् । तथाच मन्त्रवर्ण — "मोघमन्नं विदते" इत्यादि । स्मृतिरपि— "नात्मार्थं पाचयेदन्नम्" "अप्रदायैभ्यो यो भुंक्ते स्तेन एव स" "अन्नादे भ्रूणहा मार्ष्टि" इत्यादि । कस्मात्पुन पाप्मनो न व्यावर्तते ? मिश्रं ह्येतत्सर्वेषा हि स्वं तदप्रविभक्तं यत्प्राणिभिर्भुज्यते । सर्वभोज्यत्वादेव यो मुखे प्रक्षिप्यमाणोऽपि ग्रास परस्य पीडाकरो दृश्यते ममेदं स्यादिति हि सर्वेषा तत्राशा प्रतिबद्धा । तस्मान्न परमपीडयित्वा ग्रसितुमपि शक्यते । "दुष्कृतं हि मनुष्याणाम्" इत्यादिस्मरणाच्च ।

गृहिणा वैश्वदेवाख्यमन्नं यदहन्यहनि निरूप्यत इति केचित् । तन्न । सर्वभोक्तृसाधारणत्व वैश्वदेवाख्यस्यान्नस्य न सर्वप्राणभृद्भुज्यमानान्नवत्प्रत्यक्षम् । नापि यदिदमद्यत इति तद्विषय वचनमनुकूलम् । सर्वप्राणभृद्भुज्यमानान्नान्त - पातित्वाच्च वैश्वदेवाख्यस्य युक्त श्वचाडालाद्यास्यान्नस्य ग्रहण, वैश्वदेवव्यतिरेकेणापि श्वचाडालाद्यान्नदर्शनात्तत्र युक्त यदिदमद्यत इति वचनम् । यदि हि तन्न गृह्येत साधारणशब्देन पित्राऽसृष्टत्वाविनियुक्तत्वे तस्य प्रसज्येयाताम् । इष्यते हि तत्सृष्टत्वं तद्विनियुक्तत्वं च सर्वस्यान्नजातस्य । न च वैश्वदेवाख्यं शास्त्रोक्तं कर्म कुर्वत पाप्मनोऽविनिवृत्तियुक्ता । न च तस्य प्रतिषेधोऽस्ति । न च मत्स्यबधनादिकर्मवत्स्वभावजुगुप्सितमेतच्छिष्टनिर्वर्त्यत्वादकरणे च प्रत्यवायश्रवणात् । इतरत्र च प्रत्यवायोपपत्ते । 'अहमन्नमन्नमदन्तमद्मि' इति मंत्रवर्णात् ॥

द्वे देवानभाजयदिति मंत्रपदं, ये द्वे अन्ने सृष्ट्वा देवानभाजयत् । के ते द्वे इत्युच्यते— हुतं च प्रहुत च । हुतमित्यग्नौ हवनम् । प्रहुत हुत्वा बलिहरणम् । यस्मात् द्वे एते अन्ने हुतप्रहुते देवानभाजयत्पिता । तस्मादेतर्ह्यपि गृहिण काले देवेभ्यो जुह्वति देवेभ्य इदमन्नमस्माभिर्दीयमानमिति मन्वाना जुह्वति, प्रजुह्वति च हुत्वा बलिहरणं च कुर्वत इत्यर्थ । अथो अप्यन्य आहुर्द्वे अन्ने पित्रा देवेभ्य प्रत्ते न हुतप्रहुते, कि तर्हि दर्शपूर्णमासाविति । द्वित्वश्रवणाविशेषादत्यंतप्रसिद्धत्वाच्च हुतप्रहुते इति प्रथमः पक्ष । यद्यपि द्वित्वं हुतप्रहुतयो संभवति तथापि श्रौतयोरेव तु दर्शपूर्णमासयोर्देवान्नत्वं प्रसिद्धतरं मंत्रप्रकाशितत्वात् । गुणप्रधानप्राप्तौ च प्रधाने प्रथमतरा अवगतिः । दर्शपूर्णमास-

योश्च प्राधान्यं हुतप्रहुतापेक्षया । तस्मात्तयोरेव ग्रहणं युक्तं द्वे देवानभाजयदिति । यस्माद्देवार्थमेते पित्रा प्रकल्पिते दर्शपूर्णमासाख्ये अग्ने, तस्मात्तयोर्देवार्थत्वाविघाताय नेष्टियाजुक इष्टियजनशील । इष्टिशब्देन किल काम्या इष्टय । शातपथीयं प्रसिद्धि । ताच्छील्यप्रत्ययप्रयोगात्काम्येष्टियजनप्रधान न स्यादित्यर्थ ॥

पशुभ्य एकं प्रायच्छदिति । यत्पशुभ्य एकं प्रायच्छत्पिता किं पुनस्तदन्नं? तत्पय । कथं पुनरवगम्यते पशवोऽस्यान्नस्य स्वामिन इत्यत आह— पयो ह्यग्रे प्रथमं यस्मान्मनुष्याश्च पशवश्च पय एवोपजीवन्तीति । उचितं हि तेषा तदन्नमन्यथा कथं तदेवाग्रे नियमेनोपजीविषु । कथमग्रे तदेवोपजीवन्तीति। उच्यते— मनुष्याश्च पशवश्च यस्मात्तेनैवान्नेन वर्तन्तेऽद्यत्वेऽपि, यथा पित्रा आदौ विनियोग कृतस्तथा । तस्मात्कुमारं बालं जात घृत वा त्रैवर्णिका जातकर्मणि जातरूपसयुक्त प्रतिलेहयन्ति प्राशयन्ति । स्तनं वाऽनुधापयन्ति पश्चात्पाययन्ति । यथासंभवमन्येषा स्तनमेवाग्रे धापयन्ति मनुष्येभ्योऽन्येषा पशूनाम्। अथ वत्सं जातमाहु कियत्प्रमाणो वत्स इत्येव पृष्टा सन्तोऽतृणाद इति । नाद्यापि तृणमत्त्यतीव बाल पयसैवाद्यापि वर्तत इत्यर्थ ॥

यच्चाग्रे जातकर्मादौ घृतमुपजीवन्ति, यच्चेतरे पय एव, तत्सर्वथापि पय एवोपजीवन्ति । घृतस्यापि पयोविकारत्वात्पयस्त्वमेव । कस्मात्पुन सप्तमं सत्पञ्चम्न चतुर्थत्वेन व्याख्यायते? कर्मसाधनत्वात् । कर्म हि पय साधनाश्रयं अग्निहोत्रादि । तच्च कर्म साधनं वित्तसाध्यं वक्ष्यमाणस्यान्नत्रयस्य साध्यस्य । यथा दर्शपूर्णमासौ पूर्वोक्तावन्ने । अत कर्मपक्षत्वात्कर्मणा सह पिंडीकृत्योपदेश । साधनत्वाविशेषादर्थसंबंधादानंतर्यमकारणमिति च । व्याख्याने प्रतिपत्तिसौकर्याच्च। सुख हि नैरंतर्येण व्याख्यातुं शक्यन्तेऽन्नानि व्याख्यातानि च सुखं प्रतीयन्ते। तस्मिन्सर्व प्रतिष्ठित यच्च प्राणिति यच्च नेत्यस्य कोऽर्थ इत्युच्यते— तस्मिन्पञ्चम्ने पयसि सर्वमध्यात्माधिभूताधिदैवलक्षणं कृत्स्नं जगत्प्रतिष्ठितं, यच्च प्राणिति प्राणचेष्टावद्यच्च न स्थावरं शैलादि । तत्र हिशब्देनैव प्रसिद्धावद्योतकेन व्याख्यातम् । कथं पयोद्रव्यस्य सर्वप्रतिष्ठात्वम्? कारणत्वोपपत्ते । कारणत्वं चाग्निहोत्रादिकर्मसमवायित्वम् । अग्निहोत्राद्याहुतिविपरिणामात्मकं च जगत्कृत्स्नमिति श्रुतिस्मृतिवादा शतशो व्यवस्थिता । अतो युक्तमेव हिशब्देन व्याख्यानम् ॥

यत्तद्ब्राह्मणान्तरेष्विदमाहु — संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति। संवत्सरेण किल त्रीणि षष्टिशतान्याहुतीनां सप्त च शतानि विंशतिश्चेति याजुष्मतीरिष्टका अभिसपद्यमाना संवत्सरस्य चाहोरात्राणि, संवत्सरमग्निं प्रजापतिमाप्नुवन्ति। एवं कृत्वा संवत्सरं जुह्वदपजयति पुनर्मृत्युमित प्रेत्य देवेषु संभूत पुनर्न म्रियत इत्यर्थ। इत्येव ब्राह्मणवादा आहु.। न तथा विद्यान्न तथा द्रष्टव्यम्। यदहरेव जुहोति तदह पुनर्मृत्युमपजयति न संवत्सराभ्यासमपेक्षते। एव विद्वान्सन्। यदुक्तं, पयसि हीदं सर्वं प्रतिष्ठितं पयआहुतिविपरिणामात्मकत्वात्मर्वस्येति, तदेकेनैवाह्ना जगदात्मत्वं प्रतिपद्यते। तदुच्यते— अपजयति पुनर्मृत्युं पुनर्मरणं, सकृन्मृत्वा विद्वान्छरीरेण वियुज्य सर्वात्मा भवति न पुनर्मरणाय परिच्छिन्नं शरीरं गृह्णातीत्यर्थ। क पुनर्हेतु सर्वात्माप्त्या मृत्युमपजयतीति? उच्यते— सर्वं समस्तं हि यस्मादेवेभ्य सर्वेभ्योऽन्नाद्यमन्नमेव तदाद्य च सायंप्रातराहुतिप्रक्षेपेण प्रयच्छति। तद्युक्तं सर्वमाहुतिमयमात्मानं कृत्वा सर्वदेवान्नरूपेण सर्वैर्देवैरेकात्मभाव गत्वा सर्वदेवमयो भूत्वा पुनर्न म्रियत इति। अथैतदप्युक्तं ब्राह्मणेन— "ब्रह्म वै स्वयंभु तपोऽतप्यत तदैक्षत न वै तपस्यानंत्यमस्ति हंताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनीति, तत्सर्वेषु भूतेष्वात्मान हुत्वा भूतानि चात्मनि सर्वेषा भूताना श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येत्" इति॥

कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति। यदा पित्रा अन्नानि सृष्ट्वा सप्त पृथक्पृथग्भोक्तृभ्य प्रत्तानि, तदाप्रभृत्येव तैर्भोक्तृभिरद्यमानानि। तान्निमित्तत्वात्तेषा स्थिते। सर्वदा नैरंतर्येण। कृतक्षयोपपत्तेश्च युक्तस्तेषा क्षय। न च तानि क्षीयमाणानि जगतोऽविभ्रष्टरूपेणैव अवस्थानदर्शनात्। भवितव्यं चाक्षयकारणेन। तस्मात्कस्मात्पुनस्तानि न क्षीयन्त इति प्रश्न। तस्येदं प्रतिवचनम्— पुरुषो वा अक्षिति। यथासौ पूर्वमन्नानां स्रष्टासीत्पिता मेधया जायादिसंबन्धेन च पांक्तकर्मणा भोक्ता च तथा येभ्यो दत्तान्यन्नानि तेऽपि तेषा अन्नानां भोक्तारोपि सन्त पितर एव, मेधया तपसा च यतो जनयन्ति तान्यन्नानि। तदेतदभिधीयते पुरुषो वै योऽन्नानां भोक्ता सोऽक्षितिरक्षयहेतु। कथं अस्याक्षितित्वमित्युच्यते— स हि यस्मादिद भुज्यमानं सप्तविधं कार्यकरणलक्षणं क्रियाफलात्मकं पुन· पुनर्भूयो भूयो जनयते उत्पादयति धिया धिया

तत्तत्कालभाविन्या तया तया प्रज्ञया, कर्मभिश्च वाङ्मन कायचेष्टितै , यद्यदि ह यद्येतत्सप्तविधमन्नमुक्तं क्षणमात्रमपि न कुर्यात्प्रज्ञया कर्मभिश्च, ततो विच्छिद्येत भुज्यमानत्वात्सातत्येन क्षीयेत ह । तस्माद्यथैवायं पुरुषो भोक्ता अन्नाना नैरंतर्येण यथाप्रज्ञं यथाकर्म च करोत्यपि । तस्मात्पुरुषोऽक्षिति सातत्येन कर्तृत्वात् । तस्मात् भुज्यमानान्यप्यन्नानि न क्षीयन्त इत्यर्थ । अत प्रज्ञाक्रियालक्षणप्रबंधारूढ सर्वो लोक साध्यसाधनलक्षण क्रियाफलात्मक संहतानेकप्राणिकर्मवासनासंतानावष्टब्धत्वात्क्षाणिकोऽशुद्धोऽसारो नदीस्रोत प्रदीपसतानकल्प कदलीस्तंभवदसार फेनमायामरीच्यभ स्वप्नादिसम तदात्मगतदृष्टीनामविकीर्यमाणो नित्य सारवानिव लक्ष्यते । तदेतद्वैराग्यार्थमुच्यते— धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत हेति । विरक्ताना ह्यस्माद्ब्रह्मविद्या आरब्धव्या चतुर्थप्रमुखेणेति ॥

यो वैतामक्षितिं वेदेति । वक्ष्यमाणान्यपि त्रीण्यन्नान्यस्मिन्नवसरे व्याख्यातान्येवेति कृत्वा तेषा याथात्म्यविज्ञानफलमुपसंहियते— यो वै एता अक्षितिमक्षयहेतुं यथोक्तं वेद, पुरुषो वा अक्षिति स हीदमन्न धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत हेति । सोऽन्नमत्ति प्रतीकेनेत्यस्यार्थ उच्यते— मुखं मुख्यत्वं प्राधान्यमित्येतत् । प्राधान्येनैवान्नाना पितु पुरुषस्य अक्षितित्वं यो वेद सोऽन्नमत्ति नान्नं प्रति गुणभूत सन्, यथाऽज्ञो न तथा विद्वानन्नानामात्मभूतो, भोक्तैव भवति न भोज्यतामापद्यते । स देवानपिगच्छति स ऊर्जमुपजीवति, देवानपिगच्छति देवात्मभावं प्रतिपद्यते । ऊर्जममृतं चोपजीवतीति यदुक्तं सा प्रशसा, नापूर्वार्थोऽन्योऽस्ति ॥

त्रीण्यात्मनेऽकुरुतेति मनो वाच प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूव नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति । कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सा । एषा ह्यंतमायैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एवैतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥३॥

पांक्तस्य कर्मणः फलभूतानि यानि त्रीण्यन्नान्युपक्षिप्तानि तानि कार्यत्वाद्वि-

स्तीर्णविषयत्वाच्च पूर्वेभ्योऽन्येभ्य पृथगुत्कृष्टानि, तेषा व्याख्यानार्थ उत्तरो ग्रंथ आ ब्राह्मणपरिसमाप्ते । त्रीण्यात्मनेऽकुरुतेति कोऽस्यार्थ इत्युच्यते— मनोवाक्प्राणा एतानि त्रीण्यन्नानि, तानि मनो वाच प्राणं च आत्मने आत्मार्थमकुरुत कृतवान्सृष्ट्वा आदौ पिता । तेषा मनसोऽस्तित्व स्वरूपं च प्रति संशय इत्यत आह— अस्ति तावन्मन श्रोत्रादिबाह्यकरणव्यतिरिक्तम् । यत एवं प्रसिद्धं बाह्यकरणविषयात्मसंबंधे सत्यप्यभिमुखीभूतं विषयं न गृह्णाति, किं दृष्टवानसीद रूपमित्युक्तो वदति— अन्यत्र मे गत मन आसीत्सोऽहमन्यत्रमना आसं नादर्शम् । तथेद श्रुतवानसि मदीय वच इत्युक्तोऽन्यत्रमना अभूवं नाश्रौष न श्रुतवानस्मीति । तस्माद्यस्यासंनिधौ रूपादिग्रहणसमर्थस्यापि सतश्चक्षुरादे स्वस्वविषयसबधे रूपशब्दादिज्ञानं न भवति, यस्य च भावे भवति, तदन्यदस्ति मनो नामान्त करणं सर्वकरणविषययोगीत्यवगम्यते । तस्मात्सर्वो हि लोको मनसा ह्येव पश्यति मनसा शृणोति तद्यग्रत्वे दर्शनाद्यभावात् ॥

अस्तित्वे सिद्धे मनस स्वरूपार्थमिदमुच्यते— काम स्त्रीव्यतिकराभिलाषादि । संकल्प प्रत्युपस्थितविषयविकल्पनं शुक्लनीलादिभेदेन । विचिकित्सा संशयज्ञानम् । श्रद्धा अदृष्टार्थेषु कर्मस्वास्तिक्यबुद्धिर्देवतादिषु च । अश्रद्धा तद्विपरीता बुद्धि· । धृतिर्धारणं देहाद्यवसादे उत्तंभनम् । अधृतिस्तद्विपर्यय । ह्रीर्लज्जा । धी· प्रज्ञा । भीर्भयम् । इत्येतदेवमादिकं सर्वं मन एव । मनसोऽन्त करणस्य रूपाण्येतानि । मनोस्तित्व प्रत्यन्यच्च कारणमुच्यते— तस्मान्मनो नामास्त्यंत करणम् । यस्माच्चक्षुषो ह्यगोचरे पृष्ठतोऽप्युपस्पृष्ट केनचिद्धस्तस्यायं स्पर्शो जानोरयमिति विवेकेन प्रतिपद्यते । यदि विवेककृन्मनो नाम नास्ति तर्हि त्वङ्मात्रेण कुतो विवेकप्रतिपत्ति स्यात् । यत्तद्विवेकप्रतिपत्तिकारण तन्मन ॥

अस्ति तावन्मन स्वरूपं च तस्याधिगतम् । त्रीण्यन्नानीह फलभूतानि कर्मणा मनोवाक्प्राणाख्यानि अध्यात्ममधिभूतमधिदैवं च व्याचिख्यासितानि । तत्र आध्यात्मिकाना वाङ्मन प्राणाना मनो व्याख्यातम् । अथेदानी वाग्वक्तव्येत्यारंभः— य· कश्च लोके शब्दो ध्वनिस्तालवादिव्यंग्य प्राणिभिर्वर्णादिलक्षण· इतरो वा वादित्रमेघादिनिमित्त सर्वो ध्वनिर्वागेव सा । इदं

तावद्वाच स्वरूपमुक्तम् । अथ तस्या कार्यमुच्यते— एषा वाग्घि यस्मादंतं अभिधेयावसानं अभिधेयनिर्णयं आयत्ताऽनुगता । एषा पुन स्वयं नाभिधेयवत्प्रकाश्या अभिधेयप्रकाशिकैव, प्रकाशात्मकत्वात्प्रदीपादिवत् । न हि प्रदीपादिप्रकाश प्रकाशान्तरेण प्रकाश्यते, तद्वद्वाक्प्रकाशिकैव स्वयं न प्रकाश्या इत्यनवस्था श्रुति परिहरति— एषा हि न प्रकाश्या । प्रकाशकत्वमेव वाच. कार्यमित्यर्थ ॥

अथ प्राण उच्यते— प्राणो मुखनासिकासचार्या हृदयवृत्ति प्रणयनात्प्राण । अपनयनान्मूत्रपुरीषादेरपानोऽधोवृत्ति आनाभिस्थान । व्यानो व्यायमनकर्मा व्यान प्राणापानयो संधिर्वीर्यवत्कर्महेतुश्च । उदान उत्कर्षोर्ध्वगमनादिहेतु आपादतलमस्तकस्थान ऊर्ध्ववृत्ति । समान सम नयनात् भुक्तस्य पीतस्य च कोष्ठस्थानोऽन्नपक्ता । अन इत्येषा वृत्तिविशेषाणा सामान्यभूता सामान्यदेहचेष्टाभिसंबंधिनी वृत्ति. । एवं यथोक्तं प्राणादिवृत्तिजातमेतत्सर्वं प्राण एव ॥

प्राण इति वृत्तिमानाध्यात्मिकोऽन उक्त । कर्म चास्य वृत्तिभेदप्रदर्शनेनैव व्याख्यातम् । व्याख्यातान्याध्यात्मिकानि मनोवाक्प्राणाख्यान्यन्नानि । एतन्मय एतद्विकार प्राजापत्यैरेतैर्वाङ्मन प्राणैरारब्ध । कोऽसावय कार्यकरणसंघात आत्मा पिड आत्मस्वरूपत्वेनाभिमतोऽविवेकिभि [१] आविशेषेणैतन्मय इत्युक्तस्य विशेषेण वाङ्मयो मनोमय प्राणमय इति स्फुटीकरणम् ॥

तेषामेव प्राजापत्यानामन्नाना आधिभौतिको विस्तारोऽभिधीयते—

त्रयो लोका एत एव वागेवाय लोको मनोऽन्तरिक्षलोक प्राणोऽसौ लोक. ॥४॥

त्रयो लोका भूर्भुव स्वरित्याख्या एत एव वाङ्मन प्राणा, तत्र विशेषो वागेवायं लोको मनोऽन्तरिक्षलोक प्राणोऽसौ लोक ॥

त्रयो वेदा एत एव वागेवर्ग्वेदो मनो यजुर्वेद प्राण. सामवेद. ॥५॥ देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितर प्राणो मनुष्या ॥६॥ पिता माता प्रजैत एव मन एव पिता वाङ्माता प्राणः प्रजा ॥७॥

तथा त्रयो वेदा इत्यादीनि वाक्यानि ऋज्वर्थानि ॥

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किंच विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति ॥८॥

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव । तत्र विशेषो यत्किंच विज्ञातं विस्पष्ट ज्ञातं वाचस्तद्रूपम् । तत्र स्वयमेव हेतुमाह— वाग्घि विज्ञाता प्रकाशात्मकत्वात्कथमविज्ञाता भवेत् या अन्यानपि विज्ञापयति 'वाचैव सम्राडबंधु प्रज्ञायते' इति हि वक्ष्यति । वाग्विशेषविद इद फलमुच्यते— वागेवैन यथोक्तवाग्विभूतिविदं तद्विज्ञातं भूत्वाऽवति पालयति विज्ञातरूपेणैवास्यान्नं भोज्यता प्रतिपद्यत इत्यर्थ ॥

यत्किंच विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वाऽवति ॥९॥

तथा यत्किंच विजिज्ञास्यं विस्पष्टं ज्ञातुमिष्टं विजिज्ञास्यं तत्सर्वं मनसो रूपं, मनो हि यस्मात्संदिह्यमानाकारत्वाद्विजिज्ञास्यम् । पूर्ववन्मनोविभूतिविद फलं— मन एनं तद्विजिज्ञास्य भूत्वा अवति विजिज्ञास्यस्वरूपेणैव अन्नत्वमापद्यते ॥

यत्किचाविज्ञात प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वाऽवति ॥१०॥

तथा यत्किचाविज्ञातं विज्ञानागोचरं न च संदिह्यमानं प्राणस्य तद्रूपम् । प्राणो ह्यविज्ञातोऽविज्ञातरूपो हि यस्मात्प्राणोऽनिरुक्तश्रुते । विज्ञातविजिज्ञास्याविज्ञातभेदेन वाङ्मन प्राणविभागे स्थिते त्रयो लोका इत्यादयो वाचनिका एव । सर्वत्र विज्ञातादिरूपदर्शनाद्वचनादेव नियम स्मर्तव्य । प्राण एनं तद्भूत्वाऽवति अविज्ञातरूपेणैवास्य प्राणोऽन्नं भवतीत्यर्थ । शिष्यपुत्रादिभि संदिह्यमानाविज्ञातोपकारा अप्याचार्यपित्रादयो दृश्यन्ते । तथा मन प्राणयोरपि संदिह्यमानाविज्ञातयोः अन्नत्वोपपत्ति ॥

व्याख्यातो वाङ्मन प्राणानामाधिभौतिको विस्तार । अथायमाधिदैविकार्थ आरंभ —

तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्नि ॥११॥

तस्यै तस्याः वाच प्रजापतेरन्नत्वेन प्रस्तुताया. पृथिवी शरीरं बाह्य आधारो ज्योतीरूपं प्रकाशात्मकं करणं पृथिव्या आधेयभूतमयं पार्थिवोऽग्निः ।

द्विरूपा हि प्रजापतेर्वाक्कार्यमाधारोऽप्रकाश , करणं च आधेय प्रकाशस्तदुभयं पृथिव्यग्नी वागेव प्रजापते । तत्तत्र यावत्येव यावत्परिमाणैव अध्यात्माधिभूत-भेदाभिन्ना सती वाग्भवति, तत्र सर्वत्र आधारत्वेन पृथिवी व्यवस्थिता, तावत्येव भवति कार्यभूता । तावानयमग्नि आधेय. करणरूपो ज्योतीरूपेण पृथिवीमनुप्रविष्टस्तावानेव भवति । समानमुत्तरम् ॥

अथैतस्य मनसो द्यौ. शरीरं ज्योतीरूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनं समैतां तत. प्राणोऽजायत स इंद्र स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥१२॥

अथैतस्य प्राजापत्यान्नोक्तस्यैव मनसो द्यौर्द्युलोक शरीर कार्यमाधारो, ज्योतीरूपं करणमाधेयोऽसावादित्य । तत्तत्र यावत्परिमाणमेव अध्यात्ममधिभूत वा मनस्तावती तावद्विस्तारा तावत्परिमाणा मनसो ज्योतीरूपस्य करणस्य आधारत्वेन व्यवस्थिता द्यौ, तावानसावादित्यो ज्योतीरूपं करणमाधेयं, तावग्न्यादित्यौ वाङ्मनसे आधिदैविके मातापितरौ मिथुन मैथुन्यमितरेतरसंसर्गं समैता समगच्छेताम् । मनसा आदित्येन प्रसूतं पित्रा, वाचाऽग्निना मात्रा प्रकाशितं कर्म करिष्यामीति अंतरा रोदस्यो । ततस्तयोरेव संगमनात्प्राणो वायुरजायत परिस्पंदाय कर्मणे । यो जात. स इंद्र परमेश्वरो, न केवलमिंद्र एवासपत्नोऽविद्यमान सपत्नो यस्य, क पुन सपत्नो नाम? द्वितीयो वै प्रतिपक्षत्वेनोपगत स द्वितीय सपत्न इत्युच्यते । तेन द्वितीयत्वेऽपि सति वाङ्मनसे न सपत्नत्वं भजेते, प्राणं प्रति गुणभावोपगते एव हि ते अध्यात्ममिव । तत्र प्रासंगिकासपत्नविज्ञानफलमिदं— नास्य विदुष सपत्न प्रतिपक्षो भवति य एवं यथोक्तं प्राणमसपत्नं वेद ॥

अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चंद्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चंद्रस्त एते सर्व एव समाः सर्वेऽनताः स यो हैतानंतवत उपास्तेऽन्तवन्तं स लोकं जयत्यथ यो हैताननतानुपास्तेऽनंतं स लोकं जयति ॥१३॥

अथैतस्य प्रकृतस्य प्राजापत्यान्नस्य प्राणस्य न प्रजोक्तस्य अनंतरनिर्दिष्टस्य आप शरीरं कार्यं करणाधार , पूर्ववज्ज्योतीरूपमसौ चंद्रः तत्र यावानेव प्राणो यावत्परिमाणोऽध्यात्मादिभेदेषु, तावद्व्याप्तिमत्य आप तावत्परिमाणा.,

तावानसौ चंद्रोऽबाधेयस्तास्वप्स्वनुप्रविष्ट करणभूतोऽध्यात्ममधिभूतं च तावद्व्याप्तिमानेव । तान्येतानि पित्रा पाक्तेन कर्मणा सृष्टानि त्रीण्यन्नानि वाङ्मन-प्राणाख्यानि । अध्यात्ममधिभूतं च जगत्समस्तमेतैर्व्याप्तं, नैतेभ्योऽन्यदतिरिक्तं किंचिदस्ति कार्यात्मकं करणात्मकं वा । समस्तानि त्वेतानि प्रजापतिस्ते एते वाङ्मन प्राणा सर्वे एव समास्तुल्या व्याप्तिमन्तो यावत्प्राणिगोचरं साध्यात्माधिभूतं व्याप्य व्यवस्थिता । अत एवानता यावत्ससारभाविनो हि ते । नहि कार्यकारणप्रत्याख्यानेन संसारोऽवगम्यते । कार्यकरणात्मका हि त इत्युक्तम् । स य कश्चित् हैतान्प्रजापतेरात्मभूतानंतवत परिच्छिन्नानध्यात्मरूपेण वा अधिभूतरूपेण वोपास्ते सच तदुपासनानुरूपमेव फलमतवन्त लोक जयति, परिच्छिन्न एव जायते नैतेषामात्मभूतो भवतीत्यर्थ । अथ पुनर्यो हैताननंतान्सर्वात्मकान्सर्वप्राण्यात्मभूतान् अपरिच्छिन्नानुपास्ते सोऽनंतमेव लोक जयति ॥१३॥

पिता पाक्तेन कर्मणा सप्तान्नानि सृष्ट्वा त्रीण्यन्नान्यात्मार्थमकरोदित्युक्तम् । तान्येतानि पाक्तकर्मफलभूतानि व्याख्यातानि । तत्र कथं पुन पाक्तस्य कर्मण फलमेतानीति । उच्यते— यस्मात्तेष्वपि त्रिष्वन्नेषु पाक्तताऽवगम्यते । वित्तकर्मणोरपि तत्र संभवात् । तत्र पृथव्यग्नी माता । दिवादित्यौ पिता । योऽयमनयोरंतरा प्राण स प्रजेति व्याख्यातम् । तत्र वित्तकर्मणी संभावयितव्ये इत्यारंभ —

स एष सवत्सर. प्रजापति षोडशकलस्तस्य रात्रय एव पचदश कला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यतेऽप च क्षीयते सोऽमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य तत. प्रातर्जायते तस्मादेतां रात्रिं प्राणभृत. प्राणं न विच्छिद्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥१४॥

स एष संवत्सरो योऽयं व्यन्नात्मा प्रजापति प्रकृत , स एष संवत्सरात्मना विशेषतो निर्दिश्यते । षोडशकल षोडश कला अवयवा अस्य सोऽयं षोडशकल संवत्सर संवत्सरात्मा कालरूप । तस्य च कालात्मन प्रजापते रात्रय एवाहोरात्राणि, तिथय इत्यर्थ , पंचदशकला· । ध्रुवैव नित्यैव व्यवस्थिता अस्य प्रजापते. षोडशी षोडशानां पूरणी कला । स रात्रिभिरेव तिथिभि

कलोक्ताभिरापूर्यते चापक्षीयते च । प्रतिपदाद्याभिर्हि चंद्रमा प्रजापति शुक्लपक्ष-आपूर्यते कलाभिरुपचीयमानाभिर्वर्धते यावत्संपूर्णमंडल पौर्णमास्याम् । ताभिः एवापचीयमानाभि कलाभिरपक्षीयते कृष्णपक्षे यावत् ध्रुवैका कला व्यवस्थिता अमावास्यायाम् । स प्रजापति कालात्मा अमावास्याममावास्याया रात्रिं रात्रौ या व्यवस्थिता ध्रुवा कलोक्ता एतया षोडश्या कलया सर्वमिदं प्राणभृत्प्राणि-जातमनुप्रविश्य यदप पिबति यच्चौषधीरश्नाति तत्सर्वमेव ओषध्यात्मना सर्वं व्याप्यामावास्या रात्रिमवस्थाय ततोऽपरेद्यु प्रातर्जायते द्वितीयया कलया सयुक्त । एवं पाक्तात्मकोऽसौ प्रजापति । दिवादित्यौ मन पिता । पृथिव्यग्नी वाग्जाया माता । तयोश्च प्राण प्रजा । चाद्रमस्यस्तिथय. कला वित्त उपचयापचया-धर्मित्वाद्वित्तवत् तासा च कलाना कालावयवाना जगत्पारिणामहेतुत्व कर्म । एवमेष कृत्स्न. प्रजापति 'जाया मे स्यादथ प्रजायेयाथ वित्त मे स्यादथ कर्म कुर्वीय' इत्येषणानुरूप एव पाक्तस्य कर्मण फलभूत सवृत्त । कारणानुविधायि हि कार्यमिति लोकेऽपि स्थिति । यस्मादेष चद्र एता रात्रिं सर्वप्राणिजातमनुप्रविष्टो ध्रुवया कलया वर्तते, तस्माद्धेतोरेतामावास्या रात्रि प्राणभृत प्राणिन प्राणं न विच्छिद्यात्प्राणिनं न प्रमापयेदित्येतत् अपि कृकलासस्य । कृकलासो हि पापात्मा स्वभावेनैव हिस्यते प्राणिभिर्दृष्टोऽयमगल इति कृत्वा । ननु प्रतिषिद्धैव प्राणिहिंसा 'न हिंस्यात्सर्वभूतान्यन्यत्र तीर्थेभ्य' इति । बाढं प्रतिषिद्धा, तथापि नामावास्याया अन्यत्र प्रतिप्रसवार्थं वचन हिसाया कृकलासविषये वा, कि तर्ह्येतस्या सोमदेवताया अपचित्यै पूजार्थम् ॥

यो वै स संवत्सर. प्रजापति. षोडशकलोऽयमेव स योऽयमेव-वित्पुरुषस्तस्य वित्तमेव पंचदश कला आत्मैवास्य षोडशी कला स वित्तेनैवा च पूर्यतेऽप च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वेऽप्यनिं जीयत आत्मना चेज्जीवति प्रधिनाऽगादित्येवाहु ॥१५॥

यो वै परोक्षाभिहित संवत्सरः प्रजापति· षोडशकल स नैवाल्यंतं परोक्षो मंतव्यो, यस्मादयमेव स प्रत्यक्ष उपलभ्यते । कोऽसावयं ? यो यथोक्तं त्र्यात्मकं प्रजापतिमात्मभूतं वेत्ति स एवंवित्पुरुष । केन सामान्येन प्रजाप-तिरिति तदुच्यते— तस्यैवंविद पुरुषस्य गवादिवित्तमेव पंचदश कला उपच-यापचयधर्मित्वात् तद्वित्तसाध्यं च कर्म । तस्य कृत्स्नतायै आत्मैव पिड एवास्य

विदुष षोडशी कला ध्रुवस्थानीया। स चंद्रवद्वित्तेनैवापूर्यते चापक्षीयते च। तदेतल्लोके प्रसिद्धम्। तदेतन्नभ्यं, नाभ्यै हितं नभ्यं नाभि वा अर्हतीति। किं तत्? यदय योऽयमात्मा पिंड, प्रधिर्वित्तं परिवारस्थानीयं बाह्यं चक्रस्येवारनेम्यादि। तस्माद्यद्यपि सर्वज्यानिं सर्वस्वापहरणं जीयते हीयते ग्लानिं प्राप्नोति, आत्मना चक्रनाभिस्थानीयेन चेद्यदि जीवति प्रधिना बाह्येन परिवारेणायमगात्क्षीणोऽय, यथा चक्रमरनेमिविमुक्तमेवमाहु। जीवंश्चेत् अरनेमिस्थानीयेन वित्तेन पुनरुपचीयत इत्यभिप्राय॥

एवं पात्रेन दैववित्तविद्यासंयुक्तेन कर्मणा त्र्यन्नात्मक प्रजापतिर्भवतीति व्याख्यातम्। अनंतरं च जायादिवित्तं परिवारस्थानीयमित्युक्तम्। तत्र पुत्रकर्मापरविद्याना लोकप्राप्तिसाधनत्वमात्र सामान्येनावगतं, न पुत्रादीना लोकप्राप्तिफलं प्रति विशेषसबंधनियम। सोऽयं पुत्रादीना साधनाना साध्यविशेषसंबंधो वक्तव्य इत्युत्तरकंडिका प्रणीयते—

अथ त्रयो वाव लोका मनुष्यलोक पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठस्तस्माद्विद्यां प्रशंसन्ति॥१६॥

अथेति वाक्योपन्यासार्थ। त्रयो, वावेत्यवधारणार्थ। त्रय एव शास्त्रोक्तसाधनार्हा लोका, न न्यूना नाधिका वा। के त इत्युच्यते—मनुष्यलोक पितृलोको देवलोक इति। तेषा सोऽयं मनुष्यलोक पुत्रेणैव साधनेन जय्यो जेतव्य साध्यो,—यथा च पुत्रेण जेतव्यस्तथोत्तरत्र वक्ष्यामो,—नान्येन कर्मणा, विद्यया वेति वाक्यशेष। कर्मणा अग्निहोत्रादिलक्षणेन केवलेन पितृलोको जेतव्यो न पुत्रेण नापि विद्यया। विद्यया देवलोको न पुत्रेण नापि कर्मणा। देवलोको वै लोकाना त्रयाणा श्रेष्ठ प्रशस्यतम। तस्मात्तत्साधनत्वाद्विद्यां प्रशंसन्ति॥

अथातः संप्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्र प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता। ये वै के च यज्ञास्तेषां सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषां सर्वेषां लोक इत्येकतैतावद्वा इदं सर्वमेतन्मा सर्वं सन्नयमितोऽमुनजदिति तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति

स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति । स यद्यनेन किंचिदक्ष्णयाऽकृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुंचति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिल्लोके प्रतितिष्ठत्यथैनमेते दैवा. प्राणा अमृता आविशन्ति ॥१७॥

एवं साध्यलोकत्रयफलभेदेन विनियुक्तानि पुत्रकर्मविद्याख्यानि त्रीणि साधनानि । जाया तु पुत्रकर्मार्थत्वान्न पृथक्साधनमिति पृथङ्नाभिहिता । वित्तं च कर्मसाधनत्वान्न पृथक्साधनम् । विद्याकर्मणोर्लोकजयहेतुत्व स्वात्मप्रतिलाभेनैव भवतीति प्रसिद्धम् । पुत्रस्य त्वक्रियात्मकत्वात्केन प्रकारेण लोकजयहेतुत्वमिति न ज्ञायते । अतस्तद्वक्तव्यमिति अथानंतरमारभ्यते— सप्रत्तिसंप्रदानम् । संप्रत्तिरिति वक्ष्यमाणस्य कर्मणो नामधेयम् । पुत्रे हि स्वात्मव्यापारसंप्रदानं करोत्यनेन प्रकारेण पिता, तेन सप्रत्तिसज्ञकमिदं कर्म । तत्कस्मिन्काले कर्तव्यमित्याह— स पिता यदा यस्मिन्काले प्रेष्यन्मरिष्यन्मरिष्यामीत्यरिष्टादिदर्शनेन मन्यतेऽथ तदा पुत्रमाहूयाह— त्व ब्रह्म त्व यज्ञस्त्वं लोक इति । स एवमुक्त पुत्र प्रत्याह, स तु पूर्वमेवानुशिष्टो जानाति मयैतत्कर्तव्यमिति, तेनाह— अहं ब्रह्माहं यज्ञोऽहं लोक इति । एतद्वाक्यत्रयम् ॥

एतस्यार्थस्तिरोहित इति मन्वाना श्रुतिर्व्याख्यानाय प्रवर्तते— यद्वै किंच यत्किचावशिष्टमनूक्तं अधीतमनधीतं च, तस्य सर्वस्यैव ब्रह्मेत्येतस्मिन्पदे एकतैकत्वं, योऽध्ययनव्यापारो मम कर्तव्य आसीदेतावन्त काल वेदविषयः, स इत ऊर्ध्वं त्वं ब्रह्म त्वत्कर्तृकोऽस्त्वित्यर्थ । तथा ये वै के च यज्ञा अनुष्ठेयास्तो मया अनुष्ठिताश्चाननुष्ठिताश्च, तेषा सर्वेषा यज्ञ इत्येतस्मिन्पदे एकतैकत्वं, मत्कर्तृका यज्ञा य आसंस्ते इत ऊर्ध्वं त्वं यज्ञस्त्वत्कर्तृका भवन्त्वित्यर्थ । ये वै के च लोका मया जेतव्या सन्तो जिता अजिताश्च, तेषा सर्वेषा लोक इत्येतस्मिन्पदे एकता । इत ऊर्ध्वं त्वं लोकस्त्वया जेतव्यास्ते । इत ऊर्ध्वं मया अध्ययनयज्ञलोकजयकर्तव्यकृतुस्त्वयि समर्पित , अहं तु मुक्तोऽस्मि कर्तव्यताबंधनविषयात्कृतो । स च सर्वं तथैव प्रतिपन्नवान्पुत्रोऽनुशिष्टत्वात् ॥

तत्रेमं पितुरभिप्रायं मन्वाना आचष्टे श्रुति — तावदेतत्परिमाणं वै इदं सर्वं यत् गृहिणा कर्तव्यं, यदुत वेदा अध्येतव्या, यज्ञा यष्टव्या, लोकाश्च जेतव्या । एतन्मा सर्वं सन्नयं, सर्वं हीमं भारं मदधीनं मत्तोऽपच्छिद्य आत्मनि

निधाय इतोऽस्माल्लोकान्मा मा अमुनजत्पालयिष्यतीति। लृडर्थे लड छंदसि कालनियमाभावात्। यस्मादेवं सपत्न पुत्र पितरमस्माल्लोकात्कर्तव्यताबधनतो मोचयिष्यति, तस्मात्पुत्रमनुशिष्टं लोक्य लोकहितं पितुराहुर्ब्राह्मणा । अत एव स्वेन पुत्रमनुशासति लोक्योऽयं न स्यादिति पितर ।

स पिता यदा यस्मिन्काले एवंवित्पुत्रसमर्पितकर्तव्यताकृतु अस्माल्लोकात्प्रैति म्रियते, अथ तदैभिरेव प्रकृतैर्वाङ्मन प्राणै पुत्रमाविशति पुत्र व्याप्नोति। अध्यात्मपरिच्छेदहेत्वपगमात्पितुर्वाङ्मन प्राणा. स्वेन आधिदैविकेन रूपेण पृथिव्यग्न्याद्यात्मना भिन्नघटप्रदीपप्रकाशवत्सर्वमाविशन्ति । तै प्राणै सह पिताप्याविशति, वाङ्मन प्राणात्मभावित्वात्पितु । अहमस्म्यनंता वाङमन प्राणा अध्यात्मादिभेदविस्तारा इत्येवं भावितो हि पिता । तस्मात्तत्प्राणानुवृत्तित्व पितुर्भवतीति युक्तमुक्त, एभिरेव प्राणै सह पुत्रमाविशतीति। सर्वेषा ह्यसावात्मा भवति पुत्रस्य च । एतदुक्त भवति— यस्य पितुरेवमनुशिष्ट पुत्रो भवति सोऽस्मिन्नेव लोके वर्तते, पुत्ररूपेण नैव मृतो मंतव्य इत्यर्थ । तथा च श्रुत्यंतरे— 'सोऽस्यायमितर आत्मा पुण्येभ्य कर्मभ्य प्रतिवीयते' इति ॥

अथेदानी पुत्रनिर्वचनमाह— स पुत्रो यदि कदाचिदेनेन पित्रा अक्ष्णया कोणच्छिद्रतोऽन्तराऽकृतं भवति कर्तव्यम्। तस्मात्कर्तव्यतारूपात्पित्राऽकृतात् सर्वस्माल्लोकप्राप्तिप्रतिबंधरूपात्पुत्रो मुंचति मोचयति तत्सर्वं स्वयमनुतिष्ठन्पूरयित्वा। तस्मात्पूरणेन त्रायते स पितरं यस्मात्तस्मात्पुत्रो नाम । इदं तत्पुत्रस्य पुत्रत्वं यत्पितुच्छिद्रं पूरयित्वा त्रायते । स पितैवंविधेन पुत्रेण मृतोऽपि सन्नमृतोऽस्मिन्नेव लोके प्रतितिष्ठति, एवमसौ पिता पुत्रेणेमं मनुष्यलोक जयति । न तथा विद्याकर्मभ्या देवलोकपितृलोकौ स्वरूपलाभसत्तामात्रेण । न हि विद्याकर्मणी स्वरूपलाभव्यतिरेकेण पुत्रवद्व्यापारान्तरापेक्षया लोकजयहेतुत्वं प्रतिपद्येते । अथ कृतसंप्रत्तिकं पितरमेनमेते वागादय प्राणा दैवा हैरण्यगर्भा अमृता अमरणधर्माण आविशन्ति ॥

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥१८॥

कथमिति वक्ष्यति पृथिव्यै चैनमित्यादि । एव पुत्रकर्मापरविद्यानां मनुष्यलोकपितृलोकदेवलोकसाध्यार्थता प्रदर्शिता श्रुत्या स्वयमेव । अत्र केचिद्वा-

वदूका श्रुत्युक्तविशेषाथार्नाभिज्ञा सन्त पुत्रादिसाधनाना मोक्षार्थता वदन्ति ॥ तेषा मुखापिधानं श्रुत्येद कृतं—जाया मे स्यादित्यादि पाक्त काम्य कर्मेत्युपक्रमेण, पुत्रादीना च साध्यविशेषविनियोगोपसंहारेण च। तस्मादणश्रुतिरविद्वद्विषया न परमात्मविद्विषयेति सिद्धम्। वक्ष्यति च— 'कि प्रजया करिष्यामो येषा नोऽयमात्माऽयं लोक' इति ॥

केचित्तु पितृलोकदेवलोकजयोऽपि पितृलोकदेवलोकाभ्या व्यावृत्तिरेव, तस्मात्पुत्रकर्मापरविद्याभि समुच्चित्यानुष्ठिताभिस्त्रिभ्य एतेभ्यो लोकेभ्यो व्यावृत्त परमात्मविज्ञानेन मोक्षमधिगच्छतीति परपरया मोक्षार्थान्येव पुत्रादिसाधनानीच्छन्ति। तेषामपि मुखापिधानाय इयमेव श्रुतिरुत्तरा कृतसंप्रत्तिकस्य पुत्रिण कर्मिण व्यन्नात्मविद्याविद फलप्रदर्शनाय प्रवृत्ता। न चेदमेव फलं मोक्षफलमिति शक्यं वक्तुम्। व्यन्नसबधात् मेधातप कार्यत्वाच्चाज्ञाना पुन पुनर्जनयत इति दर्शनात्। 'यद्धैतन्न कुर्यात्क्षीयेत ह' इति च क्षयश्रवणात् ॥ शरीरं ज्योतीरूपमिति च कार्यकरणत्वोपपत्ते। 'त्रय वा इदं' इति च नामरूपकर्मात्मकत्वेनोपसहारात्। न चेदमेव साधनत्रय सहत सत्कस्यचिन्मोक्षार्थ कस्यचित्व्यन्नात्मफलं इत्यस्मादेव वाक्यादवगतुं शक्यं, पुत्रादिसाधनाना व्यन्नात्मफलदर्शनेनैव उपक्षीणत्वाद्वाक्यस्य। पृथिव्यै पृथिव्याश्चैनमग्नेश्च दैव्यधिदैवात्मिका वागेनं कृतसंप्रत्तिकमाविशति। सर्वेषा हि वाच उपादानभूता दैवी वाक्पृथिव्यग्निलक्षणा। सा ह्याध्यात्मिकासगादिदोषैर्निरुद्धा। विदुषस्तद्दोषापगमे आवरणभंग इवोदक प्रदीपप्रकाशवच्च व्याप्नोति। तदेतदुच्यते— पृथिव्या अग्नेश्चैनं दैवी वागाविशतीति। सा च दैवी वागनृतादिदोषरहिता शुद्धा, यया वाचा दैव्या यद्यदेव आत्मने परस्मै वा वदति तत्तद्भवति अमोघाऽप्रतिबद्धाऽस्य वाग्भवतीत्यर्थ ॥

दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनानन्दयेव भवत्यथो न शोचति ॥१९॥

तथा दिवश्चैनमादित्याच्च दैवं मन आविशति। तच्च दैव मन स्वभावनिर्मलत्वात्। येन मनसाऽसौ आनंदयेव भवति सुख्येव भवति, अथो अपि न शोचति शोकादिनिमित्तासंयोगात् ॥

अद्भ्यश्चैनं चंद्रमसश्च दैवः प्राण आविशति स वै दैव. प्राणो यः संचरं-

श्वासंचरंश्च न व्यथतेऽथो न रिष्यति स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैव स यथैता देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति । यदु किंचेमा. प्रजाः शोचन्त्यमैवासा तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति ॥२०॥

तथा अद्धयश्चैनं चंद्रमसश्च दैव प्राण आविशति । स वै दैव प्राणः किलक्षण इत्युच्यते— य संचरन्प्राणिभेदेष्वसंचरन्समष्टिव्यष्टिरूपेण अथवा संचरञ्जंगमेष्वसचरन्स्थावरेषु, न व्यथते न दु खनिमित्तेन भयेन युज्यते । अथो अपि न रिष्यति न विनश्यति न हिंसामापद्यते । स, यो यथोक्तमेवं वेत्ति त्यन्नात्मदर्शनं स, सर्वेषा भूतानामात्मा भवति, सर्वेषा भूताना प्राणो भवति, सर्वेषा भूताना मनो भवति, सर्वेषा भूताना वाग्भवति, इत्येवं सर्वभूतात्मतया सर्वज्ञो भवतीत्यर्थ । सर्वकृच्च । यथैषा पूर्वसिद्धा हिरण्यगर्भदेवता एवमेव नास्य सर्वज्ञत्वे सर्वकृत्त्वे वा क्वचित्प्रतिघात । स इति दार्ष्टान्तिकनिर्देशः । किंच यथैता हिरण्यगर्भदेवतामिज्यादिभि सर्वाणि भूतान्यवन्ति पालयन्ति पूजयन्ति, एवं हैवविदं सर्वाणि भूतान्यवन्ति इज्यादिलक्षणा पूजा सततं प्रयुजत इत्यर्थ. ॥

अथेदमाशंक्यते— सर्वप्राणिनामात्मा भवतीत्युक्तं, तस्य च सर्वप्राणिकार्यकरणात्मत्वे सर्वप्राणिसुखदु खै संबन्धेतेति । तन्न । अपरिच्छिन्नबुद्धित्वात् । परिच्छिन्नात्मबुद्धीना ह्याक्रोशादौ दु खसबधो दृष्ट अनेनाहमाक्रुष्ट इति । अस्य तु सर्वात्मनो य आक्रुश्यते यश्चाक्रोशति तयो आत्मत्वबुद्धिविशेषाभावान्न तन्निमित्तं दु खमुपपद्यते । मरणदु खवच्च निमित्ताभावात् । यथा हि कस्मिंश्चिन्मृते कस्यचित् दु खमुत्पद्यते, ममासौ पुत्रो भ्राता चेति, पुत्रादिनिमित्तम् । तन्निमित्ताभावे तन्मरणदर्शिनोऽपि नैव दु खमुपजायते । तथेश्वरस्यापि अपरिच्छिन्नात्मनो ममतवतादिदु खनिमित्तमिथ्याज्ञानादिदोषाभावात् नैव दु खमुपजायते । तदेतदुच्यते–यदु किंच यत्किंचेमा प्रजा शोचन्त्यमैव सहैव प्रजाभि तच्छोकादिनिमित्तं दु खं संयुक्तं भवत्यासा प्रजाना परिच्छिन्नबुद्धिजनितत्वात् । सर्वात्मनस्तु केन सह किं संयुक्तं भवेद्वियुक्तं वा । अमुं तु प्राजापत्ये पदे वर्तमानं पुण्यमेव शुभमेव फलमभिप्रेतं पुण्यमिति । निरतिशय हि तेन पुण्य कृतं, तेन तत्फलमेव गच्छति । न ह वै देवान्पापं गच्छति पापफलस्यावसराभावात् । पापफलं दुःखं न गच्छतीत्यर्थ ॥२०॥

'त एते सर्व एव समा सर्वेऽनंता' इत्यविशेषेण वाङ्मन प्राणानामुपासनमुक्त, नान्यतमगतो विशेष उक्त । किमेवमेव प्रतिपत्तव्यं किं वा विचार्यमाणे कश्चिद्विशेषो व्रतमुपासनं प्रति प्रतिपत्तुं शक्यत इत्युच्यते—

अथातो व्रतमीमांसा प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टान्यन्योन्येनास्पर्धन्त वदिष्याम्येवाहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षु श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म तानि मृत्यु. श्रमो भूत्वोपयेमे तान्याप्नोत्तान्याप्त्वा मृत्युरवारुंध तस्माच्छ्राम्यत्येव वाक्श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोद्योऽयं मध्यम प्राणस्तानि ज्ञातुं दध्रिरे । अय वै नः श्रेष्ठो यः सचरश्चासचरश्च न व्यथतेऽथो न रिष्यति हतास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवस्तस्मादेत एतेनाख्यायन्ते प्राणा इति तेन ह वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उ हैवविदा स्पर्धतेऽनुशुष्यत्यनुशुष्य हैवांततो म्रियत इत्यध्यात्मम् ॥२१॥

अथातोऽनंतरं व्रतमीमांसा उपासनकर्मविचारणेत्यर्थ । एषा प्राणानाकस्य कर्म व्रतत्वेन धारयितव्यमिति मीमांसा प्रवर्तते । तत्र प्रजापतिर्ह, हशब्द किलार्थे, प्रजापति किल प्रजा सृष्ट्वा कर्माणि करणानि वागादीनि कर्मार्थानि हि तानीति कर्माणीत्युच्यन्ते, ससृजे सृष्टवान्वागादीनि करणानीत्यर्थ । तानि पुन सृष्टान्यन्योन्येन इतरेतरमस्पर्धन्त स्पर्धां संघर्षं चक्रु । कथम्? वदिष्याम्येव स्वव्यापाराद्वदनादनुपरतैवाह स्यामिति वाग्व्रतं दध्रे धृतवती । यदि अन्योपि मत्समोस्ति स्वव्यापारादनुपरंतुं शक्त, सोपि दर्शयत्वात्मनो वीर्यमिति । यथा द्रक्ष्याम्यहमिति चक्षु, श्रोष्याम्यहमिति श्रोत्र, एवमन्यानि कर्माणि करणानि यथाकर्म, यद्यद्यस्य कर्म यथाकर्म, तानि करणानि मृत्युर्मारक श्रम श्रमरूपी भूत्वा उपयेमे संजग्राह । कथम्? तानि करणानि स्वव्यापारे प्रवृत्तान्याप्नोच्छ्रमरूपेणात्मानं दर्शितवान् । आप्त्वा च तान्यवारुंध अवरोधं कृतवान्मृत्यु, स्वकर्मभ्य प्रच्यावितवानित्यर्थ । तस्मादद्यत्वेऽपि वदने स्वकर्मणि प्रवृत्ता वाक्श्राम्यत्येव श्रमरूपिणा मृत्युना संयुक्ता स्वकर्मत प्रच्यवते । तथा श्राम्यति चक्षु. । श्राम्यति श्रोत्रम् । अथेममेव मुख्यं प्राणं नाप्नोन्न प्राप्तवान्मृत्यु श्रमरूपी, योऽयं मध्यम प्राणस्तम् । तेनाद्यत्वेऽप्यश्रान्त एव स्वकर्मणि प्रवर्तते । तानीतराणि करणानि तं ज्ञातुं दध्रिरे धृतवन्ति मन । अयं वै नोऽ-

स्माकं मध्ये श्रेष्ठ प्रशस्यतमोऽभ्यधिको यस्माद्य संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यति, हंतेदानीमस्यैव प्राणस्य सर्वे वयं रूपमसाम प्राणमात्मत्वेन प्रतिपद्येमहि । एव विनिश्चित्य ते एतस्यैव सर्वे रूपमभवन्प्राणरूपमेव आत्मत्वेन प्रतिपन्ना प्राणव्रतमेव दधिरेऽस्मद्व्रतानि न मृत्योर्वीरणाय पर्याप्तानीति । यस्मात्प्राणेन रूपेण रूपवन्तीतराणि करणानि चलनात्मना स्वेन च प्रकाशात्मना । न हि प्राणादन्यत्र चलनात्मकत्वोपपत्ति । चलनव्यापारपूर्वकाण्येव हि सर्वदा स्वव्यापारेषु लक्ष्यन्ते । तस्मादेते वागादय एतेन प्राणाभिधानेन आख्यायन्तेऽभिधीयन्ते प्राणा इत्येवम् । य एवं प्राणात्मता सर्वकरणाना वेत्ति प्राणशब्दाभिधेयत्वं च, तेन ह वाव तेनैव विदुषा तत्कुलमाचक्षते लौकिका । यस्मिन्कुले स विद्वाञ्जातो भवति तत्कुलं विद्वन्नान्नैव प्रथित भवत्यमुष्येदं कुलमिति । यथा तापत्य इति । य एवं यथोक्त वेद वागादीना प्राणरूपता प्राणाख्यत्व च तस्यैतत्फलम् । किंच य कश्चिदु हैवंविदा प्राणात्मदर्शिना स्पर्धते तत्प्रतिपक्षी सन्सोऽस्मिन्नेव शरीरेऽनुशुष्यति शोषमुपगच्छति । अनुशुष्य हेव शोष गत्वैव अंततोऽन्ते म्रियते न सहसाऽनुपद्रुतो म्रियते । इत्येवमुक्तमध्यात्म प्राणात्मदर्शनमिति उक्तोपसंहार अधिदैवतप्रदर्शनार्थ. ॥

अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्द्दध्रे तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चद्रमा एवमन्या देवता यथादैवतं स यथैषां प्राणानां मध्यम· प्राण एवमेतासां देवताना वायुर्म्लोचन्ति ह्यन्या देवता न वायुः सैषाऽनस्तमिता देवता यद्वायु· ॥२२॥

अथानतरं अधिदैवतं देवताविषयं दर्शनमुच्यते । कस्य देवताविशेषस्य व्रतधारणं श्रेय इति मीमास्यते । अध्यात्मवत्सर्वम् । ज्वलिष्याम्येवाहमित्यग्नि र्दध्रे । तप्स्याम्यहमित्यादित्य । भास्याम्यहमिति चंद्रमा । एवमन्या देवता यथादैवतम् । सोऽध्यात्मं वागादीनामेषा प्राणाना मध्ये मध्यम प्राणो मृत्युनाऽनाप्त स्वकर्मणो न प्रच्यावित स्वेन प्राणव्रतेनाभग्नव्रतो यथा, एवमेतासामग्न्यादीना देवताना वायुरपि । म्लोचन्त्यस्तं यन्ति स्वकर्मभ्य उपरमन्ते यथाऽध्यात्मं वागादयोऽन्या देवता अग्न्याद्या, न वायुरस्तं याति यथा मध्यम प्राण । अत सैषा अनस्तमिता देवता यद्वायुर्योऽयं वायु· । एवमध्यात्ममधिदैव च मीमासित्वा निर्धारितं प्राणवाय्वात्मनोर्व्रतमभग्नमिति ॥

अथैष श्लोको भवति यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मं स एवाद्य स उ श्व इति यद्वा एतेऽमुर्ह्याध्रियन्त तदेवाप्यद्य कुर्वन्ति । तस्मादेकमेव व्रत चरेत्प्राण्याचैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति ॥२३॥ इति पंचमं ब्राह्मणम् ॥

अथैतस्यैवार्थस्य प्रकाशक एष श्लोको मन्त्रो भवति । यतश्च यस्माद्वायोरुदेत्युद्गच्छति सूर्योऽध्यात्मं च चक्षुरात्मना प्राणादस्तं च यत्र वायौ प्राणे च गच्छत्यपरस्यामसमये स्वापसमये च पुरुषस्य, त देवास्तं धर्मं देवाश्चक्रिरे धृतवन्तो वागादयोऽग्न्यादयश्च प्राणव्रत वायुव्रत च पुरा विचार्य । स एवाद्येदानी श्वोऽपि भविष्यत्यपि कालेऽनुवर्त्यतेऽनुवर्तिष्यते च देवैरित्यभिप्राय । तत्रेमं मंत्रं सक्षेपतो व्याचष्टे ब्राह्मणम् । प्राणाद्वा एष सूर्य उदेति प्राणेऽस्तमेति । तं देवाश्चक्रिरे धर्मं स एवाद्य स उ श्व इत्यस्य कोऽर्थ इत्युच्यते । यद्वै एते व्रतममुर्हि अमुष्मिन्काले वागादयोऽग्न्यादयश्च प्राणव्रत वायुव्रतं चाध्रियन्त, तदेवाद्यापि कुर्वन्त्यनुवर्तन्तेऽनुवर्तिष्यन्ते च । व्रत तेरभग्नमेव । यत्तु वागादिव्रतमग्न्यादिव्रतं च तद्भग्नमेव । तेषामस्तमनकाले स्वापकाले च वायौ प्राणे च निम्लुक्तिदर्शनात् । अथैतदन्यत्रोक्तम् – 'यदा वै पुरुष स्वपिति प्राण तर्हि वागप्येति प्राणं मन प्राणं चक्षु प्राणं श्रोत्रं यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्त इत्यध्यात्ममथाधिदैवतं यदा वा अग्निरनुगच्छति वायुं तर्ह्यनूद्वाति तस्मादेनमुदवासीदित्याहुर्वायुं ह्यनूद्वाति यदादित्योऽस्तमेति वायुं तर्हि प्रविशति वायुं चंद्रमा वायौ दिश प्रतिष्ठिता वायोरेवाधि पुनर्जायन्ते' इति । यस्मात् एतदेव व्रत वागादिष्वग्न्यादिषु चानुगतं यदेतद्वायोश्च प्राणस्य च परिस्पंदात्मकत्वं सर्वैं देवैरनुवर्त्यमान व्रतं, तस्मादन्योऽप्येकमेव व्रतं चरेत् । कि तत्[१] प्राण्यात्प्राणनव्यापार कुर्यादपान्यादपाननव्यापारं च । नहि प्राणापानव्यापारस्य प्राणनापाननलक्षणस्योपरमोऽस्ति । तस्मात्तदेवैकं व्रतं चरेद्वित्वेन्द्रियातरव्यापार नेन्मा मा पाप्मा मृत्यु श्रमरूप्याप्नुवदाप्नुयात् । नेच्छब्द परिभये । यद्यहमस्माद्व्रतात्प्रच्युत स्या ग्रस्त एवाहं मृत्युनेत्येवं त्रस्तो धारयेत्प्राणव्रतमित्यभिप्राय । यदि कदाचिदु चरेत्प्रारभेत प्राणव्रतं समापिपयिषेत्समापयितुमिच्छेत् यदि ह्यस्मात् व्रतादुपरमेत्प्राण परिभूत स्याद्देवाश्च । तस्मात्समापयेदेव । तेन उ तेनैनिन

व्रतेन प्राणात्मप्रतिपत्त्या सर्वभूतेषु वागादयोऽन्यादयश्च मदात्मका एव, अहं प्राण आत्मा सर्वपरिस्पंदकृदेवं तेनानेन व्रतधारणेन एतस्या एव प्राणदेवताया सायुज्यं सयुग्भावमेकात्मत्वं सलोकता समानलोकता वा एकस्थानत्वं, विज्ञानमाद्यापेक्षमेतत्, जयति प्राप्नोतीति ॥ इति पचमं ब्राह्मणम् ॥ १५ —

त्रय वा इद नाम रूप कर्म तेषा नाम्ना वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्ति । एतदेषा सामैतद्धि सर्वैर्नामभि सममेतदेषा ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥१॥

यदेतदविद्याविषयत्वेन प्रस्तुत साध्यसाधनलक्षणं व्याकृत जगत्प्राणात्मप्राप्त्यैतोत्कर्षवदपि फलम् । या चैतस्य व्याकरणात्प्रागवस्था अव्याकृतशब्दवाच्या वृक्षबीजवत्सर्वमेतत्त्रयम् । कि तत्त्रयमित्युच्यते । नाम रूपं कर्म चेत्यनात्मैव । नात्मा यत्साक्षादपरोक्षाद्ब्रह्म । तस्मादस्माद्विरज्येतेत्येवमर्थस्त्रयं वा इत्याद्यारंभ । न ह्यस्मादनात्मनोऽव्यावृत्ताचित्तस्य आत्मानमेव लोकमहं ब्रह्मास्मीत्युपासितुं बुद्धि प्रवर्तते । बाह्यप्रत्यगात्मप्रवृत्त्योर्विरोधात् । तथा च काठके— 'पराचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नातरात्मन् । कश्चिद्धीर प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' इत्यादि ॥

कथ पुनरस्य व्याकृताव्याकृतस्य क्रियाकारकफलात्मन ससारस्य नामरूपकर्मात्मकतैव न पुनरात्मत्वं इत्येतत्संभावयितुं शक्यत इति । अत्रोच्यते— तेषा नाम्ना यथोपन्यस्ताना वागिति शब्दसामान्यमुच्यते । 'य कश्च शब्दो वागेव सा' इत्युक्तत्वाद्वागित्येतस्य शब्दस्य योऽर्थ शब्दसामान्यमात्र एतदेतेषा नामविशेषाणामुक्थ कारणमुपादानं, सैधवलवणकणानामिव सैववाचल । तदाह— अतो ह्यस्मान्नामसामान्यात्सर्वाणि नामानि यज्ञदत्तो देवदत्त इत्येवमादिप्रविभागान्युत्तिष्ठन्त्युत्पद्यन्ते प्रविभज्यन्ते, लवणाचलादिव लवणकणा । कार्यं च कारणेनाव्यतिरिक्तम् । तथा विशेषाणा च सामान्येऽन्तर्भावात् । कथं सामान्यविशेषभाव इति । एतच्छब्दसामान्यमेषा नामविशेषाणा साम, समत्वात्साम, सामान्यमित्यर्थ । एतद्धि यस्मात्सर्वैर्नामभि आत्मविशेषै समम् । किंच आत्मलाभाविशेषाच्च नामविशेषाणाम् । यस्य च यस्मादात्मलाभो भवति स तेनाप्रविभक्तो दृष्टो यथा घटादीना मृदा । कथ नामविशेषाणामात्मलाभो वाच इत्युच्यते— यत एतदेषा वाक्शब्दवाच्य वस्तु ब्रह्म आत्मा, ततो

त्मलाभो नाम्ना, शब्दव्यतिरिक्तस्वरूपानुपपत्ते. । तत्प्रतिपादयति— एतच्छब्दसामान्यं हि यस्माच्छब्दविशेषान्सर्वाणि नामानि बिभर्ति धारयति स्वरूपप्रदानेन । एव कार्यकारणत्वोपपत्ते सामान्यविशेषोपपत्ते आत्मप्रदानोपपत्तेश्च नामविशेषाणा शब्दमात्रता सिद्धा । एवमुत्तरयोरपि सर्वं योज्य यथोक्तम् ॥

अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषां सामैताद्धि सर्वै रूपै सममेतदेषां ब्रह्मैताद्धि सर्वाणि रूपाणि बिभर्ति ॥२॥

अथेदानी रूपाणा सितासितप्रभृतीना चक्षुरिति चक्षुर्विषयसामान्यं चक्षु - शब्दाभिधेयं रूपसामान्यं प्रकाश्यमात्रमभिधीयते । अतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषा साम, एतद्धि सर्वै रूपै समं, एतदेषा ब्रह्म एतद्धि सर्वाणि रूपाणि बिभर्ति ॥

अथ कर्मणामात्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येतदेषां सामैताद्धि सर्वै. कर्मभि. सममेतदेषां ब्रह्मैताद्धि सर्वाणि कर्माणि बिभर्ति तदेतत्त्रयं सदेकमयमात्मात्मो एक. सन्नेतत्त्रय तदेतदमृत सत्त्येन च्छन्नं प्राणो वा अमृत नामरूपे सत्त्यं ताभ्यामयं प्राणश्छन्न. ॥३॥ इति षष्ठ ब्राह्मणम् ॥ इति बृहदारण्यकोपनिषदि प्रथमोऽध्याय· ॥

अथेदानीं सर्वकर्मविशेषाणा मननदर्शनात्मकाना चलनात्मकाना च क्रियासामान्यमात्रेऽन्तर्भाव उच्यते । कथं ? सर्वेषा कर्मविशेषाणामात्मा शरीर सामान्यं आत्मा, आत्मन कर्म आत्मेत्युच्यते । आत्मना हि शरीरेण कर्म करोतीत्युक्तम् । शरीरे च सर्व कर्माभिव्यज्यते । अत तात्स्थ्यात्तच्छब्दं कर्म कर्मसामान्यमात्र सर्वेषामुक्थमित्यादि पूर्ववत् । तदेतद्यथोक्तं नाम रूपं कर्म त्रयमितरेतराश्रय इतरेतराभिव्यक्तिकारण इतरेतरप्रलय संहत त्रिदंडविष्टभवत् सदेकम् । केनात्मनैकत्वमित्युच्यते— अयमात्मायं पिंड कार्यकारणात्मसंघात तथान्नत्रये व्याख्यात 'एतन्मयो वा अयमात्मा' इत्यादिना । एतावद्धीदं सर्वं व्याकृतमव्याकृतं च यदुत नाम रूपं कर्मेति, आत्मा उ एकोऽयं कार्यकरणसंघात सन्नध्यात्माधिभूताधिदैवभावेन व्यवस्थितमेतदेव त्रयं नाम रूपं कर्मेति । तदेतद्वक्ष्यमाणम् । अमृतं सत्त्येन च्छन्नमित्येतस्य वाक्यस्यार्थमाह— प्राणो वा अमृत करणात्मक अतरुपष्टभक आत्मभूतोऽमृतोऽविनाशी । नामरूपे सत्त्यं कार्यात्मके

शरीरावस्थे, क्रियात्मकस्तु प्राणस्तयोरुपष्टभको बाह्याभ्या शरीरात्मकाभ्या उपजनापायधर्मिभ्या मर्त्याभ्या छन्नोऽप्रकाशीकृत । एतदेव ससारसतत्त्वम-विद्याविषय प्रदर्शितम् । अत ऊर्ध्व विद्याविषय आत्माऽधिगंतव्य इति चतुर्थ आर-भ्यते ॥ इति षष्ठ ब्राह्मणम् ॥ इति प्रथमोऽध्याय ॥

॥ द्वितीयोऽध्यायः ॥

आत्मेत्येवोपासीत, तदन्वेषणे च सर्वमन्विष्ट स्यात्, तदेव चात्मतत्त्वं सर्वस्मात्प्रेयस्त्वादन्वेष्टव्यम् । आत्मानमेवावेदह ब्रह्मास्मीत्यात्मतत्त्वमेक विद्या-विषय. । यस्तु भेददृष्टिविषय स अन्योऽसावन्योऽहमस्मीति न स वेदेति, अविद्याविषय ॥

'एकधैवानुद्रष्टव्यं' 'मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति' इत्येवमादिभि प्रविभक्तौ विद्याविद्याविषयौ सर्वोपनिषत्सु । तत्र चाविद्याविषय सर्व एव साध्यसाधनादिभेदविशेषविनियोगेन व्याख्यात आ तृतीयाध्यायपरि-समाप्ते । स च व्याख्यातोऽविद्याविषय सर्व एव द्विप्रकार । अत प्राण उपष्टभको गृहस्थेव स्तभादिलक्षण प्रकाशकोऽमृत । बाह्यश्च कार्यलक्षणोऽ-प्रकाशक उपजनापायधर्मक तृणकुशमृत्तिकासमो गृहस्थेव सत्यशब्दवाच्यो मर्त्य । तेनामृतशब्दवाच्य प्राणश्छन्न इति चोपसहृतम् । स एव च प्राणो बाह्याधारभेदेष्वनेकधा विस्तृत । प्राण एको देव इत्युच्यते । तस्यैव बाह्य-पिंड एक साधारणो विराट् वैश्वानर आत्मा पुरुषविध प्रजापति. को हिरण्य-गर्भ, इत्यादिभि पिंडप्रदानै शब्दै आख्यायते सूर्यादिप्रविभक्तकरण । एकं चानेकं च ब्रह्म एतावदेव, नात परमस्ति, प्रत्येकं च शरीरभेदेषु परिसमाप्तं चेतनावत्कर्तृ भोक्तृ च इत्यविद्याविषयमेव आत्मत्वेनोपगतो गार्ग्यो ब्राह्मणो वक्ता उपस्थाप्यते । तद्विपरीतात्मदृगजातशत्रु श्रोता । एवं हि यत पूर्वपक्ष-सिद्धान्ताख्यायिकारूपेण समर्प्यमाणोऽर्थ श्रोतुश्चित्तस्य वशमेति । विपर्यये हि तर्कशास्त्रवत्केवलार्थानुगमवाक्यैः समर्प्यमाणो दुर्विज्ञेय स्यात् अत्यंतसू-क्ष्मत्वाद्वस्तुन । तथा च काठके— 'श्रवणायापि बहुभिर्यो न ल-भ्य' इत्यादि-वाक्यै सुसंस्कृतदेवबुद्धिगम्यत्वं सामान्यमात्रबुद्धयगम्यत्वं च सप्रपंचं दर्शितम् ।

'आचार्यवान्पुरुषो वेद' 'आचार्याद्धैव विद्या' इतिच छादोग्ये । "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन" इति च गीतासु । इहापि च शाकल्ययाज्ञवल्क्य-संवादेन अतिगह्वरत्व महता संरंभेण ब्रह्मणो वक्ष्यति । तस्मात् श्लिष्ट एव आख्यायिकारूपेण पूर्वपक्षसिद्धान्तरूपमापाद्य वस्तुसमर्पणार्थ आरंभ । आचार-विध्युपदेशार्थश्च । एवमाचारवतो वक्तृश्रोत्रोराख्यायिकानुगतोऽर्थोऽवगम्यते । केवलतर्कबुद्धिनिषेधार्थो चाख्यायिका— 'नैषा तर्केण मतिरापनेया' 'न तर्कशास्त्रदगधाय' इति श्रुतिस्मृतिभ्याम् । श्रद्धा च ब्रह्मविज्ञाने परमं साधन-मित्याख्यायिकार्थः । तथाहि गार्ग्याजातशत्रवो अतीव श्रद्धालुता दृश्यते आख्यायिकायाम् । "श्रद्धावाँल्लभते ज्ञानम्" इति च स्मृति ॥

ॐ ॥ दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रु काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रु सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ॥१॥

तत्र पूर्वपक्षवादी अविद्याविषयब्रह्मवित् दृप्तबालाकि दृप्तो गर्वितोऽ-सम्यग्ब्रह्मवित्त्वादेव, बलाकाया अपत्यं बालाकिर्दृप्तश्चासौ बालाकिश्चेति दृप्त-बालाकि, हशब्द ऐतिह्यार्थ आख्यायिकाया, अनूचानोऽनुवचनसमर्थो वक्ता वाग्मी, गार्ग्यो गोत्रत, आस बभूव क्वचित्कालविशेषे । स होवाचाजातशत्रुं अजातशत्रुनामानं काश्यं काशिराजमाभिगम्य– ब्रह्म ते ब्रवाणीति ब्रह्म ते तुभ्यं ब्रवाणि कथयानि । स एवमुक्तोऽजातशत्रुरुवाच— सहस्रं गवा दद्म एतस्या वाचि या मा प्रत्यवोचो ब्रह्म ते ब्रवाणीति तावन्मात्रमेव गोसहस्रप्रदाने निमित्तमि-त्यभिप्राय । साक्षाद्ब्रह्मकथनमेव निमित्तं कस्मान्नापेक्ष्यते सहस्रदाने, ब्रह्म ते ब्रवाणीति इयमेव तु वाक् निमित्तमपेक्ष्यत इत्युच्यते— यत श्रुतिरेव राज्ञोऽ-भिप्रायमाह— जनको दाता जनक श्रोतेति चैतस्मिन्वाक्यद्वये पदद्वयमभ्यस्यते जनको जनक इति । वैशब्द प्रसिद्धावद्योतनार्थ । जनको दित्सुर्जनक शुश्रू-षुरिति ब्रह्म शुश्रूषवो विवक्षव प्रतिजिघृक्षवश्च जना धावन्त्यभिगच्छन्ति । तस्मात्तत्सर्व मय्यपि संभावितवानसीति ॥

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्धा

राजेति वा अहमेतमुपास इति स य एतमेव मुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥२॥

एवं राजानं शुश्रूषु अभिमुखीभूतं स होवाच गार्ग्य । य एवासावादित्ये चक्षुषि चैकोऽभिमानी चक्षुर्द्वारेणेह हृदि प्रविष्टोऽहं भोक्ता कर्ता चेत्यवस्थित । एतमेवाहं ब्रह्म पश्याम्यस्मिन्कार्यकरणसंघाते उपासे । तस्मात्तमहं पुरुषं ब्रह्म तुभ्यं ब्रवीम्युपास्स्वेति । स एवमुक्त प्रत्युवाच अजातशत्रुर्मा मा मा इति हस्तेन विनिवारयन् । एतस्मिन्ब्रह्मणि विज्ञेये मा संवदिष्ठा । मा मेत्याबाधनार्थं द्विर्वचनम् । एवं समाने विज्ञानविषये आवयोरस्मानाविज्ञानवत इव दर्शयता बाधिता स्याम. अतो मा संवदिष्ठा मा सवादं कार्षीरस्मिन्ब्रह्मणि । अन्यच्चेज्जानासि तद्ब्रह्म वक्तुमर्हसि न तु यन्मया ज्ञायते एव । अथ चेन्मन्यसे, जानीषे त्वं ब्रह्ममात्रं न तु तद्विशेषणोपासनफलानीति, तन्न मंतव्यं यत. सर्वमेतदहं जाने यद्ब्रवीषि । कथम्? अतिष्ठाः अतीत्य भूतानि तिष्ठतीत्यतिष्ठा । सर्वेषा च भूताना मूर्धा शिरो राजेति वै राजा दीप्तिगुणोपेतत्वादेतैर्विशेषणैर्विशिष्टमेतद्ब्रह्म अस्मिन्कार्यकरणसघाते कर्तृ भोक्तृ चेत्यहमेतमुपास इति । फलमप्येवं विशिष्टोपासकस्य । स य एतमेवमुपास्तेऽतिष्ठा. सर्वेषा भूताना मूर्धा राजा भवति । यथागुणोपासनमेव हि फलम् । 'तं यथा यथोपासते तदेव भवति' इति श्रुते ॥

स होवाच गार्ग्यो य एवासौ चंद्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पांडरवासा. सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहर्हं सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥३॥

संवादेन आदित्यब्रह्मणि प्रत्याख्यातेऽजातशत्रुणा चंद्रमसि ब्रह्मान्तरं प्रतिपेदे गार्ग्य । य एवासौ चंद्रे मनसि चैक पुरुषो भोक्ता कर्ता चेति पूर्ववद्विशेषणम् । बृहन्महान्पाडरं शुक्लं वासो यस्य सोऽयं पांडरवासा, अप्शरीरत्वात् चंद्राभिमानिन प्राणस्य । सोमो राजा चंद्र , यश्चान्नभूतोऽभिषूयते लतात्मको यज्ञे तमेकीकृत्यैतमेवाहं ब्रह्मोपासे, यथोक्तगुणं य उपास्ते तस्याहरह सुत सोमोऽभिषुतो भवति यज्ञे, प्रसुतः प्रकृष्टं सुतरां सुतो भवति विकारे, उभयविधयज्ञानुष्ठानसामर्थ्यं भवतीत्यर्थः । अन्नं चास्य न क्षीयतेऽन्नात्मकोपासकस्य ॥

स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाह ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति ॥४॥

तथा विद्युति त्वचि हृदये चैका देवता । तेजस्वीति विशेषणं, तस्यास्तत्फलं तेजस्वी ह भवति तेजास्विनी हास्य प्रजा भवति । विद्युता बहुत्वस्यागीकरणादात्मनि प्रजाया च फलबाहुल्यम् ॥

स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाह ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥५॥

तथा आकाशे हृद्याकाशे चैका देवता । पूर्णमप्रवर्ति चेति विशेषणद्वयम् । पूर्णत्वविशेषणफलमिदं पूर्यते प्रजया पशुभि । अप्रवर्तिविशेषणफलं नास्यास्माल्लोकात्प्रजोद्वर्तत इति । प्रजा संतानाविच्छित्ति ॥

स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इंद्रो वैकुंठोऽपराजिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥६॥

तथा वायौ प्राणे हृदि चैका देवता । विशेषणं इंद्र परमेश्वरो, वैकुंठोऽप्रसह्यो, न परैर्जितपूर्वाऽपराजिता सेना मरुता गुणत्वप्रसिद्धे । उपासनफलमपि— जिष्णुर्ह जयनशीलोऽपराजिष्णुर्न च परैर्जितस्वभावो भवति । अन्यतस्त्यजायी अन्यतस्त्याना सपत्नाना जयनशीलो भवति ॥

स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्ह भवति विषासहिर्हास्य प्रजा भवति ॥७॥

अग्नौ वाचि हृदि चैका देवता । विशेषणं— विषासहिर्मर्षयिता परेषाम् । अग्निबाहुल्यात्फलबाहुल्यं पूर्ववत् ॥

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति

स य एतमेवमुपास्ते प्रतिरूपं हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपो-ऽस्माज्जायते ॥८॥

अप्सु रेतसि हृदि चैका देवता । तस्या विशेषणं— प्रतिरूपोऽनुरूप श्रुतिस्मृत्यप्रतिकूल इत्यर्थ । फलं— प्रतिरूप श्रुतिस्मृतिशासनानुरूपमेव एनमुपगच्छति प्राप्नोति न विपरीतं, अन्यच्चास्मात्तथाविध एवोपजायते ॥

स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमेवाह ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्सवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यै सनिगच्छति सर्वांस्तानतिरोचते ॥९॥

आदर्शे प्रसादस्वभावे चान्यत्र खड्गादौ हार्दे च सत्त्वशुद्धिस्वाभाव्ये चैका देवता, तस्या विशेषणं— रोचिष्णुर्दीप्तिस्वभाव , फल च तदेव रोचनाधारबाहुल्यात्फलबाहुल्यम् ॥

स होवाच गार्ग्यो य एवायं यन्त पश्चाच्छब्दोऽनूदेत्येतमेवाह ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्सवदिष्ठा असुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वं हैवास्मिल्लोक आयुरेति नैन पुरा कालात्प्राणो जहाति ॥१०॥

यन्तं गच्छन्तं य एवायं शब्द पश्चात्पृष्ठतोऽनूदेत्यभ्यात्मं च जीवनहेतु प्राण , तमेकीकृत्याह असु प्राणो जीवनहेतुरिति गुणस्तस्य फल सर्वमायुरस्मिल्लोक एतीति । यथोपात्तं कर्मणा आयुः कर्मफलपरिच्छिन्नकालात्पुरा पूर्व रोगादिभि पीडयमानमप्येन प्राणो न जहाति ॥

स होवाच गार्ग्यो य एवाय दिक्षु पुरुष एतमेवाह ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्सवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान्ह भवति नास्माद्गणाच्छिद्यते ॥

दिक्षु कर्णयोर्हृदि चैका देवता अश्विनौ देवावियुक्तस्वभावौ । गुणस्तस्य द्वितीयवत्त्वमनपगत्वमवियुक्ता चान्योन्यं दिशामश्विनोश्चैवंधर्मित्वात् । तदेव च फलमुपासकस्य गणाविच्छेदो द्वितीयवत्त्व च ॥

स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्सवदिष्ठा मृत्युरिति वा अहमेतमुपास

इति स य एतमेवमुपास्ते सर्वं हैवास्मिल्लोक आयुरेति नैन पुरा कालान्मृत्युरागच्छति ॥१२॥

छायाया बाह्ये तमस्यध्यात्म च आवरणात्मकेऽज्ञाने हृदि चैका देवता, तस्या विशेषण मृत्यु.। फलं सर्वं पूर्ववन्मृत्योरनागमनेन रोगादिपीडाभावो विशेष ॥

स होवाच गार्ग्यो य एवायमात्मनि पुरुष एवमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्सवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्त आत्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति स ह तूष्णीमास गार्ग्य. ॥१३॥

आत्मनि प्रजापतौ बुद्धौ च हृदि चैका देवता तस्या आत्मन्व्यात्मवानिति विशेषणम्। फलं— आत्मन्वी ह भवत्यात्मवान्भवति। आत्मन्विनी हास्य प्रजा भवति बुद्धिबहुलत्वात्प्रजाया सपादनमिति विशेष। स्वय परिज्ञातत्वेनैव क्रमेण प्रत्याख्यातेषु ब्रह्मसु स गार्ग्य क्षीणब्रह्मविज्ञानोऽप्रतिभासमानोत्तरस्तूष्णीमवाक्शिरा आस ॥

स होवाचाजातशत्रुरेतावन्नू३ इत्येतावद्धीति नैतावता विदित भवतीति स होवाच गार्ग्य उप त्वा यानीति ॥१४॥

तं तथाभूतमालक्ष्य गार्ग्यं स होवाचाजातशत्रु — एतावन्नू३ इति। किमेतावद्ब्रह्म निर्ज्ञातं, आहोस्विदधिकमप्यस्तीति। इतर आहैतावद्धीति। नैतावता विदितेन ब्रह्म विदित भवतीत्याहाजातशत्रुः, किमर्थं गर्वितोऽसि ब्रह्म ते ब्रवाणीति। किमेतावद्विदितं विदितमेव न भवतीत्युच्यते। न, फलवद्विज्ञानश्रवणात्। न चार्थवादत्वमेव वाक्यानामवगतुं शक्यम्। अपूर्वविधानपराणि हि वाक्यानि प्रत्युपासनोपदेशं लक्ष्यन्ते 'अतिष्ठा सर्वेषा भूताना' इत्यादीनि। तदनुरूपाणि च फलानि सर्वत्र श्रूयन्ते विभक्तानि। अर्थवादत्वे एतदसमजसम्। कथं तर्हि नैतावता विदित भवतीति? नैष दोष, अधिकृतापेक्षत्वात्। ब्रह्मोपदेशार्थं हि शुश्रूषवे अजातशत्रवे अमुख्यब्रह्मविद्गार्ग्य प्रवृत्त, स युक्त एव मुख्यब्रह्मविदाऽजातशत्रुणाऽमुख्यब्रह्मविद्गार्ग्यो वक्तुं– यन्मुख्यं ब्रह्म वक्तुं प्रवृत्तस्त्वं तन्न जानीष इति। यद्यमुख्यब्रह्मविज्ञानमपि प्रत्याख्यायेत तदैतावतेति न ब्रूयान्न किंचिज्ज्ञात त्वयेत्येवं ब्रूयात् तस्माद्भवन्त्येतावन्त्यविद्याविषये

ब्रह्माणि। एतावद्विज्ञानद्वारत्वाच्च परब्रह्मविज्ञानस्य युक्तमेव वक्तुं नैतावता विदित भवतीति। अविद्याविषये विज्ञेयत्वं नामरूपकर्मात्मकत्वं चैषा तृतीयेऽध्याये प्रदर्शितम्। तस्मात् 'नैतावता विदितं भवति' इति ब्रुवता अधिकं ब्रह्म ज्ञातव्यमस्तीति दर्शितं भवति। तच्चानुपसन्नाय न वक्तव्यमित्याचारविधिज्ञो गार्ग्य स्वयमेवाह उप त्वा यानीत्युपगच्छानीति त्वा, यथान्य शिष्यो गुरुम् ॥

स होवाचाजातशत्रु प्रतिलोमं चैतद्यद्ब्राह्मण क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति त्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषं सुप्तमाजग्मतुस्तमेतैर्नामभिरामंत्रयांचक्रे बृहन् पांडरवास सोम राजन्निति स नोत्तस्थौ त पाणिनाऽऽपेष बोधयाचकार स होत्तस्थौ ॥१५॥

स होवाचाजातशत्रु प्रतिलोमं विपरीतं चैतत्कि तद्यद्ब्राह्मण उत्तमवर्ण आचार्यत्वेऽधिकृत सन्क्षत्रियमनाचार्यस्वभावमुपेयादुपगच्छेच्छिष्यवृत्त्या ब्रह्म मे वक्ष्यतीति। एतदाचारविधिशास्त्रेषु निषिद्धम्। तस्मात्तिष्ठ त्वमाचार्य एव सन्। विज्ञपयिष्याम्येव त्वामहं यस्मिन्विदिते ब्रह्म विदित भवति यत्तन्मुख्य ब्रह्म वेद्यम्। त गार्ग्यं सलज्जमालक्ष्य विश्रंभजननाय पाणौ हस्त आदाय गृहीत्वोत्तस्थावुत्थितवान्। तौ ह गार्ग्याजातशत्रू पुरुषं सुप्तं राजगृहप्रदेशे क्वचिदाजग्मतुरागतौ। तं च पुरुषं सुप्त प्राप्य एतैर्नामभि बृहन् पाडरवास सोम राजन् इत्येतैरामंत्रयाचक्रे। एवमामंत्र्यमाणोऽपि स सुप्तो नोत्तस्थौ। तमप्रतिबुध्यमानं पाणिना आपेष आपिष्यापिष्य बोधयाचकार प्रतिबोधितवान्। तेन स होत्तस्थौ। तस्माद्यो गार्ग्येणाभिप्रेतो नासावस्मिञ्छरीरे कर्ता भोक्ता ब्रह्मेति ॥

कथं पुनरिदमवगम्यते सुप्तपुरुषगमनतत्संबोधनानुत्थानै गार्ग्याभिमतस्य ब्रह्मणोऽब्रह्मत्व ज्ञापितमिति? जागरितकाले यो गार्ग्याभिप्रेत पुरुष कर्ता भोक्ता ब्रह्म संनिहित करणेषु यथा, तथा अजातशत्रवभिप्रेतोऽपि तत्स्वामी भृत्येष्विव राजा संनिहित एव। किं तु भृत्यस्वामिनो गार्ग्याजातशत्रवभिप्रेतयो यद्विवेकावधारणकारणं तत्संकीर्णत्वादनवधारितविशेषम्। यद्द्रष्टृत्वमेव भोक्तुर्न दृश्यत्वं यच्चाभोक्तुर्दृश्यत्वमेव न तु द्रष्टृत्वं तच्चोभयमिह संकीर्णत्वाद्विविच्य दर्शयितुमशक्यमिति सुप्तपुरुषगमनम् ॥

ननु सुप्तेऽपि पुरुषे विशिष्टैर्नामभिरामंत्रितो भोक्तैव प्रतिपत्स्यते नाभोक्तेति नैव निर्णय स्यादिति। न, निर्धारितविशेषत्वाद्वाग्र्याभिप्रेतस्य । यो हि सत्येन च्छन्न प्राण आत्माऽमृतो वागादिष्वनस्तमितो निम्लोचत्सु, यस्य आप शरीरं पाडरवासा, यश्चासपत्नत्वात् बृहन्, यश्च सोमो राजा षोडशकल, स स्वव्यापारारूढो यथानिर्ज्ञात एव अनस्तमितस्वभाव आस्ते । नचान्यस्य कस्यचिद्व्यापारस्तस्मिन्काले गार्ग्येणाभिप्रेयते तद्विरोधिन । तस्मात्स्वनामभिरामंत्रितेन प्रतिबोद्धव्यं नच प्रत्यबुध्यत । तस्मात्पारिशेष्याद्वाग्र्याभिप्रेतस्य अभोक्तृत्व ब्रह्मण । भोक्तृस्वभावश्चेत् भुंजीतैव स्वं विषयं प्राप्तम् । नहि दग्धृस्वभाव प्रकाशयितृस्वभाव सन्वह्नि तृणोलपादि दाह्य स्वविषयं प्राप्त न दहति, प्रकाश्यं वा न प्रकाशयति । न चेद्दहति प्रकाशयति वा प्राप्तं स्वं विषयं, नासौ वह्निर्दग्धा प्रकाशयिता वेति निश्चीयते । तथासौ प्राप्तशब्दादिविषयोपलब्धृस्वभावश्चेत् गार्ग्याभिप्रेत प्राणो बृहन्पाडरवास इत्येवमादिशब्दं स्व विषयमुपलभेत । यथा प्राप्तं तृणोलपादि वह्निर्दहेत्प्रकाशयेच्च अव्यभिचारेण तद्वत् । तस्मात्प्राप्ताना शब्दादीनामप्रतिबोधादभोक्तृस्वभाव इति निश्चीयते । न हि यस्य य स्वभावो निश्चित स तं व्यभिचरति कदाचिदपि । अत सिद्धं प्राणस्याभोक्तृत्वम् । संबोधनार्थनामविशेषेण संबंधाग्रहणादप्रतिबोध इति चेत् । स्यादेतत् । यथा बहुष्वासीनेषु स्वनामविशेषेण संबंधाग्रहणान्नामयं संबोधयतीति शृण्वन्नपि संबोध्यमानो विशेषतो न प्रतिपद्यते, तथेमानि बृहन्नित्येवमादीनि मम नामानीति अगृहीतसंबंधत्वात्प्राणो न गृह्णाति संबोधनार्थं शब्दं न त्वविज्ञातृत्वादेवेति चेत् । न । देवताभ्युपगमेऽग्रहणानुपपत्ते । यस्य हि चक्षुराद्यभिमानिनी देवता अध्यात्मं प्राणो भोक्ता अभ्युपगम्यते, तस्य तथा संव्यवहाराय विशेषनाम्ना संबंधोऽवश्यं ग्रहीतव्यो, अन्यथा आह्वानादिविषये संव्यवहारोऽनुपपन्न स्यात् । व्यतिरिक्तक्षेऽपि अप्रतिपत्तेरयुक्तमिति चेत् । यस्य च प्राणव्यतिरिक्तो भोक्ता तस्यापि बृहन्नित्यादिनामभि संबोधने बृहत्त्वादिनाम्नां तदा तद्विषयत्वात्प्रतिपत्तिर्युक्ता । न च कदाचिदपि बृहत्त्वादिशब्दै संबोधित प्रतिपद्यमानो दृश्यते । तस्मादकारणमभोक्तृत्वे संबोधनाप्रतिपत्तिरिति चेत् । न । तद्वतस्तावन्मात्राभिमानानुपपत्ते । यस्य प्राणव्यतिरिक्तो भोक्ता स प्राणादिकरणवान्प्राणी । तस्य न प्राणदेवतामात्रेऽभिमानो यथा हस्ते । तस्मात्प्राण-

नामसबोधने कृत्स्नाभिमानिनो युक्तैवाप्रतिपत्ति । न तु प्राणस्यासाधारणनामसंयोगे । देवतात्मत्वानभिमानाच्च आत्मन । स्वनामप्रयोगेऽप्यप्रतिपत्तिदर्शनात् अयुक्तमिति चेत् । सुषुप्तस्य यल्लौकिकं देवदत्तादि नाम तेनापि सबोध्यमान कदाचिन्न प्रतिपद्यते सुषुप्त । तथा भोक्तापि सन्प्राणो न प्रतिपद्यत इति चेत् । न । आत्मप्राणयो सुप्तासुप्तत्वविशेषोपपत्ते । सुषुप्तत्वात्प्राणग्रस्ततयोपरतकरण आत्मा स्व नाम प्रयुज्यमानमपि न प्रतिपद्यते । न तु तदसुप्तस्य प्राणस्य भोक्तृत्वे उपरतकरणत्व सबोधनाग्रहण वा युक्तम् ॥

अप्रसिद्धनामभि सबोधनमयुक्तमिति चेत् । सन्ति हि प्राणविषयाणि प्रसिद्धानि प्राणादिनामानि । तान्यपोह्य अप्रसिद्धैर्बृहत्त्वादिनामाभि संबोधनमयुक्त, लौकिकन्यायापोहात् । तस्माद्भोक्तुरेव सत प्राणस्याप्रतिपत्तिरिति चेत् । न । देवताप्रत्याख्यानार्थत्वात् । केवलसबोधनमात्राप्रतिपत्त्यैव असुप्तस्याध्यात्मिकस्य प्राणस्याभोक्तृत्वे सिद्धे यच्चद्रदेवताविषयैर्नामभि संबोधन तच्चंद्रदेवता प्राणोऽस्मिञ्छरीरे भोक्तेति गार्ग्यस्य विशेषप्रतिपत्तिनिराकरणार्थम् । न हि तल्लौकिकनाम्ना सबोधने शक्य कर्तुम् । प्राणप्रत्याख्यानेनैव प्राणग्रस्तत्वात्करणान्तराणा प्रवृत्त्यनुपपत्तेर्भोक्तृत्वाशकानुपपत्ति । देवतान्तराभावाच्च । नन्वतिष्ठा इत्याद्यात्मन्वीर्यतेन ग्रंथेन गुणवद्देवताभेदस्य दर्शितत्वादिति चेत् । न । तस्य प्राण एवैकत्वाभ्युपगमात्सर्वश्रुतिष्वरनाभिनिदर्शनेन । 'सत्येन च्छन्न ' 'प्राणो वा अमृतं' इति च प्राणबाह्यस्यान्यस्यानभ्युपगमाद्भोक्तु । 'एष उ ह्येव सर्वे देवा कतम एको देव इति प्राण ' इति च सर्वदेवाना प्राण एवैकत्वोपपादनाच्च । तथा करणभेदेष्वनाशंका । देहभेदेष्विव स्मृतिज्ञानेच्छादिप्रतिसंधानानुपपत्ते । न ह्यन्यदृष्टमन्य स्मरति जानाति इच्छति प्रतिसदधाति वा । तस्मान्न करणभेदविषया भोक्तृत्वाशंका विज्ञानमात्रविषया वा कदाचिदप्युपपद्यते ॥

ननु सघात एवास्तु भोक्ता किं व्यतिरिक्तकल्पनयेति । न । आपेषणे विशेषदर्शनात् । यदि हि प्राणशरीरसंघातमात्रो भोक्ता स्यात्संघातमात्राविशेषात्सदा आपिष्टस्यानापिष्टस्य च प्रतिबोधे विशेषो न स्यात् । संघातव्यतिरिक्ते तु पुनर्भोक्तरि संघातसंबंधविशेषानेकत्वात् पेषणापेषणकृतवेदनाया सुखदु खमोहमध्यमाधमोत्तमकर्मफलभेदोपपत्तेश्च विशेषो युक्त । न तु संघातमात्रे संबंध-

कर्मफलभेदानुपपत्तेर्विशेषो युक्त । तथा शब्दादिपटुमाद्यादिकृतश्च । अस्ति चाय विशेषो यस्मात्स्पर्शमात्रेणाप्रतिबुध्यमानं पुरुष सुप्तं पाणिना आपेषं आपिष्यापिष्य बोधयाचकाराजातशत्रु । तस्माद्य आपेषणेन प्रतिबुबुधे ज्वलन्निव स्फुरन्निव कुतश्चिदागत इव पिड च पूर्वविपरीतं बोधचेष्टाकारविशेषादिमत्त्वेन आपादयन्सोऽन्योऽस्ति गार्ग्याभिमतब्रह्मभ्यो व्यतिरिक्त इति सिद्धम् ॥

संहतत्वाच्च पाराथ्र्योपपत्ति प्राणस्य । गृहस्य स्तंभादिवच्छरीरस्य अंतरुपष्टभक प्राण शरीरादिभि सहत इत्यवोचाम । अरनेमिवच्च । नाभिस्थानीय एतस्मिन्सर्वमिति च । तस्मात् गृहादिवत्स्वावयवसमुदायजातीयव्यतिरिक्तार्थ सहन्यत इत्येवमवगच्छाम ॥

स्तंभकुड्यतृणकाष्ठादिगृहावयवाना स्वात्मजन्मोपचयापचयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादि-तद्विषयद्रष्टृश्रोतृमतृविज्ञात्रर्थत्व दृष्ट्वा मन्यामहे, तत्सघातस्य च, तथा प्राणाद्यवयवाना तत्सघातस्य च, स्वात्मजन्मोपचयापचयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादि - तद्विषयद्रष्टृश्रोतृमतृविज्ञात्रर्थत्व भवितुमर्हतीति । देवताचेतनावत्त्वे समत्वात् गुणभावानुपगम इति चेत् । प्राणस्य विशिष्टैर्नामाभिरामंत्रणदर्शनाच्चेतनावत्त्वमभ्युपगतम् । चेतनावत्त्वे च पाराथ्र्योपगम समत्वादनुपपन्न इति चेत् । न । निरुपाधिकस्य केवलस्य विजिज्ञापयिषितत्वात् । क्रियाकारकफलात्मकता ह्यात्मनो नामरूपोपाधिजनिता अविद्याध्यारोपिता । तान्निमित्तो लोकस्य क्रियाकारकफलाभिमानलक्षण संसार । स निरुपाधिकात्मस्वरूपविद्यया निवर्तयितव्य इति तत्स्वरूपविजिज्ञापयिषयोपनिषदारंभ 'ब्रह्म ते ब्रवाणि' 'नैतावता विदित भवति' इति चोपक्रम्य 'एतावदरे खल्वमृतत्वं' इति चोपसंहारात् । न चातोऽन्यदंतराले विवाक्षितमुक्तं वास्ति । तस्मादनवसर. समत्वात् गुणभावानुपगम इति चोद्यस्य ॥

विशेषवतो हि सोपाधिकस्य संव्यवहारार्थो गुणगुणिभावो, न विपरीतस्य । निरुपाख्यो हि विजिज्ञापयिषित सर्वस्यामुपनिषदि । 'स एष नेति नेति' इत्युपसहारात् । तस्मादादित्यादिब्रह्मभ्य एतेभ्योऽविज्ञानमयेभ्यो विलक्षणोऽन्योऽस्ति विज्ञानमय इत्येतत्सिद्धम् ॥१५॥

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुष कैष तदाभूत्कुत एतदागादिति तदु ह न मेने गार्ग्य. ॥१६॥

स एवमजातशत्रु व्यतिरिक्तात्मास्तित्वं प्रतिपाद्य गार्ग्यमुवाच । यत्र यस्मिन्काले एष विज्ञानमय पुरुष एतत्स्वपनं सुप्तोऽभूत्प्राक्पाणिपेषप्रतिबोधात् । विज्ञान विज्ञायतेऽनेनेत्यंत करण बुद्धिरुच्यते, तन्मयस्तत्प्रायो विज्ञानमय । किं पुनस्तत्प्रायत्वम् ? तस्मिनुपलभ्यत्व तेन चोपलभ्यत्वमुपलब्धृत्वं च । कथ पुनर्मयटोऽनेकार्थत्वे प्रायार्थतैवावगम्यते । 'स वा अयमात्मा ब्रह्म बिज्ञानमयो मनोमय.' इत्येवमादौ प्रायार्थ एव प्रयोगदर्शनात् परविज्ञानविकारत्वस्याप्रसिद्धत्वात् 'य एष विज्ञानमय ' इति च प्रसिद्धवदनुवादात् अवयवोपमार्थयोश्चात्रासभवात् पारिशेष्यात्प्रायार्थतैव । तस्मात्संकल्पविकल्पाद्यात्मकमंत करण तन्मय इत्येतत् । पुरुष पुरि शयनात् । क्वैष तदाऽभूदिति प्रश्न स्वभावविजिज्ञापयिषया । प्राक्प्रतिबोधात्क्रियाकारकफलविपरीतस्वभाव आत्मेति कार्याभिवेन दिदर्शयिषितम् । न हि प्राक्प्रतिबोधात्कर्मादिकार्य सुखादि किचन गृह्यते । तस्मादकर्मप्रयुक्तत्वात्तथास्वाभाव्यमेव आत्मनोऽवगम्यते । यस्मिन्स्वाभाव्येऽभूत् यतश्च स्वाभाव्यात्प्रच्युत ससारी स्वभावविलक्षण इत्येतद्विवक्षया पृच्छति गार्ग्य प्रतिभानरहितं बुद्धिव्युत्पादनाय । क्वैष तदाभूत्कुत एतदागात् इत्येतदुभयं गार्ग्येणैव प्रष्टव्यमासीत् । तथापि गार्ग्येण न पृष्टमिति नोदास्ते अजातशत्रु । बोधयितव्य एवेति प्रवर्तते । ज्ञापयिष्याम्येवेति प्रतिज्ञातत्वात् । एवमसौ व्युत्पाद्यमानोऽपि गार्ग्यो यत्रैष आत्माऽभूत्प्राक्प्रतिबोधात् यतश्चैतदागमनमागात् तदुभयं न व्युत्पेदे वक्तुं वा प्रष्टुं वा गार्ग्यो ह न मेने न ज्ञातवान् ॥

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन्शेते तानि यदा गृह्णात्यथ हैतत्पुरुष स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाग्गृहीत चक्षुर्गृहीत श्रोत्र गृहीतं मनः ॥१७॥

स होवाचाजातशत्रुर्विवक्षितार्थसमर्पणाय । यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमय पुरुष क्वैष तदाभूत्कुत एतदागादिति यदपृच्छाम, तच्छृणूच्यमान— यत्रैष एतत्सुप्तोऽभूत्तत्तदा तस्मिन्काले एषा वागादीना प्राणानां विज्ञानेनान्त करणगताभिव्यक्तिविशेषविज्ञानेन उपाधिस्वभावजनितेन आदाय विज्ञानं वागादीना स्वस्वविषयगतसामर्थ्यं गृहीत्वा, य एषोऽन्तर्मध्ये हृदये

हृदयस्याकाशो, य आकाशशब्देन पर एव स्व आत्मोच्यते तस्मिन्स्वे आत्मन्याकाशे शेते स्वाभाविकेऽसासारिके । न केवले आकाशे एव श्रुत्यंतरसामर्थ्यात् 'सता सोम्य तदा संपन्नो भवति' इति । लिंगोपाधिसंबंधकृतं विशेषात्मस्वरूपमुत्सृज्य अविशेषे स्वाभाविके आत्मन्येव केवले वर्तत इत्यभिप्रायः । यदा शरीरेन्द्रियाद्यक्षतामुत्सृजति तदासौ स्वात्मनि वर्तत इति कथमवगम्यते ? नामप्रसिद्ध्या । कासौ नामप्रसिद्धिरित्याह— तानि वागादेर्विज्ञानानि यदा यस्मिन्काले गृह्णात्यादत्ते अथ तदा हैतत्पुरुष स्वपिति नाम । एतन्नामास्य पुरुषस्य तदा प्रसिद्धं भवति । गौणमेवास्य नाम भवति । स्वमेवात्मानमपीत्यपिगच्छतीति स्वापितीत्युच्यते । सत्य स्वपितीतिनामप्रसिद्ध्या आत्मन ससारधर्मविलक्षणं रूपमवगम्यते, न त्वत्र युक्तिरस्तीत्याशंक्याह—तत्तत्र स्वापकाले गृहीत एव प्राणो भवति । प्राण इति घ्राणेन्द्रिय वागादिप्रकरणात् । वागादिसंबधे हि सति तदुपाधित्वादस्य ससारधर्मित्व लक्ष्यते । वागादयश्चोपसहृता एव तदा तेन । कथम् ? गृहीता वाग्गृहीत चक्षुर्गृहीत श्रोत्र गृहीत मन । तस्मादुपसहृतेषु वागादिषु क्रियाकारकफलात्मताभावात्स्वात्मस्थ एव आत्मा भवतीत्यवगम्यते ॥

स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावच निगच्छति स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकाम परिवर्तेतैवमेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥१८॥

ननु दर्शनलक्षणाया स्वप्नावस्थाया कार्यकरणवियोगेऽपि ससारधर्मित्व मस्य दृश्यते । यथा च जागरिते सुखी दुःखी बंधुवियुक्त शोचति मुह्यते च । तस्माच्छोकमोहधर्मवानेवाय, नास्य शोकमोहादय. सुखदुःखादयश्च कार्यकरणसंयोगजनितभ्रान्त्या अध्यारोपिता इति । न मृषात्वात् । स प्रकृत आत्मा यत्र यस्मिन्काले दर्शनलक्षणया स्वप्न्यया स्वप्नवृत्त्या चरति वर्तते तदा ते हास्य लोकाः कर्मफलानि । के ते ? तत्तत्रोतापि महाराज इव भवति । सोऽय महाराजत्वमिवास्य लोको, न महाराजत्वमेव जागरित इव । तथा महाब्राह्मण इव, उताप्युच्चावचमुच्चं च देवत्वाद्यवचं च तिर्यक्त्वादि, उच्चमिवावचमिव च निगच्छति । मृषैव महाराजत्वादयोऽस्य लोका इवशब्दप्रयोगाद्व्यभिचारदर्शनाच्च । तस्मान्न बंधुवियोगादिजनितशोकमोहादिभि स्वप्ने संबध्यत एव ॥

ननु च यथा जागरिते जाग्रत्कालाव्याभिचारिणो लोकाः, एवं स्वप्नेऽपि तेऽस्य महाराजत्वादयो लोका स्वप्नकालभाविन स्वप्नकालाव्याभिचारिण आत्मभूता एव, न त्वविद्याध्यारोपिता इति। ननु च जाग्रत्कार्यकरणात्मत्वं देवतात्मत्व चाविद्याध्यारोपितं न परमार्थत इति व्यतिरिक्तविज्ञानमयात्मप्रदर्शनेन प्रदर्शितम्। तत्कथं दृष्टान्तत्वेन स्वप्नलोकस्य मृत इवोज्जीविष्यन्प्रादुर्भविष्यति। सत्य, विज्ञानमये व्यतिरिक्ते कार्यकरणदेवतात्मत्वप्रदर्शनं अविद्याध्यारोपितं शुक्तिकायामिव रजतत्वदर्शन इत्येतत्सिध्यति व्यतिरिक्तात्मास्तित्वप्रदर्शनन्यायेनैव, न तु तद्विशुद्धिपरतयैव न्याय उक्त इति असन्नपि दृष्टान्तो जाग्रत्कार्यकरणदेवतात्मत्वदर्शनलक्षण पुनरुद्धाव्यते। सर्वो हि न्याय किंचिद्विशेषमपेक्षमाणोऽपुनरुक्ती भवति॥

न तावत्स्वप्नेऽनुभूतमहाराजत्वादयो लोका आत्मभूता. । आत्मनोऽन्यस्य जाग्रत्प्रतिबिंबभूतस्य लोकस्य दर्शनात्। महाराज एव तावद्यस्तसुप्तासु प्रकृतिषु पर्यंके शयान स्वप्नान्पश्यन्नुपसंहृतकरण पुनरुपगतप्रकृतिं महाराजमिवात्मान जागरित इव पश्यति यात्रागत भुजानमिव च भोगान्। न च तस्य महाराजस्य पर्यंके शयनात् द्वितीयोऽन्य प्रकृत्युपेतो विषये पर्यटन्नहनि लोके प्रसिद्धोऽस्ति यमसौ सुप्त पश्यति। न चोपसंहृतकरणस्य रूपादिमतो दर्शनमुपपद्यते। न च देहे देहान्तरस्य तत्तुल्यस्य संभवोऽस्ति। देहस्थस्यैव हि स्वप्नदर्शनम्।

ननु पर्यंके शयान पथि प्रवृत्तमात्मानं पश्यति, न बहि स्वप्नान्पश्यतीत्येतदाह—स महाराजो जानपदाञ्जनपदे भवान्राजोपकरणभूतान्भृत्यानन्याश्च गृहीत्वोपादाय स्व आत्मीय एव जयादिनोपार्जिते जनपदे यथाकाम यो यः कामोऽस्य यथाकाममिच्छातो यथा परिवर्तेतेत्यर्थ. । एवमेवैष विज्ञानमय, एतदिति क्रियाविशेषणं, प्राणान्गृहीत्वा जागरितस्थानेभ्य उपसंहृत्य स्वे शरीरे स्व एव देहे न बहि यथाकामं परिवर्तते। कामकर्मभ्यामुद्भासिता पूर्वानुभूतवस्तुसदृशीर्वासना अनुभवतीत्यर्थ। तस्मात्स्वप्ने मृषाध्यारोपिता एव आत्मभूतत्वेन लोका अविद्यमाना एव सन्त, तथा जागरितेऽपि, इति प्रत्येतव्यम्। तस्माद्विशुद्धोऽक्रियाकारकफलात्मको विज्ञानमय इत्येतत्सिद्धम्। यस्मात दृश्यन्ते द्रष्टुर्विषयभूता क्रियाकारकफलात्मका कार्यकरणलक्षणा लोका, तथा स्वप्नेऽपि,

तस्मादन्योऽसौ दृश्येभ्य स्वप्नजागरितलोकेभ्यो द्रष्टा विज्ञानमयो विशुद्ध ॥१८॥

दर्शनवृत्तौ स्वप्ने वासनाराशे दृश्यत्वादतद्धर्मतेति विशुद्धताऽवगता आत्मन । तत्र यथाकामं परिवर्तत इति कामवशात्परिवर्तनमुक्तम् । द्रष्टृदृश्य-संबंधश्चास्य स्वाभाविक इत्यशुद्धता शक्यते । अतस्तद्विशुद्धयर्थमाह—

अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिं सहस्राणि हृदयात्पुरीततमाभिप्रतिष्ठन्ते ताभि प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिघ्नीमानदस्य गत्वा शयीतैवमेवैष एतच्छेते ॥१९॥

अथ यदा सुषुप्तो भवति यदा स्वप्न्यया चरति, तदाप्यय विशुद्ध एव । अथ पुनर्यदा हित्वा दर्शनवृत्तिं स्वप्नं यदा यस्मिन्काले सुषुप्त सुष्ठु सुप्त संप्रसाद स्वाभाव्यं गतो भवति सलिलमिवान्यसंबधकालुष्यं हित्वा स्वाभाव्येन प्रसीदति । कदा सुषुप्तो भवति ? यदा यस्मिन्काले न कस्यचन न किंचनेत्यर्थो वेद विजानाति । कस्यचन वा शब्दादे सबधि वस्त्वतर किचन न वेदे-त्यध्याहार्यम् । पूर्व तु न्याय्यं, सुप्ते तु विशेषविज्ञानाभावस्य विवक्षितत्वात् ।

एवं तावद्विशेषविज्ञानाभावे सुषुप्तो भवतीत्युक्तम् । केन पुन क्रमेण सुषुप्तो भवतीत्युच्यते— हिता नाम हिता इत्येवंनाम्न्यो नाड्य शिरा देहस्या-ऽसरसविपरिणामभूता ताश्च द्वासप्तति सहस्राणि, द्वे सहस्रे अधिके सप्ततिश्च सहस्राणि ता द्वासप्तति सहस्राणि, हृदयात् हृदयं नाम मासपिंडस्तस्मान्मास-पिंडात्पुडरीकाकारात्पुरीततं हृदयपरिवेष्टनमाचक्षते तदुपलक्षितं शरीरमिह पुरीतच्छब्देनाभिप्रेतं पुरीततमभिप्रतिष्ठन्त इति शरीरं कृत्स्नं व्याप्नुवत्योऽश्वत्थ-पर्णराजय इव बहिर्मुख्य प्रवृत्ता इत्यर्थ । तत्र बुद्धेरत करणस्य हृदयं स्थानं, तत्रस्थबुद्धितंत्राणि चेतराणि बाह्यानि करणानि । तेन बुद्धि कर्मवशाच्छ्रोत्रा-दीनि ताभिर्नाडीभिर्मत्स्यजालवत्कर्णशष्कुल्यादिस्थानेभ्य प्रसारयति, प्रसार्य चाधितिष्ठति जागरितकाले । तां विज्ञानमयोऽभिव्यक्तस्वात्मचैतन्यावभासतया व्याप्नोति । संकोचनकाले च तस्या अनुसंकुचति । सोऽस्य विज्ञानमयस्य स्वाप । जाग्रद्विकासानुभवो भोग । बुद्ध्युपाधिस्वभावानुविधायी हि स चंद्रा-दिप्रतिबिंब इव जलाद्यनुविधायी । तस्मात्तस्या बुद्धेर्जाग्रद्विषयायास्ताभिर्नाडी-भि प्रत्यवसर्पणमनु प्रत्यवसृप्य पुरीतति शरीरे शेते तिष्ठति, तप्तमिव लोह-

पिंडमविशेषेण संव्याप्याग्निवच्छरीरं संव्याप्य वर्तत इत्यर्थ । स्वाभाविक एव स्वात्मनि वर्तमानोऽपि कर्मानुगतबुद्ध्यनुवृत्तित्वात्पुरीतति शेत इत्युच्यते । न हि सुषुप्तिकाले शरीरसबंधोऽस्ति । 'तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य' इति हि वक्ष्यति । सर्वसंसारदु खवियुक्ता इयमवस्थेत्यत्र दृष्टान्त — स यथा कुमारो वा अत्यतबालो वा, महाराजो वाऽत्यंतवश्यप्रकृति यथोक्तकृत् महाब्राह्मणो वा अत्यंतपरिपक्कविद्याविनयसंपन्नो, अतिघ्नीमतिशयेन दु खंहन्तीत्यतिघ्नी आनंदस्यावस्था सुखावस्था तां प्राप्य गत्वा शयीतावतिष्ठेत । एषा च कुमारादीना स्वभावस्थाना सुखं निरतिशयं प्रसिद्धं लोके । विक्रियमाणाना हि तेषा दु खं न स्वभावतस्तेन तेषा स्वाभाविक्यवस्था दृष्टान्तत्वेनोपादीयते प्रसिद्धत्वात् । न तेषा स्वाप एवाभिप्रेत । स्वापस्य दार्ष्टान्तिकत्वेन विवक्षितत्वाद्विशेषाभावाच्च । विशेषे हि सति दृष्टान्तदार्ष्टान्तिकभेद स्यात् । तस्मान्न तेषा स्वापो दृष्टान्त. । एवमेव यथायं दृष्टान्त , एष विज्ञानमय एतच्छयनं शेते इति, एतच्छब्द क्रियाविशेषणार्थ । एवमय स्वाभाविके स्वे आत्मनि सर्वसंसारधर्मातीतो वर्तते स्वापकाल इति ॥१९॥

कैष तदाभूदित्यस्य प्रश्नस्य प्रतिवचनमुक्तम् । अनेन च प्रश्ननिर्णयेन विज्ञानमयस्य स्वभावतो विशुद्धिरसंसारित्वं चोक्तम् । कुत एतदागादित्यस्य प्रश्नस्यापाकरणार्थ आरंभ । ननु यस्मिन्ग्रामे नगरे वा यो भवति सोऽन्यत्र गच्छस्तत एव ग्रामान्नगराद्वा गच्छति नान्यत । तथा सति कैष तदाभूदित्येतावानेवास्तु प्रश्न । यत्राभूत्तत एवागमनं प्रसिद्धं स्यान्नान्यत इति कुत एतदागादिति प्रश्नो निरर्थक एव । किं श्रुतिरुपालभ्यते भवता ? न, कि तर्हि, द्वितीयस्य प्रश्नस्यार्थान्तर श्रोतुमिच्छाम्यत आनर्थक्यं चोदयामि ॥

एवं तर्हि कुत इत्यपादानार्थता न गृह्यते । अपादानार्थत्वे हि पुनरुक्तता, नान्यार्थत्वे । अस्तु तर्हि निमित्तार्थ प्रश्न', कुत एतदागात्किनिमित्तमिहागमनमिति । न निमितार्थतापि प्रतिवचनवैरूप्यात् । आत्मनश्च सर्वस्य जगतोऽग्निविस्फुलिंगादिवदुत्पत्तिः प्रतिवचने श्रूयते । न हि विस्फुलिंगाना विद्रवणेऽग्निर्निमित्तमपादानमेव तु स । तथा परमात्मा विज्ञानमयस्यात्मनोऽपादानत्वेन श्रूयते 'अस्मादात्मन' इत्येतस्मिन्वाक्ये । तस्मात्प्रतिवचनवैलोम्यात्कुत इति प्रश्नस्य निमितार्थता न शक्यते वर्णयितुम् ।

नन्वपादानपक्षेऽपि पुनरुक्तादोष स्थित एव। नैष दोषः। प्रश्नान्या आत्मनि क्रियाकारकफलात्मतापोहस्य विवक्षितत्वात्। इह हि विद्याविद्याविषयावुपन्यस्तौ। 'आत्मेत्येवोपासीत' 'आत्मानमेववेत्' 'आत्मानमेव लोकमुपासीत' इति विद्याविषय। तथा अविद्याविषयश्च पाक्तं कर्म तत्फल चान्नत्रयं नामरूपकर्मात्मकमिति। तत्राविद्याविषये वक्तव्यं सर्वमुक्तम्। विद्याविषयस्त्वात्मा केवल उपन्यस्तो न निर्णीत.। तन्निर्णयाय च 'ब्रह्म ते ब्रवाणि' इति प्रक्रान्तं 'ज्ञपयिष्यामि' इति च। अतस्तद्ब्रह्म विद्याविषयभूत ज्ञापयितव्यं याथात्म्यत। तस्य च याथात्म्य क्रियाकारकफलभेदशून्यं अत्यंतविशुद्धमद्वैतं इत्येतद्विवक्षितम्। अतस्तदनुरूपौ प्रश्नावुत्थाप्येते श्रुत्या "कैष तदाभूत्कुत एतदागात्" इति।

तत्र यत्र भवति तदधिकरणं यद्भवति तदधिकर्तव्यं, तयोश्चाधिकरणाधिकर्तव्ययोर्भेदो दृष्टो लोके। तथा यत आगच्छति तदपादानं य आगच्छति स कर्ता तस्मादन्यो दृष्ट। तथा आत्मा क्वाप्यभूदन्यस्मिन्नन्य कुतश्चिदागादन्यस्मादन्य केनचिद्विज्ञेन साधनान्तरेणेत्येवं लोकवत्प्राप्ता बुद्धि। सा प्रतिवचनेन निवर्तयितव्येति। नायमात्मा अन्योऽन्यत्राभूदन्यो वा अन्यस्मादागत साधनान्तरं वा आत्मन्यस्ति। किं तर्हि स्वात्मन्येवाभूत् 'स्वमात्मानमपीतो भवति' 'सता सोम्य तदा संपन्नो भवति' 'प्राज्ञेनात्मना संपरिष्वक्त' 'पर आत्मनि संप्रतिष्ठते' इत्यादिश्रुतिभ्य। अत एव नान्योऽन्यस्मादागच्छति। तत् श्रुत्यैव प्रदर्श्यते 'अस्मादात्मन' इति। आत्मव्यतिरेकेण वस्त्वंतराभावात्॥

नन्वस्ति प्राणाद्यात्मव्यतिरिक्तं वस्त्वंतरं, न, प्राणादेस्तत एव निष्पत्ते। तत्कथमिति। उच्यते—

स यथोर्णनाभिस्तंतुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा सर्वे लोका सर्वे देवा. सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्॥२०॥ इति प्रथमं ब्राह्मणम्॥

तत्र दृष्टान्त — स यथा लोके ऊर्णनाभि। ऊर्णनाभिर्लूताकीट एक एव प्रसिद्ध सन्स्वात्माप्रविभक्तेन तंतुनोच्चरेदुद्गच्छेत्। न चास्ति तस्योद्गमने स्वतोऽतिरिक्तं कारकान्तरम्। यथा चैकरूपादेकस्मादग्ने क्षुद्रा अल्पा विस्फु-

लिंगास्त्रुटयोऽन्यवयवा व्युच्चरन्ति विविधं नाना वोच्चरन्ति। यथेमौ दृष्टान्तौ कारकभेदाभावेऽपि प्रवृत्तिं दर्शयत, प्राक्प्रवृत्तेश्च स्वभावत एकत्व, एवमेवास्मादात्मनो विज्ञानमयस्य प्राक्प्रतिबोधाद्यत्स्वरूपं तस्मादित्यर्थ। सर्वे प्राणा वागादय, सर्वे लोका भूरादय, सर्वाणि कर्मफलानि, सर्वे देवा प्राणलोकाधिष्ठातारोऽन्यादय, सर्वाणि भूतानि ब्रह्मादिस्तंबपर्यंतानि प्राणिजातानि, सर्व एत आत्मान इत्यस्मिन्पाठ उपाधिसंपर्कजनितप्रबुध्यमानविशेषात्मान इत्यर्थो, व्युच्चरन्ति। यस्मादात्मन स्थावरजगमं जगदिदमग्निविस्फुलिंगवत् व्युच्चरत्यनिश, यस्मिन्नेव च प्रलीयते जलबुद्बुदवत्, यदात्मकं च वर्तते स्थितिकाले, तस्यास्यात्मनो ब्रह्मण, उपनिषदुप समीपं निगमयतीत्यभिधायक शब्द उपनिषदित्युच्यते। शास्त्रप्रामाण्यादेतच्छब्दगतो विशेषोऽवसीयते उपनिगमयितृत्व नाम। काऽसावुपनिषदित्याह— सत्यस्य सत्यमिति। सा हि सर्वत्र चोपनिषदलौकिकार्थत्वात् दुर्विज्ञेयार्थेति तदर्थमाचष्टे— प्राणा वै सत्य तेषामेष सत्यमिति। एतस्यैव वाक्यस्य व्याख्यानायोत्तरं ब्राह्मणद्वयं भविष्यति॥

भवतु तावदुपनिषद्व्याख्यानायोत्तरं ब्राह्मणद्वयम्। तस्योपनिषदित्युक्तं, तत्र न जानीम किं प्रकृतस्यात्मनो विज्ञानमयस्य पाणिपेषणोत्थितस्य संसारिण शब्दादिभुज इयमुपनिषदाहोस्विदसंसारिण कस्यचित्। किंचात ? यदि संसारिणस्तदा ससार्येव विज्ञेय। तद्विज्ञानादेव सर्वप्राप्ति। स एव ब्रह्मशब्दवाच्यस्तद्विद्यैव ब्रह्मविद्येति। अथ असंसारिण, तदा तद्विषया विद्या ब्रह्मविद्या। तस्माच्च ब्रह्मविज्ञानात्सर्वभावापत्ति। सर्वमेतच्छास्त्रप्रामाण्याद्भविष्यति। किंत्वस्मिन्पक्षे 'आत्मेत्येवोपासीत' 'आत्मानमेवावेदह ब्रह्मास्मि' इति परब्रह्मैकत्वप्रतिपादिका श्रुतय कुप्येरन्। संसारिणश्चान्यस्याभावे उपदेशानर्थक्यात्। यत एवं पंडितानामप्येतन्महामोहस्थान अनुक्तप्रतिवचनप्रश्नविषयम्। अतो यथाशक्ति ब्रह्मविद्याप्रतिपादकवाक्येषु ब्रह्म विजिज्ञासूना बुद्धिव्युत्पादनाय विचारयिष्याम॥

न तावदसंसारी पर पाणिपेषणप्रतिबोधिताच्छब्दादिभुज अवस्थान्तरविशिष्टादुत्पत्तिश्रुते। न प्रशासिता अशनायादिवर्जित परो विद्यते। कस्मात् ? यस्मात् 'ब्रह्म ज्ञपयिष्यामि' इति प्रतिज्ञाय सुप्तं पुरुषं पाणिपेषं

बोधयित्वा तं शब्दादिभोक्तृत्वविशिष्टं दर्शयित्वा तस्यैव स्वप्नद्वारेण सुषुप्त्याख्यमवस्थान्तरमुन्नीय तस्मादेवात्मन सुषुप्त्यवस्थाविशिष्टात् अग्निविस्फुलिंगोर्णनाभिदृष्टान्ताभ्यामुत्पत्तिं दर्शयति श्रुति 'एवमेवास्मात्' इत्यादिना। न चान्यो जगदुत्पत्तिकारणमंतराले श्रुतोऽस्ति। विज्ञानमयस्यैव हि प्रकरणम्। समानप्रकरणे च श्रुत्यंतरे कौषीतकिनामादित्यादिपुरुषान्प्रस्तुत्य 'स होवाच यो वै बालाक एतेषा पुरुषाणा कर्ता यस्य चैतत्कर्म स वै वेदितव्य' इति प्रबुद्धस्यैव विज्ञानमयस्य वेदितव्यता दर्शयति, नार्थान्तरस्य। तथाच 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इत्युक्त्वा, य एवात्मा प्रिय प्रसिद्ध तस्यैव द्रष्टव्यश्रोतव्यमंतव्यनिदिध्यासितव्यता दर्शयति। तथा च विद्योपन्यासकाले 'आत्मेत्येवोपासीत' 'तदेतत्प्रेय पुत्रात्प्रेयो वित्तात्' 'तदात्मानमेवावेदहं ब्रह्मास्मि' इत्येवमादिवाक्याना आनुलोम्यं स्यात्पराभावे। वक्ष्यति च— 'आत्मानं चेद्विजानीयादयमस्मीति पूरुष' इति। सर्ववेदान्तेषु च प्रत्यगात्मवेद्यतैव प्रदर्श्यतेऽहमिति न बहिर्वेद्यता शब्दादिवत्प्रदर्श्यतेऽसौ ब्रह्मेति। तथा कौषीतकिनामेव 'न वाच विजिज्ञासीत वक्तारं विद्यात्' इत्यादिना वागादिकरणैर्व्यावृत्तस्य कर्तुरेव वेदितव्यता दर्शयति। अवस्थान्तरविशिष्टोऽसंसारीति चेत्। अथापि स्याद्यो जागरिते शब्दादिभुग्विज्ञानमय स एव सुषुप्ताख्यमवस्थान्तरं गतोऽसंसारी पर प्रशासिता अन्य स्यादिति चेत्। न। अदृष्टत्वात्। न ह्येवंधर्मक पदार्थो दृष्टोऽन्यत्र वैनाशिकसिद्धान्तात्। न हि लोके गौस्तिष्ठन्गच्छन्वा गौर्भवति शयानस्त्वश्वादिजात्यंतरमिति। न्यायाच्च। यद्धर्मको य पदार्थ प्रमाणेनावगतो भवति, स देशकालावस्थान्तरेष्वपि तद्धर्मक एव भवति, स चेत्तद्धर्मकत्वं व्यभिचरति सर्वं प्रमाणव्यवहारो लुप्येत। तथाच न्यायविद साख्यमीमासकादयोऽसंसारिणोऽभावं युक्तिशतै प्रतिपादयन्ति। संसारिणोऽपि जगदुत्पत्तिस्थितिलयक्रियाकर्तृत्वविज्ञानस्याभावात् अयुक्तमिति चेत्। यन्महता प्रपंचेन स्थापितं भवता, शब्दादिभुक्संसार्येव अवस्थान्तरविशिष्टो जगत इह कर्तेति। तदसत्। यतो जगदुत्पत्तिस्थितिलयक्रियाकर्तृत्वविज्ञानशक्तिसाधनाभाव सर्वलोकप्रत्यक्ष संसारिण। स कथमस्मदादि संसारी मनसापि चिंतयितुमशक्यं पृथिव्यादिविन्यासविशिष्टं जगन्निर्मिनुयात् अतोऽयुक्तमिति चेत्। न। शास्त्रात्। शास्त्रं संसारिण "एवमेवास्मादात्मन."

इति जगदुत्पत्त्यादि दर्शयति । तस्मात्सर्वं श्रद्धेयमिति स्यादयमेक पक्ष ॥

'यः सर्वज्ञ सर्ववित्' 'योऽशनायापिपासे अत्येति' 'असंगो न हि सज्यते' 'एतस्य वा अक्षरस्य प्रशासने' 'य सर्वेषु भूतेषु तिष्ठन् अंतर्याम्यमृत ' 'स यस्तान्पुरुषान्निरुह्यात्यक्रामत्' 'स वा एष महानज आत्मा' 'एष सेतुर्विधरण ' 'सर्वस्य वशी सर्वस्येशानः' 'य आत्माऽपहतपाप्मा विजरो विमृत्यु ' 'तत्तेजोऽसृजत' 'आत्मा वा इदमेक एवाग्र आसीत्' 'न लिप्यते लोकदु खेन बाह्य ' इत्यादिश्रुतिशतेभ्य । स्मृतेश्च ''अहं सर्वस्य प्रभवो मत्त सर्वं प्रवर्तते'' इति । परोऽस्त्यसंसारी श्रुतिस्मृतिन्यायेभ्यश्च । स च कारणं जगत. ॥

ननु 'एवमेवास्मादात्मन ' इते संसारिण एवोत्पत्तिं दर्शयतीत्युक्तम् । न । 'य एषोऽन्तर्हृदय आकाश ' इति परस्य प्रकृतत्वात् 'अस्मादात्मन ' इति युक्त· परस्यैव परामर्श । 'क्वैष तदाभूत्'' इत्यस्य प्रश्नस्य प्रतिवचनत्वेन आकाशशब्दवाच्य पर आत्मोक्तो 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति । 'सता सोम्य तदा संपन्नो भवति' 'अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति' 'प्राज्ञेनात्मना संपरिष्वक्त ' 'पर आत्मनि संप्रतिष्ठते' इत्यादिश्रुतिभ्य आकाशशब्द पर आत्मेति निश्चीयते । 'दहरोऽस्मिन्नंतराकाश ' इति प्रस्तुत्य तस्मिन्नेवात्मशब्दप्रयोगाच्च । प्रकृत एव पर आत्मा । तस्माद्युक्तं 'एवमेवास्मादात्मन ' इति परमात्मन एव सृष्टिरिति । संसारिण सृष्टिस्थितिसंहारज्ञानसामर्थ्याभावं चावोचाम ॥

अत्र च 'आत्मेत्येवोपासीत' 'आत्मानमेवावेदहं ब्रह्मास्मि' इति ब्रह्मविद्या प्रस्तुता । ब्रह्मविषय च ब्रह्मविज्ञानमिति । 'ब्रह्म ते ब्रवाणि' इति 'ब्रह्म ज्ञपयिष्यामि' इति प्रारब्धम् । तत्रेदानीमसंसारि ब्रह्म जगतः कारणमशनायाद्यतीतं नित्यशुद्धबुद्धमुक्तस्वभावं, तद्विपरीतश्च संसारी, तस्मादह ब्रह्मास्मीति न गृह्णीयात् । परं हि देवमीशानं निकृष्ट ससार्यात्मत्वेन स्मरन्कथं न दोषभाक्स्यात् । तस्मान्नाहं ब्रह्मास्मीति युक्तम् ।

तस्मात् पुष्पोदकाजलिस्तुतिनमस्कारबल्युपहारस्वाध्यायध्यानयोगादिभि आरिराधयिषेत । आराधनेन विदित्वा सर्वेशितृ ब्रह्म भवति । न पुनरसंसारि ब्रह्म संसार्यात्मत्वेन चिंतयेदग्निमिव शीतत्वेन आकाशमिव मूर्तिमत्त्वेन । ब्रह्मा-

त्मत्वप्रतिपादकमपि शास्त्रमर्थवादो भविष्यति। सर्वतर्कशास्त्रलोकन्यायैश्चैवमविरोध स्यात्॥

न। मन्त्रब्राह्मणवादेभ्यस्तस्यैव प्रवेशश्रवणात्। 'पुरश्चक्रे' इति प्रकृत्य 'पुर पुरुष आविशत्' इति 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय' 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते' इति सर्वशाखासु सहस्रशो मंत्रवादा. सृष्टिकर्तुरेवासंसारिण शरीरप्रवेशं दर्शयन्ति। तथा ब्राह्मणवादा 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' 'सेयं देवतेमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य' 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते' इत्याद्या। सर्वश्रुतिषु च ब्रह्मण्यात्मशब्दप्रयोगात् आत्मशब्दस्य च प्रत्यगात्माभिधायकत्वात् 'एष सर्वभूतान्तरात्मा' इति च श्रुते परमात्मव्यतिरेकेण ससारिणोऽभावात् 'एकमेवाद्वितीयम्' 'ब्रह्मैवेदम्' 'आत्मैवेदम्' इत्यादिश्रुतिभ्यो युक्तमेव अहं ब्रह्मास्मीत्यवधारयितुम्॥

यदैवं स्थित शास्त्रार्थ, तदा परमात्मन संसारित्वम्। तथा च सति शास्त्रानर्थक्यं असंसारित्वे चोपदेशानर्थक्यं स्पष्टो दोष प्राप्त। यदि तावत्परमात्मा सर्वभूतान्तरात्मा सर्वशरारसंपर्कजनितदु खानि अनुभवतीति स्पष्टं परस्य संसारित्वं प्राप्तम्। तथा च परस्यासंसारित्वप्रतिपादिका श्रुतय कुप्येरन्स्मृतयश्च सर्वे च न्यायाः। अथ कथंचित्प्राणिशरीरसंबंधजैर्दु खैर्न संबध्यत इति शक्यं प्रतिपादयितुं, परमात्मन साध्यपरिहार्याभावादुपदेशानर्थक्यदोषो न शक्यते निवारयितुम्॥

अत्र केचित्परिहारमाचक्षते। परमात्मा न साक्षात् भूतेष्वनुप्रविष्ट स्वेन रूपेण। किं तर्हि विकारभावमापन्नो विज्ञानात्मत्वं प्रतिपेदे। स च विज्ञानात्मा परस्मादन्योऽनन्यश्च। येनान्य, तेन संसारित्वसंबधी, येनानन्य तेन अहं ब्रह्मेत्यवधारणार्ह। एवं सर्वमविरुद्धं भविष्यतीति॥

तत्र विज्ञानात्मनो विकारपक्षे एता गतय। पृथिवीद्रव्यवदनेकद्रव्यसमाहारस्य सावयवस्य परमात्मन, एकदेशविपरिणामो विज्ञानात्मा घटादिवत्। पूर्वसंस्थानावस्थस्य वा परस्यैकदेशो विक्रियते केशोषरादिवत्सर्व एव वा पर· परिणमेत्क्षीरादिवत्। तत्र समानजातीयानेकद्रव्यसमूहस्य काश्चित् द्रव्यवि-

शेषो विज्ञानात्मत्वं प्रतिपद्यते यदा, तदा समानजातीयत्वात् एकत्वमुपचरितमेव न तु परमार्थत । तथा च सति सिद्धान्तविरोध ॥

अथ नित्यायुतसिद्धावयवानुगतोऽवयवी पर आत्मा, तस्य तदवस्थस्यैकदेशो विज्ञानात्मा ससारी, तदापि सर्वावयवानुगतत्वादवयविन एवावयवगतो दोषो गुणो वेति, विज्ञानात्मन संसारित्वदोषेण पर एवात्मा सबध्यत इति, इयमप्यनिष्टा कल्पना । क्षीरवत्सर्वपरिणामपक्षे सर्वश्रुतिस्मृतिकोप , स चानिष्ट । 'निष्कलं निष्क्रियं शान्तम्' 'दिव्यो ह्यमूर्त पुरुष सबाह्याभ्यंतरो ह्यज' 'आकाशवत्सर्वगतश्च नित्य' 'स वा एष महानज आत्माऽजरोऽमरोऽमृत' 'न जायते म्रियते वा कदाचित्' 'अव्यक्तोऽयम्' इत्यादिश्रुतिस्मृतिन्यायविरुद्धा एते सर्वे पक्षा । अचलस्य परमात्मन एकदेशपक्षे विज्ञानात्मन कर्मफलवद्देशससरणानुपपत्ति परस्य वा संसारित्वमित्युक्तम् । परस्यैकदेशो अग्निविस्फुलिंगवत्स्फुटितो विज्ञानात्मा ससरतीति चेत् । तथापि परस्यावयवस्फुटनेन क्षतप्राप्ति., तत्संसरणे च परमात्मन प्रदेशान्तरावयवव्यूहे छिद्रताप्राप्ति , अव्रणत्ववाक्यविरोधश्च । आत्मावयवभूतस्य विज्ञानात्मन ससरणे परमात्मशून्यप्रदेशाभावात् अवयवान्तरनोदनव्यूहनाभ्या हृदयशूलेनेव परमात्मनो दु खित्वप्राप्तिः ।

अग्निविस्फुलिंगादिदृष्टान्तश्रुतेर्न दोष इति चेत् । न । श्रुतेर्ज्ञापकत्वात् । न शास्त्र पदार्थानन्यथा कर्तुं प्रवृत्तम् । किं तर्हि ? यथाभूतानामज्ञाताना ज्ञापने । किंचात ? शृणु अतो यद्भवति । यथाभूता मूर्तामूर्तादिपदार्थधर्मा लोके प्रसिद्धा । तद्दृष्टान्तोपादानेन तदविरोध्येव वस्त्वंतरं ज्ञापयितु प्रवृत्त शास्त्रं न लौकिकवस्तुविरोधज्ञापनाय लौकिकमेव दृष्टान्तमुपादत्ते । उपादीयमानोऽपि दृष्टान्तोऽनर्थक स्याद्दार्ष्टान्तिकासंगते । न हि अग्नि शीत आदित्यो न तपतीति वा दृष्टान्तशतेनापि प्रतिपादयितुं शक्यम् । प्रमाणान्तरेणान्यथाधिगतत्वाद्वस्तुन । न च प्रमाणं प्रमाणान्तरेण विरुध्यते । प्रमाणान्तराविषयमेव हि प्रमाणान्तरं ज्ञापयति । न च लौकिकपदपदार्थाश्रयणव्यतिरेकेण आगमेन शक्यमज्ञातं वस्त्वंतरमवगमयितुम् । तस्मात्प्रसिद्धन्यायमनुसरता न शक्या परमात्मन सावयवाशांशित्वकल्पना परमार्थत प्रतिपादयितुम् ।

'क्षुद्रा विस्फुलिंगा' "ममैवाश " इति च श्रूयते स्मर्यते चेति चेत् । न ।

एकत्वप्रत्ययार्थपरत्वात् । अग्नेर्हि विस्फुलिंगोऽग्निरेव इत्येकत्वप्रत्ययार्हो दृष्टो लोके । तथा चाशोऽशिना एकत्वप्रत्ययार्हः । तत्रैवं सति विज्ञानात्मन परमात्मविकाराशत्ववाचका शब्दा परमात्मैकत्वप्रत्ययाधित्सव । उपक्रमोपसंहाराभ्या च । सर्वासु ह्युपनिषत्सु पूर्वमेकत्व प्रतिज्ञाय, दृष्टान्तैर्हेतुभिश्च परमात्मनो विकाराशादित्वं जगत प्रतिपाद्य, पुनरेकत्वमुपसंहरति । तद्यथेहैव तावत् 'इदं सर्व यदयमात्मा' इति प्रतिज्ञाय, उत्पत्तिस्थितिलयहेतुदृष्टान्तै विकारविकारित्वाद्येकत्वप्रत्ययहेतून्प्रतिपाद्य 'अनंतरमबाह्यं' 'अयमात्मा ब्रह्म' इत्युपसंहरिष्यति । तस्मादुपक्रमोपसंहाराभ्यामयमर्थो निश्चीयते परमात्मैकत्वप्रत्ययद्रढिम्ने उत्पत्तिस्थितिलयप्रतिपादकानि वाक्यानीति । अन्यथा वाक्यभेदप्रसंगाच्च । सर्वोपनिषत्सु हि विज्ञानात्मन परमात्मनैकत्वप्रत्ययो विधीयत इत्यविप्रतिपत्ति सर्वेषामुपनिषद्वादिनाम् । तद्विध्येकवाक्ययोगे च संभवत्युत्पत्त्यादिवाक्याना वाक्यान्तरत्वकल्पनाया न प्रमाणमस्ति । फलान्तरं च कल्पयितव्यं स्यात् । तस्मादुत्पत्त्यादिश्रुतय आत्मैकत्वप्रतिपादनपरा ॥

अत्र च संप्रदायविद आख्यायिका सप्रचक्षते— कश्चित्किल राजपुत्रो जातमात्र एव मातापितृभ्यामपविद्धो व्याधगृहे संवर्धित , सोऽमुष्य वंश्यतामजानन्व्याधजातिप्रत्ययो व्याधजातिकर्माण्येवानुवर्तते, न राजाऽस्मीति राजजातिकर्माण्यनुवर्तते । यदा पुन कश्चित्परमकारुणिको राजपुत्रस्य राजश्रीप्राप्तियोग्यता जानन्नमुष्य पुत्रता बोधयति, न त्वं व्याधोऽमुष्य राज्ञ पुत्र कथंचिद्व्याधगृहमनुप्रविष्ट इति । स एवं बोधितस्त्यक्त्वा व्याधजातिप्रत्ययकर्माणि पितृपैतामहीमात्मन पदवीमनुवर्तते राजाहमस्मीति । तथा किलायं परस्मादग्निविस्फुलिंगादिवत्तज्जातिरेव विभक्त इह देहेद्रियादिगहने प्रविष्टोऽसंसारी सन्देहेद्रियादिसंसारधर्ममनुवर्तते देहेद्रियसंघातोऽस्मि कृश स्थूल सुखी दु खीति परमात्मतामजानन्नात्मन । न त्वमेतदात्मक परमेव ब्रह्माग्र्यसंसारीति प्रतिबोधित आचार्येण हित्वैषणात्रयानुवृत्तिं ब्रह्मैवास्मीति प्रतिपद्यते । अत्र राजपुत्रस्य राजप्रत्ययवद्ब्रह्मप्रत्ययो दृढीभवति विस्फुलिंगवदेव त्वं परस्माद्ब्रह्मणो भ्रष्ट इत्युक्ते । विस्फुलिंगस्य प्रागग्नेर्भ्रंशादग्न्येकत्वदर्शनात् । तस्मादेकत्वप्रत्ययदार्ढ्याय सुवर्णमणिलोहाग्निविस्फुलिंगदृष्टान्ता नोत्पत्त्यादिभेदप्रतिपादनपरा । सैंधवघनवत्प्रज्ञप्त्येकरसनैरंतर्यावधारणात् 'एकधैवानुद्रष्टव्यं' इति च । यदि च

ब्रह्मणश्चित्रपटवत् वृक्षसमुद्रादिवच्च उत्पत्त्याद्यनेकधर्मविचित्रता विजिग्राहयिषिता, एकरसं सैन्धवघनवदनंतरमबाह्यमिति नोपसमहरिष्यत् 'एकधैवानुद्रष्टव्यं' इति च न प्रायोक्ष्यत। 'य इह नानेव पश्यति' इति निंदावचन च। तस्मादेकरूपैकत्वप्रत्ययदार्ढ्यायैव सर्ववेदान्तेषु उत्पत्तिस्थितिलयादिकल्पना न तत्प्रत्ययकरणाय ॥

न च निरवयवस्य परमात्मनोऽसंसारिण संसार्येकदेशकल्पना न्याय्या, स्वतोऽदेशत्वात्परमात्मन। अदेशस्य परस्य एकदेशसंसारित्वकल्पनाया पर एव संसारीति कल्पितं भवेत्। अथ परोपाधिकृत एकदेश परस्य घटकराद्याकाशवत्। न तदा तत्र विवेकिना परमात्मैकदेश पृथक्संव्यवहारभागिति बुद्धिरुत्पद्यते। अविवेकिना विवेकिना चोपचरिता बुद्धिर्दृष्टेति चेत्। न। अविवेकिना मिथ्याबुद्धित्वात्। विवेकिना च संव्यवहारमात्रालंबनार्थत्वात्। यथा कृष्णो रक्तश्चाकाश इति विवेकिनामपि कदाचित्कृष्णता रक्तता च आकाशस्य संव्यवहारमात्रालंबनार्थत्वं प्रतिपद्यत इति, न परमार्थत कृष्णो रक्तो वा आकाशो भवितुमर्हति। अतो न पंडितैर्ब्रह्मस्वरूपप्रतिपत्तिविषये ब्रह्मणोऽशाश्येकदेशैकदेशविकारविकारित्वकल्पना कार्या। सर्वकल्पनापनयनार्थसारपरत्वात्सर्वोपनिषदाम्। अतो हित्वा सर्वकल्पनामाकाशस्येव निर्विशेषता प्रतिपत्तव्या। "आकाशवत्सर्वगतश्च नित्य" 'न लिप्यते लोकदु खेन बाह्य' इत्यादिश्रुतिशतेभ्य। नात्मानं ब्रह्मविलक्षणं कल्पयेत् उष्णात्मक इवाग्नौ शीतैकदेशं, प्रकाशात्मके वा सवितरि तमएकदेशं सर्वकल्पनापनयनार्थसारपरत्वात्सर्वोपनिषदाम्। तस्मान्नामरूपोपाधिनिमित्ता एव आत्मन्यसंसारधार्मिणि सर्वे व्यवहारा। 'रूपं रूपं प्रतिरूपो बभूव' "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते" इत्येवमादिमंत्रवर्णेभ्य। न स्वत आत्मन संसारित्वमलक्तकाद्युपाधिसंयोगजनितरक्तस्फटिकादिबुद्धिवद्भ्रान्तमेव न परमार्थत। 'ध्यायतीव लेलायतीव' 'न कर्मणा वर्धते नो कनीयान्' 'न कर्मणा लिप्यते पापकेन' "समं सर्वेषु भूतेषु तिष्ठन्तम्" "शुनि चैव श्वपाके च" इत्यादिश्रुतिस्मृतिन्यायेभ्यः परमात्मनोऽसंसारितैव। अत एकदेशो विकार. शक्तिर्वा विज्ञानात्मा अन्यो वेति विकल्पयितुं निरवयवत्वाभ्युपगमे विशेषतो न शक्यते। अंशादिश्रुतिस्मृतिवादाश्चैकत्वार्था न तु भेदप्रतिपादका., विवक्षितार्थैकवाक्य-

योगात् इत्यवोचाम ॥

सर्वोपनिषदा परमात्मैकत्वज्ञापनपरत्वे अथ किमर्थं तत्प्रतिकूलोऽर्थो विज्ञानात्मभेद परिकल्प्यत इति । कर्मकाडप्रामाण्यविरोधपरिहारायेत्येके । कर्मप्रतिपादकानि हि वाक्यानि अनेककियाकारकफलभोक्तृकर्त्राश्रयाणि विज्ञानात्मभेदाभावे ह्यसंसारिण एव परमात्मन एकत्वे कथमिष्टफलासु कियासु प्रवर्तयेयु ? अनिष्टफलाभ्यो वा क्रियाभ्यो निवर्तयेयु ? कस्य वा बद्धस्य मोक्षायोपनिषदारभ्येत ? अपि च परमात्मैकत्ववादिपक्षे कथ परमात्मैकत्वोपदेश ? कथं वा तदुपदेशग्रहणफलम् ? बद्धस्य हि बंधनाशायोपदेशस्तदभावे उपनिषच्छास्त्र निर्विषयमेव । एवं तर्हि उपनिषद्वादिपक्षस्य कर्मकाडवादिपक्षेण चोद्यपरिहारयो समान पंथा । येन भेदाभावे कर्मकाडं निरालंबनमात्मानं न लभते प्रामाण्यं प्रति तथोपनिषदपि । एवं तर्हि यस्य प्रामाण्ये स्वार्थविघातो नास्ति, तस्यैव कर्मकाडस्यास्तु प्रामाण्यम् । उपनिषदा तु प्रामाण्यकल्पनाया स्वार्थविघातो भवेदिति मा भूत्प्रामाण्यम् । न हि कर्मकाडं प्रमाणं सदप्रमाणं भवितुमर्हति । न हि प्रदीप प्रकाश्यं प्रकाशयति न प्रकाशयति चेति । प्रत्यक्षादिप्रमाणविप्रतिषेधाच्च । न केवलमुपनिषदो ब्रह्मैकत्वं प्रतिपादयन्त्य स्वार्थविघातं कर्मकाडप्रामाण्यविघातं च कुर्वन्ति । प्रत्यक्षादिनिश्चितभेदप्रतिपत्त्यर्थप्रमाणैश्च विरुध्यन्ते । तस्मादप्रामाण्यमेव उपनिषदाम् । अन्यार्थता वास्तु । न त्वेव ब्रह्मैकत्वप्रतिपत्त्यर्थता ॥

न उक्तोत्तरत्वात् । प्रमाणस्य हि प्रमाणत्वमप्रमाणत्वं वा प्रमोत्पादनानुत्पादननिमित्तम् । अन्यथा चेत्स्तंभादीना प्रामाण्यप्रसंगाच्छब्दादौ प्रमेये । किंचात ? यदि तावदुपनिषदो ब्रह्मैकत्वप्रतिपत्तिप्रमा कुर्वन्ति, कथमप्रमाणं भवेयु· । न कुर्वन्येवेति चेद्यथाग्नि शीतमिति, स भवानेवं वदन्वक्तव्य , उपनिषत्प्रामाण्यप्रतिषेधार्थं भवतो वाक्यं उपनिषत्प्रामाण्यप्रतिषेधं कि न करोत्येवाग्निर्वा रूपप्रकाशम् ? अथ करोति, यदि करोति भवतु तदा प्रतिषेधार्थं प्रमाणं भवद्वाक्यं, अग्निश्च रूपप्रकाशको भवेत् । प्रतिषेधवाक्यप्रामाण्ये भवत्येवोपनिषदां प्रामाण्यम् । अत्रभवन्तो ब्रुवन्तु क परिहार इति । नन्वत्र प्रत्यक्षा मद्वाक्य उपनिषत्प्रामाण्यप्रतिषेधार्थप्रतिपत्तिरग्नौ च रूपप्रकाशनप्रतिपत्ति प्रमा । कस्तर्हि भवत प्रद्वेषो ब्रह्मैकत्वप्रत्यये प्रमा प्रत्यक्षं कुर्वतीषूप-

निषत्सूपलभ्यमानासु प्रातषधानुपपत्त । शोकमोहादिनिवृत्तिश्च प्रत्यक्षं फलं ब्रह्मैकत्वप्रतिपत्तिपारंपर्यजनितमित्यवोचाम । तस्मादुक्तोत्तरत्वादुपनिषदं प्रत्य-प्रामाण्यशंका तावन्नास्ति ॥

यच्चोक्तं स्वार्थविघातकरत्वादप्रामाण्यमिति । तदपि न । तदर्थप्रतिपत्ते बाधकाभावात् । नहि उपनिषद्वयो, ब्रह्मैकमेवाद्वितीयं नैव चेति प्रतिपत्तिरस्ति। यथाग्निरुष्ण शीतश्च इत्यस्माद्वाक्याद्विरुद्धार्थद्वयप्रतिपत्ति । अभ्युपगम्य चैत-दवोचाम । नतु वाक्यप्रामाण्यसमये एष न्यायो, यदुतैकस्य वाक्यस्यानेकार्थ-त्वम् । सति चानेकार्थत्वे स्वार्थश्च स्यात्तद्विघातकृच्च विरुद्धोऽन्योऽर्थ । न त्वेतद्वाक्यप्रमाणकाना विरुद्धमविरुद्ध चैकं वाक्यमनेकमर्थ प्रतिपादयतीत्येष समय । अर्थैकत्वाद्धयेकवाक्यता । न च कानिचिदुपनिषद्वाक्यानि ब्रह्मैकत्व-प्रतिषेध कुर्वन्ति । यत्तु, लौकिक वाक्यमग्निरुष्ण शीतश्चेति न तत्रैकवाक्य-ता तदेकदेशस्य प्रमाणान्तरविषयानुवादित्वात् । अग्नि शीत इत्येतदेकं वाक्यं, अग्निरुष्ण इति तु प्रमाणान्तरानुभवस्मारक, न तु स्वयमर्थावबोधकम् । अतो नाग्नि शीत इत्यनेनैकवाक्यता प्रमाणान्तरानुभवस्मारणेनैव उपक्षीणत्वात् । यत्तु विरुद्धार्थप्रतिपादकमिद वाक्यमिति मन्यते, तच्छीतोष्णपदा-भ्या अग्निपद-सामानाधिकरण्यप्रयोगनिमित्ता भ्राति , न त्वेवैकस्य वाक्यस्यानेकार्थत्वं लोकिकस्य वैदिकस्य वा ॥

यच्चोक्तं कर्मकाडप्रामाण्यविघातकृदुपनिषद्वाक्यमिति, तन्न । अन्यार्थत्वात् । ब्रह्मैकत्वप्रतिपादनपरा ह्युपनिषदो नेष्टार्थप्राप्तौ साधनोपदेशं तस्मिन्वा पुरुष-नियोगं वारयन्ति अनेकार्थत्वानुपपत्तेरेव । नच कर्मकाडवाक्याना स्वार्थे प्रमा नोत्पद्यते । असाधारणे चेत्स्वार्थे प्रमामुत्पादयति वाक्य कुतोऽन्येन विरोध स्यात् । ब्रह्मैकत्वे निर्विषयत्वात्प्रमा नोत्पद्यते एवेति चेत् । न । प्रत्य-क्षत्वात्प्रमाया । "दर्शपूर्णमासाभ्या स्वर्गकामो यजेत" "ब्राह्मणो न हंतव्य" इत्येवमादिवाक्येभ्य प्रत्यक्षा प्रमा जायमाना । सा नैव भविष्यति यद्युपनिषदो ब्रह्मैकत्वं बोधयिष्यन्तीत्यनुमानम् । न चानुमान प्रत्यक्षविरोधे प्रामाण्यं लभते । तस्मादसदेवैतद्रीयते प्रमैव नोत्पद्यत इति । अपि च यथाप्राप्तस्यैव अविद्या-प्रत्युपस्थापितस्य क्रियाकारकफलस्य आश्रयणेन इष्टानिष्टप्राप्तिपरिहारोपायसामान्ये प्रवृत्तस्य तद्विशेषमजानत. तदाचक्षाणा श्रुति क्रियाकारकफलभेदस्य लोकप्रसि-

द्धस्य सत्यतामसत्यतां वा नाचष्टे न च वारयति । इष्टानिष्टफलप्राप्तिपरिहारोपाय-विधिपरत्वात् । यथा काम्येषु प्रवृत्ता श्रुति कामाना मिथ्याज्ञानप्रभवत्वे सत्यपि यथाप्राप्तानेव कामानुपादाय तत्साधनान्येव विधत्ते, न तु कामाना मिथ्याज्ञान-प्रभवत्वादनर्थरूपत्वं चेति, न विदधाति । तथा नित्याग्निहोत्रादिशास्त्रमपि मिथ्याज्ञानप्रभवं क्रियाकारकभेदं यथाप्राप्तमेव आदाय इष्टविशेषप्राप्तिमनिष्टविशेष-परिहारं वा किमपि प्रयोजनं पश्यदग्निहोत्रादीनि कर्माणि विधत्ते, न अविद्या-गोचरासद्वस्तुविषयमिति न प्रवर्तते । यथा काम्येषु । न च पुरुषा न प्रवर्तेरन्न-विद्यावन्तो दृष्टत्वाद्यथा कामिन । विद्यावतामेव कर्माधिकार इति चेत् । न । ब्रह्मैकत्वविद्याया कर्माधिकारविरोधस्योक्तत्वात् । एतेन ब्रह्मैकत्वे निर्विषयत्वा-दुपदेशेन तद्ग्रहणफलाभावदोषपरिहार उक्तो वेदितव्य । पुरुषेच्छारागादि-वैचित्र्याच्च । अनेका हि पुरुषाणामिच्छा, रागादयश्च दोषा विचित्रा । ततश्च बाह्यविषयरागाद्यपहृतचेतसो न शास्त्र निवर्तयितु शक्तम् । नापि स्वभावतो बाह्यविषयविरक्तचेतसो विषयेषु प्रवर्तयितुं शक्तम् । किंतु शास्त्रादेतावदेव भवतीदमिष्टसाधनमिदमनिष्टसाधनमिति साध्यसाधनसंबंधविशेषाभिव्यक्ति । प्रदीपादिवत्तमसि रूपादिज्ञानम् । न तु शास्त्र मृत्यानिव बलान्निवर्तयति नियो-जयति वा । दृश्यन्ते हि पुरुषा रागादिगौरवाच्छास्त्रमप्यतिक्रामन्त । तस्मात् पुरुषमतिवैचित्र्यमपेक्ष्य साध्यसाधनसंबंधविशेषाननेकधा उपदिशति । तत्र पुरुषा स्वयमेव यथारुचि साधनविशेषेषु प्रवर्तन्ते, शास्त्रं तु सवितृप्रदीपादि-वदुदास्त एव । तथा कस्यचित्परोऽपि पुरुषार्थोऽपुरुषार्थवदवभासते यस्य यथा-ऽवभास स तथारूपं पुरुषार्थं पश्यति तदनुरूपाणि साधनान्युपादित्सते । तथाचार्थवादोऽपि— 'त्रया प्राजापत्या प्रजापतौ पितरि ब्रह्मचर्यमूषु ' इत्यादि । तस्मान्न ब्रह्मैकत्व ज्ञापयिष्यन्तो वेदान्ता विधिशास्त्रस्य बाधका । न च विधिशास्त्रमेतावता निर्विषयं स्यात् । नाप्युक्तकारकादिभेदं विधिशास्त्रमुपनिषदा ब्रह्मैकत्वं प्रति प्रामाण्यं निवर्तयति । स्वविषयशूराणि हि प्रमाणानि श्रोत्रादिवत् ॥

तत्र पडितंमन्या केचित्स्वचित्तवशात्सर्वं प्रमाणमितरेतरविरुद्धं मन्यन्ते, तथा प्रत्यक्षादिविरोधमपि चोदयन्ति ब्रह्मैकत्वे । शब्दादय किल श्रोत्रादि-विषया भिन्ना प्रत्यक्षत उपलभ्यन्ते, ब्रह्मैकत्व ब्रुवता प्रत्यक्षविरोध स्यात् । तथा श्रोत्रादिभि शब्दाद्युपलब्धार कर्तारश्च धर्माधर्मयो प्रतिशरीरं भिन्ना

अनुमीयन्ते ससारिण । तत्र ब्रह्मैकत्वं ब्रुवतामनुमानविरोधश्च । तथा च आगमविरोध वदन्ति । "ग्रामकामो यजेत" "पशुकामो यजेत" "स्वर्गकामो यजेत" इत्येवमादिवाक्येभ्यो ग्रामपशुस्वर्गादिकामा तत्साधनाद्यनुष्ठातारश्च भिन्ना अवगम्यन्ते ।

अत्रोच्यते— ते तु कुतर्कदूषितान्त करणा ब्राह्मणादिवर्णापसदा अनुकंपनीया आगमार्थविच्छिन्नसप्रदायबुद्धय इति । कथं ? श्रोत्रादिद्वारै शब्दादिभि प्रत्यक्षत उपलभ्यमानैर्ब्रह्मण एकत्वं विरुध्यत इति वदन्तो वक्तव्या । किं शब्दादीना भेदेन आकाशैकत्व विरुध्यत इति । अथ न विरुध्यते, न तर्हि प्रत्यक्षविरोध । यच्चोक्त प्रतिशरीरं शब्दाद्युपलब्धारो धर्माधर्मयोश्च कर्तारो भिन्ना अनुमीयन्ते, तथाच ब्रह्मैकत्वेऽनुमानविरोध इति । भिन्ना कैरनुमीयन्त इति प्रष्टव्या । अथ यदि ब्रूयु सर्वैरस्माभिरनुमानकुशलैरिति । के यूयं अनुमानकुशला इत्येवं पृष्टाना किमुत्तरम् । शरीरेन्द्रियमनआत्मसु च प्रत्येकमनुमानकौशलप्रत्याख्याने शरीरेन्द्रियमन साधना आत्मानो वयमनुमानकुशला, अनेककारकसाध्यत्वात्क्रियाणामिति चेत् । एव तर्ह्यनुमानकौशले भवतामनेकत्वप्रसंग । अनेककारकसाध्या हि क्रियेति भवद्भिरेवाभ्युपगतम् । तत्रानुमानं च क्रिया । सा शरीरेन्द्रियमनआत्मसाधनै कारकैरात्मकर्तृका निर्वर्त्यत इत्येतत्प्रतिज्ञातम् । तत्र वयमनुमानकुशला इत्येवं वदद्भि शरीरेन्द्रियमन-साधना आत्मान प्रत्येक वयमनेके इत्यभ्युपगतं स्यात् । अहो अनुमानकौशलं दर्शितं अपुच्छभृंगैस्तार्किकबलीवर्दै । यो ह्यात्मानमेव न जानाति स कथं मूढस्तद्गतं भेदमभेदं वा जानीयात् ? तत्र किमनुमिनोति ? केन वा लिंगेन ? न ह्यात्मन. स्वतो भेदप्रतिपादकं किंचिल्लिंगमस्ति, येन लिंगेनात्मभेदं साधयेत् । यानि लिंगान्यात्मभेदसाधनाय नामरूपवन्त्युपन्यस्यन्ति, तानि नामरूपगतानि उपाधय एव आत्मनो घटकरकापवरकभूछिद्राणीव आकाशस्य । यदाकाशस्य भेदलिंगं पश्यति तदा आत्मनोपि भेदलिंगं लभेत स । न ह्यात्मन परतो विशेषमभ्युपगच्छद्भिस्तार्किकशतैरपि भेदलिंगमात्मनो दर्शयितुं शक्यते । स्वतस्तु दूरादपनीतमेवाविषयत्वादात्मन । यद्यत्पर आत्मधर्मत्वेनाभ्युपगच्छति, तस्य तस्य नामरूपात्मकत्वाभ्युपगमान्नामरूपाभ्या चात्मनोऽन्यत्वाभ्युपगमात् 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म' इति श्रुते 'नामरूपे

व्याकरवाणि' इति च । उत्पत्तिप्रलयात्मके हि नामरूपे तद्विलक्षणं च ब्रह्म । अतोऽनुमानस्यैवाविषयत्वात्कुतोऽनुमानविरोध । एतेन आगमविरोध प्रत्युक्त ॥

यदुक्तं ब्रह्मैकत्वे यस्मै उपदेशो यस्य चोपदेशग्रहणफलं तदभावादेकत्वोपदेशानर्थक्यमिति । तदपि न । अनेककारकसाध्यत्वात्क्रियाणा कश्चोद्यो भवति । एकस्मिन्ब्रह्मणि निरुपाधिके नोपदेशो, नोपदेष्टा, न चोपदेशग्रहणफलम् । तस्मादुपनिषदा चानर्थक्यमित्येतदभ्युपगतमेव । अथानेककारकविषयानर्थक्य चोद्यते । न, स्वतोऽभ्युपगमविरोधादात्मवादिनाम् । तस्मात्तार्किकचाटभटराजाप्रवेश्यं अभयं दुर्गमिदमल्पबुद्धयगम्यं शास्त्रगुरुप्रसादरहितैश्च । 'कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति' 'देवैरत्रापि विचिकित्सितं पुरा' 'नैषा तर्केण मतिरापनेया' वरप्रसादलभ्यत्वश्रुतिस्मृतिवादेभ्यश्च । 'तदेजति तन्नैजति तद्दूरे तद्वतिके' इत्यादिविरुद्धधर्मसमवायित्वप्रकाशकमन्त्रवर्णेभ्यश्च । गीतासु च "मत्स्थानि सर्व भूतानि" इत्यादि । तस्मात्परब्रह्मव्यतिरेकेण संसारी नाम नान्यद्वस्त्वतरमस्ति । तस्मात्सुष्ठूच्यते 'ब्रह्म वा इदमग्र आसीत्' 'तदात्मानमेवावेत्' 'अहं ब्रह्मास्मि' 'नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ' इत्यादिश्रुतिशतेभ्य । तस्मात्परस्यैव ब्रह्मण. सत्यस्य सत्यं नामोपनिषत्परा ॥२०॥ इति प्रथमं ब्राह्मणम् ॥

'ब्रह्म ज्ञपयिष्यामि' इति प्रस्तुतम् । तत्र यतो जगज्जातं यन्मयं यस्मिंश्च लीयते तदेकं ब्रह्मेति ज्ञापितम् । किमात्मकं पुनस्तज्जगज्जायते लीयते च[1] पंचभूतात्मकम् । भूतानि च नामरूपात्मकानि । नामरूपे सत्यमिति श्रुक्तम् । तस्य सत्यस्य पंचभूतात्मकस्य सत्यं ब्रह्म । कथं पुनर्भूतानि सत्यमिति मूर्तामूर्तब्राह्मणम् । मूर्तामूर्तभूतात्मकत्वात्कार्यकरणात्मकानि भूतानि प्राणा अपि सत्यम् । तेषा कार्यकरणात्मकाना भूताना सतत्त्वनिर्दिधारयिषया ब्राह्मणद्वयमारभ्यते सैवोपनिषद्व्याख्या । कार्यकरणसत्यत्वावधारणद्वारेण हि सत्यस्य सत्यं ब्रह्मावधार्यते । अत्रोक्तम् 'प्राणा वै सत्यं तेषामेष सत्यम्' इति । तत्र के प्राणा कियत्यो वा प्राणविषया उपनिषद का इति च ब्रह्मोपनिषद्प्रसंगेन करणाना प्राणानां स्वरूपमवधारयति, पथिगतकूपारामाद्यवधारणवत् ॥

यो ह वै शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद सप्त ह द्विषतो

भ्रातृव्यानवरुणद्धि । अयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाधानमिदं प्रत्याधानं प्राणः स्थूणान्नं दाम ॥१॥

यो ह वै शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद तस्येदं फलम् । किं तत् । सप्त सप्तसंख्याकान्ह द्विषतो द्वेषकर्तॄन्भ्रातृव्यान् । भ्रातृव्याहि द्विविधा भवन्ति द्विषन्तोऽद्विषन्तश्च तत्र द्विषन्तो ये भ्रातृव्यास्तान् । द्विषतो भ्रातृव्यानवरुणद्धि । सप्त ये शीर्षण्याः प्राणा विषयोपलब्धिद्वाराणि तत्प्रभवा विषयरागाः सहजत्वात् भ्रातृव्याः । ते ह्यस्य स्वात्मस्थां दृष्टिं विषयविषयां कुर्वन्ति, तेन ते द्वेष्टारो भ्रातृव्याः । प्रत्यगात्मेक्षणप्रतिषेधकरत्वात् । काठके चोक्तं— 'परांचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्' इत्यादि । तत्र यः शिश्नादीन्वेद तेषां याथात्म्यमवधारयति, स एतान्भ्रातृव्यानवरुणद्धयपावृणोति विनाशयति । तस्मै फलश्रवणेनाभिमुखीभूतायाह— अयं वाव शिशुः । कोऽसौ ? योऽयं मध्यमः प्राणः शरीरमध्ये यः प्राणो लिंगात्मा, यः पंचधा शरीरमाविष्टो बृहन्पांडरवासः सोम राजन्नित्युक्तः । यस्मिन्वाङ्मनःप्रभृतीनि करणानि विषक्तानि षड्वीशशंकुनिदर्शनात् । स एष शिशुरिव विषयेष्वितरकरणवदपटुत्वात् । शिशुं साधानमित्युक्तम् । किं पुनस्तस्य शिशोर्वत्सस्थानीयस्य करणात्मन आधानम् ? तस्येदमेव शरीरमाधानं कार्यात्मकम् । आधीयतेऽस्मिन्नित्याधानम् । तस्य हि शिशोः प्राणस्येदं शरीरमधिष्ठानम् । अस्मिन्हि करणान्यधिष्ठितानि लब्धात्मकान्युपलब्धिद्वाराणि भवन्ति, न तु प्राणमात्रे विषक्तानि । तथा हि दर्शितमजातशत्रुणा— उपसंहृतेषु करणेषु विज्ञानमयो नोपलभ्यते, शरीरदेशव्यूढेषु तु करणेषु विज्ञानमय उपलभमान उपलभ्यते । तच्च दर्शितं पाणिपेषप्रतिबोधनेन । इदं प्रत्याधानं शिरः । प्रदेशविशेषेषु प्रति प्रत्याधीयत इति प्रत्याधानम् । प्राणः स्थूणा अन्नपानजनिता शक्तिः प्राणो बलमिति पर्यायः । बलावष्टंभो हि प्राणोऽस्मिञ्छरीरे । 'स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव' इति दर्शनात् । यथा वत्सः स्थूणावष्टंभ एवम् । शरीरपक्षपाती वायुः प्राणः स्थूणेति केचित् । अन्नं दाम । अन्नं हि भुक्तं त्रेधा परिणमते । यः स्थूलः परिणामः स एतद्द्वयं भूत्वेमामप्येति मूत्रं च पुरीषं च । यो मध्यमो रसः स रसो लोहितादिक्रमेण स्वकार्यं शरीरं सप्तधातुकमुपचिनोति । स्वयोन्यन्नागमे हि शरीरमुपचीयतेऽन्नमयत्वात् । विपर्ययेऽपक्षीयते पतति ।

यस्त्वणिष्ठो रसोऽमृतमूर्ध्वप्रभाव इति च कथ्यते, स नाभेरूर्ध्वं हृदयदेशमागत्य हृदयाद्विप्रसृतेषु द्वासप्ततिनाडीसहस्रेष्वनुप्रविश्य यत्तत्करणसंघातरूपं लिंगं शिशुसंज्ञकं, तस्य शरीरे स्थितिकारण भवति बलमुपजनयत्स्थूणाख्यम् । तेनान्नमुभयत प.शवत्सदामवत्प्राण शरीरयोर्निबंधनं भवति ॥१॥

इदानीं तस्यैव शिशो प्रत्याधान ऊढस्य चक्षुषि काश्चनोपनिषद उच्यन्ते—

तमेता. सप्ताक्षितय उपतिष्ठन्ते तद्या इमा अक्षन्लोहिन्यो राजयस्ताभिरेन रुद्रोऽन्वायत्तोऽथ या अक्षन्नापस्ताभि. पर्जन्यो या कनीनका तयादित्यो यत्कृष्ण तेनाग्निर्यच्छुक्लं तेनेद्रोऽधरयैन वर्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्न क्षीयते य एव वेद ॥२॥

तमेता सप्ताक्षितय उपतिष्ठन्ते । त करणात्मक प्राणं शरीरेऽन्नबंधन चक्षुष्यूढमेता वक्ष्यमाणा सप्त सप्तसख्याका अक्षितयोऽक्षितिहेतुत्वादुपतिष्ठन्ते । यद्यपि मत्रकरणे तिष्ठतिरुपपूर्व आत्मनेपदी भवति, इहापि सप्त देवताभिधानानि मंत्रस्थानीयानि करणानि, तिष्ठतेरतोऽत्राप्यात्मनेपद न विरुद्धम् । कास्ता अक्षितय इत्युच्यन्ते । तत्तत्र या इमा प्रसिद्धा अक्षन्नक्षणि लोहिन्यो लोहिता राजयो रेखा ताभिर्द्वारभूताभिरेनं मध्यमं प्राणं रुद्रोऽन्वायत्तोऽनुगत । अथ या अक्षन्नक्षण्यापो धूमादिसंयोगेनाभिव्यज्यमाना ताभिरद्भिर्द्वारभूताभि पर्जन्यो देवतात्माऽन्वायत्तोऽनुगत उपतिष्ठते इत्यर्थ । स चान्नभूतोऽक्षिति प्राणस्य । 'पर्जन्ये वर्षत्यानादिन प्राणा भवन्ति' इति श्रुत्यंतरात् । या कनीनका दृक्शक्तिस्तया कनानिकया द्वारेणादित्यो मध्यम प्राणमुपतिष्ठते । यत्कृष्ण चक्षुषि तेनैनमग्निरुपतिष्ठते । यच्छुक्लं चक्षुषि तेनेद्र. । अधरया वर्तन्या पक्ष्मणैन पृथिव्यन्वायत्ताऽधरत्वसामान्यात । द्यौरुत्तरयोर्ध्वत्वसामान्यात् । एता सप्तान्नभूता प्राणस्य सततमुपतिष्ठन्ते इत्येवं यो वेद तस्यैतत्फलं— नास्यान्नं क्षीयते य एव वेद ॥

तदेष श्लोको भवति । अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम् । तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा सविदानेति । अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं प्राणानेतदाह तस्याऽऽसत ऋषयः सप्त तीर इति प्राणा वा ऋषय प्राणानेतदाह वागष्टमी

ब्रह्मणा संविदानेति वाग्ध्यष्टमी ब्रह्मणा संवित्ते ॥३॥

तत्तत्रैतास्मिन्नर्थे एष श्लोको मंत्रो भवति— अर्वाग्बिलश्चमस इत्यादि । तत्र मंत्रार्थमाचष्टे श्रुति — अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति । कः पुनरसावर्वाग्बिलश्चमस ऊर्ध्वबुध्न ? इद तच्छिरश्चमसाकारं हि तत् । कथम् ? एष ह्यर्वाग्बिलो मुखस्य बिलरूपत्वाच्छिरसो बुध्नाकारत्वादूर्ध्वबुध्न । तस्मिन्यशो निहितं विश्वरूपमिति, यथा सोमश्चमसे एव तस्मिञ्छिरसि विश्वरूपं नानारूप निहित स्थितं भवति । किं पुनस्तत् यश , प्राणा वै यशो विश्वरूप प्राणा श्रोत्रादयो वायवश्च मरुत सप्तधा तेषु प्रसृता यश इत्येतदाह मत्र । शब्दादिज्ञानहेतुत्वात् । तस्याऽऽसत ऋषय सप्त तीर इति प्राणा परिस्पंदात्मका , त एव च ऋषय , प्राणानेतदाह मत्र । वागष्टमी ब्रह्मणा संविदानेति । ब्रह्मणा संवाद कुर्वत्यष्टमी भवति । तद्धेतुमाह— वाग्ध्यष्टमी ब्रह्मणा संवित्त इति ॥

इमावेव गोतमभरद्वाजावयमेव गोतमोऽय भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽय कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्न भवति य एव वेद ॥४॥ इति द्वितीयं ब्राह्मणम् ॥

के पुनस्तस्य चमसस्य तीर आसत ऋषय इति । इमावेव गोतमभरद्वाजौ कर्णावयमेव गोतमोऽयं भरद्वाजो दक्षिणश्चोत्तरश्च, विपर्ययेण वा । तथा चक्षुषी उपदिशन्नुवाचेमावेव विश्वामित्रजमदग्नी दक्षिण विश्वामित्र उत्तरं जमदग्निर्विपर्ययेण वा । इमावेव वासिष्ठकश्यपौ नासिके उपदिशन्नुवाच । दक्षिण पुटो भवति वसिष्ठ , उत्तर कश्यप पूर्ववत् । वागेवात्रि अदनक्रियायोगात्सप्तम । वाचा ह्यन्नमद्यते तस्मादत्तिर्ह वै प्रसिद्धं नामैतत् अत्तृत्वादत्तिरिति । अत्तिरेव सन्यदात्रिरित्युच्यते परोक्षेण । सर्वस्यैतस्यान्नजातस्य प्राणस्यात्रिर्निर्वचनविज्ञानादत्ता भवति । अत्तैव भवति नामुष्मिन्नन्नेन पुन प्रतिपद्यत इत्येतदुक्तं भवति सर्वमस्यान्नं भवतीति । य एवमेतद्यथोक्तं प्राणयाथात्म्यं वेद स एवं मध्यम प्राणो भूत्वा आधानप्रत्याधानगतो भोक्तैव भवति न भोज्यं, भोज्यात् व्यावर्तत इत्यर्थ· ॥ इति द्वितीयं ब्राह्मणम् ॥ २.२.—

द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च ॥१॥

तत्र प्राणा वै सत्यामित्युक्तम्। या प्राणानामुपनिषदस्ता ब्रह्मोपनिषत्प्रसंगेन व्याख्याता एते ते प्राणा इति च। ते किमात्मका कथं वा तेषां सत्यत्वमिति च वक्तव्यमिति पंचभूतानां सत्यानां कार्यकरणात्मकानां स्वरूपावधारणार्थमिदं ब्राह्मणमारभ्यते। यदुपाधिविशेषापनयद्वारेण 'नेति नेति' इति ब्रह्मण सतत्त्व निर्दिधारयिषितम्। तत्र द्विरूप ब्रह्म पंचभूतजनितकार्यकरणसंबद्ध मूर्तामूर्ताख्य मर्त्यामृतस्वभाव तज्जनितवासनारूपं च सर्वज्ञं सर्वशक्ति सोपाख्यं भवति। क्रियाकारकफलात्मक च सर्वव्यवहारास्पदम्। तदेव ब्रह्म विगतसर्वोपाधिविशेषं सम्यग्दर्शनविषयं अजमजरममृतमभय वाङ्मनसयोरप्यविषयमद्वैतत्वात् 'नेति नेति' इति निर्दिश्यते। तत्र यदपोहद्वारेण 'नेति नेति' इति निर्दिश्यते ब्रह्म ते एते द्वे वाव। वावशब्दोऽवधारणार्थ। द्वे एवेत्यर्थ। ब्रह्मण परमात्मनो रूपे रूप्यते याभ्यामरूपं परं ब्रह्म अविद्याध्यारोप्यमाणाभ्याम्। के ते द्वे? मूर्तं चैव मूर्तमेव च। तथाऽमूर्त चामूर्तमेव चेत्यर्थ। अंतर्णीतस्वात्मविशेषणे मूर्तामूर्ते द्वे एवेत्यवधार्येते। कानि पुनस्तानि विशेषणानि मूर्तामूर्तयोरित्युच्यन्ते— मर्त्यं च मर्त्यं मरणधर्म्यमृत च तद्विपरीतं, स्थितं च परिच्छिन्नं गतिपूर्वकं यत्स्थास्नु, यच्च यातीति यत् व्याप्यपरिच्छिन्न स्थितविपरीत, सच्च सदित्यन्येभ्यो विशेष्यमाणासाधारणधर्मविशेषवत्, त्यच्च तद्विपरीतं त्यदित्येव सर्वदा परोक्षाभिधानार्हम्॥

तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥२॥

तत्र चतुष्टयविशेषणविशिष्टं मूर्तं तथा अमूर्तं च। तत्र कानि मूर्तविशेषणानि कानि चेतराणीति विभज्यते। तदेतन्मूर्तं मूर्छितावयवं इतरेतरानुप्रविष्टावयवं घनं संहतमित्यर्थ। किं तद्यदन्यत्? कस्मादन्यत्? वायोश्चान्तरिक्षाच्च भूतद्वयात्परिशेषात्पृथिव्यादिभूतत्रयम्। एतन्मर्त्यं यदेतन्मूर्ताख्यं भूतत्रयमिदं मर्त्यं मरणधर्मि। कस्मात्? यस्मात्स्थितमेतत्। परिच्छिन्नं ह्यर्थान्तरेण संप्रयुज्यमानं विरुध्यते। यथा घट स्तंभकुड्यादिना। तथा मूर्तं स्थितं परिच्छिन्न-

मर्थान्तरसंबंधि ततोऽर्थान्तरविरोधान्मर्त्यम् । एतत्सद्विशेष्यमाणासाधारणधर्मवत् । तस्माद्धि परिच्छिन्नं परिच्छिन्नत्वान्मर्त्यमतो मूर्तम् । मूर्तत्वाद्वा मर्त्य मर्त्यत्वात्स्थित स्थितत्वात्सत् । अतोऽन्योन्याव्यभिचाराच्चतुर्णा धर्माणा यथेष्टं विशेषणविशेष्यभावो हेतुहेतुमद्भावश्च दर्शयितव्य । सर्वथापि तु भूतत्रयं चतुष्टयविशेषणविशिष्ट मूर्त रूप ब्रह्मण । तत्र चतुर्णामेकस्मिन्गृहीते विशेषणे इतरद्गृहीतमेव विशेषणमित्याह— तस्यैतस्य मूर्तस्य एतस्य मर्त्यस्य एतस्य स्थितस्य एतस्य सत चतुष्टयविशेषणस्य भूतत्रयस्येत्यर्थ । एष रस सार इत्यर्थ । त्रयाणा हि भूताना सारिष्ठ सविता । एतत्साराणि त्रीणि भूतानि यत एतत्कृतविभज्यमानरूपविशेषणानि भवन्ति । आधिदैविकस्य कार्यस्यैतद्रूप यत्सविता यदेतन्मडल तपति । सतो भूतत्रयस्य हि यस्मादेष रस इत्येतत् गृह्यते । मूर्तो ह्येष सविता तपति । सारिष्ठश्च । यत्तु आधिदैविक करण मडलस्या-यतर तद्वक्ष्याम ॥

अथामूर्तं वायुश्चान्तरिक्ष चैतदमृतमेतद्यदेतत्त्यत्तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मडले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतम् ॥३॥

अथामूर्तं— अथाधुनाऽमूर्तमुच्यते । वायुश्चान्तरिक्षं च यत्परिशेषित भूतद्वय एतदमृतममूर्तत्वादस्थितं अतोऽविरुध्यमानं केनचित् अमृतममरणधर्मि, एतद्यत्स्थितविपरीत व्यापि अपरिच्छिन्न, यस्मादेतदन्येभ्योऽप्रविभज्यमानविशेषमतस्त्यत्, त्यदिति परोक्षाभिधानार्हमेव पूर्ववत्। तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्य चतुष्टयावेशेषणस्यामूर्तस्यैष रस । कोऽसौ ? य एष एतस्मिन्मडले पुरुष करणात्मको हिरण्यगर्भ , प्राण इत्यभिधीयते य. । स एषोऽमूर्तस्य भूतद्वयस्य रस पूर्ववत्सारिष्ठ । एतत्पुरुषसारं चामूर्त भूतद्वय हैरण्यगर्भलिंगारंभाय हि भूतद्वयाभिव्यक्ति अव्याकृतात् । तस्मात्तादर्थ्यात्तत्सारं भूतद्वयम् । त्यस्य ह्येष रसो यस्माद्यो मडलस्थ पुरुषो मडलवन्न गृह्यते सारश्च भूतद्वयस्य । तस्माद्यस्ति मंडलस्थस्य पुरुषस्य भूतद्वयस्य च साधर्म्यम् । तस्माद्युक्तं प्रसिद्धवद्धेतूपादानं, त्यस्य ह्येष रस इति ॥

रस. कारणं हिरण्यगर्भविज्ञानात्मा चेतन इति केचित् । तत्र च किल हिरण्यगर्भविज्ञानात्मन कर्म वाय्वंतरिक्षयो प्रयोक्तृ, तत्कर्म वाय्वंतरिक्षाधारं

सदन्येषा भूताना प्रयोक्तृ भवति। तेन स्वकर्मणा वाय्वंतरिक्षयो प्रयोक्तेति तयो रस कारणमुच्यत इति। तन्न। मूर्तरसेनातुल्यत्वात्। मूर्तस्य तु भूतत्रयस्य रसो मूर्तमेव मंडल दृष्ट भूतत्रयसमानजातीयं, न चेतन। तथाऽमूर्तयोरपि भूतयोस्तत्समानजातीयेनैवामूर्तरसेन युक्त भवितुम्। वाक्यप्रवृत्तेस्तुल्यत्वात्। यथा हि मूर्तामूर्ते चतुष्टयधर्मवती विभज्येते, तथा रसग्रसवतोरपि मूर्तामूर्तयो तुल्येनैव न्यायेन युक्तो विभाग। न त्वर्थवैशसम्। मूर्तरसेऽपि मंडलोपाधिश्चेतनो विवक्ष्यत इति चेत्। अल्पमिदमुच्यते। सर्वत्रैव तु मूर्तामूर्तयोर्ब्रह्मरूपेण विवक्षितत्वात्। पुरुषशब्दोऽचेतनोऽनुपपन्न इति चेत्। न। पक्षपुच्छादिविशिष्टस्यैव लिंगस्य पुरुषशब्ददर्शनात्। "न वा इत्थं सन्त शक्ष्याम प्रजा प्रजनयितुमिमान्सप्त पुरुषानेकं पुरुष करवामेति त एतान्सप्त पुरुषानेक पुरुषमकुर्वन्" इत्यादो अन्नरसमयादिषु च श्रुत्यतरे पुरुषशब्दप्रयोगात्। इत्यधिदैवतमित्युक्तोपसंहारोऽध्यात्मविभागोक्त्यर्थं ॥

अथाध्यात्ममिदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमंतरात्मन्नाकाश एतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रस ॥४॥

अथाधुनाऽध्यात्मं मूर्तामूर्तयोर्विभाग उच्यते। किं तन्मूर्तं? इदमेव। किंचेदं? यदन्यत्प्राणाच्च वायोर्यश्चायमंतरभ्यंतरे आत्मन्नात्मन्याकाश खं शरीरस्थश्च य प्राण एतत् द्वयं वर्जयित्वा यदन्यच्छरीरारभक भूतत्रयम्। एतन्मर्त्यमित्यादि समानमन्यत्पूर्वेण। एतस्य सतो ह्येष रसो यच्चक्षुरिति। आध्यात्मिकस्य शरीरारभकस्य कार्यस्यैष रस सार तेन हि सारेण सारवदिदं शरीरं समस्त यथाधिदैवतमादित्यमडलेन। प्राथम्याच्च। चक्षुषी एव प्रथमे सभवतः संभवत इति। 'तेजो रसो निरवर्ततामि' इति लिंगात्। तैजसं हि चक्षु। एतत्सारं आध्यात्मिकं भूतत्रयम्। सतो ह्येष रस इति मूर्तत्वसारत्वे हेत्वर्थ ॥

अथामूर्तं प्राणश्च यश्चायमंतरात्मन्नाकाश एतदमृतमेतद्यदेतत्त्यत्तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽय दक्षिणेऽक्षन्पुरुषस्तस्यैष ह्येष रसः ॥५॥

अथाधुनाऽमूर्तमुच्यते। यत्परिशेषितं भूतद्वयं प्राणश्च यश्चायमंतरात्मन्नाकाश. एतदमूर्तम्। अन्यत्पूर्ववत्। एतस्य त्यस्यैष रस सारो योऽय दक्षिणे-

ऽक्षन्पुरुष । दक्षिणेऽक्षन्निति विशेषग्रहणं शास्त्रप्रत्यक्षत्वात् । लिगस्य हि दक्षिणेऽक्षि विशेषतोऽधिष्ठातृत्व शास्त्रस्य प्रत्यक्षं सर्वश्रुतिषु तथा प्रयोगदर्शनात् । त्यस्य ह्येष रस इति पूर्ववद्विशेषतोऽग्रहणादमूर्तत्वसारत्व एव हेत्वर्थ ॥

तस्य हैतस्य पुरुषस्य रूपम् । यथा माहारजनं वासो यथा पाण्डावि(ड्वा)क यथेद्रगोपो यथाग्न्यर्चिर्यथा पुंडरीक यथा सकृद्विद्युत्तं सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एव वेदाथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेय सत्यस्य सत्यमिति प्राणा वै सत्य तेषामेष सत्यम् ॥६॥ इति तृतीय ब्राह्मणम् ॥

ब्रह्मण उपाधिभूतयोर्मूर्तामूर्तयो कार्यकरणविभागेन अध्यात्माधिदैवतयोर्विभागो व्याख्यात सत्यशब्दवाच्ययो । अथेदानी तस्य हैतस्य पुरुषस्य करणात्मनो लिगस्य रूपं वक्ष्यामो वासनामयं मूर्तामूर्तवासनाविज्ञानमयसयोगजनित विचित्र पटाभित्तिचित्रवत् मायेद्रजालमृगतृष्णिकोपमं सर्वव्यामोहास्पदम् । एतावन्मात्रमेव आत्मेति विज्ञानवादिनो वैनाशिका यत्र भ्रान्ता । एतदेव वासनारूपं पटरूपवदात्मनो द्रव्यस्य गुण इति नैयायिका वैशेषिकाश्च सप्रतिपन्ना । इदमात्मार्थ त्रिगुणं स्वतत्र प्रधानाश्रय पुरुषार्थेन हेतुना प्रवर्तत इति साख्या ॥

औपनिषदंमन्या अपि केचित्प्रक्रिया रचयन्ति—मूर्तामूर्तराशिरेक, परमात्मराशिरुत्तम, ताभ्यामन्योऽय मध्यम किल तृतीय, कर्त्रा भोक्त्रा विज्ञानमयेन अजातशत्रुप्रतिबोधितेन सह विद्याकर्मपूर्वप्रज्ञासमुदाय । प्रयोक्ता कर्मराशि प्रयोज्य पूर्वोक्तो मूर्तामूर्तभूतराशि साधनं चेति । तत्र च तार्किकै सह संधिं कुर्वन्ति । लिंगाश्रयश्चैष कर्मराशिरित्युक्त्वा पुनस्ततस्त्रस्यन्त साख्यत्वभयात्सर्वं कर्मराशि पुष्पाश्रय इव गंध पुष्पवियोगेऽपि पुटतैलाश्रयो भवति, तद्वल्लिंगवियोगेऽपि परमात्मैकदेशमाश्रयति । स परमात्मैकदेश किलान्यत आगतेन गुणेन कर्मणा सगुणो भवति निर्गुणोऽपि सन्, स कर्ता भोक्ता बध्यते मुच्यते च विज्ञानात्मा, इति वैशेषिकचित्तमप्यनुसरन्ति । स च कर्मराशि. भूतराशेरागंतुक स्वतो निर्गुण एव परमात्मैकदेशत्वात् । स्वत उत्थिता अविद्या अनागंतुकाप्यूषरवदनात्मधर्म, इत्यनया कल्पनया सांख्यचित्तमनुवर्तन्ते ॥

सर्वमेतत्तार्किकैः सह सामजस्यकल्पनया रमणीय पश्यन्ति, नोपनिषत्सिद्धान्तं सर्वन्यायविरोधं च पश्यन्ति। कथम्? उक्ता एव तावत्सावयवत्वे परमात्मन ससारित्वसव्रणत्वकर्मफलदेशसंसरणानुपपत्त्यादयो दोषा। नित्यभेदे च विज्ञानात्मनः परेणैकत्वानुपपत्तिः। लिंगमेवेति चेत्परमात्मन उपचरितदेशत्वेन कल्पितं घटकरकभूछिद्राकाशादिवत्। तथा लिंगवियोगेऽपि परमात्मदेशाश्रयणं वासनाया। अविद्यायाश्च स्वत उत्थान ऊषरवत् इत्यादिकल्पनाऽनुपपन्नैव। न च वास्यदेशव्यतिरेकेण वासनाया वस्त्वंतरसंचरणं मनसापि कल्पयितुं शक्यम्। न च श्रुतयो अवगच्छन्ति 'काम सकल्पो विचिकित्सा' 'हृदये ह्येव रूपाणि' 'न्यायतीव लेलायतीव' 'कामा येऽस्य हृदि श्रिता' 'तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य' इत्याद्या। न चासा श्रुतीना श्रुतादर्थान्तरकल्पना न्याय्या। आत्मन परब्रह्मत्वोपपादनार्थपरत्वादासा एतावन्मात्रार्थोपक्षयत्वाच्च सर्वोपनिषदाम्। तस्मात् श्रुत्यर्थकल्पनाकुशला सर्व एवोपनिषदर्थमन्यथा कुर्वन्ति। तथापि वेदार्थश्चेत्स्यात्काम भवतु न मे द्वेष। न च 'द्वे वाव ब्रह्मणो रूपे' इति राशित्रयपक्षे समजसम्। यदा तु मूर्तामूर्ते तज्जनितवासनाश्च मूर्तामूर्ते द्वे रूपे, ब्रह्म च रूपि तृतीय, न चान्यच्चतुर्थमतराले, तदा एतदनुकूलमवधारण द्वे एव ब्रह्मणो रूपे इति। अन्यथा ब्रह्मैकदेशस्य विज्ञानात्मनो रूपे इति कल्प्य, परमात्मनो वा विज्ञानात्मद्वारेणेति। तदा च रूपे एवेति द्विवचनमसमंजसम्। रूपाणीति वासनाभि सह बहुवचन युक्ततरं स्यात्, द्वे च मूर्तामूर्ते वासनाश्च तृतीयमिति। अथ मूर्तामूर्ते एव परमात्मनो रूपे वासनास्तु विज्ञानात्मन इति चेत्। तदा विज्ञानात्मद्वारेण विक्रियमाणस्य परमात्मन इतीय वाचो युक्तिरनर्थिका स्यात्। वासनाया अपि विज्ञानात्मद्वारत्वस्य अविशिष्टत्वात्। न च वस्तु वस्त्वंतरद्वारेण विक्रियत इति मुख्यया वृत्त्या शक्यं कल्पयितुम्। न च विज्ञानात्मा परमात्मनो वस्त्वंतरम्। तथा कल्पनाया सिद्धातहानात्। तस्मात् वेदार्थमूढाना स्वचित्तप्रभवा एवमादिकल्पना अक्षरबाह्याः। न ह्यक्षरबाह्यो वेदार्थो वेदार्थोपकारी वा, निरपेक्षत्वाद्वेदस्य प्रामाण्यं प्रति। तस्मात् राशित्रयकल्पना असमंजसा॥

'योऽयं दक्षिणेऽक्षन्पुरुष' इति लिगात्मा प्रस्तुतोऽध्यात्मे, अधिदैवे च 'य एष एतस्मिन्मंडले पुरुष' इति, 'तस्य' इति प्रकृतोपादानात्स एवोपादीयते

योऽसौ त्यस्यामूर्तस्य रसो न तु विज्ञानमय । ननु विज्ञानमयस्यैवैतानि रूपाणि कस्मान्न भवन्ति विज्ञानमयस्यापि प्रकृतत्वात्, तस्येति च प्रकृतोपादानात् । नैव, विज्ञानमयस्यारूपित्वेन विजिज्ञापयिषितत्वात् । यदि हि तस्यैव विज्ञानमयस्यैतानि माहारजनादानि रूपाणि स्युस्तस्यैव 'नेति नेति' इत्यनाख्येयरूपतयाऽऽदेशो न स्यात् । ननु अन्यस्यैवासावादेशो न तु विज्ञानमयस्येति । न । षष्ठान्ते उपसहारात् 'विज्ञातारमरे केन विजानीयात्' इति विज्ञानमय प्रस्तुत्य 'स एष नेति नेति' इति, 'विज्ञापयिष्यामि' इति च प्रतिज्ञाया अर्थवत्त्वात् । यदि च विज्ञानमयस्यैव असव्यवहार्यमात्मस्वरूप ज्ञापयितुमिष्ट स्यात्प्रध्वस्तसर्वोपाधिविशेष तत इय प्रतिज्ञाऽर्थवती स्यात् । येनासौ ज्ञापितो जानात्यात्मानमेवाह ब्रह्मास्मीति, शास्त्रनिष्ठा प्राप्नोति न बिभेति कुतश्चन । अथ पुनरन्यो विज्ञानमयोऽन्यो 'नेति नेति' इति व्यपदिश्यते तदाऽन्यददो ब्रह्मान्योऽहमस्मीति विपर्ययो गृहीत स्यात् । न 'आत्मानमेवावेदह ब्रह्मास्मि' इति । तस्मात् 'तस्य हतस्य' इति लिगपुरुषस्यैवैतानि रूपाणि ॥

सत्यस्य च सत्ये परमात्मस्वरूपे वक्तव्ये निरवशेष सत्य वक्तव्यम् । सत्यस्य च विशेषरूपाणि वासना , तासामिमानि रूपाण्युच्यन्ते । एतस्य पुरुषस्य प्रकृतस्य लिगात्मन एतानि रूपाणि । कानि तानीत्युच्यन्ते— यथा लोके माहारजन हरिद्रा तया रक्त माहारजन यथा वासो लोके । एवं स्त्र्यादिविषयसयोगे तादृश वासनारूपं रजनाकारमुत्पद्यते चित्तस्य । येनासौ पुरुषो रक्त इत्युच्यते वस्त्रादिवत् । यथा च लोके पाङ्क्तविकम् । अवेरिदमाविकमूर्णादि । यथा च तत्पाडुर भवति तथाऽन्यद्वासनारूपम् । यथा च लोके इद्रगोपोऽत्यंतरक्तो भवत्येवमस्य वासनारूपम् । क्वचिद्विषयविशेषापेक्षया रागस्य तारतम्यं क्वचित्पुरुषचित्तवृत्त्यपेक्षया । यथा च लोकेऽग्न्यर्चिर्भास्वरं भवति तथा क्वचित्कस्यचिद्वासनारूप भवति । यथा पुंडरीक शुक्ल, तद्वदपि च वासनारूप कस्यचिद्भवति । यथा सकृद्विद्युत्त, यथा लोके सकृद्विद्योतन सर्वत प्रकाशक भवति तथा ज्ञानप्रकाशविवृद्धयपेक्षया कस्यचिद्वासनारूपमुपजायेत । नैषा वासनारूपाणामादिरंतो मध्यं संख्या वा देश कालो निमित्तं वावधार्यते । असंख्येयत्वाद्वासनाया वासनाहेतूना चानंत्यात् । तथा च वक्ष्यति षष्ठे 'इदंमयोऽदोमय' इत्यादि । तस्मान्न स्वरूपसंख्यावधारणार्था दृष्टान्ता 'यथा माहा-

रजनं वास ' इत्यादय । किं तर्हि प्रकारप्रदर्शनार्था । एवंप्रकाराणि हि वासनारूपाणीति । यत्तु वासनारूपमभिहितमेते सकृद्विद्योतनामिवेति, तत्किल हिरण्यगर्भस्य अव्याकृतात्प्रादुर्भवत तडिद्वत्सकृदेव व्यक्तिर्भवतीति । तत्तदीय वासनारूप हिरण्यगर्भस्य यो वेद तस्य सकृद्विद्युत्तेव । ह वै इत्यवधारणार्थो । एवमेवास्य श्री ख्यातिर्भवतीत्यर्थ । यथा हिरण्यगर्भस्य । एवमेतद्यथोक्त वासनारूपमस्य यो वेद ॥

एव निरवशेषं सत्यस्य स्वरूपमभिधाय यत्तत्सत्यस्य सत्यमवोचाम तस्यैव स्वरूपावधारणार्थं ब्रह्मण इदमारभ्यते— अथानतरं सत्यस्वरूपनिर्देशानतर, यत्सत्यस्य सत्यं तदेवावशिष्यते यस्मादतस्तस्मात्सत्यस्य सत्य स्वरूप निर्देक्ष्याम । आदेशो निर्देशो ब्रह्मण । क पुनरसौ निर्देश इत्युच्यते— नेति नेतीत्येवं निर्देश ॥

ननु कथमाभ्या 'नेति नेति' इति शब्दाभ्या सत्यस्य सत्य निर्दिदिक्षितमिति । उच्यते—सर्वोपाधिविशेषापोहेन । यस्मिन्न कश्चिद्विशेषोऽस्ति नाम वा रूपं वा कर्म वा भेदो वा जातिर्वा गुणो वा । तद्द्वारेण हि शब्दप्रवृत्तिर्भवति । न चैषा कश्चिद्विशेषो ब्रह्मण्यस्ति । अतो न निर्देष्टुं शक्यत इद तदिति । गौरसौ स्पंदते शुक्लो विषाणीति यथा लोके निर्दिश्यते तथा । अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते 'विज्ञानमानद ब्रह्म' 'विज्ञानघन एव ब्रह्मात्मा' इत्येवमादिशब्दै । यदा पुन स्वरूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषं, तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुम् । तदा अयमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण 'नेति नेति' इति निर्देश ॥

इदं च नकारद्वयं वीप्साव्याप्त्यर्थम् । यद्यत्प्राप्तं तत्तन्निषिध्यते । तथाच सति अनिर्दिष्टाशका ब्रह्मण परिहृता भवति । अन्यथा हि नकारद्वयेन प्रकृतद्वयप्रतिषेधे यदन्यत्प्रकृतात्प्रतिषिद्धद्वयाद्ब्रह्म तन्न निर्दिष्ट, कीदृश तु खलु इत्याशंका न निवर्तिष्यते । तथा चानर्थकश्च स निर्देश पुरुषस्य विविदिषाया अनिवर्तकत्वात् । 'ब्रह्म ज्ञपयिष्यामि' इति च वाक्यमपरिसमाप्तार्थ स्यात् । यदा तु सर्वादिष्कालादिविविदिषा निवर्तिता स्यात्सर्वोपाधिनिराकरणद्वारेण तदा सैन्धवघनवदेकरसं प्रज्ञानघनमनंतरमबाह्य सत्यस्य सत्यमहं ब्रह्मास्मीति सर्वतो

निवर्तते विविदिषा, आत्मन्येवावास्थिता प्रज्ञा भवति । तस्माद्वीप्सार्थ नेति नेतीति नकारद्वयम् ॥

ननु महता यत्नेन परिकरबंध कृत्वा किं युक्तमेवं निर्देष्टु ब्रह्म? बाढम् । कस्मात्? न हि यस्मादिति नेति नेत्येतस्मात् इतीति व्याप्तव्यप्रकारा नकारद्वय-विषया निर्दिश्यन्ते । यथा ग्रामो ग्रामो रमणीय इत्यन्यत्परं निर्देशनं नास्ति । तस्मादयमेव निर्देशो ब्रह्मण । यदुक्त 'तस्योपनिषत्सत्यस्य सत्यमिति' एव-प्रकारेण सत्यस्य सत्यं तत्परं ब्रह्म । अतो युक्तमुक्त नामधेय ब्रह्मण । नामैव नामधेयम् । किं तत्सत्यस्य सत्य प्राणा वै सत्यं तेषामेष सत्यमिति ॥ इति तृतीयं ब्राह्मणम् ॥ २ ३.—

आत्मेत्येवोपासीत । तदेवैतस्मिन्सर्वस्मिन्पदनीयमात्मतत्त्व यस्मात्प्रेय पुत्रादे इत्युपन्यस्तस्य वाक्यस्य व्याख्यानविषये सबधप्रयोजने अभिहिते— 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' इति । एव प्रत्यगात्मा ब्रह्मविद्याया विषय इत्येतदुपन्यस्तम् । अविद्यायाश्च विषयो 'अन्योऽसावन्यो-ऽहमस्मीति न स वेद' इत्यारभ्य चातुर्वर्ण्यप्रविभागादिनिमित्तपाक्तकर्मसाध्यसा-धनलक्षणो बीजाकुरवद्याकृताव्याकृतस्वभावो नामरूपकर्मात्मक संसार 'त्रयं वा इद नाम रूप कर्म' इत्युपसहृत शास्त्रीय उत्कर्षलक्षणो ब्रह्मलोकान्तोऽधो-भावश्च स्थावरान्तोऽशास्त्रीय पूर्वमेव प्रदर्शितो 'द्वया ह' इत्यादिना । एतस्माद-विद्याविषयाद्विरक्तस्य प्रत्यगात्मविषयब्रह्मविद्यायामधिकार कथं नाम स्यादिति तृतीयेऽध्याये उपसहृत समस्तोऽविद्याविषय । चतुर्थे तु ब्रह्मविद्याविषयं प्रत्यगात्मान 'ब्रह्म ते ब्रवाणि' इति 'ब्रह्म ज्ञपयिष्यामि' इति च प्रस्तुत्य, तद्ब्रह्मै-कमद्वयं सर्वविशेषशून्य क्रियाकारकफलस्वभावसत्यशब्दवाच्याशेषभूतधर्मप्रति-षेधद्वारेण नेति नेतीति ज्ञापितम् । अस्या ब्रह्मविद्याया अंगत्वेन संन्यासो विधित्सित । जायापुत्रवित्तादिलक्षण पाक्तं कर्माविद्याविषयं यस्मान्नात्मप्राप्ति-साधनम् । अन्यसाधनं ह्यन्यस्मै फलसाधनाय प्रयुज्यमानं प्रतिकूल भवति । न हि बुभुक्षापिपासानिवृत्त्यर्थं धावनं गमन वा साधनम् । मनुष्यलोकपितृलोक-देवलोकसाधनत्वेन हि पुत्रादिसाधनानि श्रुतानि, नात्मप्राप्तिसाधनत्वेन । विशेषितत्वाच्च । न च ब्रह्मविदो विहितानि काम्यत्वश्रवणात् 'एतावान्वैकाम·'

इति । ब्रह्मविदश्चाप्तकामत्वादाप्तकामस्य कामानुपपत्ते । 'येषा नोऽयमात्मायं लोक' इति च श्रुते ॥

केचित्तु ब्रह्मविदोऽप्येषणासबध वर्णयन्ति । तैर्बृहदारण्यकं न श्रुतम् । पुत्राद्येषणानामविद्वद्विषयत्वम् । विद्याविषये च 'येषा नोऽयमात्माऽय लोक' इत्यत 'कि प्रजया करिष्याम' इत्येष विभागस्तैर्न श्रुत श्रुत्या कृत । सर्वक्रियाकारकफलोपमर्दस्वरूपाया च विद्याया सत्या सह कार्यणाविद्याया अनुपपत्तिलक्षणश्च विरोधस्तैर्न विज्ञात । व्यासवाक्यं च तैर्न श्रुतम् । कर्मविद्यास्वरूपयोर्विद्याविद्यात्मकयो प्रतिकूलवर्तन विरोध । "यदिद वेदवचन कुरु कर्म त्यजेति च । का गति विद्यया यान्ति का च गच्छन्ति कर्मणा ॥ एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे । एतावन्योन्यवैरूप्ये वर्तेते प्रतिकूलत ॥" इत्येव पृष्टस्य प्रतिवचनेन— 'कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतय पारदर्शिन ॥" इत्येवमादिविरोध प्रदर्शित । तस्मान्न साधनान्तरसहिता ब्रह्मविद्या पुरुषार्थसाधन सर्वविरोधात्साधननिरपेक्षैव पुरुषार्थसाधनमिति पारिव्राज्य सर्वसाधनसन्यासलक्षणमगत्वेन विधित्स्यते । एतावदेव अमृतसाधनमित्यवधारणात्षष्ठसमाप्तौ लिगाच्च कर्मी सन्याज्ञवल्क्य प्रव्रजेति । मैत्रेय्यै च कर्मसाधनरहितायै साधनत्वेनामृतत्वस्य ब्रह्मविद्योपदेशाद्वित्तनिदावचनाच्च । यदि ह्यमृतत्वसाधन कर्म स्याद्वित्तमाध्य पाक्तं कर्मेति, तन्निदावचनमनिष्टं स्यात् । यदि तु परित्यिाजयिषित कर्म, ततो युक्ता तत्साधननिदा । कर्माधिकारनिमित्तवर्णाश्रमादिप्रत्ययोपमर्दाच्च 'ब्रह्म तं परादात्' 'क्षत्रं तं परादात्' इत्यादे । नहि ब्रह्मक्षत्राद्यात्मप्रत्ययोपमर्दे, ब्राह्मणेनेद कर्तव्य क्षत्रियेणेद कर्तव्यमिति विषयाभावादात्मान लभते विधि । यस्यैव पुरुषस्योपमर्दित प्रत्ययो ब्रह्मक्षत्राद्यात्मविषय·, तस्य तत्प्रत्ययसंन्यासात्तत्कार्याणा कर्मणा कर्मसाधनाना च अर्थप्राप्तश्च सन्यास । तस्मादात्मज्ञानागत्वेन संन्यासविधित्सयैव आख्यायिकेयमारभ्यते ॥

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि हत तेऽनया कात्यायन्याऽन्तं करवाणीति ॥१॥

मैत्रेयीति होवाच याज्ञवल्क्य । मैत्रेयीं स्वभार्यामामन्त्रितवान्याज्ञवल्क्यो नाम ऋषि· । उद्यास्यन्नूर्ध्वं यास्यन्पारिव्राज्याख्यमाश्रमान्तरं वै । अरे इति

संबोधनम् । अहमस्माद्गार्हस्थ्यात्स्थानादाश्रमादूर्ध्वं गंतुमिच्छन्नस्मि भवामि । अतो हतानुमतिं प्रार्थयामि ते तव । किंचान्यत्ते तवानया द्वितीयया भार्यया कात्यायन्याऽन्तं विच्छेदं करवाणि । पतिद्वारेण युवयोर्मया संबध्यमानयोर्य सबंध आसीत्तस्य सबंधस्य विच्छेदं करवाणि द्रव्यविभागं कृत्वा वित्तेन संविभज्य युवां गमिष्यामि ॥

सा होवाच मैत्रेयी । यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव तज्जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥२॥

सा एवमुक्ता होवाच— यद्यदि ह्येतिं वितकें, मे ममेयं पृथिवी भगो भगवन्सर्वा सागरपरिक्षिप्ता वित्तेन धनेन पूर्णा स्यात् । कथं ? न कथंचनेत्याक्षेपार्थं प्रश्नार्थो वा । तेन पृथिवीपूर्णवित्तसाध्येन कर्मणाऽग्निहोत्रादिना अमृता किं स्यामिति व्यवहितेन संबंध । प्रत्युवाच याज्ञवल्क्य । कथमिति यद्याक्षेपार्थमनुमोदनं नेति होवाच याज्ञवल्क्य इति । प्रश्नश्चेत्प्रतिवचनार्थं, नैव स्या अमृता किं तर्हि, यथैव लोके उपकरणवतां साधनवतां जीवितं सुखोपायभोगसंपन्नं तथैव तद्वदेव तव जीवितं स्यादमृतत्वस्य तु नाशा मनसाध्यस्ति वित्तेन वित्तसाध्येन कर्मणेति ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥३॥

सा होवाच मैत्रेयी । एवमुक्ता प्रत्युवाच मैत्रेयी यद्येवं येनाहं नामृता स्यां किमहं तेन वित्तेन कुर्यां ? यदेव भगवान्केवलममृतत्वसाधनं वेद तदेवामृतत्वसाधनं मे मह्यं ब्रूहि ॥

स होवाच याज्ञवल्क्य प्रिया बतारे नः सती प्रियं भाषस एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥४॥

स होवाच याज्ञवल्क्य । एवं वित्तसाध्येऽमृतत्वसाधने प्रत्याख्याते याज्ञवल्क्य स्वाभिप्रायसपत्तौ तुष्ट आह । स होवाच— प्रियेष्टा । बतेत्यनुकंपायाह । अरे मैत्रेयि नोऽस्माकं पूर्वमपि प्रिया सती भवन्ती इदानीं प्रियमेव चित्तानुकूलं भाषसे । अत एह्यास्स्वोपविश्य व्याख्यास्यामि यत्ते तवेष्टममृतत्वसाधनमा-

त्मज्ञानं कथयिष्यामि। व्याचक्षाणस्य तु मे मम व्याख्यानं कुर्वतो निदिध्यासस्व वाक्यान्यर्थतो निश्चयेन ध्यातुमिच्छेति ॥४॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रिय भवत्यात्मनस्तु कामाय वित्तं प्रिय भवति। न वा अरे ब्रह्मण कामाय ब्रह्म प्रिय भवत्यात्मनस्तु कामाय ब्रह्म प्रिय भवति। न वा अरे क्षत्रस्य कामाय क्षत्र प्रिय भवत्यात्मनस्तु कामाय क्षत्र प्रिय भवति। न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति। न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति। न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति। न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रिय भवति। आत्मा वा अरे द्रष्टव्य श्रोतव्यो मतव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ॥५॥

स होवाच—अमृतत्वसाधन वैराग्यमुपदिदिक्षुः जायापतिपुत्रादिभ्यो विरागमुत्पादयति तत्संन्यासाय। न वै। वैशब्द प्रसिद्धस्मरणार्थ। प्रसिद्धमेवैतल्लोके। पत्युर्भर्तुः कामाय प्रयोजनाय जायायाः पतिः प्रियो न भवति, किं तर्ह्यात्मनस्तु कामाय प्रयोजनायैव भार्यायाः पतिः प्रियो भवति। तथा न वा अरे जायाया इत्यादि समानमन्यत्। न वा अरे पुत्राणाम्। न वा अरे वित्तस्य। न वा अरे ब्रह्मण। न वा अरे क्षत्रस्य। न वा अरे लोकानाम्। न वा अरे देवानाम्। न वा अरे भूतानाम्। न वा अरे सर्वस्य। पूर्वं पूर्वं यथासन्नं प्रीतिसाधनं वचनम्। तत्र तत्र इष्टतरत्वाद्वैराग्यस्य। सर्वग्रहणमुक्तानुक्तार्थम्। तस्मात् लोकप्रसिद्धमेतदात्मैव प्रियो नान्यत्। 'तदेतत् प्रेयः पुत्रात्' इत्युपन्यस्तं, तस्यैतत् वृत्तिस्थानीयं प्रपंचितम्। तस्मादात्मप्रीतिसाधनत्वाद्गौणी अन्यत्र प्रीतिरात्मन्येव मुख्या। तस्मादात्मा वै अरे द्रष्टव्यो दर्शनार्हो, दर्शनविषयमापादयितव्य। श्रोतव्य पूर्वमाचार्यत आगमतश्च। पश्चा-

न्मंतव्यस्तर्कत । ततो निदिध्यासितव्यो निश्चयेन ध्यातव्य एवं ह्यसौ दृष्टो भवति श्रवणमननिदिध्यासनसाधनैर्निर्वर्तितै । यदैकत्वमेतान्युपगतानि तदा सम्यग्दर्शनं ब्रह्मैकत्वविषय प्रसीदति, नान्यथा श्रवणमात्रेण । यद्ब्रह्मक्षत्रादि कर्मनिमित्तं वर्णाश्रमादिलक्षण आत्मन्यविद्याध्यारोपितप्रत्ययविषयं क्रियाकारक-फलात्मक अविद्याप्रत्ययविषय रज्ज्वामिव सर्पप्रत्यय, तदुपमर्दनार्थ आह— आत्मनि खल्वरे मैत्रेयि दृष्टे श्रुते मते विज्ञाते इद सर्व विदितं विज्ञातं भवति ॥

ब्रह्म त परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्र त परादाद्योऽन्यत्रात्मन· क्षत्रं वेद लोकास्त परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्त पुरादुर्योऽन्यत्रा-त्मनो देवान्वेद भूतानि त पुरादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं त परादाद्योऽन्यत्रात्मन सर्वं वेदेद ब्रह्मेद क्षत्रमिमे लोका इमे देवा इमानि भूतानीद सर्वं यदयमात्मा ॥६॥

ननु कथमन्यस्मिन्विदितेऽन्यद्विदित भवति? नैष दोष । न हि आत्म-व्यतिरेकेणान्यत्किंचिदस्ति । यद्यस्ति न तद्विदित स्यान्न त्वन्यदस्ति । आत्मैव तु सर्वम् । तस्मात्सर्वमात्मनि विदिते विदित स्यात् । कथ पुनरात्मैव सर्व-मित्येतच्छ्रावयति ब्रह्म ब्राह्मणजातिस्त पुरुष परादात्परादध्यात्पराकुर्यात् । क? योऽन्यत्रात्मन आत्मस्वरूपव्यतिरेकेण आत्मैव न भवतीयं ब्राह्मणजातिरिति तां यो वेद, त परादध्यात्सा ब्राह्मणजातिरनात्मस्वरूपेण मा पश्यतीति । परमात्मा हि सर्वेषामात्मा । तथा क्षत्र क्षत्रियजाति, तथा लोका देवा भूतानि सर्वम् । इदं ब्रह्मेति यान्यनुक्रान्तानि तानि सर्वाण्यात्मैव, यदयमात्मा योऽयमात्मा द्रष्टव्य श्रोतव्य इति प्रकृत । यस्मादात्मनो जायत आत्मन्येव लीयत आत्ममयं च स्थितिकाले आत्मव्यतिरेकेणाग्रहणात् आत्मैव सर्वम् ॥

स यथा दुंदुभेर्हन्यमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीतः ॥७॥

कथं पुनरिदानीमिदं सर्वमात्मैवेति ग्रहीतुं शक्यते? चिन्मात्रानुगमा-त्सर्वत्र चित्स्वरूपतैवेति गम्यते । तत्र दृष्टान्त उच्यते । यत्स्वरूपव्यतिरेकेणा-ग्रहणं यस्य, तस्य तदात्मत्वमेव लोके दृष्टम् । स यथा, स इति दृष्टान्तो, लोके यथा दुंदुभेर्भेर्यादेर्हन्यमानस्य ताड्यमानस्य दंडादिना न बाह्याञ्छब्दान् बहिर्भूताञ्छब्दविशेषान्दुंदुभिशब्दसामान्यानिकृष्टान्दुंदुभिशब्दविशेषान्न शक्नु-

यात् ग्रहणाय ग्रहीतुम् । दुदुभेस्तु ग्रहणेन दुंदुभिशब्दसामान्यविशेषत्वेन दुंदुभिशब्दा एत इति शब्दविशेषा गृहीता भवन्ति । दुंदुभिशब्दसामान्यव्यतिरेकेणाभावात्तेषाम् । दुंदुभ्याघातस्य वा दुदुभेराहननमाघातो, दुंदुभ्याघातविशिष्टस्य शब्दसामान्यस्य ग्रहणेन तद्गता विशेषा गृहीता भवन्ति । न तु त एव निर्भिद्य ग्रहीतुं शक्यन्ते विशेषरूपेणाभावात्तेषाम् । तथा प्रज्ञानव्यतिरेकेण स्वप्नजागरितयोर्न कश्चिद्वस्तुविशेषो गृह्यते । तस्मात्प्रज्ञानव्यतिरेकेण अभावो युक्तस्तेषाम् ॥

स यथा शखस्य ध्मायमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद्ग्रहणाय शखस्य तु ग्रहणेन शखध्मस्य वा शब्दो गृहीत ॥८॥

तथा स यथा शखस्य ध्मायमानस्य शब्देन सयोज्यमानस्य आपूर्यमाणस्य न बाह्याञ्छब्दाञ्छक्नुयादित्येवमादि पूर्ववत् ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्शब्दाञ्शक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥९॥

तथा वीणायै वाद्यमानायै वीणाया वाद्यमानाया । अनेकदृष्टान्तोपादानमिह सामान्यबहुत्वख्यापनार्थम् । अनेके हि विलक्षणाश्चेतनाचेतनरूपा सामान्यविशेषा । तेषा पारपर्यगत्या यथैकस्मिन्महासामान्येऽन्तर्भाव प्रज्ञानघने, कथ नाम प्रदर्शयितव्य इति । दुदुभिशंखवीणाशब्दसामान्यविशेषाणा यथा शब्दत्वेऽन्तर्भाव । एवं स्थितिकाले तावत्सामान्यविशेषाव्यतिरेकात् ब्रह्मैकत्व शक्यमवगंतुम् ॥

स यथार्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यद्ग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहास पुराण विद्या उपनिषद श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निश्वसितानि ॥१०॥

एवमुत्पत्तिकाले प्रागुत्पत्तेर्ब्रह्मैवेति शक्यमवगंतुम् । यथाऽग्नेर्विस्फुलिगधूमागारार्चिषा प्राग्विभागादग्निरेवेति भवत्यग्न्येकत्वं एवं जगन्नामरूपविकृत प्रागुत्पत्ते प्रज्ञानघन एवेति युक्तं ग्रहीतुमित्येतदुच्यते । स यथा आर्द्रैधाग्ने आर्द्रैरेधोभिरिद्धोऽग्निरार्द्रैधाग्निः तस्मादभ्याहितात्पृथग्धूमा , पृथग्नानाप्रकारं धूमग्रहण

विस्फुलिंगादिप्रदर्शनार्थं, धूमविस्फुलिंगादयो विनिश्चरन्ति विनिर्गच्छन्ति । एवं यथायं दृष्टान्त । अरे मैत्रेय्यस्य परमात्मन प्रकृतस्य महतो भूतस्य निश्वसितमेतत् । निश्वासितमिव निश्वसितम् । यथाऽप्रयत्नेनैव पुरुषनिश्वासो भवत्येवं वा अरे । किं तन्निश्वसितमिव ततो जातमित्युच्यते—यद्ऋग्वेदो यजुर्वेद. सामवेदोऽथर्वांगिरसश्चतुर्विध मंत्रजात इतिहास इत्युर्वशीपुरूरवसो· संवादादि. "उर्वशी हाप्सरा" इत्यादि ब्राह्मणमेव । पुराणं 'असद्वा इदमग्र आसीत्' इत्यादि । विद्या देवजनविद्या वेद सोऽयमित्याद्या । उपनिषद 'प्रियमित्येतदुपासीत' इत्याद्या । श्लोका ब्राह्मणप्रभवा मंत्रा 'तदेते श्लोका' इत्यादय । सूत्राणि वस्तुसंग्रहवाक्यानि वेदे यथा 'आत्मेत्येवोपासीत' इत्यादीनि । अनुव्याख्यानानि मंत्रविवरणानि । व्याख्यानान्यर्थवादा । अथवा वस्तुसग्रहवाक्यविवरणानि अनुव्याख्यानानि । यथा चतुर्थाध्याये 'आत्मेत्येवोपासीत' इत्यस्य यथा वा 'अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं' इत्यस्यायमेवाध्यायशेष । मंत्रविवरणानि व्याख्यानानि । एवमष्टविधं ब्राह्मणम् ॥

एवं मन्त्रब्राह्मणयोरेव ग्रहणम् । नियतरचनावतो विद्यमानस्यैव वेदस्याभिव्यक्ति पुरुषनिश्वासवन्न च पुरुषबुद्धिप्रयत्नपूर्वक । अत प्रमाण निरपेक्ष एव स्वार्थे । तस्माद्यत्तेनोक्त तत्तथैव प्रतिपत्तव्य आत्मन श्रेय इच्छद्भिर्ज्ञानं वा कर्म वेति । नामप्रकाशवशा हि रूपस्य विक्रियाव्यवस्था । नामरूपयो एव हि परमात्मोपाधिभूतयोर्व्याक्रियमाणयो सलिलफेनवत्तत्त्वान्यत्वेनानिर्वक्तव्ययो सर्वावस्थयो संसारत्वमित्यतो नात्र एव निश्वसितत्वमुक्तम् । तद्वचनेनैव इतरस्य निश्वसितत्वसिद्धे । अथवा सर्वस्य द्वैतजातस्य अविद्याविषयत्वमुक्तं 'ब्रह्म त परादात् इदं सर्वं यदयमात्मा' इति । तेन वेदस्याप्रामाण्यमाशक्येत । तदाशंकानिवृत्त्यर्थमिदमुक्त--पुरुषनिश्वासवदप्रयत्नोत्थितत्वात्प्रमाणं वेदो, न यथा अन्यो ग्रंथ इति ॥

स यथा सर्वासामपा समुद्र एकायनमेव सर्वेषां स्पर्शानां त्वगेकायनमेवं सर्वेषां गंधानां नासिके एकायनमेवं सर्वेषां रसानां जिह्वैकायनमेवं सर्वेषां रूपाणा चक्षुरेकायनमेव सर्वेषां शब्दानां श्रोत्रमेकायनमेवं सर्वेषां संकल्पानां मन एकायनमेवं सर्वासां विद्याना हृदयमेकायनमेवं सर्वेषां कर्मणां हस्तावेकायनमेवं सर्वेषामानंदानामुपस्थ एकायनमेवं सर्वेषां वि-

सर्गाणां पायुरेकायनमेवं सर्वेषामध्वनां पादावेकायनमेव सर्वेषां वेदानां वागेकायनम् ॥११॥

किंचान्यत् । न केवलं स्थित्युत्पत्तिकालयोरेव प्रज्ञानव्यतिरेकेणाभावात् जगतो ब्रह्मत्वं, प्रलयकाले च । जलबुद्बुदफेनादीनामिव सलिलव्यतिरेकेणाभाव । एवं प्रज्ञानव्यतिरेकेण तत्कार्याणा नामरूपकर्मणा तस्मिन्नेव लीयमानानामभाव । तस्मादेकमेव ब्रह्म प्रज्ञानघनमेकरस प्रतिपत्तव्यमित्यत आह । प्रलयप्रदर्शनाय दृष्टान्त , स इतिदृष्टान्त । यथा येन प्रकारेण सर्वासा नदीवापीतडागादिगतानामपा समुद्रोऽब्धिरेकायन एकगमनमेकप्रलयोऽविभागप्राप्तिरित्यर्थ । यथायं दृष्टान्त एवं सर्वेषा स्पर्शाना मृदुकर्कशकठिनपिच्छिलादीना वायोरात्मभूताना त्वगेकायनं, त्वगिति त्वग्विषयं स्पर्शसामान्यमात्रं तस्मिन्प्रविष्टा स्पर्शविशेषा आप इव समुद्र तद्व्यतिरेकेणाभावभूता भवन्ति । तस्यैव हि ते सस्थानमात्रा आसन् । तथा तदपि स्पर्शसामान्यमात्रं त्वक्शब्दवाच्यं मन सकल्पे मनोविषयसामान्यमात्रे, त्वग्विषय इव स्पर्शविशेषा , प्रविष्ट तद्व्यतिरेकेणाभावभूत भवति । एव मनोविषयोऽपि बुद्धिविषयसामान्यमात्रे प्रविष्टस्तद्व्यतिरेकेणाभावभूतो भवति । विज्ञानमात्रमेव भूत्वा प्रज्ञानघने परे ब्रह्मण्याप इव समुद्रे प्रलीयते । एव परंपराक्रमेण शब्दादो सह ग्राहकेण करणेन प्रलीने प्रज्ञानघने उपाध्यभावात्सैन्धवघनवत् प्रज्ञानघनमेकरसमनंतमपारं निरंतरं ब्रह्म व्यवतिष्ठते । तस्मादात्मैव एकमद्वयमिति प्रतिपत्तव्यम् ।

तथा सर्वेषा गधाना पृथिवीविशेषाणा नासिके घ्राणविषयसामान्यम् । तथा सर्वेषा रसानामब्विशेषाणा जिह्वेन्द्रियविषयसामान्यम । तथा सर्वेषा रूपाणा तेजोविशेषाणा चक्षुश्चक्षुर्विषयसामान्यम् । तथा शब्दाना श्रोत्रविषयसामान्यं पूर्ववत् । तथा श्रोत्रादिविषयसामान्याना मनोविषयसामान्ये संकल्पे । मनोविषयसामान्यस्यापि बुद्धिविषयसामान्ये विज्ञानमात्रे । विज्ञानमात्र भूत्वा परस्मिन्प्रज्ञानघने प्रलीयते । तथा कर्मेन्द्रियाणा विषया वदनादानगमनविसर्गानंदविशेषा तत्तत्क्रियासामान्येष्वेव प्रविष्टा न विभागयोग्या भवन्ति, समुद्र इवाब्विशेषा । तानि च सामान्यानि प्राणमात्रं, प्राणश्च प्रज्ञानमात्रमेव । 'यो वै प्राण सा प्रज्ञा या वै प्रज्ञा स प्राण ' इति कौषीतकिनोऽधीयते ।

ननु सर्वत्र विषयस्यैव प्रलयोऽभिहितो न तु करणस्य । तत्र कोऽभि-

प्राप्नोतीति चेन्न बाढम् । किंतु विषयसमानजातीयं करणं मन्यते श्रुतिर्न तु जात्यंतरम् । विषयस्यैव स्वात्मग्राहकत्वेन संस्थानान्तरं करण नाम यथा रूपविशेषस्यैव संस्थानं प्रदीप करण सर्वरूपप्रकाशने, एव सर्वविषयविशेषाणामेव स्वात्मविशेषप्रकाशकत्वेन संस्थानान्तराणि करणानि प्रदीपवत् । तस्मान्न करणाना पृथक्प्रलये यत्न कार्यो, विषयसामान्यात्मकत्वाद्विषयप्रलयेनैव प्रलय सिद्धो भवति करणानामिति ॥११॥

तत्र 'इद सर्व यदयमात्मा' इति प्रतिज्ञातम् । तत्र हेतुरभिहित आत्मसामान्यत्वं आत्मजत्व आत्मप्रलयत्व च । तस्मादुत्पत्तिस्थितिप्रलयकालेषु प्रज्ञानव्यतिरेकेणाभावात् 'प्रज्ञान ब्रह्म' 'आत्मैवेदं सर्व' इति प्रतिज्ञात यत्तत्तर्कत साधितम् । स्वाभाविकाऽय प्रलय इति पौराणिका वदन्ति । यस्तु बुद्धिपूर्वक प्रलयो ब्रह्मविदा ब्रह्मविद्यानिमित्त अयमात्यतिक इत्याचक्षते । अविद्यानिरोधद्वारेण यो भवति, तदर्थोऽयं विशेषारंभ —

स यथा सैंधवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्यात् । यतो यतस्त्वाददीत लवणमेवैव वा अर इद महद्भूतमनंतमपार विज्ञानघन एव । एतेभ्यो भूतेभ्य· समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥१२॥

तत्र दृष्टान्त उपादीयते स यथेति । सैन्धवखिल्य सिंधोर्विकार सैधव सिंधुशब्देनोदकमभिधीयते । स्यंदनात्सिंधुरुदक ताद्विकारस्तत्र भवो वा सैधवः सैंधवश्चासौ खिल्यश्चेति सैन्धवखिल्य । खिल एव खिल्य स्वार्थे यत्प्रत्यय । उदके सिंचो स्वयोनौ प्रास्त प्रक्षिप्त उदकमेव विलीयमानमनुविलीयेत । यत्तद्भौमतैजससंपर्कात्काठिन्यप्राप्ति खिल्यस्य स्वयोनिसंपर्कादपगच्छति तदुदकस्य विलयनं, तदनु सैन्धवखिल्यो विलीयत इत्युच्यते । तदेतदाह उदकमेवानु विलीयेतेति । न ह नैव अस्य खिल्यस्योद्ग्रहणायोद्भृत्य पूर्ववत् ग्रहणाय ग्रहीतुं नैव समर्थ कश्चित्स्यात्सुनिपुणोऽपि । इवशब्दोऽनर्थक । ग्रहणाय नैव समर्थ । कस्मात्? यतो यतो यस्माद्यस्माद्देशात्तदुदकमाददीत गृहीत्वा खादयेल्लवणास्वादमेव तदुदकं न तु खिल्यभाव ।

यथाऽय दृष्टान्त एवमेव वा अरे मैत्रेयीदं परमात्माख्यं महद्भूतम् । यस्मान्महतो भूतादविद्यया परिच्छिन्ना सती कार्यकरणोपाधिसंबंधात्खिल्यभाव-

मापन्नासि, मर्त्या जन्ममरणाशनायापिपासादिसंसारधर्मवत्यसि, मायात्मिका अमुष्यान्वयाहमिति, स खिल्यभावस्त्वं कार्यकरणभूतोपाधिसंपर्कभ्रान्तिजनितो महति भूते स्वयोनौ महासमुद्रस्थानीये परमात्मनि अजरेऽमरेऽभये अशुद्धे सैधवघनवदेकरसे प्रज्ञानघनेऽनंतेऽपारे निरंतरेऽविद्याजनितभ्रांतिभेदवर्जिते प्रवेशित. । तस्मिन्प्रविष्टे स्वयोनिग्रस्ते खिल्यभावेऽविद्याकृते भेदभावे प्रणाशिते इदमेकमद्वैतं महद्भूत, महच्च तत् भूतं च महद्भूतं सर्वमहत्तरत्वादाकाशादिकारणत्वाच्च । भूतं त्रिष्वपि कालेषु स्वरूपान्यभिचारात्सर्वदैव परिनिष्पन्नमिति त्रैकालिको निष्ठाप्रत्यय । अथवा भूतशब्द परमार्थवाची । महच्च पारमार्थिक चेत्यर्थ । लौकिक तु यद्यपि महद्भवति स्वप्नमायाकृत हिमवदादिपर्वतोपम न परमार्थवस्तु । अतो विशिनष्टि इद च महच्च तद्भूत चेति । अनत नास्यातो वियत इत्यनंतम् । कदाचिदापेक्षिक स्यादित्यतो विशिनष्ट्यपारमिति । विज्ञप्तिर्विज्ञानं, विज्ञान च तद्घनश्चेति विज्ञानघन । घनशब्दो जात्यतरप्रतिषेधार्थ । यथा सुवर्णघनोऽयोघन इति । एवशब्दोऽवधारणार्थ । नान्यज्जात्यंतरमतराले वियत इत्यर्थ ।

यदीदमेकमद्वैतं परमार्थत स्वच्छं ससारदु खासंपृक्तम् । किंनिमित्तोऽय खिल्यभाव आत्मनो, जातो मृत सुखी दु ख्यहं ममेत्येवमादिलक्षणोऽनेकसंसारधर्मोपद्रुत इति । उच्यते । एते भ्यो भूते भ्यो यान्येतानि कार्यकरणविषयाकारपरिणतानि नामरूपात्मकानि सलिलफेनबुद्बुदोपमानि स्वच्छस्य परमात्मन सलिलोपमस्य । येषा विषयपर्यंताना प्रज्ञानघने ब्रह्मणि परमार्थविवेकज्ञानेन प्रविलापनमुक्तं नदीसमुद्रवत् । एते भ्यो हेतुभूते भ्यो भूते भ्य सत्यशब्दवाच्येभ्य समुत्थाय सैधवखिल्यवत् । यथा अद्भ्य सूर्यचंद्रादिप्रतिबिंबो, यथा वा स्वच्छस्य स्फटिकस्य अलक्तकाद्युपाधिभ्यो रक्तादिभाव , एवं कार्यकरणभूतभूतोपाधिभ्यो विशेषात्माखिल्यभावेन समुत्थाय सम्यगुत्थाय येभ्यो भूतेभ्य उत्थित तानि यदा कार्यकरणविषयाकारपरिणतानि भूतान्यात्मनो विशेषात्माखिल्यहेतुभूतानि शास्त्राचार्योपदेशेन ब्रह्मविद्यया नदीसमुद्रवत्प्रविलापितानि विनश्यन्ति । सलिलफेनबुद्बुदादिवत्तेषु विनश्यत्सु अन्वेवैष विशेषात्माखिल्यभावो विनश्यति । यथा उदकालक्तकादिहेत्वपनये सूर्यचंद्रस्फटिकादिप्रतिबिंबो विनश्यति, चंद्रादिस्वरूपमेव परमार्थतो व्यवतिष्ठते । तद्वत्प्रज्ञानघनमनंतमपारं स्वच्छं व्यवतिष्ठते ।

न तत्र प्रेत्य विशेषसंज्ञास्ति कार्यकरणसंघातेभ्यो विमुक्तस्य इत्येवमरे मैत्रेयि ब्रवीमि नास्ति विशेषसज्ञेति, अहमसावमुष्य पुत्रो ममेदं क्षेत्रं धनं सुखी दु खीत्येवमादिलक्षणा, अविद्याकृतत्वात्तस्या । अविद्यायाश्च ब्रह्मविद्यया निरन्वयतो नाशितत्वात्कुतो विशेषसज्ञासंभवो ब्रह्मविदश्चैतन्यस्वभावावास्थितस्य । शरीरावास्थितस्यापि विशेषसंज्ञा नोपपद्यते किमुत कार्यकरणविमुक्तस्य सर्वत । इति होवाचोक्तवान्किल परमार्थदर्शनं मैत्रेय्यै भार्यायै याज्ञवल्क्य ॥१२॥

स होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य सज्ञास्तीति स होवाच न वा अरेऽह मोह ब्रवीम्यल वा अर इद विज्ञानाय ॥१३॥

एव प्रतिबोधिता सा ह किलोवाचोक्तवती मैत्रेयी । अत्रैव एतस्मिन्नेव एकस्मिन्वस्तुनि ब्रह्मणि विरुद्धधर्मवत्त्वमाचक्षाणेन भगवता मम मोह कृत । तदाह— अत्रैव मा भगवान्पूजावानमूमुहन्मोह कृतवान् । कथ तेन विरुद्धधर्मवत्त्वमुक्तमित्युच्यते— पूर्व विज्ञानघन एवेति प्रतिज्ञाय पुनर्न प्रेत्य सज्ञास्तीति । कथं विज्ञानघन एव ? कथ वा न प्रेत्य सज्ञास्तीति ? न ह्युष्ण शीतश्चाग्निरेवैको भवति । अतो मूढास्म्यत्र । स होवाच याज्ञवल्क्यो न वा अरे मैत्रेय्यह मोहं ब्रवीमि, मोहन वाक्य न ब्रवीमीत्यर्थ । ननु कथ विरुद्धधर्मत्वमवोचो विज्ञानघनं संज्ञाभाव च ? न मयेदमेकस्मिन्धर्मिण्यभिहितम् । त्वयैवेद विरुद्धधर्मत्वेनैकं वस्तु परिगृहीतं भ्रान्त्या । न तु मयोक्तम् । मया त्विदमुक्तं– यस्त्वविद्याप्रत्युपस्थापित कार्यकरणसबंधी आत्मन खिल्यभाव , तस्मिन्विद्यया नाशिते तन्निमित्ता या विशेषसज्ञा शरीरादिसंबंधिनी अन्यत्वदर्शनलक्षणा, सा कार्यकरणसंघातोपाधौ प्रविलापिते नश्यति हेत्वभावात् उदकाद्याधारनाशादिव चंद्रादिप्रतिबिबस्तन्निमित्तश्च प्रकाशादि । न पुन. परमार्थचद्रादित्यस्वरूपानाशवदसंसारिब्रह्मस्वरूपस्य विज्ञानघनस्य नाश । तद्विज्ञानघन इत्युक्तम् । स आत्मा सर्वस्य जगत । परमार्थतो भूतनाशान्न विनाशी । विनाशी त्वविद्याकृतखिल्यभाव । 'वाचारंभणं विकारो नामधेयं' इति श्रुत्यंतरात् । अयं तु पारमार्थिकोऽविनाशी वा अरेऽयमात्मा । अतोऽल पर्याप्त वै अरे इदं महद्भूतमनंतमपारं यथाव्याख्यातं विज्ञानाय विज्ञातुम् । 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्' इति हि वक्ष्यति ॥१३॥

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति

तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन क जिघ्रेत्तत्केन कं पश्येत्तत्केन क शृणुयात्तत्केन कमभिवदेत्तत्केन कं मन्वीत तत्केनकं विजानीयात् । येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥१४॥ इति चतुर्थं ब्राह्मणम् ॥

कथ तर्हि प्रेत्य संज्ञा नास्तीत्युच्यते ? शृणु । यत्र यस्मिन्नविद्याकल्पिते कार्यकरणसघातोपाधिजनिते विशेषात्मनि खिल्यभावे, हि यस्मात् द्वैतमिव परमार्थतोऽद्वैते ब्रह्मणि द्वैतमिव भिन्नमिव वस्त्वंतरमात्मनः उपलक्ष्यते । ननु द्वैतेनोपमीयमानत्वात् द्वैतस्य पारमार्थिकत्वमिति । न । 'वाचारभण विकारो नामधेयं' इति श्रुत्यतरात् 'एकमेवाद्वितीयं' 'आत्मैवेद सर्वं' इति च । तत्तत्र यस्मात् द्वैतमिव तस्मादेवेतरोऽसौ परमात्मन खिल्यभूत आत्माऽपरमार्थ, चन्द्रादेरिवोदकचंद्रादिप्रातिबिंब, इतरो घ्रातेतरेण घ्राणेनेतरं घ्रातव्यं जिघ्रति । इतर इतरमिति कारकप्रदर्शनार्थ, जिघ्रतीति क्रियाफलयोरभिधानम् । यथा छिनत्तीति । यथोद्यम्योद्यम्य निपातन छेद्यस्य च द्वैधीभाव· उभयं छिनत्तीत्येकेनैव शब्देन अभिधीयते क्रियावसानत्वात्क्रियाव्यतिरेकेण च तत्फलस्यानुपलंभात् । इतरो घ्राता इतरेण घ्राणेनेतर घ्रातव्य जिघ्रति तथा । सर्व पूर्ववत् । विजानाति । इयमविद्यावदवस्था । यत्र तु ब्रह्मविद्ययाऽविद्या नाशमुपगमिता तत्र आत्मव्यतिरेकेणान्यास्याभाव । यत्र वा अस्य ब्रह्मविद सर्वं नामरूपाद्यात्मन्येव प्रविलापितमात्मैव संवृत्तं, यत्र एवमात्मैवाभूत्तत्तत्र केन करणेन कं घ्रातव्यं को जिघ्रेत् ? तथा पश्येद्विजानीयात् ? सर्वत्र हि कारकसाध्या क्रिया । अत कारकाभावेऽनुपपत्ति क्रियाया । क्रियाभावे च फलाभाव । तस्मात् अविद्यायामेव सत्या क्रियाकारकफलव्यवहारो न ब्रह्मविद । आत्मस्थादेव सर्वस्य । नात्मव्यतिरेकेण कारकं क्रियाफलं वास्ति । न चानात्मा सन्सर्वमात्मैव भवति कस्यचित् । तस्मादविद्ययैव अनात्मत्वं परिकल्पितं, न तु परमार्थत आत्मव्यतिरेकेणास्ति किंचित् । तस्मात्परमार्थात्मैकत्वप्रत्यये क्रियाकारकफलप्रत्ययानुपपत्ति । अतो विरोधाद्ब्रह्मविद क्रियाणां तत्साधनानां चात्यंतमेव निवृत्ति· । केन कमिति क्षेपार्थं वचन प्रकारान्तरानुपपत्तिदर्शनार्थम् । केनचिदपि प्रकारेण क्रियाकरणादिकारकानुपपत्ते· । केनचित्कथंचित्कश्चित्कथंचिन्न जिघ्रेदेवेत्यर्थः ॥

यत्रापि अविद्यावस्थायामन्योऽन्यं पश्यति, तत्रापि येनेदं सर्वं विजानाति तं केन विजानीयाद्येन विजानाति तस्य करणस्य विज्ञेये विनियुक्तत्वात् । ज्ञातुश्च ज्ञेय एव हि जिज्ञासा नात्मनि । न चाग्नेरिव आत्मा आत्मनो विषयो, न चाविषये ज्ञातुर्ज्ञानमुपपद्यते । तस्मात् येनेदं सर्वं विजानाति तं विज्ञातारं केन करणेन को वान्यो विजानीयात् । यदा तु पुन परमार्थविवेकिनो ब्रह्मविदो विज्ञातैव केवलोऽद्वयो वर्तते तं विज्ञातारमरे केन विजानीयादिति ॥ इति चतुर्थ ब्राह्मणम् ॥ २ ४ —

यत्केवलं कर्मनिरपेक्षममृतत्वसाधनं तद्वक्तव्यमिति मैत्रेयीब्राह्मणमारब्धम् । तच्च आत्मज्ञानं सर्वसंन्यासागविशिष्टम् । आत्मनि च विज्ञाते सर्वमिदं विज्ञातं भवति । आत्मा च प्रिय सर्वस्मात् । तस्मादात्मा द्रष्टव्य । स च श्रोतव्यो मंतव्यो निदिध्यासितव्य इति च दर्शनप्रकारा उक्ता । तत्र श्रोतव्य आचार्यागमाभ्याम् । मंतव्यस्तर्कत । तत्र च तर्क उक्त 'आत्मैवेदं सर्वं' इति प्रतिज्ञातस्य हेतुवचनमात्मैकसामान्यत्वं आत्मैकोद्भवत्वं आत्मैकप्रलयत्वं च । तत्रायं हेतुरसिद्ध इत्याशक्यत आत्मैकसामान्योद्भवप्रलयाख्य । तदाशंकानिवृत्त्यर्थमेतद्ब्राह्मणमारभ्यते ॥

यस्मात्परस्परोपकार्योपकारकभूत जगत्सर्वं पृथिव्यादि । यच्च लोके परस्परोपकार्योपकारकभूतं तदेककारणपूर्वकं एकसामान्यात्मकं एकप्रलयं च दृष्टम् । तस्मादिदमपि पृथिव्यादिलक्षण जगत्परस्परोपकार्योपकारकत्वात्तथाभूतं भवितुमर्हति । एष ह्यर्थोऽस्मिन्ब्राह्मणे प्रकाश्यते । अथवा 'आत्मैवेद सर्वं' इति प्रतिज्ञातस्य आत्मोत्पत्तिस्थितिलयत्वं हेतुमुक्त्वा पुनरागमप्रधानेन मधुब्राह्मणेन प्रतिज्ञातस्यार्थस्य निगमनं क्रियते । तथाहि नैयायिकैरुक्तं "हेत्वपदेशात्प्रतिज्ञाया पुनर्वचनं निगमनं" इति । अन्यैर्व्याख्यातं आ दुंदुभिदृष्टाताच्छ्रोतव्यार्थमागमवचनं प्राङ्मधुब्राह्मणान्मतव्यार्थमुपपत्तिप्रदर्शनेन, मधुब्राह्मणेन तु निदिध्यासनविधिरुच्यते इति । सर्वथापि तु यथा आगमेनावधारितं तर्कतस्तथैव मंतव्यम् । यथा तर्कतो मतं तस्य तर्कागमाभ्या निश्चितस्य तथैव निदिध्यासनं क्रियत इति पृथक्निदिध्यासनविधिरनर्थक एव । तस्मात् पृथक्प्रकरणविभागोऽनर्थक इत्यस्मदभिप्राय श्रवणमननिदिध्यासनानामिति । सर्वथापि तु अध्यायद्वयस्यार्थोऽस्मिन्ब्राह्मणे उपसंहियते ॥

इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमय. पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद सर्वम् ॥१॥

इयं पृथिवी प्रसिद्धा सर्वेषा भूताना मधु, सर्वेषा ब्रह्मादिस्तंबपर्यंताना भूताना प्राणिना, मधु कार्यं, मध्विव मधु । यथैको मध्वपूपोऽनेकैर्मधुकरै निर्वर्तित एवमिय पृथिवी सर्वभूतनिर्वर्तिता । तथा सर्वाणि भूतानि पृथिव्यै पृथिव्या अस्या मधु कार्यम् । किं च यश्चाय पुरुषोऽस्या पृथिव्या तेजोमयश्चिन्मात्रप्रकाशमयोऽमृतमयोऽमरणधर्मा पुरुषो, यश्चायमध्यात्म शारीर शरीरे भव पूर्ववत्तेजोमयोऽमृतमय पुरुष । स च लिंगाभिमानी । स च सर्वेष भूतानामुपकारकत्वेन मधु । सर्वाणि च भूतान्यस्य मधु । चशब्दसामर्थ्यात् । एवमेतच्चतुष्टयं तावदेकं सर्वभूतकार्यं, सर्वाणि च भूतान्यस्य कार्यम् । अतोऽस्य एककारणपूर्वकता । यस्मादेकस्मात्कारणादेतज्जात तदेवैक परमार्थतो ब्रह्म, इतरत्कार्यं वाचारभण विकारो नामधेयमात्रमित्येष मधुपर्यायाणा सर्वेषामर्थ संक्षेपत । अयमेव स योऽयं प्रतिज्ञात 'इदं सर्व यदयमात्मा' इति । इदममृतं यन्मैत्रेय्या अमृतत्वसाधनमुक्तं आत्मविज्ञानमिदं तदमृतम् । इदं ब्रह्म यत् ब्रह्म ते ब्रवाणि, ज्ञपयिष्यामि, इत्यध्यायादौ प्रकृत, यद्विषया च विद्या ब्रह्मविद्येत्युच्यते, इदं सर्व यस्माद्ब्रह्मणो विज्ञानात्सर्वं भवति ॥

इमा आप सर्वेषां भूतानां मध्वासामपां सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥२॥

तथा आप । अध्यात्मं रेतस्यपा विशेषतोऽवस्थानम् ॥

अयमग्निः सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म वाङ्मयस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥३॥

तथा अग्नि । वाचि अग्नेर्विशेषतोऽवस्थानम् ॥

अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु

यश्चायमस्मिन्वायौ तेजोमयोऽमृतमय· पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमय. पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेदं सर्वम् ॥४॥

तथा वायुः । अध्यात्म प्राण । भूताना शरीरारंभकत्वेनोपकारान्मधुत्वम् । तदंतर्गताना तेजोमयादीना करणत्वेनोपकारान्मधुत्वम् । तथा चोक्तं 'तस्यै वाच पृथिवी शरीरं ज्योतीरूपमयमग्नि ' इति ॥

अयमादित्य सर्वेषां भूतानां मध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमय. पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥५॥

तथा आदित्यो मधु । चाक्षुषोऽध्यात्मम् ॥

इमा दिश सर्वेषा भूतानां मध्वासां दिशां सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमय· पुरुषो यश्चायमध्यात्म श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेदं सर्वम् ॥६॥

तथा दिशो मधु । दिशा यद्यपि श्रोत्रमध्यात्मं, शब्दप्रतिश्रवणवेलाया तु विशेषत सनिहितो भवतीत्यध्यात्म प्रातिश्रुत्कः, प्रतिश्रुत्काया प्रतिश्रवणवेलाया भव प्रातिश्रुत्क ॥

अयं चद्र सर्वेषां भूतानां मध्वस्य चंद्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिश्चद्रे तेजोमयोऽमृतमय. पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥७॥

तथा चंद्र । अध्यात्मं मानस ॥

इयं विद्युत्सर्वेषां भूतानां मध्वस्यै विद्युत· सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥८॥

तथा विद्युत् । त्वक्तेजसि भवस्तैजसोऽध्यात्मम् ॥

अयं स्तनयित्नु सर्वेषां भूतानां मध्वस्य स्तनयित्नो· सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चाय-

मध्यात्मं शाब्द. सौवरस्तेजोमयोऽमृतमय. पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद सर्वम् ॥९॥

तथा स्तनयित्नु । शब्दे भव शाब्दोऽध्यात्म यद्यपि, तथापि स्वरे विशेषतो भवतीति सौवरोऽध्यात्मम् ॥

अयमाकाश सर्वेषां भूतानां मध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद सर्वम् ॥१०

तथा आकाश । अध्यात्मं हृद्याकाश ॥१०॥

आकाशान्ता पृथिव्यादयो भूतगणा देवतागणाश्च कार्यकरणसंघातात्मान उपकुर्वन्तो मधु भवन्ति प्रतिशरीरिणमित्युक्तम् । येन ते प्रयुक्ता शरीरिभि संबध्यमाना मधुत्वेनोपकुर्वन्ति तद्वक्तव्यमितीदमारभ्यते—

अय धर्म. सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म धार्मस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेदं सर्वम् ॥११॥

अय धर्म., अयमित्यप्रत्यक्षोऽपि धर्म कार्येण तत्प्रयुक्तेन प्रत्यक्षेण व्यपदिश्यतेऽयं धर्म इति, प्रत्यक्षवत् । धर्मश्च व्याख्यात श्रुतिस्मृतिलक्षण क्षत्रादीनामपि नियंता, जगतो वैचित्र्यकृत्पृथिव्यादीना परिणामहेतुत्वात् प्राणिभिरनुष्ठीयमानरूपश्च । तेन चाय धर्म इति प्रत्यक्षेण व्यपदेश । सत्यधर्मयोश्चाभेदेन निर्देश कृत शास्त्राचारलक्षणयो । इह तु भेदेन व्यपदेश एकत्वे सत्यपि । दृष्टादृष्टभेदरूपेण कार्यारभकत्वात् । यस्त्वदृष्टोऽपूर्वाख्यो धर्म , स सामान्यविशेषात्मना अदृष्टेन रूपेण कार्यामारभते सामान्यरूपेण पृथिव्यादीना प्रयोक्ता भवति, विशेषरूपेण चाध्यात्म कार्यकरणसघातस्य । तत्र पृथिव्यादीना प्रयोक्तरि यश्चायमस्मिन्धर्मे तेजोमयः । तथाध्यात्मं कार्यकरणसंघातकर्तरि धर्मे भवो धार्म ॥

इदं सत्यं सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥१२॥

तथा दृष्टेनानुष्ठीयमानेन आचाररूपेण सत्याख्यो भवति स एव धर्म । सोऽपि द्विप्रकार एव सामान्यविशेषात्मरूपेण । सामान्यरूप पृथिव्यादिसमवेतो विशेषरूप कार्यकरणसंघातसमवेत । तत्र पृथिव्यादिसमवेते वर्तमानक्रियारूपे सत्ये, तथाऽध्यात्मं कार्यकरणसंघातसमवेते सत्ये, भव साल्य । "सत्येन वायुरावाति" इति श्रुत्यतरात् ॥

इदं मानुष सर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म मानुषस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद सर्वम् ॥१३॥

धर्मसत्याभ्या प्रयुक्तोऽय कार्यकरणसंघातविशेष । स येन जातिविशेषेण संयुक्तो भवति स जातिविशेषो मानुषादि । तत्र मानुषादिजातिविशिष्टा एव सर्वे प्राणिनिकाया. परस्परोपकार्योपकारकभावेन वर्तमाना दृश्यन्ते । अतो मानुषादिजातिरपि सर्वेषा भूताना मधु । तत्र मानुषादिजातिरपि बाह्या आध्यात्मिकी चेत्युभयथा निर्देशभाग्भवति ॥

अयमात्मा सर्वेषां भूतानां मध्वस्यात्मन. सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमय पुरुषो यश्चायमात्मा तेजोमयोऽमृतमय. पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद सर्वम् ॥१४॥

यस्तु कार्यकरणसंघातो मानुषादिजातिविशिष्ट सोऽयमात्मा सर्वेषां भूताना मधु । नन्वय शारीरशब्देन निर्दिष्ट पृथिवीपर्याय एव । न । पार्थिवाशस्यैव तत्र ग्रहणात् । इह तु सर्वात्मा प्रत्यस्तमिताध्यात्माधिभूताधिदैवादिसर्वविशेष सर्वभूतदेवतागणविशिष्ट कार्यकरणसंघात स अयमात्मेत्युच्यते । तस्मिन्नस्मिन्नात्मनि तेजोमयोऽमृतमय पुरुषोऽमूर्तरस सर्वात्मको निर्दिश्यते । एकदेशेन तु पृथिव्यादिषु निर्दिष्टोऽत्राध्यात्मावशेषाभावात्स न निर्दिश्यते । यस्तु परिशिष्टो विज्ञानमयो यदर्थोऽयं देहलिंगसघात आत्मा स यश्चायमात्मा इत्युच्यते ॥

स वा अयमात्मा सर्वेषां भूतानामधिपति सर्वेषां भूतानां राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोका. सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥१५॥

यस्मिन्नात्मनि परिशिष्टो विज्ञानमयोऽन्त्ये पर्याये प्रवेशित , सोऽयमात्मा । तस्मिन्नविद्याकृतकार्यकरणसघातोपाधिविशिष्टे ब्रह्मविद्यया परमार्थात्मनि प्रवेशिते, स एवमुक्तोऽनंतरोऽबाह्य कृत्स्न प्रज्ञानघनभूत स वै स एवायमात्मा अव्यवहितपूर्वपर्याये तेजोमय इत्यादिना निर्दिष्टो विज्ञानात्मा विद्वान् सर्वेषा भूतानामयमात्मा सर्वैरुपास्य सर्वेषा भूतानामधिपति सर्वभूताना स्वतन्त्रो न कुमारामात्यवत्कि तर्हि सर्वेषा भूताना राजा । राजत्वावशेषणमाधिपतिरिति भवति काश्चिद्राजोचितवृत्तिमाश्रित्य राजा न त्वधिपति , अतो विशिनष्टयधिपतिरिति । एवं सर्वभूतात्मा विद्वान्ब्रह्मविन्मुक्तो भवति । यदुक्तं 'ब्रह्मविद्यया सर्व भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवत्' इतीद तद्व्याख्यातम् । एवमात्मानमेव सर्वात्मत्वेन आचार्यागमाभ्या श्रुत्वा, मत्वा तर्कतो, विज्ञाय साक्षादेवं, यथा मधुब्राह्मणे दर्शितं तथा । तस्माद्ब्रह्मविज्ञानादेवंलक्षणात्पूर्वमपि ब्रह्मैव सदविद्यया अब्रह्मासीत्सर्वमेव च सदसर्वमासीत्ता त्वविद्यामस्माद्विज्ञानात्तिरस्कृत्य ब्रह्मविद्ब्रह्मैव सन्ब्रह्माभवत् सर्व स सर्वमभवत् । परिसमाप्त शास्त्रार्थो यदर्थ प्रस्तुत । तस्मिन्नेतस्मिन्सर्वात्मभूते ब्रह्मविदि सर्वात्मनि सर्व जगत्समर्पितमित्येतस्मिन्नर्थे दृष्टान्त उपादीयते– तद्यथा रथनाभौ च रथनेमौ चारा सर्वे समर्पिता इति, प्रसिद्धोऽर्थ । एवमेवास्मिन्नात्मनि परमात्मभूते ब्रह्मविदि सर्वाणि भूतानि ब्रह्मादिस्तबपर्यतानि सर्वे देवा अग्न्यादय , सर्वे लोका भूरादय , सर्वे प्राणा वागादय , सर्व एत आत्मानो जलचंद्रवत्प्रतिशरीरानुप्रवेशिनोऽविद्याकल्पिता । सर्व जगदस्मिन्समर्पितम् । यदुक्त ब्रह्मविद्वामदेव प्रतिपेदे 'अहं मनुरभवं सूर्यश्च' इति, स एष सर्वात्मभावो व्याख्यात । स एष विद्वान्ब्रह्मवित्सर्वोपाधि सर्वात्मा सर्वो भवति । निरुपाधिर्निरुपाख्य अनतरोऽबाह्य कृत्स्न प्रज्ञानघनोऽजोऽजरोऽमृतोऽभयोऽचलो नेति नेत्यस्थूलोऽनणुरित्येवंविशेषणो भवति ॥

तमेतमर्थमजानन्तस्तार्किका केचित्पंडितंमन्याश्चागमविद शास्त्रार्थ विरुद्धं मन्यमाना विकल्पयन्तो मोहमगाधमुपयान्ति । तमेतमर्थमेतौ मंत्रावनुवदतः—'अनेजदेकं मनसो जवीय ' 'तदेजति तन्नैजति' इति । तथा च तैत्तिरीयके—'यस्मात्पर नापरमस्ति किचित्' 'एतत्साम गायन्नास्ते' 'अहमन्नमहमन्नमहमन्नम्' इत्यादि । तथाच च्छादोग्ये 'जक्षत्क्रीडन्रममाणः' 'स यदि

पितृलोककाम' 'सर्वगंध सर्वरस' 'सर्वज्ञ सर्ववित्' इत्यादि। आथर्वणे च 'दूरात्सुदूरे तदिहान्तिके च'। कठवल्लीष्वपि 'अणोरणीयान्महतो महीयान्' 'कस्तं मदामदं देवम्' 'तद्भावतोऽन्यानत्येति तिष्ठत्' इति च। तथा गीतासु "अहं क्रतुरह यज्ञ" "पिताऽहमस्य जगत" "नादत्ते कस्यचित्पापम्" "समं सर्वेषु भूतेषु" 'अविभक्तं विभक्तेषु" "ग्रसिष्णु प्रभविष्णु च" इत्येवमाद्यागमार्थं विरुद्धमिव प्रतिभान्त मन्यमाना स्वचित्तसामर्थ्यादर्थनिर्णयाय विकल्पयन्त, अस्त्यात्मा नास्त्यात्मा कर्ताऽकर्ता मुक्तो बद्ध क्षणिको विज्ञानमात्रं शून्य चेत्येव विकल्पयन्तो न पारमधिगच्छन्त्यविद्याया, विरुद्धधर्मदर्शित्वात्सर्वत्र। तस्मात्तत्र य एव श्रुत्याचार्यदर्शितमार्गानुसारिण त एवाविद्याया पारमधिगच्छन्ति। त एव चास्मान्मोहसमुद्रादगाधादुत्तरिष्यन्ति नेतरे स्वबुद्धिकौशलानुसारिण ॥१५॥

परिसमाप्ता ब्रह्मविद्याऽमृतत्वसाधनभूता, या मैत्रेयी पृष्टवती भर्तारं 'यदेव भगवानमृतत्वसाधन वेद तदेव मे ब्रूहि' इति। एतस्या ब्रह्मविद्याया स्तुत्यर्थेयमाख्यायिका आनीता। तस्या आख्यायिकाया संक्षेपतोऽर्थप्रकाशनार्थावेतौ मन्त्रौ भवत। एवं हि मंत्रब्राह्मणाभ्या स्तुतत्वात् अमृतत्वसर्वप्राप्तिसाधनत्वं ब्रह्मविद्याया प्रकटीकृत राजमार्गमुपनीतं भवति। यथाऽऽदित्य उद्यञ्छार्वरं तमोऽपनयतीति तद्वत्। अपि चैव स्तुता ब्रह्मविद्या या इद्वराजरक्षिता सा दुष्प्राप्या देवैरपि। यस्मादश्विभ्यामपि देवभिषग्भ्यामिद्वरक्षिता विद्या महतायासेन प्राप्ता। ब्राह्मणस्य शिरश्छित्वाऽश्व्यं शिर प्रतिसंधाय तस्मिन्निद्रेण च्छिन्ने पुन स्वशिर एव प्रतिसधाय तेन ब्राह्मणस्य स्वशिरसैवोक्ताऽशेषा ब्रह्मविद्या श्रुता। तस्मात्तत परतरं किंचित्पुरुषार्थसाधनं न भूतं न भावि वा, कुत एव वर्तमानं, इति नात परा स्तुतिरस्ति।

अपि चैव स्तूयते ब्रह्मविद्या। सर्वपुरुषार्थाना कर्म हि साधनमिति लोके प्रसिद्धम्। तच्च कर्म वित्तसाध्यं तेनाशापि नास्त्यमृतत्वस्य। तदिदममृतत्वं केवलयात्मविद्यया कर्मनिरपेक्षया प्राप्यते। यस्मात्कर्मप्रकरणे वक्तुं प्राप्तापि सती प्रवर्ग्यप्रकरणे कर्मप्रकरणादुत्तीर्य कर्मणा विरुद्धत्वात्केवलसन्याससहिता अभिहिताऽमृतत्वसाधनाय। तस्मान्नात परं पुरुषार्थसाधनमस्ति। अपि चैवं स्तुता ब्रह्मविद्या। सर्वो हि लोको द्वंद्वारामः 'स वै नैव रेमे तस्मादेकाकी न रमते' इति

श्रुते' । याज्ञवल्क्यो लोकसाधारणोऽपि सन्नात्मज्ञानबलाद्भार्यापुत्रवित्तादिसंसाररतिं परित्यज्य प्रज्ञानतृप्त आत्मरतिर्बभूव । अपि चैव स्तुता ब्रह्मविद्या । यस्माद्याज्ञवल्क्येन संसारमार्गात् व्युत्तिष्ठतापि प्रियायै भार्यायै प्रीत्यर्थमेवाभिहिता । 'प्रियं भाषस एवास्त्र' इति लिंगात् ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषि पश्यन्नवोचत् । तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् । दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेति ॥१६॥

तत्रेयं स्तुत्यर्थाख्यायिकेत्यवोचाम । का पुन सा आख्यायिकेति । उच्यते— इदमित्यनतरानिर्दिष्टं व्यपदिशति, बुद्धौ सन्निहितत्वात् । वैशब्द स्मरणार्थ । तदित्याख्यायिकानिर्वृत्तं प्रकरणान्तराभिहितं परोक्ष वैशब्देन स्मारयन्निह व्यपदिशति । यत्तत्प्रवर्ग्यप्रकरणे सूचित नाविष्कृत मधु, तदिद मध्विहानंतरं निर्दिष्ट 'इयं पृथिवी' इत्यादिना । कथं तत्र प्रकरणान्तरे सूचितं दध्यङ् ह वा आभ्यामाथर्वणो मधु नाम ब्राह्मणमुवाच । तदेनयो प्रिय धाम तदेवैनयोरेतेनोपगच्छति । स होवाचेद्रेण वा उक्तोऽस्म्येतच्चेदन्यस्मा अनुब्रूयास्तत एव ते शिरश्छिद्यामिति । तस्माद्वे बिभेमि यद्वै मे स शिरो न छिद्यात्तद्वामुपनेष्य इति । तौ होचतुरावा त्वा तस्मात्त्रास्यावहे इति । कथ मा त्रास्येथे इति । यदा नावुपनेष्यसे । अथ ते शिरच्छित्त्वा अन्यत्राहृत्योपनिधास्याव. । यथाश्वस्य शिर आहृत्य तत्ते प्रतिधास्याव । तेन नावनुवक्ष्यसि । स यदा नावनुवक्ष्यसि, अथ ते तदिद्र शिरच्छेत्स्यति । अथ ते स्वं शिर आहृत्य तत्ते प्रतिधास्याव इति । तथेति तौ होपनिन्ये । तौ यदोपानिन्ये । अथास्य शिरच्छित्त्वाऽन्यत्रोपानिदधतुः । अथाश्वस्य शिर आहृत्य तद्वास्य प्रतिदधतु । तेन हाभ्यामनूवाच । स यदा आभ्यामनूवाचाथास्य तदिंद्र शिरश्चिच्छेद । अथास्य स्वं शिर आहृत्य तद्वास्य प्रतिदधतुरिति । यावत्तु प्रवर्ग्यकर्मांगभूतं मधु तावदेव तत्राभिहितं, न तु कक्ष्यमात्मज्ञानाख्यम् । तत्र या आख्यायिकाभिहिता सेह स्तुत्यर्था प्रदर्श्यते । **इदं वै तन्मधु दध्यङ्ङाथर्वणोऽनेन प्रपंचेनाश्विभ्यामुवाच ।**

तदेतदृषिस्तदेतत्कर्म, ऋषिर्मंत्र पश्यन्नुपलभमानोऽवोचदुक्तवान् । कथम्? तद्दंस इति व्यवहितेन संबंध. । दंस इति कर्मणो नामधेयम् । तच्च दंस किं-विशिष्टम्? उग्र क्रूरम् । वा युवयो. । हे नरा नराकारावश्विनौ । तच्च कर्म

किंनिमित्तम्[1] सनये लाभाय। लाभलुब्धो हि लोकेऽपि क्रूरं कर्माचरति, तथैवैतावुपलभ्येते यथा लोके। तदावि प्रकाशं कृणोमि करोमि यद्रहसि भवद्भ्या कृतम्। किमिवेत्युच्यते। तन्यतु पर्जन्यो नेव। नकारस्तूपरिष्टादुपचार उपमार्थीयो वेदे न प्रतिषेधार्थ। यथाश्वं न। अश्वमिवेति यद्वत्। तन्यतुरिव वृष्टि यथा पर्जन्यो वृष्टि प्रकाशयति स्तनयित्न्वादिशब्दे. तद्वदहं युवयो क्रूरं कर्म आविष्कृणोमीति सबंध। नन्वश्विनो स्तुत्यर्थौ कथमिमौ मन्त्रौ स्याता निंदावचनौ हीमौ। नैष दोष। स्तुतिरेवैषा, न निंदावचनौ। यस्मादीदृशमाचरति-क्रूरं कर्म कुर्वतोर्युवयोर्न लोम च मीयत इति। न चान्यत्किंचिद्धीयत एवेति। स्तुतावेतौ भवत। निंदा प्रशंसा हि लौकिका स्मरन्ति। तथा प्रशंसारूपा च निंदा लोके प्रसिद्धा। दध्यङ्नाम आथर्वण। हेत्यनर्थको निपात। यन्मधु कक्ष्यमात्मज्ञानलक्षणमाथर्वणो वा युवाभ्यामश्वस्य शीर्ष्णा शिरसा प्र यत् ईं उवाच यत्प्रोवाच मधु। ईमित्यनर्थको निपात ॥१६॥

इद वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच। तदेतदृषि. पश्यन्नवोचत्। आथर्वणायाश्विनो दधीचेऽश्व्यं शिर प्रत्यैरयतम्। स वा मधु प्रवोचदृतायन्त्वाष्ट्रं यद्दस्रावपि कक्ष्य वामिति ॥१७॥

इदं वै तन्माध्वित्यादि पूर्ववन्मन्त्रान्तरप्रदर्शनार्थम्। तथाऽन्यो मंत्रस्तामेव आख्यायिकामनुसरति स्म। आथर्वणो दध्यङ्नाम, आथर्वणोऽन्यो विद्यत इत्यतो विशिनष्टि दध्यङ्नामाथर्वण। तस्मै दधीच आथर्वणाय हेऽश्विनाविति मंत्रदृशो वचनम्। अश्व्यमश्वस्य स्वभूतं शिरो, ब्राह्मणस्य शिरसि च्छिन्नेऽश्वस्य शिरश्छित्त्वेदृशमतिक्रूरं कर्म कृत्वाऽश्व्यं शिरो ब्राह्मणं प्रति ऐरयतं गमितवन्तौ युवाम्। स चाथर्वणो वा युवाभ्या तन्मधु प्रवोचद्यत्पूर्वं प्रतिज्ञातं वक्ष्यामीति। स किमर्थमेवं जीवितसंदेहमारुह्य प्रवोचदित्युच्यते। ऋतायन्यत्पूर्वं प्रतिज्ञातं, सत्यं तत्परिपालयितुमिच्छन्। जीवितादपि हि सत्यधर्मपरिपालना गुरुतरेत्येतस्य लिंगमेतत्। किं तन्मधु प्रवोचदित्युच्यते। त्वाष्ट्रं, त्वष्टा आदित्यस्तस्य संबंधि, यज्ञस्य शिरच्छिन्नं त्वष्टाऽभवत्तत्प्रतिसंधानार्थं प्रवर्ग्यं कर्म। तत्र प्रवर्ग्य-कर्मांगभूतं यद्विज्ञानं तत्त्वाष्ट्रं मधु यज्ञस्य शिरश्छेदनप्रतिसंधानादिविषयं दर्शनं तत्त्वाष्ट्रं यन्मधु हे दस्रौ, दस्राविति परबलानामुपक्षपयितारौ शत्रूणां वा हिंसितारौ। अपि च न केवलं त्वाष्ट्रमेव मधु कर्मसंबंधि, युवाभ्यामवोचत्, अपि च कक्ष्यं

गोप्य रहस्य परमात्मसंबंधि यद्विज्ञानं मधु मधुब्राह्मणेनोक्तं अध्यायद्वयप्रकाशितं, तच्च वा युवाभ्या प्रवोचदित्यनुवर्तते ॥

इद वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषि पश्यन्नवोचत् । पुरश्चक्रे द्विपद पुरश्चक्रे चतुष्पद । पुर स पक्षी भूत्वा पुर पुरुष आविशदिति । स वा अय पुरुष. सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृत नैनेन किंचनासवृतम् ॥१८॥

इदं वै तन्मध्वित पूर्ववत् । उक्तौ द्वौ मन्त्रौ प्रवर्ग्यसंबंध्याख्यायिकोपसहर्तारौ । द्वयो प्रवर्ग्यकर्मार्थयोरध्याययोरर्थ आख्यायिकाभूताभ्या मन्त्राभ्या प्रकाशित । ब्रह्मविद्यार्थयोस्त्वध्याययोरर्थ उत्तराभ्यामृग्भ्या प्रकाशयितव्य इत्यत प्रवर्तते । यत्कर्म्य च मधूक्तवानाथर्वणो युवाभ्यामित्युक्तम् । किं पुनस्तन्मध्वित्युच्यते । पुरश्चक्रे पुर पुराणि शरीराणि, यत इयमव्याकृतव्याकरणप्रक्रिया । स परमेश्वरो नामरूपे अव्याकृते व्याकुर्वाण प्रथमं भूरादील्लोकान्सृष्ट्वा चक्रे कृतवान्द्विपदो द्विपादुपलक्षितानि मनुष्यशरीराणि पक्षिशरीराणि । तथा पुर शरीराणि चक्रे चतुष्पदश्चतुष्पादुपलक्षितानि पशुशरीराणि । पुर पुरस्तात्स ईश्वर पक्षी लिगशरीर भूत्वा पुर शरीराणि पुरुष आविशदित्यस्यार्थमाचष्टे श्रुति । स वा अय पुरुष सर्वासु पूर्षु सर्वशरीरेषु पुरिशय , पुरि शेत इति पुरिशय सन्पुरुष इत्युच्यते । नैनेनानेन किंचन किंचिदप्यनावृतमनाच्छादितम् । तथा नैनेन किचनासवृतमंतरननुप्रवेशितं बाह्यभूतेनान्तर्भूतेन च न अनावृतम् । एव स एव नामरूपात्मना अतर्बहिर्भावेन कार्यकरणरूपेण व्यवस्थित । पुरश्चक्रे इत्यादिमंत्र सक्षेपत आत्मैकत्वमाचष्ट इत्यर्थ ॥

इद वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषि. पश्यन्नवोचत् । रूपं रूपं प्रतिरूपो बभूव तदस्य रूप प्रतिचक्षणाय । इद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति । अय वै हरयोऽय वै दश च सहस्राणि बहूनि चानंतानि च तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥१९॥ इति पंचमं ब्राह्मणम् ॥

इदं वै तन्मध्वित्यादि पूर्ववत् । रूपं रूपं प्रतिरूपो बभूव । रूपं रूपं प्रति प्रतिरूपो रूपान्तरं बभूवेत्यर्थ । प्रतिरूपोऽनुरूपो वा यादृक्संस्थानौ मातापितरौ तत्संस्थानस्तदनुरूप एव पुत्रो जायते । न हि चतुष्पदो द्विपाज्जायते द्विपदो वा

चतुष्पात् । स एव हि परमेश्वरो नामरूपे व्याकुर्वाणो रूपं रूपं प्रतिरूपो बभूव । किमर्थं पुन प्रतिरूपमागमनं तस्येत्युच्यते । तदस्यात्मनो रूपं प्रतिचक्षणाय प्रतिख्यापनाय । यदि हि नामरूपे न व्याक्रियेते तदा अस्यात्मनो निरुपाधिकं रूप प्रज्ञानघनाख्यं न प्रतिख्यायेत । यदा पुन कार्यकरणात्मना नामरूपे व्याकृते भवत तदास्य रूपं प्रतिख्यायेत । इद्र परमेश्वरो मायाभि प्रज्ञाभि नामरूपभूतकृतमिथ्याभिमानैर्वा न तु परमार्थत , पुरुरूपो बहुरूप ईयते गम्यते, एकरूप एव प्रज्ञानघन सन्नविद्याप्रज्ञाभि । कस्मात्पुनः कारणात् ? युक्ता रथ इव वाजिन स्वविषयप्रकाशनाय, हि यस्मादस्य हरयो हरणार्दिंद्रियाणि, शता शतानि, दश च प्राणिभेदबाहुल्याच्छतानि दश च भवन्ति । तस्मादिंद्रिय-विषयबाहुल्यात्तत्प्रकाशनायैव च युक्तानि तानि न आत्मप्रकाशनाय । 'पराचि खानि व्यतृणत्स्वयभू' इति हि काठके । तस्मात्तैरेव विषयस्वरूपैरीयते न प्रज्ञानघनैकरसेन स्वरूपेण ।

एवं तर्हि अयमन्य परमेश्वरोऽन्ये हरय इत्येवं प्राप्ते उच्यते— अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानंतानि च । प्राणिभेदस्यानंत्यात् । किं बहुना, तदेतद्ब्रह्म य आत्मा । अपूर्वं नास्य कारणं पूर्वं विद्यत इत्यपूर्वम् । नास्यापरं कार्यं विद्यत इत्यनपरम् । नास्य जात्यंतरमंतराले विद्यत इत्यनंतरम् । तथा बहिरस्य न विद्यत इत्यबाह्यम् । किं पुनस्तन्निरंतरं ब्रह्म ? अयमात्मा । कोऽसौ ? य प्रत्यगात्मा द्रष्टा श्रोता मंता बोद्धा विज्ञाता सर्वानुभू, सर्वात्मना सर्वमनुभवतीति सर्वानुभू । इत्येतदनुशासनं सर्ववेदान्तोपदेश । एष सर्ववेदा-न्तानामुपसंहृतोऽर्थ । एतदमृतमभयम् । परिसमाप्तश्च शास्त्रार्थ ॥ इति पंचमं ब्राह्मणम् ॥ २५ —

अथ वंश । पौतिमाष्यो गौपवनाद्गौपवन. पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवन. कौशिकात्कौशिकः कौंडिन्यात्कौंडिन्यः शांडिल्याच्छांडिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥१॥ आग्निवेश्यादाग्निवेश्य शांडिल्याच्चा-नभिम्लाताच्चानभिम्लात आनभिम्लातादानभिम्लात आनभिम्लाता-दानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्यां सैतवप्राचीनयोग्यो पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो बैजवापायनाद्बैजवापायनः कौशि-

कायने. कौशिकायनि· ॥२॥ घृतकौशिकाद्घृतकौशिक. पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो मांटेर्माटिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्य शांडिल्याच्छांडिल्य कैशोर्यात्काप्यात्कैशोर्य· काप्य कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौंडिन्याद्विदर्भीकौंडिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रव पथ. सौभरात्पथा. सौभरोऽयास्यादांगिरसादयास्य आंगिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्ध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्यो प्राध्वसनान्मृत्युः प्राध्वसन प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टि सनारो सनारु सनातनात्सनातन सनगात्सनगः परमेष्ठिन परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नम ॥३॥ इति षष्ठं ब्राह्मणम् ॥ इति द्वितीयोऽध्याय ॥

अथेदानीं ब्रह्मविद्यार्थस्य मधुकाडस्य वश स्तुत्यर्थो ब्रह्मविद्याया । मंत्रश्चायं स्वाध्यायार्थो जपार्थश्च । तत्र वश इव वंशो यथा वेणुर्वश पर्वण पर्वणो हि भिद्यते तद्वदग्रात्प्रभृति आ मूलप्राप्तेरय वंश । अध्यायचतुष्टयस्य आचार्यपरपराक्रमो वश इत्युच्यते । तत्र प्रथमान्त शिष्य पचम्यत आचार्य । परमेष्ठी विराट् । ब्रह्मणो हिरण्यगर्भात् ।

ततः परं आचार्यपरपरा नास्ति । यत्पुनर्ब्रह्म तन्नित्यं स्वयभु, तस्मै ब्रह्मणे स्वयंभुवे नम ॥ इति षष्ठ ब्राह्मणम् ॥ इति द्वितीयोऽध्याय ॥

॥ तृतीयोऽध्यायः ॥

'जनको ह वैदेह ' इत्यादि याज्ञवल्कीयं काडमारभ्यते । उपपत्तिप्रधानत्वादतिक्रान्तेन मधुकाडेन समानार्थत्वेऽपि सति न पुनरुक्तता । मधुकाड ह्यागमप्रधानम् । आगमोपपत्ती ह्यात्मैकत्वप्रकाशनाय प्रवृत्ते शक्नुत करतलगतबिल्वमिव दर्शयितुम् । 'श्रोतव्यो मंतव्य ' इति ह्युक्तम् । तस्मादागमार्थस्यैव परीक्षापूर्वकं निर्धारणाय याज्ञवल्कीयं काडमुपपत्तिप्रधानमारभ्यते ।

आख्यायिका तु विज्ञानस्तुत्यर्था उपायविधिपरा वा । प्रसिद्धो ह्युपायो विद्वद्भि· शास्त्रेषु च दृष्टो—दानम् । दानेन ह्युपनमन्ते प्राणिन । प्रभूतं हिरण्य गोसहस्र-दान चेहोपलभ्यते । तस्मादन्यपरेणापि शास्त्रेण विद्याप्राप्त्युपायदानप्रदर्शनार्था आख्यायिका आरब्धा । अपि च तद्विद्यसयोगस्तैश्च सह वादकरण विद्या-प्राप्त्युपायो न्यायविद्याया दृष्ट । तच्चास्मिन्न्याये प्राबल्येन प्रदर्श्यते । प्रत्यक्षा च विद्वत्सयोगे प्रज्ञावृद्धि । तस्माद्विद्याप्राप्त्युपायप्रदर्शनायैव आख्यायिका ॥

ॐ जनको ह वदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपचालाना ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव क.स्विदेषा ब्राह्मणानामनूचानतम इति स ह गवां सहस्रमवरुरोध दश दश पादा एकैकस्या· शृगयोराबद्धा बभूवु ॥१॥

जनको नाम ह किल सम्राड्राजा बभूव विदेहाना, तत्र भवो वैदेह । स च बहुदक्षिणेन यज्ञेन, शाखान्तरप्रसिद्धो वा बहुदक्षिणो नाम यज्ञो, अश्वमेधो वा दक्षिणाबाहुल्याद्बहुदक्षिण इहोच्यते, तेनेजेऽयजत् । तत्र तस्मिन्यज्ञे निमंत्रिता दर्शनकामा वा कुरूणा देशाना पंचालाना च ब्राह्मणास्तेषु हि विदुषा बाहुल्यं प्रसिद्ध, अभिसमेता अभिसगता बभूवु । तत्र महान्त विद्वत्समुदाय दृष्ट्वा तस्य ह किल जनकस्य वैदेहस्य यजमानस्य को नु खल्वत्र ब्रह्मिष्ठ इति विशेषेण ज्ञातुमिच्छा विजिज्ञासा बभूव । कथं? क स्वित्को नु खल्वेषा ब्राह्मणानामनू-चानतम सर्व इमेऽनूचाना क स्विदेषामतिशयेनानूचान इति । स ह अनूचान-तमविषयोत्पन्नजिज्ञास सस्तद्विज्ञानोपायार्थ गवा सहस्र प्रथमवयसामवरुरोध, गोष्ठेऽवरोध कारयामास । किंविशिष्टास्ता गावोऽवरुद्धा इत्युच्यते । पलचतुर्थभाग पाद सुवर्णस्य । दश दश पादा एकैकस्या गो शृगयोराबद्धा बभूवु । पच पंच पादा एकैकस्मिन् शृगे ॥

तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठ स एता गा उदजतामिति । ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्य. स्वमेव ब्रह्मचारिणमुवाचैता: सोम्योदज सामश्रवा३ इति ता होदाचकार ते ह ब्राह्मणाश्चुकुधु· कथ नो ब्रह्मिष्ठो ब्रुवीतेत्यथ ह जनकस्य वैदेहस्य होताश्वलो बभूव स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति स होवाच नमो वयं

ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्म इति त ह तत एव प्रष्टुं दध्रे होताऽश्वलः ॥२॥

गा एवमवरुध्य ब्राह्मणास्तान्होवाच हे ब्राह्मणा भगवन्त इत्यामंत्र्य । यो वो युष्माक ब्रह्मिष्ठ, सर्वे यूय ब्रह्मणोऽतिशयेन युष्माकं ब्रह्मा य स एता गा उदजतामुत्कालयतु स्वगृह प्रति । ते ह ब्राह्मणा न दधृषु । ह किलैवमुक्ता ब्राह्मणा ब्रह्मिष्ठतामात्मन प्रतिज्ञातुं न दधृषुर्न प्रगल्भा सवृत्ता । अप्रगल्भभूतेषु ब्राह्मणेष्वथ ह याज्ञवल्क्य स्वमात्मीयमेव ब्रह्मचारिणमतेवासिनमुवाच— एता गा हे सोम्योदजोद्गमयास्मद्गृहान्प्रति । हे सामश्रव सामविधि हि शृणोत्यतोऽर्थाच्चतुर्वेदो याज्ञवल्क्य । ता गा होदाचकारोत्कालितवानाचार्यगृह प्रति । याज्ञवल्क्येन ब्रह्मिष्ठपणस्वीकरणेन आत्मनो ब्रह्मिष्ठता प्रतिज्ञातेति ते ह चुक्रुधु क्रुद्धवन्तो ब्राह्मणा । तेषा क्रोधाभिप्रायमाचष्टे । कथ नोऽस्माक एकैकप्रधानाना ब्रह्मिष्ठोऽस्मीति ब्रुवीतेति । अथ हैव क्रुद्धेषु ब्राह्मणेषु जनकस्य यजमानस्य होतर्त्विगश्वलो नाम बभूव आसीत् । स एन याज्ञवल्क्य ब्रह्मिष्ठाभिमानी राजाश्रयत्वाच्च वृष्टो याज्ञवल्क्यं पप्रच्छ पृष्टवान् । कथ? त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति । प्लुतिर्भर्त्सनार्था । स होवाच याज्ञवल्क्यो— नमस्कुर्मो वयं ब्रह्मिष्ठाय । इदानी गोकामा स्मो वयमिति । त ब्रह्मिष्ठप्रतिज्ञ सन्तं तत एव ब्रह्मिष्ठपणस्वीकरणात्प्रष्टुं दध्रे धृतवान्मनो होता अश्वल ॥

याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्युनाप्त सर्वं मृत्युनाभिपन्न केन यजमानो मृत्योराप्तिमतिमुच्यत इति होत्रर्त्विजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक्सोऽयमग्नि. स होता स मुक्ति. सातिमुक्ति. ॥३॥

याज्ञवल्क्येति होवाच । तत्र मधुकाडे पात्तेन कर्मणा दर्शनसमुच्चितेन यजमानस्य मृत्योरत्ययो व्याख्यात उद्गीथप्रकरणे सक्षेपत । तस्यैव परीक्षाविषयोऽयमिति तद्वतदर्शनविशेषार्थोऽय विस्तर आरभ्यते । यदिदं साधनजात अस्य कर्मण ऋत्विगग्न्यादि मृत्युना कर्मलक्षणेन स्वाभाविकासंगसहितेनाप्त व्याप्त, न केवल व्याप्तमभिपन्नं च मृत्युना वशीकृत च । केन दर्शनलक्षणेन साधनेन यजमानो मृत्योराप्ति अतिमृत्युगोचरत्वमतिक्रम्य मुच्यते स्वतंत्रो मृत्योरवशो भवतीत्यर्थ । ननूद्गीथ एवाभिहितं येनातिमुच्यते मुख्यप्राणात्मदर्शनेनेति ।

बाढमुक्तं, योऽनुक्तो विशेषस्तत्र, तदर्थोऽयमारभ इत्यदोष । होत्रर्त्विजाऽग्निना वाचेत्याह याज्ञवल्क्य । एतस्यार्थं व्याचष्टे । क पुनर्होता येन मृत्युमतिक्रामतीति। उच्यते— वाग्वै यज्ञस्य यजमानस्य 'यज्ञो वै यजमान ' इति श्रुते । यज्ञस्य यजमानस्य या वाक्सैव होताऽधियज्ञे । कथ ? तत्तत्र येय वाग्यज्ञस्य यजमानस्य सोऽय प्रसिद्धोऽग्निरधिदैवतम् । तदेतत्त्र्यन्नप्रकरणे व्याख्यातम् । स चाग्निर्होता 'अग्निर्वै होता' इति श्रुते । यदेतद्यज्ञस्य साधनद्वय होता चर्त्विगधियज्ञमध्यात्मं च वाक्, एतदुभय साधनद्वय परिच्छिन्न मृत्युना आप्तं स्वाभाविकाज्ञानासंग-प्रयुक्तेन कर्मणा मृत्युना प्रतिक्षणमन्यथात्वमापद्यमानं वशीकृतम् । तदनेनाधि-दैवतरूपेणाग्निना दृश्यमान यजमानस्य यज्ञस्य मृत्योरतिमुक्तये भवति । तदे-तदाह— स मुक्ति स होताऽग्निर्मुक्तिरग्निस्वरूपदर्शनमेव मुक्ति । यदैव साधनद्वय-मग्निरूपेण पश्यति तदानीमेव हि स्वाभाविकादासंगान्मृत्योर्विमुच्यते आध्यात्मिका-त्परिच्छिन्नरूपादाधिभौतिकाच्च । तस्मात्स होता अग्निरूपेण दृष्टो मुक्तिर्मुक्तिसाधनं यजमानस्य । सा अतिमुक्ति । यैव च मुक्ति सातिमुक्ति अतिमुक्तिसाधन-मित्यर्थ । साधनद्वयस्य परिच्छिन्नस्य या अधिदेवतारूपेणापरिच्छिन्नेनाग्निरूपेण दृष्टि सा मुक्ति । याऽसौ मुक्तिरधिदेवतादृष्टि सैवाध्यात्माधिभूतपरिच्छेद-विषयासगास्पद मृत्युमतिक्रम्य अधिदेवतात्वस्याग्निभावस्य प्राप्तिर्या फलभूता सा अतिमुक्तिरित्युच्यते । तस्या अतिमुक्तेर्मुक्तिरेव साधनमिति कृत्वा सा अतिमुक्तिः इत्याह । यजमानस्य त्र्यतिमुक्तिर्वागादीनामग्न्यादिभाव इत्युद्गीथप्रकरणे व्याख्या-तम् । तत्र सामान्येन मुख्यप्राणदर्शनमात्रं मुक्तिसाधनमुक्तं, न तद्विशेष । वागादीनामग्न्यादिदर्शनमिह विशेषो वर्ण्यते । मृत्युप्राप्त्यतिमुक्तिस्तु सैव फल-भूतयोद्गीथब्राह्मणेन व्याख्याता 'मृत्युमतिक्रान्तो दीप्यते' इत्याद्या ॥

याज्ञवल्क्येति होवाच यदिद सर्वमहोरात्राभ्यामाप्त सर्वमहोरात्रा-भ्यामभिपन्न केन यजमानोऽहोरात्रयोरातिमतिमुच्यत इत्यध्वर्युणर्त्विजा चक्षुषादित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिद चक्षुः सोऽसावादित्यः सोऽध्वर्युः स मुक्तिः सातिमुक्तिः ॥४॥

याज्ञवल्क्येति होवाच । स्वाभाविकादज्ञानासंगप्रयुक्तात् कर्मलक्षणान्मृ-त्योरतिमुक्तिर्व्याख्याता । तस्य कर्मण सासंगस्य मृत्योराश्रयभूताना दर्शपूर्ण-मासादिकर्मसाधनानां यो विपरिणामहेतु काल तस्मात्कालात्पृथगतिमुक्तिः

वक्तव्येतीदमारभ्यते, क्रियानुष्ठानव्यतिरेकेणापि प्रागूर्ध्वं च क्रियाया साधन-विपरिणामहेतुत्वेन व्यापारदर्शनात्कालस्य । तस्मात्पृथक्कालादतिमुक्तिर्वक्तव्येत्यत आह— यदिद सर्वमहोरात्राभ्यामाप्त स च कालो द्विरूपोऽहोरात्रादिलक्षण तिथ्यादिलक्षणश्च । तत्राहोरात्रादिलक्षणात्तावदतिमुक्तिमाह— अहोरात्राभ्या हि सर्वं जायते वर्धते विनश्यति च । तथा यज्ञसाधन च । यज्ञस्य यजमानस्य चक्षुरध्वर्युश्च । शिष्टान्यक्षराणि पूर्ववन्नेयानि । यजमानस्य चक्षुरध्वर्युश्च साधन-द्वयमध्यात्माधिभूतपरिच्छेदं हित्वा अधिदैवतात्मना दृष्टं यत्स मुक्ति सो-ऽध्वर्युरादित्यभावेन दृष्टो मुक्ति । सैव मुक्तिरेवातिमुक्तिरिति पूर्ववत् । आदि-त्यात्मभावमापन्नस्य हि नाहोरात्रे सभवत ॥

याज्ञवल्क्येति होवाच यदिद सर्वं पूर्वपक्षापरपक्षाभ्यामाप्त सर्वं पूर्व-पक्षापरपक्षाभ्यामभिपन्न केन यजमान. पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योऽय प्राण. स वायुः स उद्गाता स मुक्तिः सातिमुक्ति· ॥५॥

इदानीं तिथ्यादिलक्षणादतिमुक्तिरुच्यते— यादेदं सर्वमहोरात्रयोराविशि-ष्टयोरादित्य कर्ता, न प्रतिपदादीना तिथीनाम् । तासा तु वृद्धिक्षयोपगमनेन प्रतिपत्प्रभृतीना चंद्रमा कर्ता । अतस्तदापत्त्या पूर्वपक्षापरपक्षाख्यय आदि-त्यापत्त्या अहोरात्राख्ययवत् । तत्र यजमानस्य प्राणो वायु । स एव उद्गाता इति उद्गीथब्राह्मणेऽवगतं 'वाचा च ह्येव स प्राणेन चोदगायत्' इति च निर्धारितम् । अथैतस्य प्राणस्याप शरीर ज्योतीरूपमसौ चंद्र इति च । प्राणवायुचद्रमसोमेकत्वाच्चंद्रमसा वायुना चोपसंहारे न कश्चित् विशेष । एव-मन्यमाना श्रुतिर्वायुना अधिदैवतरूपेणोपसंहरति । अपि च वायुनिमित्तौ हि वृद्धिक्षयौ चंद्रमस । तेन तिथ्यादिलक्षणस्य कालस्य कर्तुरपि कारयिता वायु । अतो वायुरूपापन्नस्तिथ्यादिकालादतीतो भवतीत्युपपन्नतरं भवति । तेन श्रुत्यंतरे चंद्ररूपेण दृष्टिर्मुक्तिरतिमुक्तिश्च । इह तु काण्वाना साधनत्रयस्य तत्कारणरूपेण वाय्वात्मना दृष्टिर्मुक्तिरतिमुक्तिश्चेति न श्रुत्योर्विरोध ॥

याज्ञवल्क्येति होवाच यदिदमंतरिक्षमनारंबणमिव केनाक्रमेण यजमान. स्वर्गं लोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चंद्रेण मनो वै यज्ञस्य ब्रह्मा

तद्यदिद मन. सोऽसौ चद्रः स ब्रह्मा स मुक्तिः सातिमुक्तिरित्यतिमोक्षा अथ संपदः ॥६॥

मृत्यो कालादतिमुक्तिर्व्याख्याता यजमानस्य । सोऽतिमुच्यमान· केनावष्टंभेन परिच्छेदविषय मृत्युमतीत्य फलं प्राप्नोत्यतिमुच्यत इत्युच्यते । यदिद प्रसिद्धमंतरिक्षमाकाशो अनारबणमनालबनं इवशब्दात् अस्त्येव तत्रालंबन तत्तु न ज्ञायत इत्यभिप्राय । यत्तु तदज्ञायमानमालबन, तत्सर्वनाम्ना केनेति पृच्छघते । अन्यथा फलप्राप्तेरसंभवात् । येनावष्टंभेनाक्रमेण यजमान कर्मफल प्रतिपद्यमानोऽतिमुच्यते, किं तदिति प्रश्नविषय । केनाक्रमेण यजमान स्वर्गं लोकमाक्रमत इति, स्वर्ग लोक फलं प्राप्नोत्यतिमुच्यत इत्यर्थ । ब्रह्मणर्त्विजा मनसा चंद्रेणेत्यक्षरन्यास पूर्ववत् । तत्राध्यात्मं यज्ञस्य यजमानस्य यदिद प्रसिद्ध मन , सोऽसौ चद्रोऽधिदैवम् । मनोऽध्यात्मं चंद्रमा अधिदैवतमिति हि प्रसिद्धम् । स एव चद्रमा ब्रह्मर्त्विक्तेनाधिभूत ब्रह्मण परिच्छिन्नं रूपमध्यात्मं च मनस एतद्द्वयमपरिच्छिन्नेन चद्रमसो रूपेण पश्यति । तेन चंद्रमसा मनसाऽवलबनेन कर्मफल स्वर्ग लोकं प्राप्नोत्यतिमुच्यते इत्यभिप्राय । इतीत्युपसंहारार्थं वचनम् । इत्येवप्रकारा मृत्योरतिमोक्षा । सर्वाणि हि दर्शनप्रकाराणि यज्ञागविषयाण्यस्मिन्नवसर उक्तानीति कृत्वोपसहार । इत्यतिमोक्षा , एवप्रकारा अतिमोक्षा इत्यर्थ ।

अथ संपद । अथाधुना संपद उच्यन्ते । संपन्नाम केनचित्सामान्येनाग्निहोत्रादीना कर्मणा फलवता तत्फलाय सपादनं संपत्फलस्यैव वा । सर्वोत्साहेन फलसाधनानुष्ठाने प्रयतमानाना केनचिद्वैगुण्येनासंभव । तदिदानीमाहिताग्नि सन्यत्किंचित्कर्माग्निहोत्रादीना यथासंभवमादाय आलंबनीकृत्य कर्मफलविद्वत्ताया सत्या यत्कर्मफलकामो भवति, तदेव संपादयति । अन्यथा राजसूयाश्वमेधपुरुषमेधसर्वमेधलक्षणाना अधिकृताना त्रैवर्णिकानामप्यसंभव तेषा तत्पाठः स्वाध्यायार्थ एव केवल स्यात्, यदि तत्फलप्राप्त्युपाय कश्चन न स्यात् । तस्मात्तेषा संपदैव तत्फलप्राप्ति तस्मात्संपदामपि फलवत्त्वमत संपद आरभ्यन्ते ॥६॥

याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया ।

किं ताभिर्जयतीति यत्किंचेद प्राणभृदिति ॥७॥

याज्ञवल्क्येति होवाच अभिमुखीकरणाय । कतिभिरयाद्याग्निभिर्होताऽस्मिन्यज्ञे कतिभि कतिसख्याभिर्ऋग्भिर्ऋग्जातिभि अय होतर्त्विगस्मिन्यज्ञे करिष्यति शस्त्र शसति । आहेतर — तिसृभिर्ऋग्जातिभि । इत्युक्तवन्त प्रत्याहेतर कतमास्तास्तिस्र इति । संख्येयविषयोऽय प्रश्न पूर्वस्तु सख्याविषय । पुरोनुवाक्या च प्राग्यागकालाद्या प्रयुज्यन्त ऋच सग्जाति पुरोनुवाक्येत्युच्यते । यागार्थ या प्रयुज्यन्ते ऋच सग्जातिर्याज्या । शस्त्रार्थ या प्रयुज्यन्ते ऋच सग्जाति शस्या । सर्वास्तु या काश्चनर्चस्ता स्तोत्रिया वा अन्या वा सर्वा. एतास्त्वेव तिसृषु ऋग्जातिष्वतर्भवन्ति । किं ताभिर्जयतीति यत्किंचेद प्राणभृदिति । अतश्च सख्यासामान्यात् यत्किंचित्प्राणभृज्जात तत्सर्व जयति तत्सर्व फलजात सपादयति संख्यादिसामान्येन ॥

याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरास्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशेरते किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनुष्यलोक ॥८॥

याज्ञवल्क्येति होवाचेति पूर्ववत् । कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति, कत्याहुतिप्रकारा [१] तिस्र इति, कतमास्तास्तिस्र इति पूर्ववत् । इतर आह— या हुता उज्ज्वलन्ति समिदाज्याहुतय । या हुता अतिनेदन्तेऽतीव शब्द कुर्वन्ति मासाद्याहुतय । या हुता अधिशेरतेऽध्यधो गत्वा भूमेरधिशेरते पय सोमाहुतय । किं ताभिर्जयतीति, ताभिरेवं निर्वर्तिताभिराहुतिभिः किं जयतीति । या आहुतयो हुता उज्ज्वलन्त्युज्ज्वलनयुक्ता आहुतयो निर्वर्तिता फलं च देवलोकाख्यमुज्ज्वलमेव, तेन सामान्येन या मयैता उज्ज्वलन्त्य आहुतयो निर्वर्त्यमानास्ता एता साक्षाद्देवलोकस्य कर्मफलस्य रूपं देवलोकाख्यं फलमेव मया निर्वर्त्यत, इत्येवं संपादयति । या हुता अतिनेदन्ते आहुतय पितृलोकमेव ताभिर्जयति कुत्सितशब्दकर्तृत्वसामान्येन । पितृलोकमबद्धाया हि संयमन्या पुर्या वैवस्वतेन यात्यमानाना 'हा हता स्म मुंच मुंच' इति शब्दो

भवति । तथावदानाहुतय । तेन पितृलोकसामान्यात्पितृलोक एव मया निर्वर्त्यत इति संपादयति । या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयति भूम्युपरिसबंध-सामान्यात् । अध इव ह्यध एव हि मनुष्यलोक उपरितनान्साध्याँल्लोकानपेक्ष्य, अथवाऽधोगमनमपेक्ष्य । अतो मनुष्यलोक एव मया निर्वर्त्यत, इति संपादयति पय सोमाहुतिनिर्वर्तनकाले ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवता-भिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनत वै मनोऽनता विश्वे देवा अनतमेव स तेन लोक जयति ॥९॥

याज्ञवल्क्येति होवाचेति पूर्ववत् । अयमृत्विग्ब्रह्मा दक्षिणतो ब्रह्मा आ-सने स्थित्वा यज्ञ गोपायति । कतिभिर्देवताभिर्गोपायतीति प्रासंगिकेमतद्बहुवच-नम् । एकया हि देवतया गोपायत्यसौ । एव ज्ञाते बहुवचनेन प्रश्नो नोपपद्यते स्वय जानत । तस्मात्पूर्वयो कंडिकयो प्रश्नप्रतिवचनेषु कतिभि कति तिसृभि तिस्र इति प्रसगं दृष्ट्वेहापि बहुवचनेनैव प्रश्नोपक्रम क्रियते । अथवा प्रतिवा-दिव्यामोहार्थं बहुवचनम् । इतर आहैकयेति । एका सा देवता यया दक्षिणत स्थित्वा ब्रह्मा आसने यज्ञ गोपायति । कतमा सैकेति । मन एवेति, मन सा देवता । मनसा हि ब्रह्मा व्याप्रियते ध्यानेनैव । 'तस्य यज्ञस्य मनश्च वाक्च वर्तनी तयोरन्यतरा मनसा सस्करोति ब्रह्मा' इति श्रुत्यंतरात् । तेन मन एव देवता तया मनसा हि गोपायति ब्रह्मा यज्ञम् । तच्च मनो वृत्तिभेदेनानतम् । वैशब्द प्रसिद्धावद्योतनार्थ । प्रसिद्ध मनस आनंत्यम् । तदानत्याभिमानिनो देवा । अनता वै विश्वे देवा । 'सर्वे देवा यत्रैकं भवन्ति' इत्यादिश्रुत्यंतरात् । तेन आनत्यसामान्यादनंतमेव स तेन लोकं जयति ॥

याज्ञवल्क्येति होवाच कत्ययमद्योद्गाताऽस्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्येव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्याऽपानो याज्या व्यान शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोनुवाक्यया जयत्यंतरिक्षलोकं याज्यया द्युलोकं शस्यया ततो ह होताश्वल उपरराम ॥१०॥ इति प्रथम ब्राह्मणम् ॥

याज्ञवल्क्येति होवाचेति पूर्ववत् । कति स्तोत्रिया स्तोष्यतीत्ययमुद्गाता ।

स्तोत्रिया नाम ऋक्सामसमुदाय कतिपयानामृचाम्। स्तोत्रिया शस्या वा या काश्चन ऋच ता सर्वास्तिस्र एवेत्याह। ताश्च व्याख्याता पुरोनुवाक्या च याज्या च शस्यैव तृतीयेति। तत्र पूर्वमुक्त—यात्किंचेद प्राणभृत्सर्व जयतीति तत्केन सामान्येनेति? उच्यते—कतमास्तास्तिस्र ऋचो या अध्यात्म भवन्तीति। प्राण एव पुरोनुवाक्या। पशब्दसामान्यात्। अपानो याज्या। आनंतर्यात्। अपानेन हि प्रत्तं हविर्देवता प्रसान्ति। यागश्च प्रदानम्। व्यान. शस्या 'अप्राणन्ननपानन्नचमभिव्याहरति' इति श्रुत्यंतरात्। किं ताभिर्जयतीति व्याख्यातम्। तत्र विशेषसंबंधसामान्यमनुक्तमिहोच्यते, सर्वमन्यद्व्याख्यातम्। लोकसंबंधसामान्येन पृथिवीलोकमेव पुरोनुवाक्यया जयति, अंतरिक्षलोक याज्यया मध्यमत्वसामान्यात्। द्युलोक शस्ययोर्ध्वत्वसामान्यात्। ततो ह तस्मादात्मन प्रश्ननिर्णयादसौ होता अश्वल उपरराम नायमस्मद्गोचर इति॥

इति प्रथम ब्राह्मणम्॥ ३ १—

आख्यायिकासबंध प्रसिद्ध एव। मृत्योरतिमुक्तिर्व्याख्याता काललक्षणात्कर्मलक्षणाच्च। क पुनरसौ मृत्युर्यस्मादतिमुक्तिर्व्याख्याता? स च स्वाभाविकाज्ञानसंगास्पदोऽध्यात्माधिभूतविषयपरिच्छिन्नो ग्रहातिग्रहलक्षणो मृत्यु। तस्मात्परिच्छिन्नरूपान्मृत्योरतिमुक्तस्य रूपाण्यन्यादित्यादीन्युद्गीथप्रकरणे व्याख्यातानि। अश्वलप्रश्ने च तद्गतो विशेष काश्चित्। तच्चैतत्कर्मणा ज्ञानसहितानां फलम्। एतस्मात्साध्यसाधनरूपात्संसारान्मोक्ष कर्तव्य इत्यतो बंधनरूपस्य मृत्यो स्वरूपमुच्यते। बद्धस्य हि मोक्ष कर्तव्य। यदा यतिमुक्तस्य स्वरूपमुक्तं तत्रापि ग्रहातिग्रहाभ्यामविनिर्मुक्त एव मृत्युरूपाभ्याम्। तथाचोक्त 'अशनाया हि मृत्यु' 'एष एव मृत्यु' इति आदित्यस्थं पुरुषमंगीकृत्याह 'एको मृत्युर्बहव' इति च। तदात्मभावापन्नो हि मृत्योरतिमतिमुच्यत इत्युच्यते। न च तत्र ग्रहातिग्रहौ मृत्युरूपौ न स्त। 'अथैतस्य मनसो द्यौ शरीर ज्योतीरूप मसावादित्य' 'मनश्च ग्रह स कामेनातिग्राहेण गृहीत' इति वक्ष्यति 'प्राणो वै ग्रह सोऽपानेनातिग्राहेण' इति, 'वाग्वै ग्रह स नाम्नाऽतिग्राहेण' इति च। तथा व्यन्नविभागे व्याख्यातमस्माभि। सुविचारितं चैतद्यदेव प्रवृत्तिकारणं तदेव निवृत्तिकारण न भवतीति।

केचित्तु सर्वमेव निवृत्तिकारण मन्यन्ते । अत कारणात्पूर्वस्मात्पूर्वस्मान्मृत्योर्मुच्यते उत्तरमुत्तरं प्रतिपद्यमानो, व्यावृत्त्यर्थमेव प्रतिपद्यते न तु तादर्थ्य, इत्यत आ द्वैतक्षयात्सर्व मृत्यु , द्वैतक्षये तु परमार्थतो मृत्योराप्तिमतिमुच्यते । अतश्च आपेक्षिकी गौणी मुक्तिरंतराले ।

सर्वमेतदेवमबाहेदारण्यकम् । ननु सर्वैकत्वं मोक्ष 'तस्मात्तत्सर्वमभवत्' इति श्रुते । बाढं भवत्येतदपि, न तु "ग्रामकामो यजेत पशुकामो यजेत" इत्यादिश्रुतीना तादर्थ्यम् । यदि ह्यद्वैतार्थत्वमेव आसा ग्रामपशुस्वर्गाद्यर्थत्व नास्तीति ग्रामपशुस्वर्गादयो न गृह्येरन्गृह्यन्ते तु कर्मफलवैचित्र्यविशेषा । यदि च वैदिकाना कर्मणा तादर्थ्यमेव, संसार एव नाभविष्यत् । अथ तादर्थ्येऽपि अनुनिष्पादितपदार्थस्वभाव संसार इति चेत् । यथा च रूपदर्शनार्थ आलोके सर्वोऽपि तत्रस्थ प्रकाश्यत एव । न प्रमाणानुपपत्ते । अद्वैतार्थत्वे वैदिकाना कर्मणा विद्यासहिताना अन्यस्यानुनिष्पादितत्वे प्रमाणानुपपत्ति । न प्रत्यक्ष नानुमानमत एव च नागम । उभयमेकेन वाक्येन प्रदर्श्यत इति चेत्कुल्या प्रणयनालोकादिवत् । तन्नैवं, वाक्यधर्मानुपपत्ते । न च एकवाक्यगतस्यार्थस्य प्रवृत्तिनिवृत्तिसाधनत्वमवगतुं शक्यते । कुल्याप्रणयनालोकादौ अर्थस्य प्रत्यक्षत्वाददोष ।

यदप्युच्यते मन्त्रा अस्मिन्नर्थे दृष्टा इति । अयमेव तु तावदर्थ प्रमाणागम्य । मन्त्रा पुन किमस्मिन्नर्थे आहोस्विदन्यास्मिन्नर्थे इति मृग्यमेतत् । तस्माद्ब्रह्मातिग्रहलक्षणो मृत्युर्बध , तस्मान्मोक्षो वक्तव्य इत्यत इदमारभ्यते । न च जानीमो विषयसबधाविवान्तरालेऽवस्थानमर्धजरतीय कौशलम् । यत्तु मृत्योरतिमुच्यत इत्युक्त्वा ग्रहातिग्रहावुच्येते, तत्तु अर्थसंबधात् । सर्वोऽयं साध्यसाधनलक्षणो बध । ग्रहातिग्रहाविनिर्मोकात् । निगडे हि निर्ज्ञाते निगडितस्य मोक्षाय यत्न कर्तव्यो भवति । तस्मात्तादर्थ्येनारंभ ॥

अथ हैन जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इति । अष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ॥१॥

अथ हैनं, हशब्द ऐतिह्यार्थ· । अथानंतरमश्वले उपरते प्रकृत याज्ञवल्क्यं जरत्कारुगोत्रो जारत्कारव· ·ऋतभागस्यापत्यमार्तभाग पप्रच्छ । याज्ञ-

वल्क्येति होवाचेत्यभिमुखीकरणाय । पूर्ववत्प्रश्न — कति ग्रहा कत्यतिग्रहा इति । इतिशब्दो वाक्यपरिसमाप्त्यर्थ । तत्र निर्ज्ञातेषु वा ग्रहातिग्रहेषु प्रश्नः स्यादनिर्ज्ञातेषु वा । यदि तावद्ग्रहा अतिग्रहाश्च निर्ज्ञाता, तदा तद्गतस्यापि गुणस्य सख्याया निर्ज्ञातत्वात्कति ग्रहा कत्यतिग्रहा इति सख्याविषय प्रश्नो नोपपद्यते । अथानिर्ज्ञातास्तदा सख्येयविषयप्रश्न इति के ग्रहा केऽतिग्रहा इति प्रष्टव्य, न तु कति ग्रहा कत्यतिग्रहा इति प्रश्न । अपि च निर्ज्ञात-सामान्यकेषु विशेषविज्ञानाय प्रश्नो भवति — यथा कतमेऽत्र कठा कतमेऽत्र कालापा इति । न चाऽन ग्रहातिग्रहा नाम पदार्था केचन लोके प्रसिद्धा । येन विशेषार्थ प्रश्न स्यात् । ननु च 'अतिमुच्यते' इत्युक्त ग्रहगृहीतस्य हि मोक्ष 'स मुक्ति साऽतिमुक्ति' इति हि द्विरुक्तम् । तस्मात्प्राप्ता ग्रहा अतिग्रहाश्च । ननु तत्रापि चत्वारो ग्रहा अतिग्रहाश्च निर्ज्ञाता वाक्चक्षु प्राणमनासि, तत्र कतीति प्रश्नो नोपपद्यते निर्ज्ञातत्वात् । न । अनवधारणार्थत्वात् । न हि चतुष्ट्व तत्र विवक्षित, इह तु ग्रहातिग्रहदर्शनेऽष्टत्वगुणविवक्षया कतीति प्रश्न उपपद्यत एव । तस्मात् 'स मुक्ति साऽतिमुक्ति' इति मुक्त्यतिमुक्ती द्विरुक्ते । ग्रहातिग्रहा अपि सिद्धा । अत कतिसख्याका ग्रहा कति वा अतिग्रहा इति पृच्छति । इतर आह— अष्टौ ग्रहा अष्टावतिग्रहा इति । ये तेऽष्टौ ग्रहा अभिहिता, कतमे ते नियमेन ग्रहीतव्या इति ॥

प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गधाञ्जिघ्रति ॥२॥

तत्राह— प्राणो वे ग्रह । प्राण इति घ्राणमुच्यते, प्रकरणात् । वायु-सहित स । अपानेनेति गधेनेत्येतत् । अपानसचिवत्वादपानो गध उच्यते । अपानोपहृत हि गध घ्राणेन सर्वो लोको जिघ्रति । तदेतदुच्यतेऽपानेन हि गंधाञ्जिघ्रतीति ॥

वाग्वै ग्रहः स नाम्नाऽतिग्राहेण गृहीतो वाचा हि नामान्यभिवदति ॥३॥
जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्विजानाति ॥४॥
चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥५॥
श्रोत्र वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्शृणोति ॥६॥
मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान्कामयते ॥७॥
हस्तौ वै ग्रहः स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति ॥८॥

स्वग्वै ग्रह. स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहा. ॥९॥

वाग्वै ग्रह । वाचा ह्यात्मपरिच्छिन्नया आसगविषयास्पदया असत्यानृतासभ्यबीभत्सादिवचनेषु व्यापृतया गृहीतो लोकोऽपहृत , तेन वाग्ग्रह । स नाम्नाऽतिग्राहेण गृहीत , स वागाख्यो ग्रहो नाम्ना वक्तव्येन विषयेणातिग्रहेण, अतिग्राहेणेति दैर्घ्य छादस नाम । वक्तव्यार्था हि वाक्तेन वक्तव्येनार्थेन तादर्थ्येन प्रयुक्ता वाक्तेन वशीकृता । तेन तत्कार्यमकृत्वा नैव तस्या मोक्ष । अतो नाम्नातिग्राहेण गृहीता वागित्युच्यते । वक्तव्यासंगेन लुप्तप्रवृत्ता सर्वानर्थर्युज्यते । समानमन्यत् । इत्येते त्वक्पर्यन्ता अष्टौ ग्रहा स्पर्शपर्यन्ताश्चैतेऽष्टावतिग्रहा इति ॥

याज्ञवल्क्येति होवाच यदिद सर्वं मृत्योरन्न का स्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्यु जयति ॥१०॥

उपसहृतेषु ग्रहातिग्रहेषु आह पुन — याज्ञवल्क्येति होवाच । यदिद सर्व मृत्योरन्न, यदिदं व्याकृत सर्व मृत्योरन्न, सर्व जायते विपद्यते च ग्रहातिग्रहलक्षणेन मृत्युना ग्रस्तम् । का स्वित्का नु स्यात्सा देवता, यस्या देवताया मृत्युरपि अन्नं भवेत् 'मृत्युर्यस्योपसेचनम्' इति श्रुत्यतरात् । अयमभिप्राय प्रष्टु — यदि मृत्योर्मृत्यु वक्ष्यति, अनवस्था स्यात् । अथ न वक्ष्यति, अस्माद्ग्रहातिग्रहलक्षणान्मृत्यो मोक्षो नोपपद्यते । ग्रहातिग्रहमृत्युविनाशे हि मोक्ष स्यात् । स यदि मृत्योरपि मृत्यु स्याद्भवेद्ग्रहातिग्रहलक्षणस्य मृत्योर्विनाश । अतो दुर्वचन प्रश्नं मन्वान पृच्छति का स्वित्सा देवतेति । अस्ति तावन्मृत्योर्मृत्यु । नन्वनवस्था स्यात्तस्याप्यन्यो मृत्युरिति । नानवस्था । सर्वमृत्योर्मृत्युर्वक्तव्यतरानुपपत्ते । कथं पुनरवगम्यतेऽस्ति मृत्योर्मृत्युरिति । दृष्टत्वात् । अग्निस्तावत्सर्वस्य दृष्टो मृत्यु , विनाशकत्वात् । सोऽद्भिर्भक्ष्यते सोऽग्निरपामन्नम् । गृहाण तर्ह्यस्ति मृत्योर्मृत्युरिति । तेन सर्वं ग्रहातिग्रहजातं भक्ष्यते मृत्योर्मृत्युना । तस्मिन्बंधने नाशिते मृत्युना भक्षिते संसारान्मोक्ष उपपन्नो भवति । बंधनं हि ग्रहातिग्रहलक्षणमुक्त, तस्माच्च मोक्ष उपपद्यत इत्येतत्प्रसाधितम् । अतो बंधमोक्षाय पुरुषप्रयास. सफलो भवति । अतोऽपजयति पुनर्मृत्युम् ॥

याज्ञवल्क्येति होवाच यत्राय पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्या-

होऽ३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृत शेते ॥११॥

परेण मृत्युना मृत्यौ भक्षिते परमात्मदर्शनेन योऽसौ मुक्तो विद्वान्सोऽयं पुरुषो यत्र यस्मिन्काले म्रियते उदूर्ध्वमस्माद्ब्रह्मविदो म्रियमाणात्प्राणा वागादयो ग्रहा नामादयश्चातिग्रहा वासनारूपा अतस्था प्रयोजका क्रामन्त्यूर्ध्वमुत्क्रामन्ति, आहोस्विन्नेति ? नेति होवाच याज्ञवल्क्यो नोत्क्रामन्ति, अत्रैवास्मिन्नेव परेणात्मनाऽविभागं गच्छन्ति विदुषि कार्याणि करणानि च स्वयोनौ परब्रह्मसतत्त्वे समवनीयन्ते एकीभावेन समवसृज्यन्ते, प्रलीयन्ते इत्यर्थ । ऊर्मय इव समुद्रे । तथा च श्रुत्यन्तर कलाशब्दवाच्याना प्राणाना परस्मिन्नात्मनि प्रलय दर्शयति— 'एवमेवास्य परिद्रष्टुरिमा षोडश कला पुरुषायणा पुरुष प्राप्यास्त गच्छन्ति' इति । इति परेणात्मनाऽविभागं गच्छन्तीति दर्शितम् । न तर्हि मृतो, नहि । मृतश्चाय यस्मात्स उच्छ्वयत्युच्छूनता प्रतिपद्यते, आध्मायति बाह्येन वायुना पूर्यते दृतिवत्, आध्मातो मृत शेते निश्चेष्ट । बधननाशे मुक्तस्य न क्वचिद्गमनमिति वाक्यार्थ ॥

याज्ञवल्क्येति होवाच यत्राय पुरुषो म्रियते किमेन न जहातीति नामेत्यनत वै नामानता विश्वे देवा अनतमेव स तेन लोक जयति ॥१२॥

मुक्तस्य कि प्राणा एव समवनीयन्ते, आहोस्वित्तत्प्रयोजकमपि सर्वम् ? अथ प्राणा एव न तत्प्रयोजकं सर्व, प्रयोजके विद्यमाने पुन प्राणाना प्रसंग । अथ सर्वमेव कामकर्मादि, ततो मोक्ष उपपद्यते, इत्येवमर्थ उत्तर प्रश्न । याज्ञवल्क्येति होवाच, यत्राय पुरुषो म्रियते किमेनं न जहातीति । आहेतरो नामेति । सर्व समवनीयते इत्यर्थ । नाममात्रं तु न लीयत आकृतिसंबंधात् । नित्य हि नाम । अनंतं वै नाम । नित्यत्वमेवानत्यं नाम्न । तदानत्याधिकृता अनता वै विश्वे देवा । अनतमेव स तेन लोक जयति । तन्नामानंत्याधिकृतान्विश्वान्देवानात्मत्वेनोपेत्य तेनानंत्यदर्शनेनानतमेव लोकं जयति ॥

याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चंद्रं दिश. श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वाय तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्तभागावामेवैतस्य वेदिष्यावो न नावेतत्सजन

इति । तौ होत्क्रम्य मत्रयांचक्राते तौ ह यदूचतुः कर्म हेव तदूचतुरथ यत्प्रशशंसतु कर्म हैव तत्प्रशशसतु पुण्यो वै पुण्येन कर्मणा भवति पाप पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥१३॥ इति द्वितीयं ब्राह्मणम् ॥

ग्रहातिग्रहरूपं बधनमुक्त मृत्युरूप, तस्य च मृत्योर्मृत्युसद्भावान्मोक्षश्चोपपद्यते । स च मोक्षो ग्रहातिग्रहरूपाणामिहैव प्रलय , प्रदीपनिर्वाणवत् । यत्तत् ग्रहातिग्रहाख्य बधन मृत्युरूपं तस्य यत्प्रयोजक तत्स्वरूपनिर्धारणार्थ इदमारभ्यते । याज्ञवल्क्येति होवाच ॥

अत्र केचिद्वर्णयन्ति— ग्रहातिग्रहस्य सप्रयोजकस्य विनाशेऽपि किल न मुच्यते । नामावशिष्टोऽविद्यया ऊषरस्थार्नायया स्वात्मप्रभवया परमात्मन परिच्छिन्नो भोज्याच्च जगतो व्यावृत्त उच्छिन्नकामकर्मा अतराले व्यवतिष्ठते । तस्य परमात्मैकत्वदर्शनेन द्वैतदर्शनमपनेतव्यमित्यत पर परमात्मदर्शनमारब्धव्य इत्येवमपवर्गाख्यामतरालावस्था परिकल्प्योत्तरग्रथसबध कुर्वन्ति ॥

तत्र वक्तव्य—विशीर्णेषु करणेषु विदेहस्य परमात्मदर्शनश्रवणमननानिदिध्यासनानि कथमिति । समवनीतप्राणस्य हि नाममात्रावशिष्टस्येति तैरुच्यते । 'मृत शेते' इति ह्युक्तम् । न मनोरथेनाप्येतदुपपादयितु शक्यते । अथ जीवन्नेवाविद्यामात्रावशिष्टो भोज्यादपावृत्त इति परिकल्प्यते, तत्तु किंनिमित्तमिति वक्तव्यम् । समस्तद्वैतैकत्वात्मप्राप्तिनिमित्तमिति यद्युच्येत, तत्पूर्वमेव निराकृतम् । कर्मसहितेन द्वैतैकत्वात्मदर्शनेन सपन्नो विद्वान्मृत समवनीतप्राणो जगदात्मत्वं हिरण्यगर्भस्वरूप वा प्राप्नुयात्, असमवनातप्राणो भोज्याज्जीवन्नेव वा व्यावृत्तो विरक्त परमात्मदर्शनाभिमुख स्यात् । न चोभय एकप्रयत्ननिष्पाद्येन साधनेन लभ्यम् । हिरण्यगर्भप्राप्तिसाधनं चेत् न ततो व्यावृत्तिसाधनम् । परमात्माभिमुखीकरणस्य भोज्याद्व्यावृत्ते साधन चेत् न हिरण्यगर्भप्राप्तिसाधनम् । न हि यद्गतिसाधन तद्गतिनिवृत्तेरपि । अथ मृत्वा हिरण्यगर्भ प्राप्य तत समवनीतप्राणो नामावशिष्ट परमात्मज्ञानेऽधिक्रियते । ततोऽस्मदाद्यर्थं परमात्मज्ञानोपदेशोऽनर्थक स्यात् । सर्वेषा हि ब्रह्मविद्या पुरुषार्थायोपदिश्यते 'तद्यो यो देवानाम्' इत्याद्यया श्रुत्या । तस्मादत्यंतनिकृष्टा शास्त्रबाह्यैवेयं कल्पना । प्रकृतं तु वर्तयिष्याम ॥

तत्र केन प्रयुक्तं ग्रहातिग्रहलक्षणं बंधनमित्येतन्निर्दिधारयिषया आह—

यत्रास्य पुरुषस्यासम्यग्दर्शिन शिर पाण्यादिमतो मृतस्य वागग्निमप्येति, वात प्राणोऽप्येति, चक्षुरादित्यमप्येतीति सर्वत्र सबन्ध्यते । मनश्चन्द्र दिश श्रोत्रं पृथिवी शरीर, आकाशमात्मेत्यत्रात्मा आविष्टान हृदयाकाशमुच्यते । स आकाशमप्येति । ओषधीरपियन्ति लोमानि । वनस्पतीनपियन्ति केशा । अप्सु लोहितं च रेतश्च निधीयत इति पुनरादानलिगम् । सर्वत्र हि वागादि-शब्देन देवता परिगृह्यन्ते न तु करणान्येवापक्रामन्ति प्राङमोक्षात् । तत्र देवताभिरनाविष्टितानि करणानि न्यस्तदात्राद्युपमानानि विदेहश्च कर्ता पुरुषो-ऽस्वतत्र किमाश्रितो भवतीति पृच्छ्यते—क्वायं तदा पुरुषो भवतीति । किमा-श्रितस्तदा पुरुषो भवतीति । यमाश्रयमाश्रित्य पुन कार्यकरणसंघातमुपादत्ते, येन ग्रहातिग्रहलक्षणं बधन प्रयुज्यते, तत्किमिति प्रश्न ॥

अत्रोच्यते— स्वभावयदृच्छाकालकर्मदैवविज्ञानमात्रशून्यानि वादिभि परिकल्पितानि । अतोऽनेकविप्रतिपत्तिस्थानत्वान्नैव जल्पन्यायेन वस्तुनिर्णय । अत्र वस्तुनिर्णय चेदिच्छसि, आहर सोम्य हस्तमार्तभाग ह, आवामेवैतस्य त्वत्पृष्टस्य वेदितव्यं यत्तद्वेदिष्यावो निरूपयिष्याव । कस्मात्? न नौ आवयो-रेतद्वस्तु सजने जनसमुदाये निर्णेतुं शक्यते । अत एकान्तं गमिष्यावो विचा-रणाय । तौ हेत्यादि श्रुतिवचनम् । तौ याज्ञवल्क्यार्तभागावेकान्त गत्वा किं चक्रतुरित्युच्यते— तौ होत्क्रम्य सजनादेशान्मंत्रयाचक्राते । आदौ लौकिकवादि-पक्षाणामेकैकं पारेगृह्य विचारितवन्तौ । तौ ह विचार्य यदूचतुरपोह्य पूर्वपक्षा-न्सर्वानेव, तच्छृणु । कर्म हैव आश्रय पुन पुन कार्यकरणोपादानहेतु तत्त्व-त्रोचतुरुक्तवन्तौ । न केवलं, कालकर्मदैवेश्वरेष्वप्युपगतेषु हेतुषु यत्प्रशशंसतुस्तौ, कर्म हैव तत्प्रशशसतु । यस्मान्निर्धारितमेतत्कर्मप्रयुक्त ग्रहातिग्रहादिकार्यकरणो-पादान पुन पुन, तस्मात्पुण्यो वै शास्त्रविहितेन पुण्येन कर्मणा भवति, तद्विपरीतेन विपरीतो भवति पाप पापेन । इत्येव याज्ञवल्क्येन प्रश्नेषु निर्णी-तेषु, ततोऽशक्यप्रकाशयत्वाद्याज्ञवल्क्यस्य, ह जारत्कारव आर्तभाग उपरराम ॥

इति द्वितीयं ब्राह्मणम् ॥ ३ २ —

अथ हैनं भुज्युर्लाह्यायनि पप्रच्छ । ग्रहातिग्रहलक्षणं बंधनमुक्तम् । यस्मा-त्सप्रयोजकान्मुक्तो मुच्यते, येन वा बद्ध संसरति, स मृत्यु । तस्माच्च मोक्ष

उपपद्यते यस्मान्मृत्योर्मृत्युरस्ति । मुक्तस्य च न गति क्वचित् । सर्वोत्सादो नाममात्रावशेष प्रदीपनिर्वाणवदिति चावधृतम् । तत्र संसरता मुच्यमानाना च कार्यकरणाना स्वकारणसंसर्गे समाने, मुक्तानामत्यतमेव पुनरनुपादानम् । ससरता तु पुन पुनरुपादान येन प्रयुक्ताना भवति, तत्कर्मेत्यवधारित विचारणापूर्वकम् । तत्क्षये च नामावशेषेण सर्वोत्सादो मोक्ष । तच्च पुण्यपापाख्यं कर्म । 'पुण्यो वै पुण्येन कर्मणा भवति पाप पापेन' इत्यवधारितत्वात् । एतत्कृत ससार । तत्रापुण्येन स्थावरजगमेषु स्वभावदु खबहुलेषु नरकतिर्यक्प्रेतादिषु च दु खमनुभवति पुन पुनर्जायमानो म्रियमाणश्चेत्येतत् राजवर्मवत्सर्वलोकप्रसिद्धम । यत्तु शास्त्रीयं पुण्यो वै पुण्येन कर्मणा भवति तत्रैवादर क्रियत इह श्रुत्या । पुण्यमेव च कर्म सर्वपुरुषार्थसाधनमिति सर्वे श्रुतिस्मृतिवादा । मोक्षस्यापि पुरुषार्थत्वात्तत्साध्यता प्राप्ता । यावद्यावत्पुण्योत्कर्ष तावत्तावत्फलोत्कर्षप्राप्ति । तस्मादुत्तमेन पुण्योत्कर्षेण मोक्षो भविष्यतीत्याशंका स्यात् । सा निवर्तयितव्या । ज्ञानसहितस्य च प्रकृष्टस्य कर्मण एतावती गति । व्याकृतनामरूपास्पदत्वात्कर्मणस्तत्फलस्य च । न त्वकार्ये निर्लेऽव्याकृतधर्मिणि अनामरूपात्मके क्रियाकारकफलस्वभाववर्जिते कर्मणो व्यापारोऽस्ति । यत्र च व्यापार स संसार एवेत्यस्यार्थस्य प्रदर्शनाय ब्राह्मणमारभ्यते ॥

यत्तु केश्चिदुच्यते—विद्यासहितं कर्म निरभिसधि विषदध्यादिवत्कार्यान्तरमारभत इति । तन्न । अनारभ्यत्वान्मोक्षस्य । बंधननाश एव हि मोक्षो न कार्यभूत । बधन चाविद्येत्यवोचाम । अविद्यायाश्च न कर्मणा नाश उपपद्यते । दृष्टविषयत्वाच्च कर्मसामर्थ्यस्य । उत्पत्त्याप्तिविकारसंस्कारा हि कर्मसामर्थ्यस्य विषया । उत्पादयितुं प्रापयितुं विकर्तुं संस्कर्तुं च सामर्थ्यं कर्मणो, नातो व्यतिरिक्तविषयोऽस्ति कर्मसामर्थ्यस्य । लोके अप्रसिद्धत्वात् । न च मोक्ष एषा पदार्थानामन्यतम । अविद्यामात्रव्यवहित इत्यवोचाम ॥

बाढम । भवतु केवलस्यैव कर्मण एवंस्वभावता । विद्यासंयुक्तस्य तु निरभिसंधे भवत्यन्यथा स्वभाव । दृष्टं ह्यन्यशक्तित्वेन निर्ज्ञातानामपि पदार्थाना विषदध्यादीना विद्यामंत्रशर्करादिसंयुक्तानामन्यविषये सामर्थ्यम् । तथा कर्मणोऽप्यस्त्विति चेत् । न । प्रमाणाभावात् । तत्र हि कर्मण उक्तविषयव्यतिरेकेण विषयान्तरे सामर्थ्यास्तित्वे प्रमाणं न प्रत्यक्षं नानुमानं नोप-

मानं नार्थापत्तिर्न शब्दोऽस्ति । ननु फलान्तराभावे चोदनान्यथानुपपत्तिः प्रमाणमिति । न हि नित्याना कर्मणा विश्वजिन्न्यायेन फलं कल्प्यते । नापि श्रुतं फलमस्ति । चोद्यन्ते च तानि । पारिशेष्यान्मोक्षस्तेषा फलमिति गम्यते । अन्यथा हि पुरुषा न प्रवर्तेरन् । ननु विश्वजिन्न्याय एव आयातो, मोक्षस्य फलस्य कल्पितत्वात् । मोक्षे वाऽन्यस्मिन्वा फलेऽकल्पिते पुरुषा न प्रवर्तेरन्निति मोक्ष फलं कल्प्यते श्रुतार्थापत्त्या, यथा विश्वजिति । नन्वेवं सति कथमुच्यते विश्वजिन्न्यायो न भवतीति । फल च कल्प्यते विश्वजिन्न्यायश्च न भवतीति विप्रतिषिद्धमभिधीयते । मोक्ष फलमेव न भवतीति चेत् । न । प्रतिज्ञाहानात । कर्म कार्यांतरं विषदध्यादिवदारभत इति हि प्रतिज्ञातम् । स चेन्मोक्ष कर्मण कार्य फलमेव न भवतीति सा प्रतिज्ञा हीयेत । कर्मकार्यत्वे च मोक्षस्य स्वर्गादिफलेभ्यो विशेषो वक्तव्य । अथ कर्मकार्यं न भवति, नित्याना कर्मणा फलं मोक्ष इत्यस्या वचनव्यक्ते कोऽर्थ इति वक्तव्यम् । न च कार्यफलशब्दभेदमात्रेण विशेष शक्य कल्पयितुम् । अफल च मोक्षो नित्यैश्च कर्मभि क्रियते नित्याना कर्मणा फल न कार्यमिति चैषोऽर्थो विप्रतिषिद्धोऽभिधीयते यथाग्नि शीत इति । ज्ञानवदिति चेत् । यथा ज्ञानस्य कार्यं मोक्षो ज्ञानेनाक्रियमाणोऽप्युच्यते, तद्वत्कर्मकार्यत्वमिति चेत् । न । अज्ञाननिवर्तकत्वाज्ज्ञानस्य । अज्ञानव्यवधाननिवर्तकत्वाज्ज्ञानस्य मोक्षो ज्ञानकार्यमित्युपचर्यते । न तु कर्मणा निर्वर्तयितव्यमज्ञानम् । न चाज्ञानव्यतिरेकेण मोक्षस्य व्यवधानान्तरं कल्पयितुं शक्यं,— नित्यत्वान्मोक्षस्य साधकस्वरूपाव्यतिरेकाच्च— यत्कर्मणा निवर्त्येत । अज्ञानमेव निवर्तयतीति चेत् । न । विलक्षणत्वात् । अनभिव्यक्तिरज्ञानं अभिव्यक्तिलक्षणेन ज्ञानेन विरुध्यते । कर्म तु नाज्ञानेन विरुध्यते । तेन ज्ञानविलक्षणं कर्म । यदि ज्ञानाभावो, यदि संशयज्ञानं, यदि विपरीतज्ञानं वोच्यतेऽज्ञानमिति, सर्वं हि तज्ज्ञानेनैव निवर्त्यते । न तु कर्मणान्यतमेनापि विरोधाभावात् ।

अथादृष्ट कर्मणामज्ञाननिवर्तकत्वं कल्प्यमिति चेत् । न । ज्ञानेन अज्ञाननिवृत्तौ गम्यमानायां अदृष्टनिवृत्तिकल्पानुपपत्ते । यथा अवघातेन व्रीहीणा तुषनिवृत्तौ गम्यमानायां अग्निहोत्रादिनित्यकर्मकार्याऽदृष्टा न कल्प्यते तुषनिवृत्तिः । तद्वदज्ञाननिवृत्तिरपि नित्यकर्मकार्याऽदृष्टा न कल्प्यते । ज्ञानेन

विरुद्धत्वं चासकृत्कर्मणामवोचाम । यदविरुद्ध ज्ञान कर्मभिस्तद्देवलोकप्राप्ति-निमित्तामित्युक्त 'विद्यया देवलोक' इति श्रुते । किचान्यत् । कल्प्ये च फले नित्याना कर्मणा श्रुताना यत्कर्मभिर्विरुध्यते, द्रव्यगुणकर्मणा कार्यमेव न भवति, कि तत्कल्प्यता, यस्मिन्कर्मण सामर्थ्यमेव न दृष्टम्? कि वा यस्मिन्दृष्ट सामर्थ्य, यच्च कर्मणा फलमविरुद्धं, तत्कल्प्यतामिति । पुरुषप्रवृत्ति-जननायावश्यं चेत्कर्मफल कल्पयितव्यम् । कर्माविरुद्धविषय एव श्रुतार्थापत्ते क्षीणत्वान्नित्यो मोक्ष फलं कल्पयितु न शक्य, तद्व्यवधानाज्ञाननिवृत्तिर्वा । अविरुद्धत्वात् दृष्टसामर्थ्यविषयत्वाच्चेति । पारिशेष्यन्यायान्मोक्ष एव कल्पयितव्य इति चेत् । सर्वेषा हि कर्मणा सर्व फलम् । न चान्यदितरकर्मफलव्यतिरेकेण फलं कल्पनायोग्यमस्ति । परिशिष्टश्च मोक्ष । स चेष्टो वेदविदा फलम् । तस्मात्स एव कल्पयितव्य इति चेत । न । कर्मफलव्यक्तीना आनंत्यात्परिशेष्यन्यायानुपपत्ते ।

न हि पुरुषेच्छाविषयाणा कर्मफलानामेतावत्त्वं नाम केनचिदसर्वज्ञनावधृतं, तत्साधनाना वा पुरुषेच्छाना वा अनियतदेशकालनिमित्तत्वात्, पुरुषेच्छा-विषयसाधनाना च पुरुषेष्टफलप्रयुक्तत्वात् । प्रतिप्राणि च इच्छावैचित्र्यात्फलाना तत्साधनाना च आनंत्यसिद्धि । तदानंत्याच्चाशक्यमेतावत्त्वं पुरुषैर्ज्ञातुम् । अज्ञाते च साधनफलैतावत्त्वे कथं मोक्षस्य परिशेषसिद्धिरिति । कर्मफलजाति-पारिशेष्यमिति चेत् । सत्यपि इच्छाविषयाणा तत्साधनाना चानत्ये कर्मफल-जातित्वं नाम सर्वेषा तुल्यम् । मोक्षस्त्वकर्मफलत्वात्परिशिष्ट स्यात् । तस्मात्परिशेषात्स एव युक्त कल्पयितुमिति चेत् । न । तस्यापि नित्यकर्मफलत्वाभ्युपगमे कर्मफलसमानजातीयत्वोपपत्ते परिशेषानुपपत्ति । तस्मादन्यथाऽप्युपपत्ते क्षीणा श्रुतार्थापत्ति । उत्पत्त्याप्तिविकारसंस्काराणा अन्यतममपि नित्याना कर्मणा फलमुपपद्यत इति क्षीणा श्रुतार्थापत्ति ।

चतुर्णामन्यतम एव मोक्ष इति चेत् । न तावदुत्पाद्यो, नित्यत्वात् । अत एवाविकार्य. । असंस्कार्यश्चात एवासाधनद्रव्यात्मकत्वाच्च । साधनात्मकं हि द्रव्यं संस्क्रियते । यथा पात्राज्यादि प्रोक्षणादिना । न च संस्क्रियमाण, संस्कारनिर्वर्त्यो वा, यूपादिवत् । पारिशेष्यादाप्यः स्यात् । नाप्योऽपि आत्मस्वभावत्वादेकत्वाच्च । इतरै कर्मभिर्वैलक्षण्यान्नित्यानां कर्मणां तत्फलेनापि

विलक्षणेन भवितव्यमिति चेत्। न। कर्मत्वसालक्षण्यात्सलक्षणं कस्मात्फलं न भवतीतरकर्मफलै ? निमित्तवैलक्षण्यादिति चेत्। न। क्षामवत्यादिभि समानत्वात्। यथा हि गृहदाहादौ निमित्ते क्षामवत्यादीष्टि, यथा भिन्ने जुहोति स्कन्ने जुहोतीत्येवमादौ नैमित्तिकेषु कर्मसु न मोक्ष फलं कल्प्यते, तैश्चाविशेषान्नैमित्तिकत्वेन, जीवनादिनिमित्ते च श्रवणात्, तथा नित्यानामपि न मोक्ष फलम्। आलोकस्य सर्वेषा रूपदर्शनसाधनत्वे उलूकादय आलोकेन रूपं न पश्यन्तीत्युलूकादिचक्षुषो वैलक्षण्यादितरलोकचक्षुभिर्न रसादिविषयत्व परिकल्प्यते। रसादिविषये सामर्थ्यस्यादृष्टत्वात्। सुदूरमपि गत्वा यद्विषये दृष्टं सामर्थ्य तत्रैव कश्चिद्विशेष कल्पयितव्य ।

यत्पुनरुक्त विद्यामत्रशर्करादिसयुक्तविषदग्यादिवन्नित्यानि कार्यान्तरमारभन्त इति। आरभ्यता विशिष्ट कार्य तदिष्टत्वादविरोध। निरभिसधे कर्मणो विद्यासंयुक्तस्य विशिष्टकार्यान्तरारंभे न कश्चिद्विरोध। देवयाज्यात्मयाजिनो आत्मयाजिनो विशेषश्रवणात्। 'देवयाजिन श्रेयानात्मयाजी' इत्यादौ 'यदेव विद्यया करोति' इत्यादौ च। यस्तु परमात्मदर्शनविषये मनुनोक्त आत्मयाजिशब्द "संपश्यन्नात्मयाजी" इत्यत्र, समं पश्यन्नात्मयाजी भवतीत्यर्थ अथवा भूतपूर्वगत्या। आत्मयाजी आत्मसस्कारार्थ नित्यानि कर्माणि करोति 'इद मेऽनेनागं सस्क्रियते' इति श्रुते। तथा "गाभैर्होमै" इत्यादिप्रकरणे कार्यकरणसंस्कारार्थत्व नित्याना कर्मणा दर्शयति। संस्कृतश्च य आत्मयाजी तै कर्मभि सम द्रष्टु समर्थो भवति। तस्येह वा जन्मान्तरे वा सममात्मदर्शनमुत्पद्यते। समं पश्यन्स्वाराज्यमधिगच्छतीत्येषोऽर्थ। आत्मयाजिशब्दस्तु भूतपूर्वगत्या प्रयुज्यते। ज्ञानयुक्ताना नित्याना कर्मणा ज्ञानोत्पत्तिसाधनत्वप्रदर्शनार्थम्॥

किंचान्यत्। "ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमा सात्त्विकीमेता गतिमाहुर्मनीषिण॥" इति च देवसार्ष्टिव्यतिरेकेण भूताप्ययं दर्शयति "भूतान्यायेति पंच वै"। भूतान्यत्येतीति पाठे ये कुर्वन्ति, तेषां वेदविषये परिच्छिन्नबुद्धित्वाददोष। न चार्थवादत्वम्। अध्यायस्य ब्रह्मान्तकर्मावेपाकार्थस्य तद्व्यतिरिक्तात्मज्ञानार्थस्य च कर्मकाडोपनिषद्भ्या तुल्यार्थत्वदर्शनात्।

विहिताकरणप्रतिषिद्धकर्मणा च स्थावरश्वसूकरादिफलदर्शनात् । वान्ताश्यादि-प्रेतदर्शनाच्च ।

न च श्रुतिस्मृतिविहितप्रतिषिद्धव्यतिरेकेण विहितानि वा प्रतिषिद्धानि वा कर्माणि केनचिदवगतुं शक्यन्ते । येषामकरणादनुष्ठानाच्च प्रेतश्वसूकरस्थावरादीनि कर्मफलानि प्रत्यक्षानुमानाभ्यामुपलभ्यन्ते । नचैषा कर्मफलत्व केनचिदभ्युपगम्यते । तस्माद्विहिताकरणप्रतिषिद्धसेवाना यथैते कर्मविपाका प्रेततिर्यक्स्थावरादय , तथोत्कृष्टेष्वपि ब्रह्मान्तेषु कर्मविपाकत्वं वेदितव्यम् । तस्मात्स आत्मनो वपामुदखिदत् सोऽरोदीत् , इत्यादिवन्नाभूतार्थवादत्वम् । तत्राप्यभूतार्थवादत्वं मा भूदिति चेत् । भवत्वेवम् । न चैतावत्ता अस्य न्यायस्य बाधो भवति । न चास्मत्पक्षो वा दुष्यति । न च "ब्रह्मा विश्वसृज" इत्यादीना काम्यकर्मफलत्व शक्यं वक्तुम् । तेषा देवसार्ष्टिताया फलस्योक्तत्वात् । तस्मात्साभिसंधीना नित्याना कर्मणा सर्वमेधाश्वमेधादीना च ब्रह्मत्वादीनि फलानि ॥

येषा पुनर्नित्यानि निरभिसंधीन्यात्मसंस्कारार्थानि, तेषा ज्ञानोत्पत्त्यर्थानि तानि । "ब्राह्मीय क्रियते तनु" इति स्मरणात् । तेषामारादुपकारकत्वात् मोक्षसाधनान्यपि कर्माणि भवन्तीति न विरुध्यते । यथा चायमर्थ षष्ठे जनकाख्यायिकासमासौ वक्ष्याम । यत्तु विषदध्यादिवदित्युक्तं, तत्र प्रत्यक्षानुमानविषयत्वादविरोध । यस्तु अत्यंतशब्दगम्योऽर्थ तत्र वाक्यस्याभावे तदर्थप्रतिपादकस्य न शक्यं कल्पयितुं विषदध्यादिसाधर्म्यम् । न च प्रमाणान्तरविरुद्धार्थविषये श्रुतेः प्रामाण्यं कल्प्यते, यथा शीतोऽग्नि क्लेदयतीति । श्रुते तु तादर्थ्ये वाक्यस्य प्रमाणान्तरस्य आभासत्वम् । यथा खद्योतोऽग्निरिति, तलमलिनमंतरिक्षमिति बालाना यत्प्रत्यक्षमपि तद्विषयप्रमाणान्तरस्य यथार्थत्वे निश्चिते, निश्चितार्थमपि बालप्रत्यक्षमाभासी भवति ॥

तस्मात् वेदप्रामाण्यस्याव्यभिचारात्तादर्थ्ये सति वाक्यस्य तथात्वं स्यात् । न तु पुरुषमतिकौशलम् । न हि पुरुषमतिकौशलात्सविता रूपं न प्रकाशयति । तथा वेदवाक्यान्यपि नान्यार्थानि भवन्ति । तस्मान्न मोक्षार्थानि कर्माणीति सिद्धम् । अतः कर्मफलानां संसारत्वप्रदर्शनायैव ब्राह्मणमारभ्यते ॥

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच । मद्रेषु चरकाः पर्यव्रजाम ते पतंचलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गंधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वांगिरस इति त यदा लोकानामंतानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन्स्व पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥१॥

अथानंतरं उपरते जारत्कारवे, भुज्युरिति नाम्नतो लाह्यस्यापत्यं लाह्यस्तपदत्य लाह्यायनि पप्रच्छ । याज्ञवल्क्येति होवाच । आदावुक्तमश्वमेधदर्शन, समष्टिव्यष्टिफलश्चाश्वमेधकतु । ज्ञानसमुच्चितो वा केवलज्ञानसंपादितो वा सर्वकर्मणा परा काष्ठा । भ्रूणहत्याश्वमेधाभ्या न पर पुण्यपापयोरिति हि स्मरन्ति । तेन हि समष्टिं व्यष्टीश्च प्राप्नोति । तत्र व्यष्टयो निर्ज्ञाता अंतरंगविषया अश्वमेधप्रागफलभूता । 'मृत्युरस्यात्मा भवत्येतासा देवतानामेको भवति' इत्युक्तम् । मृत्युश्चाशनायालक्षणो बुद्ध्यात्मा समष्टि प्रथमजो वायु सूत्र सत्य हिरण्यगर्भ । तस्य व्याकृतो विषयो यदात्मकं सर्वं द्वैतैकत्वं, य सर्वभूतान्तरात्मा लिगममूर्तरसो यदाश्रितानि सर्वभूतकर्माणि, य कर्मणा कर्मसंबद्धाना च विज्ञानाना परा गति परं फलम् । तस्य क्रियान्गोचर कियती व्याप्तिः सर्वत परिमडलीभूता, सा वक्तव्या । तस्याप्युक्ताया सर्व ससारो बंधगोचर उक्तो भवति । तस्य च समष्टिव्यष्टयात्मदर्शनस्य अलौकिकत्वप्रदर्शनार्थ आख्यायिकामात्मनो वृत्ता प्रकुरुते । तेन च प्रतिवादिबुद्धि व्यामोहयिष्यामीति मन्यते ॥

मद्रेषु मद्रा नाम जनपदास्तेषु, चरका अध्ययनार्थ व्रतचरणाच्चरका अध्वर्यवो वा, पर्यव्रजाम पर्यटितवन्त । ते पतंचलस्य ते वयं पर्यटन्तः पतंचलस्य नाम्नत काप्यस्य कपिगोत्रस्य गृहानैम गतवन्त. । तस्यासीत् दुहिता गंधर्वगृहीता, गंधर्वेण अमानुषेण सत्त्वेन केनचिदाविष्टा । गंधर्वो वा धिष्ण्योऽग्निर्भूत्विग्देवता विशिष्टविज्ञानत्वादवसीयते । न हि सत्त्वमात्रस्येदृशं विज्ञानमुपपद्यते । तं सर्वे वयं परिवारिता सन्तोऽपृच्छाम कोऽसीति, कस्त्वमसि किंनामा किंसतत्त्व । सोऽब्रवीद्गंधर्व सुधन्वा नामत आगिरसो गोत्रत । तं यदा यस्मिन्काले लोकानामंतान्धर्यवसानान्यपृच्छाम अथैन गंधर्वमब्रूम भुक्तकोशपरिमाणज्ञानाय प्रवृत्तेषु सर्वेष्वात्मानं श्लाघयन्त पृष्टवन्तो वयम् । कथं? क्व पारिक्षिता अभवन्निति । स च गंधर्व सर्वमस्मभ्यमब्रवीत् । तेन

दिव्येभ्यो मया लब्धं ज्ञानं, तत्तव नास्ति, अतो निगृहीतोऽसीत्यभिप्राय । सोऽहं विद्यासंपन्नो लब्धागमो गधर्वात्त्वा त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवंस्तत्त्वं किं जानासि ? हे याज्ञवल्क्य कथय पृच्छामि क्व पारिक्षिता अभवन्निति ॥१॥

स होवाचोवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति क्व न्वश्वमेधयाजिनो गच्छन्तीति द्वात्रिंशत वै देवरथाह्ययान्यय लोकस्तं समन्तं पृथिवी द्विस्तावत्पर्येति तां समन्त पृथिवी द्विस्तावत्समुद्र पर्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकाया पत्रं तावानंतरेणाकाशस्तानिंद्र सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्निति्येवमिव वै स वायुमेव प्रशशस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्यु जयति य एव वेद ततो ह भुज्युर्लाह्यायनिरुपरराम ॥२॥ इति तृतीय ब्राह्मणम् ॥

स होवाच याज्ञवल्क्य उवाच वै स । वैशब्द स्मरणार्थ । उवाच वै स गंधर्वस्तुभ्यम् । अगच्छन्वै ते पारिक्षितास्तत्तत्र । क्व ? यत्र यस्मिन्नश्वमेधयाजिनो गच्छन्तीति निर्णीते प्रश्ने आह—क्व नु कस्मिन्नश्वमेधयाजिनो गच्छन्तीति । तेषा गतिविवक्षया भुवनकोशपरिमाणमाह--द्वात्रिंशतं वै, द्वे अधिके त्रिंशत् द्वात्रिंशतं वै देवरथाह्ययानि । देव आदित्यस्तस्य रथो देवरथंस्तस्य रथस्य गत्या अह्नया यावत्परिच्छिद्यते देशपरिमाणं तावद्देवरथाह्यं, तत् द्वात्रिंशद्गुणित देवरथाह्ययानि, तावत्परिमाणोऽयं लोको लोकालोकगिरिणा परिक्षिप्त । यत्र वैराज शरीरं यत्र च कर्मफलोपभोग प्राणिना स एष लोक । एतावाल्लोकोऽत परमलोक । तं लोकं समन्तं समन्ततो लोकविस्तारात् द्विगुणपरिमाणविस्तारेण परिमाणेन त लोकं परिक्षिप्ता पर्येति पृथिवी । तां पृथिवी तथैव समन्त द्विस्तावत् द्विगुणेन परिमाणेन समुद्र पर्येति यं घनोदमाचक्षते पौराणिका । तत्र अडकपालयोर्विवरपरिमाणमुच्यते । येन विवरेण मार्गेण बाह्यैर्निर्गच्छन्तो व्याप्नुवन्त्यश्वमेधयाजिन । तत्र यावती यावत्परिमाणा क्षुरस्य धारा अग्रं, यावद्वा सौक्ष्म्येण युक्तं मक्षिकाया पत्रं तावास्तावत्परिमाणोऽन्तरेण मध्ये अंडकपालयो आकाशश्छिद्रं, तेनाकाशेनेत्येतत् । तान्यारिक्षितानश्वमेधयाजिन प्राप्तानिंद्र परमेश्वरो. योऽश्वमेधेऽग्निश्चित . सपर्णो

यद्विषयं दर्शनमुक्त 'तस्य प्राची दिक्शिर' इत्यादिना, सुपर्ण पक्षी भूत्वा पक्षपुच्छाद्यात्मक सुपर्णो भूत्वा, वायवे प्रायच्छन्मूर्तत्वान्नास्त्यात्मनो गतिस्तत्रेति। तान्परिक्षितान्वायुरात्मनि धित्वा स्थापयित्वा स्वात्मभूतान्कृत्वा तत्र तस्मिन्नगमयत्। क्व? यत्र पूर्वेऽतिक्रान्ता पारिक्षिता अश्वमेधयाजिनो अभवन्निति। एवमिव वै एवमेव स गंधर्वो वायुमेव प्रशशंस पारिक्षितानां गतिम्॥

समाप्ता आख्यायिका। आख्यायिकानिर्वृत्त त्वर्थमाख्यायिकातोऽपसृत्य स्वेन श्रुतिरूपेणैव आचष्टेऽस्मभ्यम्। यस्माद्वायु स्थावरजंगमाना भूतानामंतरात्मा बहिश्च स एव, तस्मादध्यात्माधिभूताधिदैवभावेन विविधा या अष्टिर्व्याप्ति स वायुरेव। तथा समष्टि केवलेन सूत्रात्मना वायुरेव। एव वायुमात्मान समष्टिव्यष्टिरूपात्मकत्वेनोपगच्छति य एव वेद। तस्य कि फलमित्याह— अप पुनर्मृत्यु जयति, सकृन्मृत्वा पुनर्न म्रियते। तत आत्मन प्रश्ननिर्णयात् भुज्युर्लाह्यायनिरुपरराम॥२॥ इति तृतीय ब्राह्मणम्॥ ३.३ —

अथ हैनमुषस्तश्चाक्रायण पप्रच्छ। पुण्यपापप्रयुक्तैर्ग्रहातिग्रहैर्गृहीत पुन पुनर्ग्रहातिग्रहास्त्यजन्नुपाददत्ससरतीत्युक्तम्। पुण्यस्य च पर उत्कर्षो व्याख्यातो व्याकृतविषय समष्टिव्यष्टिरूपो द्वैतैकत्वात्मप्राप्ति। यस्तु ग्रहातिग्रहैर्ग्रस्त. संसरति, सोऽस्ति वा नास्ति। अस्तित्वे च किलक्षण इत्यात्मन एव विवेकाधिगमायोषस्तप्रश्न आरभ्यते। तस्य च निरुपाधिस्वरूपस्य क्रियाकारकविनिर्मुक्तस्वभावस्य अधिगमात् ययोक्ताद्बन्धनाद्विमुच्यते सप्रयोजकात्। आख्यायिकासबंधस्तु प्रसिद्ध॥

अथ हैनमुषस्तश्चाक्रायण पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्त मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तर. कतमो याज्ञवल्क्य सर्वान्तरो य. प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानीति स त आत्मा सर्वान्तरो यो व्यानेन व्यानीति स त आत्मा सर्वान्तरो य उदानेनोदानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः॥१॥

अथ हैनं प्रकृतं याज्ञवल्क्यमुषस्तो नामतश्चक्रस्यापत्य चाक्रायण. पप्र-

च्छ । यद्ब्रह्म साक्षादव्यवहितं केनचित् द्रष्टुरपरोक्षादगौणम् । न श्रोत्रब्रह्मादिवत् । किं तत्[१] य आत्मा । आत्मशब्देन प्रत्यगात्मोच्यते । तत्र आत्मशब्दस्य प्रसिद्धत्वात् । सर्वस्याभ्यंतरः सर्वान्तर । यद्य शब्दाभ्या प्रसिद्ध आत्मा ब्रह्मेति । तमात्मान मे मह्यं व्याचक्ष्वेति, विस्पष्टं शृंगे गृहीत्वा यथा गा दर्शयति तथा आचक्ष्व, सोऽयमित्येवं कथयस्वेत्यर्थ ।

एवमुक्त प्रत्याह याज्ञवल्क्य — एष ते तवात्मा सर्वान्तर सर्वस्याभ्यंतर । सर्वविशेषणोपलक्षणार्थं सर्वान्तरग्रहणम् । यत्साक्षादव्यवहितं अपरोक्षादगौणं ब्रह्म बृहत्तममात्मा सर्वस्य सर्वस्याभ्यतर , एतैर्गुणैः समस्तैरुक्त एष । कोऽसौ तवात्मा, योऽयं कार्यकरणसंघातस्तव स येनात्मना आत्मवान्स एव तव आत्मा । तव कार्यकरणसघातस्येत्यर्थ । तत्र पिंड तस्याभ्यंतरे लिंगात्मा करणसंघात , तृतीयो यश्च संदिह्यमानस्तेषु कतमो ममात्मा सर्वान्तर त्वया विवक्षित इत्युक्त इतर आह-- य प्राणेन मुखनासिकासंचारिणा प्राणिति प्राणचेष्टा करोति, येन प्राण प्रणीयत इत्यर्थ । स ते तव कार्यकरणमघातस्य आत्मा विज्ञानमय । समानमन्यत् । योऽपानेनापानीति यो व्यानेन व्यानीतीति । च्छादसं दैर्घ्यम् । सर्वा कार्यकरणसघातगता प्राणनादिचेष्टा दारुयंत्रस्येव येन क्रियन्ते । न हि चेतनावदनधिष्ठितस्य दारुयंत्रस्येव प्राणनादिचेष्टा विद्यन्ते । तस्माद्विज्ञानमयेनाधिष्ठित विलक्षणेन दारुयंत्रवत्प्राणनादिचेष्टा प्रतिपद्यते । तस्मात्सोऽस्ति कार्यकरणसघातविलक्षणो यश्चेष्टयति ॥१॥

स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ मौरसावश्व इत्येवमेवैतद्ब्रह्मपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तर. कतमो याज्ञवल्क्य सर्वान्तर. । न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः । एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम ॥२॥ इति चतुर्थं ब्राह्मणम् ॥

स होवाचोषस्तश्चाक्रायण — यथा कश्चिदन्यथा प्रतिज्ञाय पूर्वं पुनर्विप्रतिपन्नो ब्रूयादन्यथाऽसौ गौरसावश्वो यश्चलति धावतीति वा, पूर्वं प्रत्यक्षं दर्शयामीति प्रतिज्ञाय पश्चाच्चलनादिलिंगैर्व्यपदिशति, एवमेवैतद्ब्रह्म प्राणनादिलिंगैर्व्यपदिष्टं भवति त्वया । किं बहुना[१] स्वकृत्या गोतृष्णानिमित्तं व्याजं,

यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति । इतर आह— यथा मया प्रथमं प्रतिज्ञातस्तवात्मा, एवलक्षण इति, तां प्रतिज्ञामनुवर्त एव । तत्रैव, यथोक्तं मया ।

यत्पुनरुक्त तमात्मानं घटादिवद्विषयीकुर्विति, तदशक्यत्वान्न क्रियते । कस्मात्पुनस्तदशक्यमिति आह । वस्तुस्वाभाव्यात् । किं पुनस्तद्वस्तुस्वाभाव्यम् ? दृष्टयादिद्रष्टृत्वम् । दृष्टेर्द्रष्टा ह्यात्मा । दृष्टिरिति द्विविधा भवति लौकिकी पारमार्थिकी चेति । तत्र लौकिकी चक्षुसंयुक्ता अंतःकरणवृत्तिः । सा क्रियत इति जायते विनश्यति च । या तु आत्मनो दृष्टि अग्न्युष्णप्रकाशादिवत्सा च द्रष्टु स्वरूपत्वान्न जायते न विनश्यति च । सा क्रियमाणयोपाधिभूतया संसृष्टेवेति व्यपदिश्यते द्रष्टेति, भेदवच्च द्रष्टा दृष्टिरिति च । यासौ लौकिकी दृष्टि चक्षुर्द्वारा रूपोपरक्ता जायमानैव, नित्यया आत्मदृष्ट्या संसृष्टेव, तत्प्रतिच्छाया तया व्याप्तैव जायते तथा विनश्यति च । तेनोपचर्यते द्रष्टा सदा पश्यन्नपि पश्यति न पश्यति चेति । ननु पुन द्रष्टुर्दृष्टे कदाचिदप्यन्यथात्वम् । तथा च वक्ष्यति षष्ठे—'न्यायतीव लेलायतीव' । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति च ।

तमिममर्थमाह— लौकिक्या दृष्टेः कर्मभूताया द्रष्टार स्वकीयया नित्यया दृष्टया व्यापारं न पश्ये । यासौ लौकिकी दृष्टि कर्मभूता, सा रूपोपरक्ता रूपाभिव्यंजिका नात्मान स्वात्मनो व्यापार प्रत्यंचं व्याप्नोति । तस्मात्त प्रत्यगात्मानं दृष्टेर्द्रष्टारं न पश्ये. । तथा श्रुते श्रोतार न शृणुया । तथा मतेर्मनोवृत्ते केवलाया व्यापारं न मन्वीथा । तथा विज्ञाते केवलाया बुद्धिवृत्तेर्व्यापारं न विजानीया । एष वस्तुन स्वभाव । अतो नैव दर्शयितुं शक्यते गवादिवत् ॥

'न दृष्टेर्द्रष्टारं' इत्यत्राक्षराण्यन्यथा व्याचक्षते केचित् । न दृष्टेर्द्रष्टारं दृष्टे कर्तारं दृष्टिभेदमकृत्वा दृष्टिमात्रस्य कर्तारं न पश्येरिति । दृष्टेरिति कर्मणि षष्ठी । सा दृष्टि क्रियमाणा घटवत्कर्म भवति । द्रष्टारमिति तृजंतेन द्रष्टुर्दृष्टिकर्तृत्वमाचष्टे । तेषामौ दृष्टेर्द्रष्टा दृष्टे कर्तेति व्याख्यातृणामभिप्राय । तत्र दृष्टेरिति षष्ठ्यंतेन दृष्टिग्रहणं निरर्थकमिति दोषं न पश्यन्ति । पश्यता च पुनरुक्तमसार· ग्रमादपाठ इति वा न आदर । कथं पुनराधिक्यं ? तृजंतेनैव

दृष्टिकर्तृत्वस्य सिद्धत्वात् द्रष्टेरिति निरर्थकम्। तदा 'द्रष्टार न पश्ये' इत्येतावदेव वक्तव्यम्। यस्माद्धातो परस्तृच् श्रूयते, तद्धात्वर्थकर्तारं हि तृच्स्मर्यते। गन्तारं भेत्तार वा नयतीत्येतावानेव हि शब्द प्रयुज्यते। न तु गतेर्गतार भिदेर्भेत्तारमिति असति अर्थविशेषे प्रयोक्तव्य। नच अर्थवादत्वेन हातव्य सत्या गतो। न च प्रमादपाठ। सर्वेषामविगानात्। तस्माद्व्याख्यातृणामेव बुद्धिदौर्बल्यं, नाध्येतृप्रमाद।

यथा तु अस्माभिर्व्याख्यात लौकिकदृष्टेर्विविच्य नित्यदृष्टिविशिष्ट आत्मा प्रदर्शयितव्य, तथा कर्तृकर्मविशेषणत्वेन दृष्टिशब्दस्य द्वि प्रयोग उपपद्यते आत्मस्वरूपनिर्धारणाय। 'न हि द्रष्टुर्दृष्टे' इति च प्रदेशान्तरवाक्येनैव एकवाक्यतोपपन्ना भवति। तथा च 'चक्षूषि पश्यति' 'श्रोत्रमिद श्रुतम् इति श्रुत्यतरेण एकवाक्यतोपपन्ना। न्यायाच्च। एवमेव ह्यात्मनो नित्यत्वमुपपद्यते विक्रियाभावे। विक्रियावच्च नित्यमिति च विप्रतिषिद्धम्। 'ध्यायतीव लेलायतीव' 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' 'एष नित्यो महिमा ब्राह्मणस्य' इति च श्रुत्यक्षराण्यन्यथा न गच्छन्ति॥

ननु द्रष्टा श्रोता मन्ता विज्ञातेत्येवमादीन्यपि अक्षराण्यात्मनोऽविक्रियत्वे न गच्छन्तीति। न। यथाप्राप्तलौकिकवाक्यानुवादित्वात्तेषाम्। न आत्मतत्त्वनिर्धारणार्थानि तानि। 'न दृष्टेर्द्रष्टार' इत्येवमादीनामन्यार्थासंभवात् यथोक्तार्थपरत्वमवगम्यते। तस्मादनवबोधादेव हि विशेषण परित्यक्त दृष्टेरिति। एष ते तवात्मा सर्वैरुक्तैर्विशेषणैर्विशिष्ट। अत एतस्मादात्मनोऽन्यदार्त, कार्य वा शरीरं करणात्मकं वा लिंगम्। एतदेवकं अनार्तमविनाशि कूटस्थम्। ततो ह उषस्तश्चाक्रायण उपरराम॥ इति चतुर्थ ब्राह्मणम्॥ ३ ४ —

बधन सप्रयोजकमुक्तम्। यश्च बद्धस्तस्याप्यस्तित्वमधिगत, व्यतिरिक्तत्व च। तस्येदानी बधमोक्षसाधन ससन्यासमात्मज्ञान वक्तव्यमिति कहोलप्रश्न आरभ्यते—

अथ हैनं कहोलः कौषीतकेय पप्रच्छ याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तर। कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां

मृत्युमत्येति। एतं वै तमात्मानं विदित्वा ब्राह्मणा. पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवत। तस्माद्ब्राह्मण पांडित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्य च पांडित्य च निर्विद्याथ मुनिरमौनं च मौन च निर्विद्याथ ब्राह्मण स ब्राह्मण. केन स्याद्येन स्यात्तेनेदृश एवातोऽन्यदार्तं ततो ह कहोल कौषीतकेय उपरराम ॥१॥ इति पचमं ब्राह्मणम् ॥

अथ हैनं कहोलो नामत, कुषीतकस्यापत्यं कौषीतकेय पप्रच्छ। याज्ञवल्क्येति होवाचेति पूर्ववत। यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः त मे व्याचक्ष्वेति। य विदित्वा बधनात्प्रमुच्यते। याज्ञवल्क्य आह—एष ते तवात्मा ॥

किं उषस्तकहोला+यामेक आत्मा पृष्ट., किं वा भिन्नावात्मानौ तुल्यलक्षणाविति? भिन्नाविति युक्त, प्रश्नयोरपुनरुक्तत्वोपपत्ते। यदि ह्येक आत्मा उषस्तकहोलप्रश्नयोर्विवक्षित तत्रैकेनैव प्रश्नेनाधिगतत्वात्तद्विषयो द्वितीय प्रश्नोऽनर्थक स्यात्। न चार्थवादरूपत्वं वाक्यस्य। तस्माद्भिन्नावेतावात्मानौ क्षेत्रज्ञपरमात्माख्यौ इति केचिद्व्याचक्षते।

तन्न। ते इति प्रतिज्ञानात्। 'एष त आत्मा' इति हि प्रतिवचने प्रतिज्ञातम्। नचैकस्य कार्यकरणसंघातस्य द्वावात्मानौ उपपद्येते। एको हि कार्यकरणसंघात एकेनात्मना आत्मवान्। न च उषस्तस्यान्य कहोलस्यान्यो जातितो भिन्न आत्मा भवति। द्वयो अगौणत्वात्मत्वसर्वान्तरत्वानुपपत्ते। यद्येकमगौणं ब्रह्म द्वयोरितरेणावश्य गौणेन भवितव्यं, तथा आत्मत्वं सर्वान्तरत्वं च। विरुद्धत्वात्पदार्थानाम्। यद्येकं सर्वान्तरं ब्रह्म आत्मा मुख्य, इतरेण असर्वान्तरेण अनात्मना अमुख्येनावश्य भवितव्यम। तस्मादेकस्यैव द्वि श्रवणं विशेषविवक्षया ॥

यत्तु पूर्वोक्तेन समानं द्वितीये प्रश्नान्तर उक्तं, तावन्मात्रं पूर्वस्यैवानुवाद, तस्यैवानुक्त कश्चिद्विशेषो वक्तव्य इति। क पुनरसौ विशेष इति। उच्यते—पूर्वस्मिन्प्रश्ने अस्ति व्यतिरिक्त आत्मा यस्याय सप्रयोजको बध उक्त इति। द्वितीये तु, तस्यैव आत्मनोऽशनायादिसंसारधर्मातीतत्व विशेष उच्यते।

यद्विशेषपरिज्ञानात्संन्याससहितात्पूर्वोक्ताद्बंधनाद्विमुच्यते । तस्मात्प्रश्नप्रतिवचनयो 'एष त आत्मा' इत्येवमंतयोस्तुल्यार्थत्वेव ॥

ननु कथं एकस्यैवात्मन अशनायाद्यतीतत्वं तद्वत्त्वं चेति विरुद्धधर्मसमवायित्वमिति । न । परिहृतत्वात् । नामरूपविकारकार्यकरणलक्षणसंघातोपाधिभेदसपर्कजनितभ्रान्तिमात्र हि संसारित्वं इत्यसकृदवोचाम । विरुद्धश्रुतिव्याख्यानप्रसगेन च । यथा रज्जुशुक्तिकागगनादय सर्परजतमलिना भवन्ति पराभ्यारोपितधर्मविशिष्टा , स्वत केवला एव रज्जुशुक्तिकागगनादय । न चैवं विरुद्धधर्मसमवायित्वे पदार्थाना कश्चन विरोध । नामरूपोपाध्यास्तित्वे 'एकमेवाद्वितीयम् 'नेह नानाऽस्ति किंचन' इति श्रुतयो विरुध्येरन्निति चेत् । न । सलिलफेनदृष्टान्तेन परिहृतत्वान्मृदादिदृष्टान्तैश्च । यदा तु परमार्थदृष्ट्या परमात्मतत्त्वात् श्रुत्यनुसारिभि अन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवत् वस्त्वतरे तत्त्वतो न स्त , सलिलफेनघटादिविकारवदेव, तदा तदपेक्ष्य 'एकमेवाद्वितीय' 'नेह नानाऽस्ति किंचन' इत्यादिपरमार्थदर्शनगोचरत्व प्रतिपद्यते । यदा तु स्वाभाविक्या अविद्यया ब्रह्मस्वरूप रज्जुशुक्तिकागगनस्वरूपवदेव स्वेन रूपेण वर्तमान केनचिदस्पृष्टस्वभावमपि सन्नामरूपकृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते, नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी, तदा सर्वोऽय वस्त्वतरास्तित्वव्यवहार । अस्ति चायं भेदकृतो मिथ्याव्यवहारो येषा ब्रह्मतत्त्वादन्यत्वेन वस्तु विद्यते येषा च नास्ति । परमार्थवादिभिस्तु श्रुत्यनुसारेण निरूप्यमाणे वस्तुनि, किं तत्त्वतोऽस्ति वस्तु कि वा नास्तीति, ब्रह्मैकमेवाद्वितीय सर्वसंव्यवहारशून्यमिति निर्धार्यते । तेन न कश्चिद्विरोध । न हि परमार्थावधारणनिष्ठाया वस्त्वतरास्तित्व प्रतिपद्यामहे 'एकमेवाद्वितीयम्' 'अनंतरमबाह्यम्' इति श्रुते । न च नामरूपव्यवहारकाले त्वविवेकिना क्रियाकारकफलादिसंव्यवहारो नास्तीति प्रतिषिध्यते । तस्माज्ज्ञानाज्ञाने अपेक्ष्य सर्व संव्यवहार शास्त्रीयो लौकिकश्च । अतो न काचन विरोधशंका । सर्ववादिनाप्यपरिहार्य परमार्थसंव्यवहारकृतो व्यवहार ॥

तत्र परमार्थात्मस्वरूपमपेक्ष्य प्रश्न पुन । कतमो याज्ञवल्क्य सर्वान्तर इति । प्रत्याहेतर — योऽशनायापिपासे । अशितुमिच्छाऽज्ञानाया । पातुमिच्छा पिपासा । ते अशनायापिपासे योऽत्येतीति वक्ष्यमाणेन संबंध । अविवेकिभिः

तलमलवदिव गगनं गम्यमानमेव तलमले अलेपेति परमार्थत ताभ्यामसंसृष्ट-स्वभावत्वात्। तथा मूढै अशनायापिपासादिमद्ब्रह्म गम्यमानमपि क्षुधितोऽह पिपासितोऽहमिति, ते अलेपेत्येव परमार्थत ताभ्यामसंसृष्टस्वभावत्वात्। 'न लिप्यते लोकदु खेन बाह्य' इति श्रुते। अविद्वल्लोकाध्यारोपितदु खेनेत्यर्थ। प्राणैकधर्मत्वात्समाप्तकरणं अशनायापिपासयो॥

शोकं मोहं शोक इति काम। इष्टं वस्तूद्दिश्य चिंतयतो यदरमण तत्तृष्णाभिभूतस्य कामबीजं, तेन हि कामो दीप्यते। मोहस्तु विपरीतप्रत्ययप्रभवो अविवेको भ्रम। स चाविद्या सर्वस्यानर्थस्य प्रसवबीजम्। भिन्नकार्यत्वात्तयो शोकमोहयो असमासकरणम्। तौ मनोविकरणौ। तथा शरीराधिकरणौ जरा मृत्युं चाल्पेति। जरेति कार्यकरणसघातविपरिणामो वलीपलितादिलिंग। मृत्युरिति तद्विच्छेदो विपरिणामावसान। तौ जरामृत्यू शरीराधिकरणौ अलेपेति। ये तेऽशनायादय प्राणमन शरीराधिकरणा प्राणिष्वनवरत वर्तमाना अहोरात्रादिवत्समुद्रोर्मिवच्च प्राणिषु ससार इत्युच्यन्ते। योऽसौ दृष्टेर्द्रष्टेत्यादिलक्षण साक्षादव्यवहितोऽपरोक्षादगौण सर्वान्तर आत्मा ब्रह्मादिस्तवपर्यंताना भूताना अशनायापिपासादिभि संसारधर्मै सदा न स्पृश्यते, आकाश इव घनादिमलै। तमेतं वै आत्मान स्व तत्त्वं विदित्वा ज्ञात्वा अयमहमस्मि परं ब्रह्म सदा सर्वसंसारविनिर्मुक्त नित्यतृप्तमिति। ब्राह्मणा ब्राह्मणाना एवाधिकारो व्युत्थानेऽतो ब्राह्मणग्रहणम्। व्युत्थाय वैपरीत्येनोत्थान कृत्वा। कुत इत्याह— पुत्रैषणाया पुत्रार्थैषणा पुत्रैषणा। पुत्रेणेम लोक जयेयमिति लोकजयसाधन पुत्रं प्रतीच्छैषणा दारसग्रह। दारसग्रहमकृत्वेत्यर्थ। वित्तैषणायाश्च, कर्मसाधनस्य गवादेरुपादान, अनेन कर्म कृत्वा पितृलोकं जेष्यामीति, विद्यासंयुक्तेन वा देवलोकं, केवलया वा हिरण्यगर्भविद्यया दैवेन वित्तेन देवलोकम्। दैवाद्वित्तात् व्युत्थानमेव नास्तीति केचित्। यस्मात्तद्बलेन हि किल व्युत्थानमिति। तदसत्। 'एतावान्वै काम' इति पठितत्वादेषणासध्ये दैवस्य वित्तस्य। हिरण्यगर्भादिदेवताविषयैव विद्या वित्तमित्युच्यते। देवलोकहेतुत्वात्। न हि निरुपाधिकप्रज्ञानघनविषया ब्रह्मविद्या देवलोकप्राप्तिहेतु। 'तस्मात्तत्सर्वमभवत्' 'आत्मा ह्येषा स भवति' इति श्रुतेः। तद्बलेन हि व्युत्थानम् 'एतं वै तमात्मानं विदित्वा' इति विशेषवचनत्। तस्मात्

त्रिभ्योपि एतेभ्योऽनात्मलोकप्राप्तिसाधनेभ्य एषणाविषयेभ्यो व्युत्थाय । एषणा काम 'एतावान्वै काम' इति श्रुते । एतस्मिन्विविधेऽनात्मलोकप्राप्तिसाधने तृष्णामकृत्वेत्यर्थ ॥

सर्वा हि साधनेच्छा फलेच्छैव । अतो व्याचष्टे श्रुति एकैवैषणेति । कथम् ? या ह्येव पुत्रैषणा सा वित्तैषणा । दृष्टफलसाधनत्वतुल्यत्वात् । या वित्तैषणा सा लोकैषणा । फलार्थैव सा । सर्व फलार्थप्रयुक्त एव हि सर्व साधनमुपादत्ते । अत एकैवैषणा या लोकैषणा सा साधनमतरेण सपादयितु न शक्यत इति, साध्यसाधनभेदेन उभे हि यस्मादेते एषणे एव भवत । तस्माद्ब्रह्मविदो नास्ति कर्म कर्मसाधन वा । अतो येऽतिक्रान्ता ब्राह्मणा सर्व कर्म कर्मसाधनं च सर्व देवपितृमानुषनिमित्त यज्ञोपवीतादि । तेन हे दैव पित्र्य मानुष च कर्म क्रियते । 'निर्वीत मनुष्याणाम्' इत्यादिश्रुते । तस्मात्पूर्वे ब्राह्मणा ब्रह्मविदो व्युत्थाय कर्मभ्य कर्मसाधनेभ्यश्च यज्ञोपवीतादिभ्य परमहसपरिव्राज्यं प्रतिपद्य भिक्षाचर्य चरन्ति । भिक्षार्थं चरण भिक्षाचर्य चरन्ति त्यक्त्वा स्मार्त लिग केवलं आश्रममात्रशरणाना जीवनसाधन पारिव्राज्यव्यजकम् । विद्वाल्लिंगवर्जित । "तस्मादलिगो वर्मज्ञोऽव्यक्तालिगोऽव्यक्ताचार" इत्यादिस्मृतिभ्य. । 'अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रह' इत्यादिश्रुते । "सशिखान्केशानिकृत्य विसृज्य यज्ञोपवीत" इति च ॥

ननु 'व्युत्थायाथ भिक्षाचर्य चरन्ति' इति वर्तमानोपदेशादर्थवादोऽयम् । न विधायक प्रत्यय कश्चित् श्रूयते लिड्लोट्तव्याना अन्यतमोऽपि । तस्मादर्थवादमात्रेण श्रुतिस्मृतिविहिताना यज्ञोपवीतादीना साधनाना न शक्यते परित्याग कारयितुम् । "यज्ञोपवीत्येवाचीयीत याजयेद्यजेत वा" । पारिव्राज्ये तावदध्ययनं विहितम्— "वेदसन्यसनाच्छूद्रस्तस्माद्वेद न संन्यसेत्" इति । "स्वाध्याय एवोत्सृज्यमानो वाचम्" इति च आपस्तंब । "ब्रह्मोज्झं वेदनिंदा च कौटसाक्ष्य सुहृद्वध । गर्हिताद्यान्ययोर्जग्धि सुरापानसमानि षट् ॥" इति वेदपरित्यागे दोषश्रवणात् । "उपासने गुरूणा वृद्धानामतिथीना होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात्" इति परिव्राजकधर्मेषु च गुरूपासनस्वाध्यायभोजनाचमनादीना कर्मणा श्रुतिस्मृतिषु कर्तव्यतया चोदितत्वात् गुर्वाद्युपासनागत्वेन यज्ञोपवीतस्य विहितत्वात्तत्परि-

त्यागो नैवावगतु शक्यते । यद्यप्येषणाभ्यो व्युत्थान विधीयत एव, तथापि पुत्राद्येषणाभ्यस्तिसृभ्य एव व्युत्थान, न तु सर्वस्मात्कर्मण कर्मसाधनाच्च व्युत्थानम् । सर्वपरित्यागे चाश्रुतं कृत स्यात् श्रुतं च यज्ञोपवीतादि हापित स्यात् । तथाच महानपराधो विहिताकरणप्रातिषिद्धाचरणनिमित्त कृत स्यात् । तस्मात् यज्ञोपवीतादिलिंगपरित्यागो अंधपरंपरैव ॥

न । "यज्ञोपवीत वेदाश्च सर्व तद्वर्जयेद्यति" इति श्रुते । अपि च आत्मज्ञानपरत्वात्सर्वस्या उपनिषद । आत्मा द्रष्टव्य श्रोतव्यो मंतव्य इति हि प्रस्तुतम । स चात्मैव साक्षादपरोक्षात्सर्वान्तर अशनायादिससारधर्मवर्जित इत्येव विज्ञेय इति तावत्प्रसिद्धम् । सर्वा हीयमुपनिषत् एवपरेति विध्यंतरशेषत्व तावन्नास्ति । अतो नार्थवाद । आत्मज्ञानस्य कर्तव्यत्वात् । आत्मा च अशनायादिधर्मवान्न भवतीति साधनफलविलक्षणो ज्ञातव्य । अतोऽन्यतिरेकेण आत्मनो ज्ञानमविद्या । 'अन्योऽसावन्योऽहमस्मीति न स वेद' 'मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति' 'एकधैवानुद्रष्टव्यम्' 'एकमेवाद्वितीयम्' 'तत्त्वमसि' इत्यादिश्रुतिभ्य । क्रियाफलं साधनं च अशनायादिससारधर्मातीतादात्मनोऽन्यदविद्याविषयम् । 'यत्र हि द्वैतमिव भवति' 'अन्योऽसावन्योऽहमस्मीति न स वेद' 'अथ येऽन्ययाऽतो विदु' इत्यादिवाक्यशतेभ्य ॥

न च विद्याविद्ये एकस्य पुरुषस्य सह भवतो, विरोधात्, तम प्रकाशाविव । तस्मादात्मविदोऽविद्याविषयोऽधिकारो न द्रष्टव्य क्रियाकारकफलभेदरूप । 'मृत्यो स मृत्युमाप्नोति' इत्यादिनिदितत्वात् । सर्वक्रियासाधनफलाना च अविद्याविषयाणा तद्विपरीतात्मविद्यया हातव्यत्वेनेष्टत्वात् । यज्ञोपवीतादिसाधनाना च तद्विषयत्वात् । तस्मात् असाधनफलस्वभावादात्मन अन्यविषया विलक्षणैषणा । उभे ह्येते साधनफले एषणे एव भवत । यज्ञोपवीतादे तत्साध्यकर्मणा च साधनत्वात् । उभे ह्येते एषणे एव' इति हेतु वचनेनावधारणात् । यज्ञोपवीतादिसाधनात्तत्साध्येभ्यश्च कर्मभ्योऽविद्याविषयत्वात् एषणारूपत्वाच्च जिहासितव्यरूपत्वाच्च व्युत्थानं विधित्सितमेव ।

ननु उपनिषद आत्मज्ञानपरत्वात् व्युत्थानश्रुति तत्स्तुत्यर्था, न विधि । न । विधित्सितविज्ञानेन समानकर्तृकत्वश्रवणात् । न हि अकर्तव्येन कर्तव्यस्य

समानकर्तृकत्वेन वेदे कदाचिदपि श्रवण संभवति । कर्तव्यानामेव हि अभिषव-होमभक्षणा यथा श्रवणं, अभिषुत्य हुत्वा भक्षयन्तीति, तद्वदात्मज्ञानैषणा-व्युत्थानभिक्षाचर्याणा कर्तव्यानामेव समानकर्तृकत्वश्रवणं भवेत् । अविद्या-विषयत्वादेषणात्वाच्च अर्थप्राप्त आत्मज्ञानविधेरेव यज्ञोपवीतादिपरित्यागो, न तु विधातव्य इति चेत् । न । सुतरामात्मज्ञानविधिनैव विहितस्य समानकर्तृकत्व-श्रवणेन दाढ्योपपत्ति तथा भिक्षाचर्यस्य च । यत्पुनरुक्त वर्तमानापदेशा-दर्थवादमात्रमिति । न । औदुबरयूपादिविधिसमानत्वाददोष ॥

'व्युत्थाय भिक्षाचर्य चरन्ति' इत्यनेन पारिव्राज्य विधीयते । पारि व्राज्याश्रमे च यज्ञोपवीतादिसाधनानि विहितानि, लिंग च श्रुतिभि स्मृति-भिश्च । अतस्तद्वर्जयित्वा अन्यस्मात् व्युत्थानं एषणात्वेऽपीति चेत् । न । विज्ञानसमानकर्तृकात्पारिव्राज्यादेषणाव्युत्थानलक्षणात् पारिव्राज्यान्तरोपपत्ते. । यद्धि तदेषणाभ्यो व्युत्थानलक्षणं पारिव्राज्य तदात्मज्ञानागम् । आत्मज्ञान विरोध्येषणापरित्यागरूपत्वात् । अविद्याविषयत्वाच्चैषणाया । तद्व्यतिरेकेण चास्त्याश्रमरूपं पारिव्राज्यं ब्रह्मलोकादिफलप्राप्तिसाधनं, यद्विषयं यज्ञोपवीतादि-साधनविधानं लिंगविधान च ।

न च एषणारूपसाधनोपादानस्य आश्रमधर्ममात्रेण पारिव्राज्यान्तरे विषये संभवति सति, सर्वोपनिषद्विहितस्य आत्मज्ञानस्य बाधनं युक्तम् । यज्ञो-पवीताद्यविद्याविषयैषणारूपसाधनोपादित्सायां चावश्यं असाधनफलरूपस्य अशनायादिसंसारधर्मवर्जितस्य अह ब्रह्मास्मीति विज्ञान बाध्यते । न च तद्बा-धनं युक्तम् । सर्वोपनिषदा तदर्थपरत्वात् ।

'भिक्षाचर्यं चरन्ति' इत्येषणा ग्राहयन्ती श्रुति स्वयमेव बाधत इति चेत् । अथापि स्यात् एषणाभ्यो व्युत्थानं विधाय पुनरेषणैकदेशं भिक्षाचर्यं ग्राह-यन्ती तत्सबद्धमन्यदपि ग्राहयतीति चेत् । न । भिक्षाचर्यस्याप्रयोजकत्वात् हुत्वोत्तरकालभक्षणवत् । शेषप्रतिपत्तिकर्मत्वादप्रयोजकं हि तत् । असंस्कार्य-कत्वाच्च । भक्षणं पुरुषसंस्कारकमपि स्यान्न तु भिक्षाचर्यम् । नियमादृष्टस्यापि ब्रह्मविदाऽनिष्टत्वात् ।

नियमादृष्टस्यानिष्टत्वे किं भिक्षाचर्येणेति चेत् । न । अन्यसाधनात् व्युत्थानस्य विहितत्वात् । तथापि किं तेनेति चेत् । यदि स्यात्, बाढमभ्यु-

पगम्यते हि तत् । यानि पारिव्राज्येऽभिहितानि वचनानि "यज्ञोपवीत्येवाधीयीत" इत्यादीनि, तान्यविद्वत्पारिव्राज्यमात्रविषयाणीति परिहृतानि । इतरथा आत्मज्ञानबाध स्यादिति ह्युक्तम् । "निराशिषमनारंभं निर्नमस्कारमस्तुतिम् । अक्षीण क्षीणकर्माण त देवा ब्राह्मण विदु ॥" इति सर्वकर्माभाव दर्शयति स्मृतिर्विदुष । "विद्वाल्लिंगविवर्जित" "तस्मादलिंगो धर्मज्ञ" इति च । तस्मात्परमहसपारिव्राज्यमेव व्युत्थानलक्षणं प्रतिपद्येत आत्मवित्सर्वकर्मसाधनपरित्यागरूपमिति ॥

यस्मात्पूर्वं ब्राह्मणा एतमात्मानं असाधनफलस्वभावं विदित्वा सर्वस्मात्साधनफलस्वरूपादेषणालक्षणात् व्युत्थाय भिक्षाचर्य चरन्ति स्म, दृष्टादृष्टार्थं कर्म तत्साधनं च हित्वा, तस्मादद्यत्वेऽपि ब्राह्मणो ब्रह्मवित्पाडित्यं पंडितभावं, एतदात्मविज्ञान पाडित्य, निविद्य नि शेष विदित्वा, आत्मविज्ञान निरवशेष कृत्वेत्यर्थ । आचार्यत आगमतश्चैषणाभ्यो व्युत्थाय । एषणाव्युत्थानावसानमेव हि तत्पाडित्यम् । एषणातिरस्कारोद्भवत्वादेषणाविरुद्धत्वात् । एषणामतिरस्कृत्य न ह्यात्मविषयस्य पाडित्यस्योद्भव इत्यात्मज्ञानेनैव विहितमेषणाव्युत्थानम् । आत्मज्ञानसमानकर्तृकत्वाप्रत्ययोपादानलिंगश्रुत्या दृढीकृतम् । तस्मादेषणाभ्यो व्युत्थाय ज्ञानबलभावेन बाल्येन तिष्ठासेत्स्थातुमिच्छेत् । साधनफलाश्रयण हि बलमितरेषामनात्मविदाम् । तद्बलं हित्वा विद्वान् असाधनफलस्वरूपात्मविज्ञानमेव बलं तद्भावमेव केवलमाश्रयेत् । तदाश्रयणे हि करणान्येषणाविषये एनं हृत्वा स्थापयितु नोत्सहन्ते । ज्ञानबलहीन हि मूढ दृष्टादृष्टविषयाया एषणायामेवैनं करणानि नियोजयन्ति । बलं नाम आत्मविद्ययाऽशेषविषयदृष्टितिरस्करणम् । अतस्तद्भावेन बाल्येन तिष्ठासेत् । तथा 'आत्मना विदते वीर्यम्' इति श्रुत्यंतरात् । 'नायमात्मा बलहीनेन लभ्य' इति च । बाल्य च पाडित्य च निर्विद्य नि शेषं कृत्वाऽथ मननान्मुनिर्योगी भवति । एतावद्धि ब्राह्मणेन कर्तव्यं यदुत सर्वानात्मप्रत्ययतिरस्करणम् । एतत्कृत्वा कृतकृत्यो योगी भवति । अमौनं च आत्मज्ञानानात्मप्रत्ययतिरस्कारौ पाडित्यबाल्यसंज्ञकौ नि शेषं कृत्वा, मौनं नाम अनात्मप्रत्ययतिरस्करणस्य पर्यवसानं फल, तच्च निर्विद्याथ ब्राह्मण कृतकृत्यो भवति । ब्रह्मैव सर्वमिति प्रत्यय उपजायते । स ब्राह्मण कृतकृत्योऽतो ब्राह्मण । निरुपचरित हि तदा तस्य ब्राह्मण्यं प्राप्तम् । अत आह—

स ब्राह्मण केन स्यात्केन चरणेन भवेत् ? येन स्याद्येन चरणेन भवेत् तेनेदृश एवायम् ।' येन केनचिच्चरणेन स्यात्तेनेदृश एव उक्तलक्षण एव ब्राह्मणो भवति । येन केनचिच्चरणेनेति स्तुत्यर्थं, येयं ब्राह्मण्यावस्था सेय स्तूयते, न तु चरणेऽनादर । अत एतस्माद्ब्राह्मण्यावस्थानात् अशनायाद्यतीतात्मस्वरूपात् नित्यतृप्तादन्यदविद्याविषयमेषणालक्षण वस्त्वतरं आर्तं विनाश्यार्तिपरिगृहीतं, स्वप्नमायामरीच्युदकसममसारम् । आत्मैवैक केवला नित्यमुक्त इति । ततो ह कहोल कौषीतकेय उपरराम ॥ इति पचम ब्राह्मणम् ॥ ३ ५ —

अथ हैन गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिद सर्वमप्स्वोत च प्रोत च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यतरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वतरिक्षलोका ओताश्च प्रोताश्चेति गधर्वलोकेषु गार्गीति कस्मिन्नु खलु गधर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चद्रलोकेषु गार्गीति कस्मिन्नु खलु चद्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीद्रलोकेषु गार्गीति कस्मिन्नु खल्विद्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि माऽतिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि माऽतिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥५॥ इति षष्ठ ब्राह्मणम् ॥

यत्साक्षादपरोक्षाद्ब्रह्म सर्वान्तर आत्मेत्युक्त, तस्य सर्वान्तरस्य स्वरूपाधिगमाय आ शाकल्यब्राह्मणात् ग्रथ आरभ्यते । पृथिव्यादीनि ह्याकाशान्तानि भूतानि अतर्बहिर्भावेन व्यवस्थितानि । तेषा यद्बाह्यं बाह्यं अधिगम्याधिगम्य निराकुर्वन्द्रष्टु साक्षात्सर्वान्तरोऽगौण आत्मा सर्वससारधर्मविनिर्मुक्तो दर्शयितव्य इत्यारभ । अथ हैन गार्गी नामतो, वाचक्नवी वचक्नोर्दुहिता पप्रच्छ । याज्ञवल्क्येति होवाच । यदिद सर्वं पार्थिवं धातुजातं अप्सूदके ओत च प्रोतं च, ओतं दीर्घपटसंतुवत्प्रोतं तिर्यक्तंतुवद्विपरीतं वा । अद्भि सर्वतोऽन्तर्बहि-

भूताभिर्व्याप्तमित्यर्थ । अन्यथा सक्तुमुष्टिवद्विशीर्येत । इद तावदनुमानमुपन्यस्तम् । यत्कार्य परिच्छिन्न स्थूलं कारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति दृष्टम् । यथा पृथिव्यद्भि तथा पूर्व पूर्वमुत्तरेणोत्तरेण व्यापिना भवितव्यं, इत्येष आ सर्वान्तरादात्मन प्रश्नार्थ ।

तत्र भूतानि पंच संहतान्येवोत्तरमुत्तरं सूक्ष्मभावेन व्यापकेन कारणरूपेण च व्यवतिष्ठन्ते । न च परमात्मनोऽर्वाक्त्वव्यतिरेकेण वस्त्वंतरमस्ति 'सत्यस्य सत्यम' इति श्रुते । सत्य च भूतपचक, सत्यस्य सत्य च पर आत्मा । कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति । तासामपि कार्यत्वात्स्थूलत्वात्परिच्छिन्नत्वाच्च क्वचिद्धि ओतप्रोतभावेन भवितव्यम् । क्व तासामोतप्रोतभाव इति, एवमुत्तरोत्तरप्रश्नप्रसगो योजयितव्य । वायौ गार्गीति । नन्वग्नाविति वक्तव्यम् । नैष दोष । अग्ने पार्थिवं वा आप्यं वा धातुमनाश्रित्य इतरभूतवत्स्वातन्त्र्येण आत्मलाभो नास्तीति तस्मिन्नोतप्रोतभावो नोपदिश्यते । कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यंतरिक्षलोकेषु गार्गीति । तान्येव भूतानि सहतान्यतरिक्षलोका । तान्यपि गन्धर्वलोकेषु, गन्धर्वलोका आदित्यलोकेषु, आदित्यलोका चन्द्रलोकेषु, चन्द्रलोका नक्षत्रलोकेषु, नक्षत्रलोका देवलोकेषु, देवलोका इन्द्रलोकेषु, इन्द्रलोका विराट्शरीरारभकेषु भूतेषु प्रजापतिलोकेषु, प्रजापतिलोका ब्रह्मलोकेषु । ब्रह्मलोका नाम अंडारंभकाणि भूतानि । सर्वत्र हि सूक्ष्मतारतम्यक्रमेण प्राण्युपभोगाश्रयाकारपरिणतानि भूतानि सहतानि तान्येव पचेति बहुवचनमाजि । कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति । स होवाच याज्ञवल्क्यो— हे गार्गि माऽतिप्राक्षी स्व प्रश्न, न्यायप्रकारमतीत्य आगमेन प्रष्टव्या देवतामनुमानेन मा प्राक्षीरित्यर्थ । पृच्छन्त्याश्च मा ते तव मूर्धा शिरो व्यपप्तद्विस्पष्ट पतेत् । देवताया स्वप्रश्न आगमविषय । तं प्रश्नविषयमतिक्रान्तो गार्ग्या प्रश्न, आनुमानिकत्वात् । स यस्या देवताया प्रश्न सातिप्रश्न्या, नातिप्रश्न्याऽनतिप्रश्न्या, स्वप्रश्नविषयैव । केवलागमगम्येत्यर्थ । तामनतिप्रश्न्या वै देवतामतिपृच्छसि । अतो गार्गि मातिप्राक्षी मर्तु चेन्नेच्छसि । ततो ह गार्गी वाचक्नवी उपरराम ॥

इति षष्ठ ब्राह्मणम् ॥ ३.६ —

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्व-

वसाम पतंचलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्यासीद्भार्या गधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबध आथर्वण इति सोऽब्रवीत्पतचल काप्य याज्ञिकाश्च वेत्थ नु त्व काप्य तत्सूत्र येनाय च लोक परश्च लोक सर्वाणि च भूतानि संदब्धानि भवन्तीति सोऽब्रवीत्पतंचल काप्यो नाह तद्भगवन्वेदेति सोऽब्रवीत्पतचल काप्य याज्ञिकांश्च वेत्थ नु त्वं काप्य तमतर्यामिणं य इम च लोक परं च लोक सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत्पतचलः काप्यो नाह त भगवन्वेदेति सोऽब्रवीत्पतचलं काप्य याज्ञिकाश्च यो वै तत्काप्य सूत्रं विद्यात्त चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदह वेद तच्चेत्त्व याज्ञवल्क्य सूत्रमविद्वास्त चान्तर्यामिण ब्रह्मगर्वारुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्र तं चान्तर्यामिणमिति यो वा इद कश्चिद्ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥१॥

इदानीं ब्रह्मलोकानामन्तरतम सूत्र वक्तव्यमिति तदर्थ आरभ । तच्च आगमेनैव प्रष्टव्यमितीतिहासेन आगमोपन्यास क्रियते— अथ हैनमुद्दालको नामत , अरुणस्यापत्यमारुणि पप्रच्छ । याज्ञवल्क्येति होवाच । मद्रेषु देशेष्ववसामोषितवन्त , पतचलस्य पतंचलो नामतस्तस्यैव कपिगोत्रस्य काप्यस्य गृहेषु यज्ञमधीयाना यज्ञशास्त्राध्ययन कुर्वाणा । तस्यासीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति । सोऽब्रवीत्कबधो नामतोऽथर्वणोऽपत्यमाथर्वण इति । सोऽब्रवीद्गन्धर्व पतंचलं काप्य याज्ञिकाश्च तच्छिष्यान् वेत्थ नु त्व हे काप्य जानीषे तत्सूत्रम् ? कि तत् ? येन सूत्रेणाय च लोक इदं च जन्म, परश्च लोक परं च प्रतिपत्तव्यं जन्म, सर्वाणि च भूतानि ब्रह्मादिस्तंबपर्यंतानि संदब्धानि संग्रथितानि सगिव सूत्रेण विष्टब्धानि भवन्ति येन तत्किं सूत्र वेत्थ ? सोऽब्रवीदेवं पृष्ट काप्यो— नाह तद्भगवन्वेदेति, तत्सूत्र नाह जाने हे भगवन्निति सपूजयन्नाह । सोऽब्रवीत्पुनर्गंधर्व. उपाध्यायमस्माश्च वेत्थ नु त्वं काप्य तमतर्यामिण ? अन्तर्यामीति विशेष्यते— य इम च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरोऽभ्यंतर सन्यमयति नियमयति, दारुयंत्रमिव भ्रामयति, स्वं स्वमुचितव्यापारं कारयतीति । सोऽब्रवीदेवमुक्त पतचल काप्यो— नाहं तं जाने भगवन्निति संपूजयन्नाह ।

सोऽब्रवीत्पुनर्गर्धर्व । सूत्रतदंतर्गतान्तर्यामिणोर्विज्ञानं स्तूयते । य कश्चिद्वै तत्सूत्रं हे काप्य विद्याद्विजानीयात्तं चातर्यामिणं सूत्रातर्गत तस्यैव सूत्रस्य नियतारं विद्याद्य इत्येवमुक्तेन प्रकारेण, स हि ब्रह्मवित्परमात्मवित्स लोकाश्च भूरादीनतर्यामिणा नियम्यमानाल्लोकान्वेत्ति, स देवाश्चाग्न्यादील्लोकिनो जानाति, वेदाश्च सर्वप्रमाणभूतान्वेत्ति, भूतानि च ब्रह्मादीनि सूत्रेण ध्रियमाणानि तदंतर्गतेनान्तर्यामिणा नियम्यमानानि वेत्ति, स आत्मान च कर्तृत्वभोक्तृत्वविशिष्टं तेनैवान्तर्यामिणा नियम्यमानं वेत्ति, सर्व च जगत्तथाभूत वेत्तीति । एव स्तुते सूत्रान्तर्यामिविज्ञाने प्रलुब्ध काप्योऽभिमुखीभूतो, वयं च । तेभ्यश्चास्मभ्यमभिमुखीभूतेभ्य अब्रवीद्गर्धर्व सूत्रमतर्यामिण च । तदह सूत्रातर्यामिविज्ञान वेद गर्धर्वाल्लब्धागम सन् । तच्चेद्याज्ञवल्क्य सूत्र तं चातर्यामिणमविद्वाश्चेदब्रह्मावित्सन्यदि ब्रह्मगवीरुदजसे ब्रह्मविदा स्वभूता गा उदजसे उन्नयसि त्वमन्यायेन, ततो मच्छापदग्धस्य मूर्धा शिरस्ते तव विस्पष्टं पतिष्यति । एवमुक्तो याज्ञवल्क्य आह— वेद जानाम्यह हे गौतमेति गोत्रतस्तत्सूत्र यद्गन्धर्वस्तुभ्यमुक्तवान्य चान्तर्यामिण गर्धर्वाद्विदितवन्तो यूय, त चान्तर्यामिण वेदाहमिति । एवमुक्त प्रत्याह गोतमो— य कश्चित्प्राकृत इद यत्त्वयोक्त ब्रूयात् । कथ ? वेद वेदेति आत्मान श्लाघयन । कि तेन गर्जितेन ? कार्येण दर्शय । यथा वेत्थ तथा ब्रूहीति ॥१॥

स होवाच वायुर्वै गौतम तत्सूत्र वायुना वै गौतम सूत्रेणायं च लोक परश्च लोक. सर्वाणि च भूतानि सदब्धानि भवन्ति तस्माद्वै गौतम पुरुष प्रेतमाहुर्व्यस्रसिषतास्यांगानीति वायुना हि गौतम सूत्रेण सदब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्यान्तर्यामिणं ब्रूहीति ॥२॥

स होवाच याज्ञवल्क्य । ब्रह्मलोका यस्मिन्नोताश्च प्रोताश्च वर्तमाने काले, यथा पृथिव्यासु तत्सूत्रमागमगम्यं वक्तव्यमिति तदर्थ प्रश्नान्तरमुत्थापित अतानिर्णयायाह— वायुर्वै गौतम तत्सूत्रं, नान्यत् । वायुरिति सूक्ष्ममाकाशवद्विष्टंभकं पृथिव्यादीना, यदात्मक, सप्तदशविध लिग कर्मवासनासमवायि प्राणिना, यत्तत्समष्टिव्यष्ट्यात्मकं, यस्य बाह्या भेदाः सप्तसप्त मरुद्गणा समुद्रस्येवोर्मय, तदेतद्वायव्यं तत्त्व सूत्रमित्यभिधीयते । वायुना वै गौतम सूत्रेणायं च लोक परश्च लोक सर्वाणि च भूतानि सदब्धानि भवन्ति सग्रथितानि भवन्तीति

प्रसिद्धमेतत् । अस्ति च लोके प्रसिद्धि । कथ[1] यस्माद्वायु सूत्र वायुना विधृतं सर्व, तस्माद्वै गौतम पुरुषं प्रेतमाहु कथयन्ति व्यस्रासिषत विस्रस्तान्यस्य पुरुषस्यागानीति । सूत्रापगमे हि मण्यादीना प्रोताना अवस्रसन दृष्टम् । एव वायु सूत्र, तस्मिन्मणिवत्प्रोतानि यद्यस्यागानि स्युस्ततो युक्तमेतद्वाय्वपगमेऽवस्रसनमगानाम् । अतो वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीति निगमयति । एवमेवैतद्याज्ञवल्क्य सम्यगुक्त सूत्रम् । तदंतर्गत त्विदानी तस्यैव सूत्रस्य नियतारमतर्यामिण ब्रूहात्युक्त आह ॥

य. पृथिव्या तिष्ठन्पृथिव्या अतरो य पृथिवी न वेद यस्य पृथिवी शरीर य पृथिवीमतरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥३॥

य पृथिव्या तिष्ठन्भवति, सोऽन्तर्यामी । सर्व पृथिव्या तिष्ठतीति सर्वत्र प्रसंगो मा भूदिति विशिनष्टि— पृथिव्या अंतरोऽन्तर । तत्रैतत्स्यात्पृथिवी देवतैव अतर्यामीत्यत आह— यमतर्यामिणं पृथिवी देवतापि न वेद मन्यन्य कश्चिद्वर्तत इति । यस्य पृथिवी शरीर यस्य च पृथिव्येव शरीरं, नान्यत्पृथिवीदेवताया यच्छरीर तदेव शरीरं यस्य । शरीरग्रहण चोपलक्षणार्थं, करणं च पृथिव्यास्तस्य । स्वकर्मप्रयुक्त हि कार्य करण च पृथिवीदेवताया । तदस्य स्वकर्माभावादन्तर्यामिणो नित्यमुक्तत्वात् । परार्थकर्तव्यतास्वभावत्वात्परस्य यत्कार्यं करण च तदेवास्य न स्वत । तदाह—यस्य पृथिवी शरारमिति । देवताकार्यकरणस्य ईश्वरसाक्षिमात्रसानिध्येन हि नियमेन प्रवृत्तिनिवृत्ती स्याताम् । य ईदृगीश्वरो नारायणाख्य पृथिवी पृथिवीदेवता यमयति नियमयति स्वव्यापारे अतरोऽन्यंतरस्तिष्ठन्नेष त आत्मा । ते तव मम च सर्वभूताना चेत्युपलक्षणार्थमेतत् । अंतर्यामी यस्त्वया पृष्टोऽमृत सर्वससारधर्मवर्जित इत्येतत् ॥

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्याप शरीर योऽपोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥४॥ योऽग्नौ तिष्ठन्नग्नेरंतरो यमग्निर्न वेद यस्याग्नि शरीरं योऽग्निमंतरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥५॥ योऽन्तरिक्षे तिष्ठन्नतरिक्षादंतरो यमंतरिक्ष न वेद यस्यांतरिक्षं शरीर योऽन्तरिक्षमतरो यमयत्येष त आत्माऽन्तर्याम्यमृत. ॥६॥ यो वायौ तिष्ठन्वायोरन्तरो यं वायुर्न वेद यस्य वायु शरीर यो वायुमतरो यमयत्येष त आत्मा-

ऽन्तर्याम्यमृतः ॥ ७ ॥ यो दिवि तिष्ठन्दिवोऽन्तरो य द्यौर्न वेद यस्य द्यौः शरीर यो दिवमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥८॥ य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्य शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥९॥ यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो य दिशो न विदुर्यस्य दिशः शरीर यो दिशोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥१०॥ यश्चंद्रतारके तिष्ठंश्चद्रतारकादतरो य चद्रतारक न वेद यस्य चंद्रतारक शरीर यश्चद्रतारकमतरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥११॥ य आकाशे तिष्ठन्नाकाशादतरो यमाकाशो न वेद यस्याकाश शरीरं य आकाशमंतरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥१२॥ यस्तमसि तिष्ठ स्तमसोऽन्तरो यं तमो न वेद यस्य तम शरीरं यस्तमोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत. ॥१३॥ यस्तेजसि तिष्ठस्तेजसोऽन्तरो यं तेजो न वेद यस्य तेज. शरीर यस्तेजोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिदैवतमथाधिभूतम् ॥१४॥

समानमन्यत । योऽप्सु तिष्ठन्नमावतरिक्षे वायौ दिव्यादित्ये दिक्षु चंद्रतारके आकाशे यस्तमस्यावरणात्मके बाह्ये तमसि, तेजसि तद्विपरीते प्रकाशसामान्ये, इत्येवमधिदैवत अतर्यामिविषय दर्शन देवतासु । अथाधिभूत भूतेषु ब्रह्मादिस्तंबपर्यंतेषु अंतर्यामिदर्शनमधिभूतम् ॥

य· सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीर य· सर्वाणि भूतान्यंतरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिभूतमथाध्यात्मम् ॥१५॥ य प्राणे तिष्ठन्प्राणादंतरो यं प्राणो न वेद यस्य प्राण. शरीरं यः प्राणमतरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥१६॥ यो वाचि तिष्ठन्वाचोऽन्तरो य वाङ्न वेद यस्य वाक्शरीरं यो वाचमतरो यमयत्येष त आत्माऽन्तर्याम्यमृत. ॥१७॥ यश्चक्षुषि तिष्ठश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षु. शरीरं यश्चक्षुरंतरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥१८॥ य. श्रोत्रे तिष्ठञ्छ्रोत्रादतरो य श्रोत्र न वेद यस्य श्रोत्रं शरीरं य श्रोत्रमतरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥१९॥ यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद यस्य मन. शरीरं यो मनोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥२०॥ यस्त्वचि तिष्ठंस्त्वचोऽन्तरो

यं त्वङ्न वेद यस्य त्वक्शरीर यस्त्वचमंतरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥२१॥ यो विज्ञाने तिष्ठन्विज्ञानादंतरो य विज्ञान न वेद यस्य विज्ञानं शरीरं यो विज्ञानमंतरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥२२॥ यो रेतसि तिष्ठन्रेतसोऽन्तरो य रेतो न वेद यस्य रेत शरीर यो रेतोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतोऽदृष्टो द्रष्टाऽश्रुत श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मंता नान्योऽतोऽस्ति विज्ञातैष त आत्माऽन्तर्याम्यमृतोऽतोऽन्यदार्तं ततो होद्दालक आरुणिरुपरराम ॥२३॥ इति सप्तम ब्राह्मणम् ॥

अथाध्यात्मं— य प्राणे प्राणवायुसहिते घ्राणे, यो वाचि चक्षुषि श्रोत्रे मनसि त्वचि विज्ञाने बुद्धौ रेतसि प्रजनने । कस्मात्पुन कारणात्पृथिव्यादिदेवता महाभागा सत्यो मनुष्यादिवदात्मनि तिष्ठन्तमात्मनो नियन्तारमतर्यामिणं न विदुरित्यत आह— अदृष्टो न दृष्टो न विषयीभूत चक्षुर्दर्शनस्य कस्यचित्स्वयं तु चक्षुषि सनिहितत्वात् दृशिस्वरूप इति द्रष्टा । तथाऽश्रुत श्रोत्रगोचरत्वमनापन्न कस्यचित्स्वयं त्वलुप्तश्रवणशक्ति सर्वश्रोत्रेषु सनिहितत्वाच्छ्रोता । तथाऽमतो मन सकल्पविषयतामनापन्न । दृष्टश्रुते एव हि सर्व सकल्पयति । अदृष्टत्वादश्रुतत्वादेवामत । अलुप्तमननशक्तित्वात्सर्वमन सुसंनिहितत्वाच्च मता । तथाऽविज्ञातो निश्चयगोचरतामनापन्नो रूपादिवत्सुखादिवद्वा स्वयं त्वलुप्तविज्ञानशक्तित्वात्तत्सनिधानाच्च विज्ञाता । तत्र यं पृथिवी न वेद य सर्वाणि भूतानि न विदुरिति चान्ये नियन्तव्या विज्ञातारो अन्यो नियन्ता अंतर्यामीति प्राप्त, तदन्यत्वाशकानिवृत्त्यर्थमुच्यते— नान्योऽतो, नान्य अतोऽस्मादतर्यामिणो नान्योऽस्ति द्रष्टा, तथा नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मता, नान्योऽतोऽस्ति विज्ञाता । यस्मात्परो नास्ति द्रष्टा श्रोता मता विज्ञाता, योऽदृष्टो द्रष्टा, अश्रुत श्रोता, अमतो मता, अविज्ञातो विज्ञाता, अमृत सर्वसंसारधर्मवर्जित सर्वसयमिणा कर्मफलविभागकर्ता, एष ते आत्माऽन्तर्याम्यमृत. । अस्मादीश्वरादात्मनोऽन्यदार्तम् । ततो होद्दालक आरुणिरुपरराम ॥ इति सप्तमं ब्राह्मणम् ॥ ३ ७ —

———

*

अत परं अशनायादिविनिर्मुक्त निरुपाधिकं साक्षादपरोक्षात्सर्वान्तरं ब्रह्म वक्तव्यमित्यत आरंभ —

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हंताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न जातु युष्माकमिम कश्चिद्ब्रह्मोद्य जेतेति पृच्छ गार्गीति ॥१॥

अथ ह वाचक्नव्युवाच । पूर्व याज्ञवल्क्येन निषिद्धा मूर्धपातभयादुपरता सती पुन प्रष्टु ब्राह्मणानुज्ञा प्रार्थयते । हे ब्राह्मणा भगवत पूजावन्त शृणुत मम वच । हताहमिम याज्ञवल्क्यं पुनर्द्वौ प्रश्नौ प्रक्ष्यामि, यद्यनुमतिर्भवतामास्ति । तौ प्रश्नौ चेद्यदि वक्ष्यति कथयिष्यति मे, कथंचिन्न वै जातु कदाचिद्युष्माक मध्ये इमं याज्ञवल्क्यं कश्चिद्ब्रह्मोद्य ब्रह्मवदन प्रति जेता न वै कश्चिद्ब्रवीदिति । एवमुक्ता ब्राह्मणा अनुज्ञा प्रददु पृच्छ गार्गीति ॥

सा होवाचाह वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्य धनुराधिज्य कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाह त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्था तौ मे ब्रूहीति पृच्छ गार्गीति ॥२॥

लब्धानुज्ञा ह याज्ञवल्क्य सा होवाच । अह वै त्वा त्वा द्वौ प्रश्नौ प्रक्ष्यामीत्यनुषज्यते । कौ ताविति जिज्ञासाया तयोर्दुरुत्तरत्व द्योतयितु दृष्टातपूर्वकं तावाह— हे याज्ञवल्क्य यथा लोके काश्य काशिषु भव काश्य प्रसिद्ध शौर्य काश्ये, वैदेहो वा विदेहाना वा राजा, उग्रपुत्र शूरान्वय इत्यर्थ । उज्ज्यमवतारितज्याक धनु पुनरधिज्यमारोपितज्याक कृत्वा द्वौ बाणवन्तौ बाणशब्देन शराग्रे यो वशखड सधीयते तेन विनापि शरो भवतीत्यतो विशिनष्टि बाणवन्ताविति । द्वौ बाणवन्तौ शरौ तयोरेव विशेषण सपत्नातिव्याधिनौ शत्रो पीडाकरावतिशयेन, हस्ते कृत्वोपोत्तिष्ठेत्समीपत आत्मान दर्शयेत्, एवमेवाह त्वा त्वा शरस्थानीयाभ्या प्रश्नाभ्या द्वाभ्यामुपोदस्था उत्थितवत्यस्मि त्वत्समीपे । तौ मे ब्रूहीति ब्रह्मविच्चेत् । आहेतर पृच्छ गार्गीति ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूत च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोत चेति ॥३॥

सा होवाच यदूर्ध्वमुपरि दिव अडकपालात् यच्चावागध पृथिव्या अधोऽण्डकपालात् यच्चातरा मध्ये द्यावापृथिवी द्यावापृथिव्यो अंडकपालयो, इमे च द्यावापृथिवी यत् भूतं यच्चातीत भवच्च वर्तमान खव्यापारस्थं, भविष्यच्च वर्तमानादूर्ध्वकालभाविलिगगम्य यत्सर्वमेतदाचक्षते कथयन्त्यागमत, तत्सर्व द्वैतजात यस्मिन्नेकीभवतीत्यर्थ । तत्सूत्रसंज्ञं पूर्वोक्त कस्मिन्नोतं च प्रोतं च पृथिवीवातुरिवास्मु ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूत च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोत च प्रोतं चेति ॥४॥

स होवाचेतर — हे गार्गि यत्त्वयोक्तमूर्ध्वं दिव इत्यादि तत्सर्वं यत्सूत्रमाचक्षते तत्सूत्र आकाशे तदोत च प्रोतं च, यदेतद्याकृत सूत्रात्मक जगदव्याकृताकाशे, अप्स्विव पृथिवीधातुस्त्रिष्वपि कालेषु वर्तते उत्पत्तौ स्थितौ लये च ॥

सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एत व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति ॥५॥

पुन सा होवाच । नमस्तेऽस्त्वित्यादि प्रश्नस्य दुर्वचत्वप्रदर्शनार्थम् । यो मे ममैतं प्रश्न व्यवोचो विशेषेणापाकृतवानसि । एतस्य दुर्वचत्वे कारणं— सूत्रमेव तावदगम्यामितरैर्दुर्वाच्यं, किमुत तद्यस्मिन्नोत च प्रोत चेति । अतो नमोऽस्तु ते तुभ्यम् । अपरस्मै द्वितीयाय प्रश्नाय धारयस्व दृढी कुर्वात्मानमित्यर्थ । पृच्छ गार्गीतीतर आह ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदतरा द्यावापृथिवी इमे यद्भूत च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥६॥

व्याख्यातमन्यत् । सा होवाच यदूर्ध्वं याज्ञवल्क्येत्यादिप्रश्न प्रतिवचनं च उक्तस्यैवार्थस्यावधारणार्थं पुनरुच्यते । न किंचिदपूर्वमर्थान्तरमुच्यते ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदतरा द्यावापृथिवी इमे यद्भूत च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥७॥

सर्वं यथोक्तं गार्ग्यो प्रत्युच्चार्य तमेव पूर्वोक्तमर्थमवधारितवानाकाश एवेति याज्ञवल्क्य । गार्ग्याह— कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । आकाशमेव तावत्कालत्रयातीतत्वात् दुर्वाच्यम् । ततोऽपि कष्टतरमक्षरं यस्मिन्नाकाश ओतं च प्रोत च, अतोऽवाच्यमिति कृत्वा न प्रतिपद्यते सा अप्रतिपत्तिर्नाम निग्रहस्थानं तार्किकसमये । अथावाच्यमपि वक्ष्यति तथापि विप्रतिपत्तिर्नाम निग्रहस्थानम् । विरुद्धा प्रतिपत्तिर्हि सा यदवाच्यस्य वदनम् । अतो दुर्वचनं प्रश्न मन्यते गार्गी ॥

स होवाचैतद्वै तदक्षर गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वहस्वमदीर्घमलोहितमस्नेहमच्छायमतमो ऽवाय्वनाकाशमसगमरसमगंधमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्य न तदश्नाति किचन न तदश्नाति कश्चन ॥८॥

तद्दोषद्वयमपि परिजिहीर्षन्नाह— स होवाच याज्ञवल्क्य । एतद्वै तद्यत्पृष्टवत्यसि कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । किं तत् ? अक्षरं यन्न क्षीयते न क्षरतीति वाऽक्षर तदक्षर हे गार्गि ब्राह्मणा ब्रह्मविदोऽभिवदन्ति । ब्राह्मणाभिवदनकथनेन नाहमवाच्यं वक्ष्यामि न च न प्रतिपद्येयमित्येव दोषद्वयं परिहरति । एवमपाकृते प्रश्ने पुनर्गार्ग्या प्रतिवचन द्रष्टव्य— ब्रूहि किं तदक्षरं यद्ब्राह्मणा अभिवदन्ति । इत्युक्त आह— अस्थूलं तत्स्थूलादन्यत् । एव तर्ह्यणु, अनणु । अस्तु तर्हि ह्रस्व, अह्रस्वम् । एवं तर्हि दीर्घ, नापि दीर्घमदीर्घम् । एवमेतैश्चतुर्भि परिमाणप्रतिषेधै द्रव्यधर्म प्रतिषिद्धो, न द्रव्यं तदक्षरमित्यर्थ । अस्तु तर्हि लोहितो गुण, ततोऽप्यन्यदलोहितम् । आग्नेयो गुणो लोहित । भवतु तर्ह्यपा स्नेहन, नास्नेहम् । अस्तु तर्हि च्छाया सर्वथाऽप्यनिर्देश्यत्वात्, छायाया अप्यन्यदच्छायम् । अस्तु तर्हि तम, अतमः । भवतु वायुस्तर्हि, अवायु । भवेत्तर्ह्याकाश, अनाकाशम् । भवतु तर्हि सगात्मकं जतुवत्, असंगम् । रसोऽस्तु तर्हि, अरसम् । तथा गंधोऽस्त्वगंधम् । अस्तु तर्हि चक्षुरचक्षुष्क, न हि चक्षुरस्य करण विद्यतेऽतोऽचक्षुष्कम् । 'पश्यत्यचक्षु' इति मत्रवर्णात् । तथाऽश्रोत्रं 'स शृणोत्यकर्ण' इति । भवतु तर्हि वागवाक् । तथाऽमन । तथाऽतेजस्कमविद्यमानं तेजोऽस्य तदतेजस्कम् । न हि तेजोऽग्न्यादिप्रकाशवदस्य विद्यते । अप्राणमाध्यात्मिको वायु प्रतिषि-

ध्यतेऽप्राणमिति । मुख तर्हि द्वारं तदमुखम् । अमात्रं मीयते येन तन्मात्रम-मात्रं मात्रारूप तन्न भवति न तेन किंचिन्मीयते । अस्तु तर्हि च्छिद्रवदनन्तरं नास्यान्तरमस्ति । सभवेत्तर्हि बहिस्तस्य, अबाह्यम् । अस्तु तर्हि भक्षयितृ तन्न तदश्नाति किंचन । भवेत्तर्हि भक्ष्यं कस्यचिन्न तदश्नाति कश्चन । सर्वविशेषण-रहितमित्यर्थ । एकमेवाद्वितीय हि तत्केन कि विशिष्यते ॥

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचद्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतव. संवत्सरा इति विधृतास्तिष्ठन्त्येतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्य स्यदन्ते श्वेतेभ्य पर्वतेभ्य प्रतीच्योऽन्या यां या च दिशमन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्या प्रशंसन्ति यजमान देवा दर्वी पितरोऽन्वायत्ता ॥९॥

अनेकविशेषणप्रतिषेधप्रयासादस्तित्व तावदक्षरस्योपगमित श्रुत्या । तथापि लोकबुद्धिमपेक्ष्याशक्यते यतोऽतोऽस्तित्वायानुमान प्रमाणमुपन्यस्यति एतस्य वा अक्षरस्य । यदेतदधिगतमक्षरं सर्वान्तर साक्षादपरोक्षाद्ब्रह्म, य आत्मा अशनायादिधर्मातीत एतस्य वा अक्षरस्य प्रशासने । यथा राज्ञ प्रशासने राज्यमस्फुटित नियत वर्तते एवमेतस्याक्षरस्य प्रशासने हे गार्गि सूर्याचद्रमसौ, सूर्यश्च चद्रमाश्च सूर्याचद्रमसौ अहोरात्रयोर्लोकप्रदीपौ तादर्थ्येन प्रशासित्रा ताभ्या निर्वर्त्यमानलोकप्रयोजनविज्ञानवता निर्मितौ च स्याता साधारणसर्व-प्राणिप्रकाशोपकारकत्वात् लौकिकप्रदीपवत् । तस्मादस्ति तद्येन विधृतावीश्वरौ स्वतंत्रौ सन्तौ निर्मितौ तिष्ठतो नियतदेशकालनिमित्तोदयास्तमयवृद्धिक्षयाभ्या वर्तेते । तदस्येवमेतयो. प्रशासित्रक्षरं, प्रदीपकर्तृविधारयितृवत् । एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ द्यौश्च पृथिवी च सावयवत्वास्फुटनस्व-भावे अपि सत्यौ गुरुत्वात्पतनस्वभावे संयुक्तत्वाद्वियोगस्वभावे चेतनावदभिमा-निदेवताधिष्ठितत्वात् स्वतत्रे अपि एतस्याक्षरस्य प्रशासने वर्तेते विधृते तिष्ठत । एतद्ध्यक्षरं सर्वव्यवस्थासेतु सर्वमर्यादाविधरणम् । अतो नास्याक्षरस्य प्रशासनं द्यावापृथिव्यावातिक्रामत । तस्मात्सिद्धमस्यास्तित्वमक्षरस्य । अव्यभिचारि हि तल्लिंगं यत् द्यावापृथिव्यौ नियते वर्तेते । चेतनावन्त प्रशासितारमससारिण-

मंतरेण नैतद्युक्तम् । "येन द्यौरुग्रा पृथिवी च दृढा" इति मंत्रवर्णात् ।

एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता इत्येते कालावयवा सर्वस्य अतीतानागतवर्तमानस्य जनिमत कलयितार । यथा लोके प्रभुणा नियतो गणक सर्वमाय व्यय चाप्रमत्तो गणयति, तथा प्रभुस्थानीय एषा कालावयवाना नियता । तथा प्राच्य प्रागंचना पूर्वदिग्गमना नद्य स्यंदन्ते स्रवन्ति श्वेते॰यो हिमवदादि॰य पर्वतेभ्यो गिरि॰यो गगाद्या नद्यस्ताश्च यथा प्रवर्तिता एव नियता. प्रवर्तन्तेऽन्यथाऽपि प्रवर्तितुमुत्सहन्त्य । तदेतल्लिग प्रशास्तु । प्रतीचोऽन्या प्रतीची दिशमचन्ति सिन्धाद्या नद्य. । अन्याश्च या या दिशमनुप्रवृत्तास्ता ता न व्यभिचरन्ति । तच्च लिगम् ।

किंच ददतो हिरण्यादीन्प्रयच्छत आत्मपीडा कुर्वतोऽपि प्रमाणज्ञा अपि मनुष्या प्रशसन्ति । तत्र यच्च दीयते ये च ददति ये च प्रतिगृह्णन्ति तेषामिहैव समागमो विलयश्चान्वक्षो दृश्यते । अदृष्टस्तु पर समागम । तथापि मनुष्या ददतां दानफलेन संयोग पश्यन्त प्रमाणज्ञतया प्रशसन्ति । तच्च कर्मफलेन संयोजयितरि कर्तु कर्मफलविभागज्ञे प्रशास्तर्यसति न स्यात् । दानक्रियाया. प्रत्यक्षविनाशित्वात् । तस्मादस्ति दानकर्तृणा फलेन सयोजयिता । अपूर्वमिति चेन्न । तत्सद्भावे प्रमाणानुपपत्ते । प्रशास्तुरपीति चेन्न । आगमतात्पर्यस्य सिद्धत्वात् । अवोचाम ह्यागमस्य वस्तुपरत्वम् । किंचान्यत् । अपूर्वकल्पनाया चार्थापत्ते क्षयोऽन्यथैवोपपत्ते । सेवाफलस्य सेव्यात्प्राप्तिदर्शनात् । सेवायाश्च क्रियात्वात्तत्सामान्याच्च यागदानहोमादीना सेव्यादीश्वरादे फलप्राप्तिरुपपद्यते । दृष्टक्रियाधर्मसामर्थ्य अपरित्यज्यैव फलप्राप्तिकल्पनोपपत्तौ दृष्टक्रियाधर्मसामर्थ्य-परित्यागो न न्याय्य । कल्पनाधिक्याच्च । ईश्वर कल्पयेऽपूर्व वा । तत्र क्रियायाश्च स्वभाव सेव्यात्फलप्राप्तिर्दृष्टा न त्वपूर्वात् । न चापूर्व दृष्टम् । तत्रापूर्वमदृष्टं कल्पयितव्यं तस्य च फलदातृत्वे सामर्थ्य, सामर्थ्ये च सति दान चा॰यधिकमिति । इह तु ईश्वरस्य सेव्यस्य सद्भावमात्रं कल्प्य, नतु फलदा॰न-सामर्थ्यं दातृत्व च । सेव्यात्फलप्राप्तिदर्शनात् । अनुमान च दर्शित— 'द्यावापृथिव्यौ विधृते तिष्ठत' इत्यादि ।

तथा च यजमान देवा ईश्वरा सन्तो जीवनार्थेऽनुगता चरुपुरोडाशा-द्युपजीवनप्रयोजनेन, अन्यथापि जीवितुमुत्सहन्त कृपणा दीना वृत्तिमाश्रित्य

स्थिता, तच्च प्रशास्तुः प्रशासनात्स्यात्। तथा पितरोऽपि तदर्थं दर्वीं दर्वी-होममन्वावृत्ता अनुगता इत्यर्थ। समानं सर्वमन्यत् ॥९॥

यो वा एतदक्षर गार्ग्यविदित्वाऽस्मिल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मण ॥१०॥

इतश्चास्ति तदक्षर यस्मात्तदज्ञाने नियता संसारोपपत्ति। भवितव्यं तु तेन यद्विज्ञानात्तद्विच्छेदो, न्यायोपपत्ते। ननु क्रियात एव तद्विच्छित्ति स्यादिति चेत्। न। यो वा एतदक्षर हे गार्ग्यविदित्वाऽविज्ञाय अस्मिल्लोके जुहोति यजते तपस्तप्यते यद्यपि बहूनि वर्षसहस्राणि, अंतवदेवास्य तत्फलं भवति, तत्फलोपभोगान्ते क्षीयन्त एवास्य कर्माणि। अपि च यद्विज्ञानात्कार्पण्यात्क्षय ससारविच्छेदो, यद्विज्ञानाभावाच्च कर्मकृत्कृपण कृतफलस्यैवोपभोक्ता जननमरणप्रबंधारूढ ससरति, तदस्त्यक्षरं प्रशासितृ। तदेतदुच्यते—यो वा एतदक्षर गार्ग्यविदित्वा अस्माल्लोकात्प्रैति स कृपण, पणक्रीत इव दासादि। अथ य एतदक्षर गार्गि विदित्वा अस्माल्लोकात्प्रैति स ब्राह्मण ॥१०॥

अग्नेर्दहनप्रकाशकत्ववत् स्वाभाविकमस्य प्रशास्तृत्वमचेतनस्यैव इत्यत आह—

तद्वा एतदक्षर गार्ग्यदृष्ट द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मंतृ नान्यदतोऽस्ति विज्ञात्रेतस्मिंश्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥११॥

तद्वा एतदक्षरं गार्गि अदृष्ट न केनचित् दृष्ट अविषयत्वात्स्वयं तु द्रष्टृ दृष्टिस्वरूपत्वात्। तथाऽश्रुत श्रोत्राविषयत्वात्स्वयं श्रोतृ श्रुतिस्वरूपत्वात्। तथाऽमतं मनसोऽविषयत्वात्। स्वयं मंतृ मतिस्वरूपत्वात्। तथाऽविज्ञात बुद्धेरविषयत्वात्स्वय विज्ञातृ विज्ञानस्वरूपत्वात्। किच नान्यदतोऽस्मादक्षरादस्ति नास्ति किंचित् द्रष्टृ दर्शनक्रियाकर्तृ। एतदेवाक्षरं दर्शनक्रियाकर्तृ सर्वत्र। तथा नान्यदतोऽस्ति श्रोतृ। तदेवाक्षरं श्रोतृ सर्वत्र। नान्यदतोऽस्ति मंतृ। तदेवाक्षरं मंतृ सर्वत्र सर्वमनोद्वारेण। नान्यदतोऽस्ति विज्ञातृ विज्ञानक्रियाकर्तृ, तदेवाक्षरं सर्वबुद्धिद्वारेण विज्ञानक्रियाकर्तृ, नाचेतनं प्रधानमन्यद्वा। एतस्मिंश्नु

खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति । यदेव साक्षादपरोक्षाद्ब्रह्म, य आत्मा सर्वान्तरोऽशनायादिसंसारधर्मातीतो, यस्मिन्नाकाश ओतश्च प्रोतश्च, एषा परा काष्ठा, एषा परा गतिरेतत्परं ब्रह्म, एतत्पृथिव्यादेराकाशान्तस्य सत्यस्य सत्यम् ॥

सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु मन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिम कश्चिद्ब्रह्मोद्य जेतेति ततो ह वाचक्नव्युपरराम ॥१२॥ इति अष्टमं ब्राह्मणम् ॥

सा होवाच । हे ब्राह्मणा भगवन्त शृणुत मदीय वच तदेव बहु मन्येध्वम् । किं तत् ? यदस्मान्याज्ञवल्क्यान्नमस्कारेण मुच्येध्वमस्मै नमस्कारं कृत्वा तदेव बहु मन्यध्वमित्यर्थ । जयस्त्वस्य मनसाऽपि न आशंसनीय, किमुत कार्यत । कस्मात् ? न वै युष्माक मध्ये जातु कदाचिदपीम याज्ञवल्क्यं ब्रह्मोद्य प्रति जेता । प्रश्नौ चेन्मद्य वक्ष्यति न जेता भवितेति पूर्वमेव मया पतिज्ञात, अद्यापि ममायमेव निश्चयो, ब्रह्मोद्य प्रत्येतत्तुल्यो न कश्चिद्विद्यते इति । ततो ह वाचक्नव्युपरराम ॥१२॥

अत्र अंतर्यामिब्राह्मणे एतदुक्तम् । यं पृथिवी न वेद, यं सर्वाणि भूतानि न विदुरिति च । यमतर्यामिणं न विदुर्यं च न विदुर्यच्च तदक्षर दर्शनादिक्रियाकर्तृत्वेन सर्वेषा चेतनाधातुरित्युक्तम् । कस्त्वेषा विशेष कि वा सामान्यमिति ॥

तत्र केचिदाचक्षते । परस्य महासमुद्रस्थानीयस्य ब्रह्मणोऽक्षरस्य अप्रचलितस्वरूपस्य ईषत्प्रचलितावस्थाऽन्तर्यामी । अत्यंतप्रचलितावस्था क्षेत्रज्ञो य तं न वेदान्तर्यामिणम् । तथान्या पंचावस्था परिकल्पयन्ति । तथा अष्टावस्था ब्रह्मणो भवन्तीति वदन्ति । अन्येऽक्षरस्य शक्तय एता इति वदन्ति अनंतशक्तिमदक्षरमिति च । अन्ये त्वक्षरस्य विकारा इति वदन्ति । अवस्थाशक्ती तावन्नोपपद्येते । अक्षरस्य अशनायादिसंसारधर्मातीतत्वश्रुते । न ह्यशनायाद्यतीतत्व अशनायादिधर्मवदवस्थावत्त्व चैकस्य युगपदुपपद्यते । तथा शक्तिमत्त्वं च । विकारावयवत्वे च दोषा प्रदर्शिताश्चतुर्थे । तस्मादेता असत्या सर्वा कल्पना ॥

कस्तर्हि भेद एषाम् ? उपाधिकृत इति ब्रूम । न स्वत एषां भेदोऽभेदो

वा । सेधवघनवत्प्रज्ञानघनैकरसत्वाभाव्यात् । 'अपूर्वमनपरमनतरमबाह्यम्' 'अयमात्मा ब्रह्म' इति च श्रुते । 'सर्वान्या॰यंतरो ह्यज ' इति चाथर्वणे । तस्मान्निरुपाधिकस्य आत्मनो निरुपाख्यत्वान्निर्विशेषत्वादेकत्वाच्च 'नेति नेति' इति व्यपदेशो भवति । अविद्याकामकर्मादिविशिष्टकार्यकरणोपाधि. आत्मा संसारी जीव उच्यते । नित्यनिरतिशयज्ञानशक्त्युपाधि आत्माऽन्तर्यामीश्वर उच्यते ।

स एव निरुपाधि केवल शुद्ध स्वेन स्वभावेनाक्षर पर उच्यते । तथा हिरण्यगर्भाव्याकृतदेवताजातिपिंडमनुष्यतिर्यक्प्रेतादिकार्यकरणोपाधिभि विशिष्ट तदाख्यस्तद्रूपो भवति । तथा 'तदेजति तन्नैजति' इति व्याख्यातम् । तथा 'एष त आत्मा' 'एष सर्वभूतान्तरात्मा' 'एष सर्वेषु भूतेषु गूढ ' 'तत्त्वमसि' 'अहमेवेद सर्वम्' 'आत्मैवेदं सर्वम्' 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतयो न विरुध्यन्ते । कल्पनान्तरेष्वेता श्रुतयो न गच्छन्ति । तस्मात् उपाधिभेदेनैव एषा भेदो नान्यथा । 'एकमेवाद्वितीयं' इत्यवधारणात्सर्वोपनिषत्सु ॥ इति अष्टम ब्राह्मणम् ॥ ३ ८ —

अथ हैनं विदग्ध शाकल्य पप्रच्छ । पृथिव्यादीना सूक्ष्मतारतम्यक्रमेण पूर्वस्य पूर्वस्य उत्तरस्मिन्नुत्तरस्मिन्नोतप्रोतभाव कथमन्तर्वान्तर ब्रह्म प्रकाशितवान् । तस्य च ब्रह्मणो व्याकृतविषये सूत्रभेदेषु नियंतृत्वमुक्तं, व्याकृतविषये व्यक्ततरं लिंगमिति । तस्यैव ब्रह्मण साक्षादपरोक्षत्वे नियंतव्यदेवताभेदसंकोचविकासद्वारेण अधिगंतव्ये इति तदर्थं शाकल्यब्राह्मणमार॰यते—

अथ हैन विदग्ध. शाकल्य पप्रच्छ कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥१॥

अथ हैनं विदग्ध इति नामत शाकलस्यापत्यं शाकल्य पप्रच्छ । कति-संख्याका देवा हे याज्ञवल्क्येति । स याज्ञवल्क्यो ह किल एतयैव वक्ष्यमाणया निविदा प्रतिपेदे संख्या, यां संख्या पृष्टवाञ्शाकल्य । यावन्तो यावत्संख्याका देवा वैश्वदेवस्य शस्त्रस्य निविदि । निविन्नाम देवतासंख्यावाचकानि मंत्रपदानि कानिचिद्वैश्वदेवे शस्त्रे शस्यन्ते तानि निवित्संज्ञकानि । तस्या निविदि यावन्तो देवा श्रूयन्ते तावन्तो देवा इति । का पुन सा निविदिति । तानि निवित्पदानि प्रदर्श्यन्ते— त्रयश्च त्री च शता त्रयश्च देवा, देवाना त्री च त्रीणि च शतानि । पुनरप्येव त्रयश्च त्री च सहस्रा सहस्राण्येतावन्तो देवा इति । शाकल्योऽप्योमिति होवाच । एवमेषा मध्यमा संख्या सम्यक्तया ज्ञाता । पुनस्तेषामेव देवाना संकोचविषया सख्या पृच्छति । कत्येव देवा याज्ञवल्क्येति । त्रयस्त्रिंशत्षट्त्रयो द्वौ अध्यर्ध एक इति । देवतासकोचविकासविषया संख्या पृष्ट्वा पुन संख्येयस्वरूपं पृच्छति— कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥

स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिंद्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति ॥२॥

स होवाचेतर — महिमानो विभूतय एषा त्रयस्त्रिंशत देवाना एते त्रयश्च त्री च शतेत्यादय । परमार्थतस्तु त्रयस्त्रिंशत्त्वेव देवा इति । कतमे ते त्रयस्त्रिंशदित्युच्यते । अष्टौ वसव एकादश रुद्रा द्वादश आदित्यास्ते एकत्रिंशत् इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति त्रयस्त्रिंशत पूरणौ ॥

कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चांतरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं सर्वं हितमिति तस्माद्वसव इति ॥३॥

कतमे वसव इति तेषां स्वरूपं प्रत्येकं पृच्छ्यते । अग्निश्च पृथिवी चेति अग्न्याद्या नक्षत्रान्ता एते वसव. । प्राणिनां कर्मफलाश्रयत्वेन कार्यकरणसंघात-रूपेण तन्निवासत्वेन च विपरिणमन्तो जगदिदं सर्वं वासयन्ति वसन्ति च । तें यस्माद्वासयन्ति तस्माद्वसव इति ॥

कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥४॥

कतमे रुद्रा इति । दशेमे पुरुषे कर्मबुद्धींद्रियाणि प्राणा आत्मा मन एकादश, एकादशाना पूरण । ते एते प्राणा यदा अस्माच्छरीरान्मर्त्यात्प्राणिना कर्मफलोपभोगक्षये उत्क्रामन्ति, अथ तदा रोदयन्ति तत्संबंधिन । तत्तत्र यस्माद्रोदयन्ति ते संबंधिनस्तस्माद्रुद्रा इति ॥

कतम आदित्या इति द्वादश वै मासा. संवत्सरस्यैत आदित्या एते हीद सर्वमाददाना यन्ति ते यदिद सर्वमाददाना यन्ति तस्मादादित्या इति ॥५॥

कतम आदित्या इति । द्वादश वै मासा संवत्सरस्य कालस्यावयवा प्रसिद्धा, एते आदित्या । कथम् । एते हि यस्मात्पुन पुन परिवर्तमाना प्राणिनामायूषि कर्मफल च आददाना गृह्णंत उपाददतो यन्ति गच्छन्ति, ते यद्यस्मादेवमिदं सर्वमाददाना यन्ति तस्मादादित्या इति ॥

कतम इद्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेद्रो यज्ञ प्रजापतिरिति कतम स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ॥६॥

कतम इद्रः कतम प्रजापतिरिति । स्तनयित्नुरेवेंद्रो यज्ञ प्रजापतिरिति । कतम स्तनयित्नुरित्यशनिरिति । अशनिर्वज्र वीर्य बल, यत्प्राणिन प्रमापयति स इद्र । इंद्रस्य हि तत्कर्म । कतमो यज्ञ इति पशव इति । यज्ञस्य हि साधनानि पशव । यज्ञस्यारूपत्वात्पशुसाधनाश्रयत्वाच्च पशवो यज्ञ इत्युच्यते ॥

कतमे षडित्यग्निश्च पृथिवी च वायुश्चांतरिक्ष चादित्यश्च द्यौश्चैते षडेते हीद सर्वं षडिति ॥७॥

कतमे षडिति । त एवाग्न्यादयो वसुत्वेन पठिताश्चद्रमस नक्षत्राणि च वर्जयित्वा षड्भवन्ति षट्संख्याविशिष्टा । एते हि यस्मात्त्रयस्त्रिशदादि यदुक्तमिदं सर्वं, एत एव षड्भवन्ति । सर्वो हि वस्वादिविस्तर एतेष्वेव षट्सु अंतर्भवतीत्यर्थ ॥

कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति

कतमौ तौ द्वौ देवावित्यत्र चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति ॥८॥

कतमे ते त्रयो देवा इति । इम एव त्रयो लोका इति । पृथिवीमग्निं चैकीकृत्यैको देव, अतरिक्ष वायु चैकीकृत्य द्वितीय, दिवमादित्यं चैकीकृत्य तृतीय । ते एव त्रयो देवा इति । एषु हि यस्मात् त्रिषु देवेषु सर्वे देवा अतर्भवन्ति, तेनेत एव देवास्त्रय इत्येष नैरुक्ताना केषाचित्पक्ष । कतमौ तौ द्वौ देवाविति । अन्न चैव प्राणश्चैतौ द्वौ देवौ अनयो सर्वेषामुक्ताना अतर्भाव । कतमोऽध्यर्ध इति । योऽय पवते वायु ॥

तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यस्मिन्निद सर्वमध्याभ्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षते ॥९॥

ततत्राहुश्चोदयन्ति— यदय वायुरेक इवैव एक एव पवते । अथ कथमध्यर्ध इति । यदस्मिन्निद सर्वमध्याभ्नोदस्मिन्वायौ सतीद सर्वमध्याभ्नोत् अधिऋद्धि प्राप्नोति, तेनाध्यर्ध इति । कतम एको देव इति प्राण इति । स प्राणो ब्रह्म सर्वदेवात्मकत्वान्महद्ब्रह्म तेन स ब्रह्म त्यदित्याचक्षते । त्यदिति तद्ब्रह्माचक्षते परोक्षाभिधायकेन शब्देन । देवानामेतदेकत्व नानात्व च । अनतानां देवाना निर्विन्मख्याविशिष्टेष्वतर्भाव । तेषामपि त्रयस्त्रिशदादिषु उत्तरोत्तरेषु यावदेकस्मिन्प्राणे । प्राणस्यैव चैकस्य सर्वोऽनतसख्यातो विस्तर । एवमेकश्चानतश्च अवान्तरसख्याविशिष्टश्च प्राण एव । तत्र च देवस्यैकस्य नामरूपकर्मगुणशक्तिभेद अधिकारभेदात् ॥

इदानीं तस्यैव प्राणस्य ब्राह्मण पुनरेष्टया भेद उपदिश्यते—

पृथिव्येव यस्यायतनमग्निर्लोको मनोज्योतिर्यो वै त पुरुषं विद्यात्सर्वस्यात्मन परायण स वे वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मन परायणं यमात्थ य एवायं शारीरः पुरुष. स एष वदैव शाकल्य तस्य का देवतेत्यमृतमिति होवाच ॥१०॥

पृथिव्येव यस्य देवस्यायतनमाश्रय । अग्निर्लोको यस्य, लोकयत्यनेनेति लोक, पश्यतीति, अग्निना पश्यतीत्यर्थ । मनोज्योति मनसा ज्योतिषा संकल्पविकल्पादिकार्यं करोति य, सोऽयं मनोज्योति । पृथिवीशरीरोऽग्निदर्शनो

मनसा संकल्पयिता पृथिव्यभिमानी कार्यकरणसघातवान्देव इत्यर्थ । य एव-विशिष्ट वै त पुरुषं विद्याद्विजानीयात्सर्वस्यात्मनः आध्यात्मिकस्य कार्यकरण-सघातस्य आत्मन परमयनं पर आश्रयस्त परायणम् । मातृजेन त्वङ्मासरुधिर-रूपेण क्षेत्रस्थानीयेन बीजस्थानीयस्य पितृजस्य अस्थिमज्जाशुक्ररूपस्य परमयनं, करणात्मनश्च, स वै वेदिता स्यात् । य एतदेवं वेत्ति स वै वेदिता पंडित स्यादित्यभिप्राय । याज्ञवल्क्य त्व तमजानन्नेव पडिताभिमानीत्यभिप्राय ।

यदि तद्विज्ञाने पाडित्य लभ्यते, वेद वा अह तं पुरुषं सर्वस्यात्मन परायण यमात्थ य कथयसि तमह वेद । तत्र शाकल्यस्य वचन द्रष्टव्यम् । यदि त्व वेत्थ त पुरुष ब्रूहि किविशेषणोऽसौ ? शृणु यद्विशेषण स । य एवायं शारीर पार्थिवांशे शरीरे भव शारीरो मातृजकोशत्रयरूप इत्यर्थ । स एष देवो यस्त्वया पृष्टो, हे शाकल्य । किंत्वस्ति तत्र वक्तव्य विशेषणान्तरं, तद्वदैव पृच्छैवेत्यर्थो, हे शाकल्य । स एवं प्रक्षोभितोऽमर्षवशग आह-- तोत्रा-र्दित इव गज --तस्य देवस्य शारीरस्य का देवता, यस्मान्निष्पद्यते य सा तस्य देवतेत्यस्मिन्प्रकरणे विवक्षित ? अमृतमिति होवाच । अमृतमिति यो भुक्तस्या-न्नस्य रसो मातृजस्य लोहितस्य निष्पत्तिहेतु । तस्माद्घयन्नरसाल्लोहित निष्पद्यते स्त्रिया श्रित, ततश्च लोहितमयं शरीर बीजाश्रयम् । समानमन्यत् ॥१०॥

काम एव यस्यायतन हृदय लोको मनोज्योतिर्यो वै त पुरुष विद्यात्सर्वस्यात्मन· परायण स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं त पुरुषं सर्वस्यात्मन· परायण यमात्थ य एवायं काममय· पुरुष स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥११॥

काम एव यस्यायतनम् । स्त्रीव्यतिकराभिलाष काम कामशरीर इत्यर्थ । हृदयं लोको हृदयेन बुद्धया पश्यति । य एवाय काममय पुरुषोऽध्यात्ममपि काममय एव । तस्य का देवतेति स्त्रिय इति होवाच । स्त्रीतो हि कामस्य दीप्तिर्जायते ॥

रूपाण्येव यस्यायतन चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुष विद्यात्सर्वस्यात्मनः परायण स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति सत्यमिति होवाच ॥१२॥

रूपाण्येव यस्यायतनम् । रूपाणि शुक्लकृष्णादीनि । य एवासावादित्ये पुरुष, सर्वेषा हि रूपाणा विशिष्टं कार्यमादित्ये पुरुष, तस्य का देवतेति । सत्यमिति होवाच । सत्यमिति चक्षुरुच्यते । चक्षुषो ह्यध्यात्मत आदित्यस्याधिदैवतस्य निष्पत्तिः ॥

आकाश एव यस्यायतनं श्रोत्रं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अह तं पुरुष सर्वस्यात्मनः परायणं यमात्थ य एवायं श्रौत्रः प्रातिश्रुत्क. पुरुष स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥१३॥

आकाश एव यस्यायतनम् । य एवायं श्रोत्रे भव श्रौत्र तत्रापि प्रतिश्रवणवेलाया विशेषतो भवतीति प्रातिश्रुत्कस्तस्य का देवतेति । दिश इति होवाच । दिग्म्यो ह्यसावाध्यात्मिको निष्पद्यते ॥

तम एव यस्यायतनं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मन· परायण स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुष सर्वस्यात्मन परायणं यमात्थ य एवायं छायामय पुरुष. स एष वदैव शाकल्य तस्य का देवतेति मृत्युरिति होवाच ॥१४॥

तम एव यस्यायतनम् । तम इति शार्वराद्यधकार परिगृह्यते । अध्यात्म छायामयोऽज्ञानमय· पुरुषस्तस्य का देवतेति । मृत्युरिति होवाच । मृत्युराधिदैवत तस्य निष्पत्तिकारणम् ॥

रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मन परायणं स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुष सर्वस्यात्मन· परायण यमात्थ य एवायमादर्शे पुरुष स एष वदैव शाकल्य तस्य का देवतेत्यसुरिति होवाच ॥१५॥

रूपाण्येव यस्यायतनम् । पूर्वं साधारणानि रूपाण्युक्तानीह तु प्रकाशकानि विशिष्टानि रूपाणि गृह्यन्ते । रूपायतनस्य देवस्य विशेषायतन प्रतिबिंबाधारमादर्शादि । तस्य का देवतेत्यसुरिति होवाच । तस्य प्रतिबिंबाख्यस्य पुरुषस्य निष्पत्तिरसो प्राणात् ॥

आप एव यस्यायतनं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायण स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं

पुरुषं सर्वस्यात्मन परायण यमात्थ य एवायमप्सु पुरुष स एष वदैव शाकल्य तस्य का देवतेति वरुण इति होवाच ॥१६॥

आप एव यस्य आयतनम् । साधारणा सर्वा आप आयतन, वापीकूपतडागाद्याश्रयास्वप्सु विशेषावस्थानम् । तस्य का देवतेति । वरुण इति । वरुणात्संघातकर्त्र्योऽध्यात्ममाप एव वाय्याद्यपा निष्पत्तिकारणम् ॥

रेत एव यस्यायतन हृदयं लोको मनोज्योतिर्यो वै त पुरुष विद्यात्सर्वस्यात्मन परायण स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुष सर्वस्यात्मन. परायणं यमात्थ य एवाय पुत्रमयः पुरुष स एष वदैव शाकल्य तस्य का देवतेति प्रजापतिरिति होवाच ॥ १७॥

रेत एव यस्यायतनम् । य एवायं पुत्रमयो विशेषायतनं रेतआयतनस्य पुत्रमय इति च अस्थिमज्जाशुक्राणि पितुर्जातानि । तस्य का देवतेति । प्रजापतिरिति होवाच । प्रजापति पितोच्यते । पितृतो हि पुत्रस्योत्पत्ति ॥

शाकल्येति होवाच याज्ञवल्क्यस्त्वां स्विदिमे ब्राह्मणा अगारावक्षयणमक्रता३ इति ॥१८॥

अष्टधा देवलोकपुरुषभेदेन त्रिधा त्रिधा आत्मानं प्रविभज्यावस्थित एकैको देव प्राणभेद एवोपासनार्थं व्यपदिष्ट । अधुना दिग्विभागेन पचधा प्रविभक्तस्य आत्मन्युपसहारार्थमाह । तूष्णींभूत शाकल्य याज्ञवल्क्यो ग्रहेणेवावेशयन्नाह— शाकल्येति होवाच याज्ञवल्क्य । त्वा स्विदिति वितर्के । इमे नून ब्राह्मणा अंगारावक्षयण, अगारा अवक्षीयन्ते यस्मिन्सदशादौ तदगारावक्षयण तन्नून त्वामकृत कृतवन्तो ब्राह्मणा , त्व तु तन्न बुध्यसे आत्मानं मया दह्यमानमित्यभिप्राय ॥

याज्ञवल्क्येति होवाच शाकल्यो यदिद कुरुपचालानां ब्राह्मणानत्यवादी. किं ब्रह्म विद्वानिति दिशो वेद सदेवा सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठा ॥१९॥

याज्ञवल्क्येति होवाच शाकल्य । यदिद कुरुपचालाना ब्राह्मणानत्यवादीरत्युक्तवानसि, स्वयं भीतास्त्वामंगारावक्षयणं कृतवन्त इति । किं ब्रह्म विद्वान्सन्नेवमाधिक्षिपसि ब्राह्मणान् । याज्ञवल्क्य आह— ब्रह्मविज्ञानं तावदिदं मम । किं तत्? दिशो वेद, दिग्विषयं विज्ञान जाने । तच्च न केवलं दिश

एव, सदेवा देवै सह दिगाधिष्ठातृभि किंच सप्रतिष्ठा. प्रतिष्ठाभिश्च सह। इतर आह। यद्यदि दिशो वेत्थ सदेवा, सप्रतिष्ठा इति। सफलं यदि विज्ञानं त्वया प्रतिज्ञातम्॥

किंदेवतोऽस्यां प्राच्यां दिश्यसीत्यादित्यदेवत इति स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षु. प्रतिष्ठितमिति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीत्येवमेवैतद्याज्ञवल्क्य ॥२०॥

किंदेवत का देवतास्य तव दिग्भूतस्य। असौ हि याज्ञवल्क्यो हृदय-मात्मानं दिक्षु पचधा विभक्तं दिगात्मभूतं, तद्द्वारेण सर्वं जगदात्मत्वेनोपगम्य, अहमस्मि दिगात्मेति व्यवस्थित। पूर्वाभिमुख सप्रतिष्ठावचनात्। यथा याज्ञ-वल्क्यस्य प्रतिज्ञा तथैव पृच्छति। किं देवतस्त्वमस्या दिश्यसीति। सर्वत्र हि वेदे या या देवतामुपास्ते इहैव तद्भूतस्ता ता प्रतिपद्यत इति। तथाच वक्ष्यति 'देवो भूत्वा देवानप्येति' इति। अस्या प्राच्या का देवता दिगात्मनस्त्वाधि-ष्ठात्री, कया देवतया त्वं प्राचीदिग्रूपेण संपन्न इत्यर्थ.। इतर आह आदित्य-देवत इति। प्राच्या दिशि मम आदित्यो देवता सोऽहमादित्यदेवत। सदेवा इत्येतदुक्तं, सप्रतिष्ठा इति तु वक्तव्यमित्याह। स आदित्य कस्मिन्प्रतिष्ठित इति। चक्षुषीति। अध्यात्मतश्चक्षुष आदित्यो निष्पन्न इति हि मंत्रब्राह्मणवादा "चक्षो सूर्यो अजायत" "चक्षुष आदित्य" इत्यादय। कार्य हि कारणे प्रतिष्ठितं भवति। कस्मिन्नु चक्षु प्रतिष्ठितमिति। रूपेष्विति। रूपग्रहणाय हि रूपात्मकं चक्षू रूपेण प्रयुक्तम्। यैर्हि रूपै प्रयुक्तं तैरात्मग्रहणायारब्ध चक्षु। तस्मात्सादित्यं चक्षु सह प्राच्या दिशा सह तत्स्थै सर्वै रूपेषु प्रतिष्ठितम्। चक्षुषा सह प्राची दिक्सर्वा रूपभूता तानि च कस्मिन्नु रूपाणि प्रतिष्ठितानीति। हृदय इति होवाच। हृदयारब्धानि रूपाणि। रूपाकारेण हि हृदयं परिणतम्। यस्मात् हृदयेन हि रूपाणि सर्वो लोको जानाति। हृदयमिति बुद्धिमनसी एकीकृत्य निर्देश। तस्मात् हृदये ह्येव रूपाणि प्रतिष्ठितानि। हृदयेन हि स्मरण भवति रूपाणा वासनात्मनाम्। तस्मात् हृदये रूपाणि प्रतिष्ठितानि इत्यर्थ। एवमेवैतद्याज्ञवल्क्य॥

किंदेवतोऽस्यां दक्षिणायां दिश्यसीति यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञ प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्दधात्यथ दक्षिणां ददाति श्रद्धायां ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२१॥

किंदेवतोऽस्या दक्षिणाया दिश्यसीति पूर्ववत् । दक्षिणाया दिशि का देवता तव । यमदेवत इति । यमो देवता मम दक्षिणादिग्भूतस्य । स यम कस्मिन्प्रतिष्ठित इति । यज्ञ इति । यज्ञे कारणे प्रतिष्ठितो यम सह दिशा । कथं पुनर्यज्ञस्य कार्यं यम इत्युच्यते— ऋत्विग्भिर्निष्पादितो यज्ञो, दक्षिणया यजमानस्तेभ्यो यज्ञं निष्क्रीय तेन यज्ञेन दक्षिणा दिशं सह यमेनाभिजयति । तेन यज्ञे यम कार्यत्वात्प्रतिष्ठित सह दक्षिणया दिशा । कस्मिन्नु यज्ञ प्रतिष्ठित इति । दक्षिणायामिति । दक्षिणया स निष्क्रीयते । तेन दक्षिणकार्यं यज्ञ । कस्मिन्नु दक्षिणा प्रतिष्ठितेति । श्रद्धायामिति । श्रद्धा नाम दित्सुत्वं आस्तिक्यबुद्धिर्भक्तिसहिता । कथं तस्या प्रतिष्ठिता दक्षिणा? यस्माद्यदा ह्येव श्रद्दधात्यथ दक्षिणा ददाति, नाश्रद्दधद्दक्षिणा ददाति । तस्माच्छ्रद्धाया ह्येव दक्षिणा प्रतिष्ठितेति । कस्मिन्नु श्रद्धा प्रतिष्ठितेति । हृदय इति होवाच । हृदयस्य हि वृत्ति श्रद्धा यस्मात्, हृदयेन हि श्रद्धा जानाति । वृत्तिश्च वृत्तिमति प्रतिष्ठिता भवति । तस्मात् हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीति । एवमेवैतद्याज्ञवल्क्य ॥

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्नवाप. प्रतिष्ठिता इति रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति हृदय इति तस्मादपि प्रतिरूप जातमाहुर्हृदयादिव सृष्टो हृदयादिव निर्मित इति हृदये ह्येव रेत· प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२२॥

किंदेवतोऽस्या प्रतीच्या दिश्यसीति । तस्या वरुणोऽधिदेवता मम । स वरुण कस्मिन्प्रतिष्ठित इत्यप्स्विति । अपा हि वरुण कार्यम् । "श्रद्धा वा आप" "श्रद्धातो वरुणमसृजत" इति श्रुते । कस्मिन्नवाप प्रतिष्ठिता इति । रेतसीति । "रेतसो ह्याप सृष्टा" इति श्रुते । कस्मिन्नु रेत प्रति-

ष्ठितामिति । हृदय इति । यस्मात् हृदयस्य कार्यं रेत । कामो हृदयस्य वृत्ति । कामिनो हि हृदयोद्रेतोऽधिस्कदति । तस्मादपि प्रतिरूपमनुरूपं पुत्र जातमाहु लौकिकाः । अस्य पितुर्हृदयादिवायं पुत्र सूते विनि सृतो, हृदयादिव निर्मितो यथा सुवर्णेन निर्मित कुडल । तस्मात् हृदये ह्येव रेत प्रतिष्ठित भवतीति । एवमेवैतद्याज्ञवल्क्य ॥

किदेवतोऽस्यामुदीच्या दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि दीक्षितमाहु सत्य वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्य जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२३॥

किदेवतोऽस्यामुदीच्या दिश्यसीति । सोमदेवत इति । सोम इति लता सोम देवता चैकीकृत्य निर्देश । स सोम कस्मिन्प्रतिष्ठित इति । दीक्षायामिति । दीक्षितो हि यजमान सोम क्रीणाति । क्रीतेन सोमेनेष्ट्वा ज्ञानवानुत्तरा दिशं प्रतिपद्यते सोमदेवताधिष्ठिता सौम्याम् । कस्मिन्नु दीक्षा प्रतिष्ठितेति । सत्य इति । कथम्[1] यस्मात्सत्ये दीक्षा प्रतिष्ठिता, तस्मादपि दीक्षितमाहु सत्य वदेति, कारणभ्रेषे कार्यभ्रेषो मा भूदिति । सत्ये ह्येव दीक्षा प्रतिष्ठितेति । कस्मिन्नु सत्यं प्रतिष्ठितमिति । हृदय इति होवाच । हृदयेन हि सत्यं जानाति । तस्मात् हृदये ह्येव सत्यं प्रतिष्ठितं भवतीति । एवमेवैतद्याज्ञवल्क्य ॥

किदेवतोऽस्यां ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति कस्मिन्नु वाक्प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदय प्रतिष्ठितमिति ॥२४॥

किदेवतोऽस्या ध्रुवाया दिश्यसीति । मेरो समंततो वसतामन्यभिचारादूर्ध्वा दिग्ध्रुवेत्युच्यते । अग्निदेवत इति । ऊर्ध्वाया हि प्रकाशभूयस्त्वं, प्रकाशश्चाग्नि । सोऽग्नि कस्मिन्प्रतिष्ठित इति, वाचीति । कस्मिन्नु वाक्प्रतिष्ठितेति । हृदय इति । तत्र याज्ञवल्क्य सर्वासु दिक्षु विप्रसृतेन हृदयेन सर्वा दिश आत्मत्वेनाभिसंपन्नः । सदेवा सप्रतिष्ठा दिश आत्मभूतास्तस्य नामरूपकर्मात्मभूतस्य याज्ञवल्क्यस्य । यद्रूपं तत्प्राच्या दिशा सह हृदयभूतं याज्ञवल्क्यस्य । यत्केवलं कर्म पुत्रोत्पादनलक्षणं च ज्ञानसहितं च सह फलेनाधिष्ठात्रीभिश्च

देवताभिर्दक्षिणाप्रतीच्युदीच्य कर्मफलात्मिका हृदयमेव आपन्नास्तस्य। ध्रुवया दिशा सह नाम सर्व वाग्द्वारेण हृदयमेव आपन्नम्। एतावद्वीदं सर्व, यदुत रूप वा कर्म वा नाम वेति तत्सर्व हृदयमेव। तत्सर्वात्मक हृदय पृच्छ्यते— कस्मिन्नु हृदयं प्रतिष्ठितमिति॥

अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यद्धयेतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयांसि वैनद्विमथ्नीरन्निति॥२५॥

अहल्लिकेति होवाच याज्ञवल्क्यो, नामान्तरेण संबोधन कृतवान्। यत्र यस्मिन्काले एतत् हृदयमात्माऽस्य शरीरस्यान्यत्र क्वचिद्देशान्तरे, अस्मदस्मत्तो, वर्तत इति मन्यासै मन्यसे। यद्धि यदि ह्येतत् हृदयमन्यत्रास्मत्स्याद्भवेत श्वानो वैनच्छरीरं तदा अद्यु, वयासि वा पक्षिणो वैनद्विमथ्नीरन्विलोडयेयु विकर्षेरन्निति। तस्मान्मयि शरीरे हृदयं प्रतिष्ठितमित्यर्थ। शरीरस्यापि नामरूपकर्मात्मकत्वात् हृदये प्रतिष्ठितत्वम्॥

कस्मिन्नु त्व चात्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राण प्रतिष्ठित इत्यपान इति कस्मिन्नपान प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यान. प्रतिष्ठित इत्युदान इति कस्मिन्नूदान प्रतिष्ठित इति समान इति स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसगो न हि सज्यतेऽसितो न व्यथते न रिष्यति। एतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषा स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्त त्वौपनिषद पुरुषं पृच्छामि त चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति। तं ह न मेने शाकल्यस्तस्य ह मूर्धा विपपाताऽपि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः॥२६॥

हृदयशरीरयोरेवमन्योन्यप्रतिष्ठोक्ता कार्यकरणयो। अतस्त्वा पृच्छामि— कस्मिन्नु त्वं च शरीरमात्मा च तव हृदयं प्रतिष्ठितौ स्थ इति। प्राण इति। देहात्मानौ प्राणे प्रतिष्ठितौ स्याता प्राणवृत्तौ। कस्मिन्नु प्राण प्रतिष्ठित इति, अपान इति। सापि प्राणवृत्ति प्रागेव प्रेयादपानवृत्त्या चेन्न निगृह्येत। कस्मिन्नपान प्रतिष्ठित इति। व्यान इति। साऽप्यपानवृत्तिरेव एव यावत्प्राणवृत्तिश्च प्रागेव, मध्यस्थया चेद्व्यानवृत्त्या न निगृह्येत। कस्मिन्नु व्यान. प्रतिष्ठित इति। उदान इति। सर्वास्तिस्रोऽपि वृत्तय उदाने कीलस्थानीये चेन्न

निबद्धा, विष्वङ्ङ्वेयु । कस्मिन्नूदान प्रतिष्ठित इति, समान इति । समान-प्रतिष्ठा ह्येता सर्वा वृत्तय । एतदुक्तं भवति—शरीरहृदयवायवोऽन्योन्य-प्रतिष्ठा , सघातेन नियता वर्तन्ते विज्ञानमयार्थप्रयुक्ता इति । सर्वमेतद्येन नियत यस्मिन्प्रतिष्ठितमाकाशान्तमोत च प्रोत च, तस्य निरुपाधिकस्य साक्षादपरोक्षा-द्ब्रह्मणो निर्देश कर्तव्य इत्ययमारंभ ॥

स एष । स यो नेति नेतीति निर्दिष्टो मधुकाडे एष स । सोऽय-मात्माऽगृह्यो न गृह्य । कथम् ? यस्मात्सर्वकार्यधर्मातीत , तस्मादगृह्य । कुत ? यस्मान्न हि गृह्यते । यद्धि करणगोचर व्याकृत वस्तु, तत् ग्रहण-गोचरम् । इदं तु तद्विपरीतमात्मतत्त्वम् । तथाऽशीर्यो, यद्धि मूर्त संहतं शरीरादि तच्छीर्यते । अयं तु तद्विपरीतोऽतो न हि शीर्यते । तथाऽसगो, मूर्तो मूर्ता-न्तरेण सब-यमान· सज्यतेऽयं च तद्विपरीतोऽतो न हि सज्यते । तथाऽसितो-ऽबद्धो, यद्धि मूर्त तद्बध्यते । अय तु तद्विपरीतत्वादबद्धत्वान्न व्यथते । अतो न रिष्यति । ग्रहणविशरणसंबधकार्यधर्मरहितत्वान्न रिष्यति न हिसामापद्यते न विनश्यतीत्यर्थ ॥

क्रममतिक्रम्य औपनिषदस्य पुरुषस्य आख्यायिकातोऽपसृत्य श्रुत्या स्वेन रूपेण त्वरया निर्देश कृत । तत पुनराख्यायिकामेवाश्रित्य आह—एतानि यान्युक्तान्यष्टावायतनानि 'पृथिव्येव यस्यायतन' इत्येवमादीनि, अष्टौ लोका अग्निलोकादयोऽष्टौ देवा 'अमृतमिति होवाच' इत्येवमादय , अष्टौ पुरुषा शारीर पुरुष इत्यादय । स य कश्चित्तान्पुरुषाञ्शारीरप्रभृतीन्निरुह्य निश्चयेनोह्य गमयित्वाष्टचतुष्कभेदेन लोकस्थितिमुपपाद्य पुन प्राचीदिगादि-द्वारेण प्रत्युह्य उपसहृत्य स्वात्मनि हृदयेऽत्यक्रामदतिक्रान्तवानुपाधिधर्म हृदयाद्या-त्मत्वम् । स्वेनैवात्मना व्यवस्थितो य औपनिषद पुरुषोऽशनायादिवर्जित· उपनिषत्स्वेव विज्ञेयो नान्यप्रमाणगम्य , त त्वा त्वा विद्याभिमानिनं पुरुषं पृच्छामि । त चेद्यदि मे न विवक्ष्यसि विस्पष्टं न कथयिष्यसि, मूर्धा ते विपतिष्यतीत्याह याज्ञवल्क्य । तं त्वौपनिषद पुरुषं शाकल्यो न मेने ह न विज्ञातवान्किल । तस्य ह मूर्धा विपपात विपतित । समाप्ताऽऽख्यायिका । श्रुतेर्वचनं तं ह न मेन इत्यादि ।

किं चापि ह्यस्य परिमोषिणस्तस्करा अस्थीन्यपि संस्कारार्थं शिष्यैर्नी

यमानानि गृहान्प्रत्यपजह्रु अपहृतवन्त । किंनिमित्तम्, अन्यद्धनं नीयमानं मन्यमाना । पूर्ववृत्ता ह्याख्यायिकेह सूचिता । अष्टाध्याय्यां किल शाकल्येन याज्ञवल्क्यस्य समानान्त एव किल संवादो निर्वृत्त । तत्र याज्ञवल्क्येन शापो दत्त । पुरेऽतिथ्ये मरिष्यसि न तेऽस्थीनिचन गृहान्प्राप्स्यन्तीति । स ह तथैव ममार । तस्य ह्यन्यन्मन्यमाना परिमोषिणोऽस्थीन्यपजह्रु । तस्माज्जोपवादी स्यादुत ह्येवंवित्परो भवतीति । सैषा आख्यायिका आचार्यार्थं सूचिता विद्यास्तुतये चेह ॥२६॥

यस्य नेति नेतीत्यन्यप्रतिषेधद्वारेण ब्रह्मणो निर्देश कृत तस्य विधिमुखेन कथ निर्देश कर्तव्य इति पुनराख्यायिकामेव आश्रित्याह मूलं च जगतो वक्तव्यामिति । आख्यायिकासंबंधस्त्वब्रह्मविदो ब्राह्मणाज्जित्वा गोधनं हर्तव्यं इति । न्याय मत्वाह—

अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते त वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषु. ॥२७॥

अथ होवाच । अथानंतर तूष्णींभूतेषु ब्राह्मणेषु होवाच, हे ब्राह्मणा भगवन्त इत्येवं संबोध्य । यो वो युष्माकं मध्ये कामयते इच्छति, याज्ञवल्क्यं पृच्छामीति, स मा मामागत्य पृच्छतु । सर्वे वा मा पृच्छत । सर्वे वा यूय मा मा पृच्छत । यो व कामयते याज्ञवल्क्यो मा पृच्छत्विति, तं व पृच्छामि, सर्वान्वा वो युष्मानहं पृच्छामि । ते ह ब्राह्मणा न दधृषु, ते ब्राह्मणा एवमुक्ता अपि न प्रगल्भा सवृत्ता· किंचिदपि प्रत्युत्तरं वक्तुम् ॥

तान्हैतै श्लोकैः पप्रच्छ—

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ।
तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहि ॥१॥

तेषु अप्रगल्भभूतेषु ब्राह्मणेषु तान्हैतैर्वक्ष्यमाणै श्लोकै पप्रच्छ पृष्टवान् । यथा लोके वृक्षो वनस्पति । वृक्षस्य विशेषण वनस्पतिरिति । तथैव पुरुषोऽमृषा । अमृषा सत्यमेतत् । तस्य लोमानि । तस्य पुरुषस्य लोमानीतरस्य वनस्पते पर्णानि । त्वगस्योत्पाटिका बहिस्त्वगस्य पुरुषस्य इतरस्योत्पाटिका वनस्पते ॥

त्वच एवास्य रुधिरं प्रस्यंदि त्वच उत्पट.।
तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाऽऽहतात् ॥२॥

त्वच एव सकाशादस्य पुरुषस्य रुधिरं प्रस्यदि, वनस्पतेस्त्वच उत्पट ॥ त्वच एवोत्स्फुटति यस्मात्। एव सर्वं समानमेव वनस्पते पुरुषस्य च। तस्मात् आतृण्णात् हिंसितात्प्रैति तत् रुधिरं निर्गच्छति वृक्षादिव आहताच्छिन्नाद्रस ॥

मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरम्।
अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥३॥

एव मासान्यस्य पुरुषस्य, वनस्पतेस्तानि शकराणि शकलानीत्यर्थ ॥ किनाटं वृक्षस्य किनाटं नाम शकलेभ्योऽभ्यंतरं वल्कलरूप काष्ठसलग्न तत्स्नाव पुरुषस्य। तत्स्थिरं तच्च किनाट स्नाववत् दृढ हि तत्। अस्थीनि पुरुषस्य स्नाय्नोऽन्तरतोऽस्थीनि भवन्ति। तथा किनाटस्याभ्यंतरतो दारूणि काष्ठानि। मज्जा मज्जैव वनस्पते पुरुषस्य च मज्जोपमा कृता। मज्जाया उपमा मज्जोपमा, नान्यो विशेषोऽस्तीत्यर्थ। यथा वनस्पतेर्मज्जा तथा पुरुषस्य, यथा पुरुषस्य तथा वनस्पते ॥

यद्वृक्षो वृक्णो रोहति मूलान्नवतर पुन.।
मर्त्य स्विन्मृत्युना वृक्ण कस्मान्मूलात्प्ररोहति ॥४॥

यद्यदि वृक्षो वृक्णश्छिन्नो रोहति पुन पुन प्ररोहति प्रादुर्भवति मूलात्पुनर्नवतर पूर्वस्मादभिनवतर। यदेतस्माद्विशेषणात्प्राग्वनस्पते पुरुषस्य च सर्वं सामान्यमवगतम्। अयं तु वनस्पतौ विशेषो दृश्यते यच्छिन्नस्य प्ररोहणम्। न तु पुरुषे मृत्युना वृक्णे पुन प्ररोहणं दृश्यते। भवितव्यं च कुतश्चित्प्ररोहणेन। तस्माद्व पृच्छामि— मर्त्यो मनुष्य स्विन्मृत्युना वृक्ण कस्मात् मूलात्प्ररोहति? मृतस्य पुरुषस्य कुत प्ररोहणमित्यर्थ ॥

रेतस इति मा वोचत जीवतस्तत्प्रजायते।
धानारुह इव वै वृक्षोऽजसा प्रेत्य संभवः ॥५॥

यदि चेदेवं वदथ रेतस प्ररोहतीति, मा वोचत मैवं वक्तुमर्हथ। कस्मात्? यस्माज्जीवत. पुरुषात्तद्रेत प्रजायते न मृतात्। अपि च धानारुहो धाना बीजं बीजरुहोऽपि वृक्षो भवति, न केवल काण्डरुह एव। इवशब्दो-

ऽनर्थक । वै वृक्षोऽजसा साक्षात्प्रेत्य मृत्वा सभवो धानातोऽपि प्रेत्य संभवो भवेदजसा पुनर्वनस्पते ॥

यत्समूलमावृहेयुर्वृक्ष न पुनराभवेत् ।
मर्त्य स्विन्मृत्युना वृक्ण कस्मान्मूलात्प्ररोहति ॥६॥

यद्यदि सह मूलेन धानया वा आवृहेयुरुद्यच्छेयु उत्पाटयेयुर्वृक्षं न पुनराभवेत्पुनरागत्य न भवेत् । तस्माद्व पृच्छामि— सर्वस्यैव जगतो मूलं मर्त्य स्विन्मृत्युना वृक्ण कस्मान्मूलात्प्ररोहति ॥

जात एव न जायते को न्वेन जनयेत्पुन ।
विज्ञानमानद ब्रह्म रातिर्दातु परायण तिष्ठमानस्य तद्विद इति ॥७॥
॥२८॥ इति नवम ब्राह्मणम् ॥ इति तृतीयोध्यायः ॥

जात एवेति मन्यध्वं यदि, किमत्र प्रष्टव्यमिति । जनिष्यमाणस्य हि संभव प्रष्टव्यो न जातस्य । अयं तु जात एवातोऽस्मिन्विषये प्रश्न एव नोपपद्यत इति चेत् । न । किं तर्हि ? मृत पुनरपि जायत एवान्यथाऽकृताभ्यागमकृतनाशप्रसंगात् । अतो व पृच्छामि को न्वेन मृतं पुनर्जनयेत् ? तन्न विजज्ञुर्ब्राह्मणा यतो मृत पुन प्ररोहति जगतो मूल न विज्ञात ब्राह्मणै । अतो ब्रह्मिष्ठत्वात् हृता गावो, याज्ञवल्क्येन जिता ब्राह्मणा । समाप्ता आख्यायिका । यज्जगतो मूल, येन च शब्देन साक्षाद्व्यपदिश्यते ब्रह्म, यद्याज्ञवल्क्यो ब्राह्मणान्पृष्टवास्तत्स्वेन रूपेण श्रुतिरस्मभ्यमाह— विज्ञान विज्ञप्तिर्विज्ञान, तच्च आनद न विषयविज्ञानवत् दु खानुविद्ध, किं तर्हि प्रसन्नं शिवमतुलमनायासं नित्यतृप्तमेकरसमित्यर्थ । कि तद्ब्रह्म उभयविशेषणवद्राती राते षष्ठ्यर्थे प्रथमा, धनस्येत्यर्थ । धनस्य दातु कर्मकृतो यजमानस्य परायणं परा गति कर्मफलस्य प्रदातृ । किंच व्युत्थायैषणाभ्यस्तस्मिन्नेव ब्रह्मणि तिष्ठत्यकर्मकृतद्ब्रह्म वेत्तीति तद्विच्च तस्य तिष्ठमानस्य च तद्विदो ब्रह्मविद इत्यर्थ । परायणमिति ॥

अत्रेदं विचार्यते । आनदशब्दो लोके सुखवाची प्रसिद्ध । अत्र च ब्रह्मणो विशेषणत्वेन आनंदशब्द श्रूयते आनद ब्रह्मेति । श्रुत्यंतरे च । 'आनंदो ब्रह्मेति व्यजानात्' 'आनंदं ब्रह्मणो विद्वान्' 'यदेष आकाश आनंदो न स्यात्' 'यो वै भूमा तत्सुखम्' इति च । 'एष परम आनंद' इत्येवमाद्या । संवेद्ये च सुखे आनंदशब्द प्रसिद्ध । ब्रह्मानंदश्च यदि संवेद्य

स्याद्युक्ता एते ब्रह्मण्यानदशब्दा । ननु च श्रुतिप्रामाण्यात्सवेद्यानंदस्वरूपमेव ब्रह्म, कि तत्र विचार्यमिति । न । विरुद्धश्रुतिवाक्यदर्शनात् । सत्यं, आनंद-शब्दो ब्रह्मणि श्रूयते । विज्ञानप्रतिषेधश्चैकत्वे । 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन क विजानीयात्' 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' 'प्राज्ञेनात्मना सपरिष्वक्तो न बाह्यं किंचन वेद' इत्यादि । विरुद्धश्रुतिवाक्यदर्शनात्तेन कर्तव्यो विचार । तस्माद्युक्त वेद-वाक्यार्थनिर्णयाय विचारयितुम् । मोक्षवादिविप्रतिपत्तेश्च । साख्या वैशेषि-काश्च मोक्षवादिनो नास्ति मोक्षे सुख सवेद्यमित्येव विप्रतिपन्ना । अन्ये निरतिशय सुखं स्वसंवेद्यमिति ॥

कि तावद्युक्तं? आनंदादिश्रवणात् । 'जक्षत्क्रीडन्रममाण' 'स यदि पितृलोककामो भवति' 'य सर्वज्ञ सर्ववित्' 'सर्वान्कामान्समश्नुते' इत्यादिश्रुति-भ्यो मोक्षे सुखं सवेद्यमिति । नन्वेकत्वे कारकविभागाभावाद्वि-ज्ञानानुपपत्ति । क्रियायाश्चानेककारकसाध्यत्वाद्विज्ञानस्य च क्रियात्वात् । नैष दोष । शब्दप्रामाण्याद्भवेद्विज्ञानमानदविषये । 'विज्ञानमानद' इत्यादानि आनंदस्वरूपस्यासवेद्यत्वेऽनुपपन्नानि वचनानीत्यवोचाम । ननु वचनेनाप्यग्ने शैत्यमुदकस्य चोष्ण्य न क्रियते एव । ज्ञापकत्वाद्वचनानाम् । न च देशान्त-रेऽग्नि शीत इति शक्यते ज्ञापयितुम् । अगम्ये वा देशान्तरे उष्णमुदकमिति । न । प्रत्यगात्मन्यानदविज्ञानदर्शनात् । न 'विज्ञानमानदं' इत्येवमादीना वच-नाना शीतोऽग्निरित्यादिवाक्यवत् प्रत्यक्षादिविरुद्धार्थप्रतिपादकत्वम् । अनूभू-यते त्वविरुद्धार्थता । सुख्यहमिति सुखात्मकमात्मान स्वयमेव वेदयते । तस्मात्सुतरा प्रत्यक्षाऽविरुद्धार्थता । तस्मादानद ब्रह्म विज्ञानात्मक सत्स्वयमेव वेदयते । तथा आनदप्रतिपादिका श्रुतय समजसा स्यु 'जक्षत्क्रीडन्रममाण' इत्येवमाद्या पूर्वोक्ता ॥

न । कार्यकरणाभावेऽनुपपत्तेर्विज्ञानस्य । शरीरवियोगो हि मोक्ष आ-त्यतिक । शरीराभावे च करणानुपपत्ति । आश्रयाभावात् । ततश्च विज्ञाना-नुपपत्ति अकार्यकरणत्वात् । देहाद्यभावे च विज्ञानोत्पत्तौ सर्वेषा कार्यकरणो-पादानानर्थक्यप्रसंग । एकत्वविरोधाच्च । परं चेद्ब्रह्म आनंदात्मकमात्मानं नित्यविज्ञानत्वान्नित्यमेव विजानीयात् । तन्न । संसार्यपि संसारविनिर्मुक्त-

स्वाभाव्यं प्रतिपद्येत । जलाशय इवोदकाजलि क्षिप्तो न पृथक्त्वेन व्यवतिष्ठते आनंदात्मकब्रह्मविज्ञानाय । तदा मुक्त आनदात्मकमात्मान वेदयते इत्येतदनर्थकं वाक्यम् ।

अथ ब्रह्मानदमन्य सन्मुक्तो वेदयते प्रत्यगात्मानं च, अहमस्म्यानंदस्वरूप इति । तदैकत्वविरोध । तथा च सति सर्वश्रुतिविरोध । तृतीया च कल्पना नोपपद्यते । किंचान्यत् । ब्रह्मणश्च निरंतरात्मानंदविज्ञाने विज्ञानाविज्ञानकल्पनानर्थक्यम् । निरंतरं चेदात्मानंदविषयं ब्रह्मणो विज्ञानं, तदेव तस्य स्वभाव इत्यात्मानद विजानातीति कल्पनाऽनुपपन्ना । अतद्विज्ञानप्रसंगे हि कल्पनाया अर्थवत्त्व, यथा आत्मान परं च वेत्तीति । न हीष्वाद्यासक्तमनसो नैरंतर्येणेषुज्ञानाज्ञानकल्पनाया अर्थवत्त्वम् । अथ विच्छिन्नमात्मानंदं विजानाति । विज्ञानस्य आत्मविज्ञानच्छिद्रेऽन्यविषयत्वप्रसग । आत्मनश्च विक्रियावत्वं ततश्चानित्यत्वप्रसग । तस्माद्विज्ञानमानन्दमिति स्वरूपान्वाख्यानपरैव श्रुति नात्मानन्दसवेद्यत्वार्था ।

जक्षत्क्रीडन्नित्यादिश्रुतिविरोधोऽसंवेद्यत्व इति चेन्न । सर्वात्मैकत्वे यथाप्राप्तानुवादित्वात् । मुक्तस्य सर्वात्मभावे सति यत्र क्वचिद्योगिषु देवेषु वा जक्षणादि प्राप्त, तद्यथाप्राप्तमेवानूद्यते, तत्तस्यैव सर्वात्मभावादिति सर्वात्मभावमोक्षस्तुतये । यथाप्राप्तानुवादित्वे दु खित्वमपीति चेत् । योग्यादिषु यथाप्राप्तजक्षणादिवत्स्थावरादिषु यथाप्राप्तदु.खित्वमपीति चेत् । न । नामरूपकृतकार्यकरणोपाधिसपर्कजनितभ्रान्त्याध्यारोपितत्वात् । सुखित्वदु खित्वादिविशेषस्येति परिहृतमेतत्सर्वम् । विरुद्धश्रुतीना च विषयमवोचाम । तस्मात् 'एषोऽस्य परम आनंद ' इतिवत्सर्वाण्यानंदवाक्यानि द्रष्टव्यानि ॥७॥२८॥ इति नवमं ब्राह्मणम् ॥ ३ ९ —

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ बृहदारण्यकोपनिषद्भाष्ये तृतीयोऽध्याय ॥

॥ चतुर्थोऽध्यायः ॥

जनको ह वैदेह आसाञ्चक्रे । अस्य संबंध । शारीराद्यानष्टौ पुरुषान्निरुह्य प्रत्युह्य पुनर्हृदये, दिग्भेदेन च पुन पंचधा व्यूह्य हृदये प्रत्युह्य, हृदयं शरीर च पुनरन्योन्यप्रतिष्ठ प्राणादिपचवृत्त्यात्मके समानाख्ये जगदात्मनि सूत्रे उपसंहृत्य, जगदात्मान शरीरहृदयसूत्रावस्थमतिक्रान्तवान्य औपनिषद पुरुषो नेति नेतीति व्यपदिष्ट, स साक्षाच्चोपादानकारणस्वरूपेण च निर्दिष्टो 'विज्ञानमानद' इति । तस्यैव वागादिदेवताद्वारेण पुनरधिगम कर्तव्य इत्यधिगमनोपायान्तरार्थोऽयमारभो ब्राह्मणद्वयस्य । आख्यायिका तु आचारप्रदर्शनार्था—

ॐ जनको ह वैदेह आसांचक्रेऽथ ह याज्ञवल्क्य आवव्राज । तं होवाच याज्ञवल्क्य किमर्थमचारी पशूनिच्छन्नण्वतानिति । उभयमेव सम्राडिति होवाच ॥१॥

जनको ह वैदेह आसाञ्चक्रे आसन कृतवानास्थायिका दत्तवानित्यर्थ, दर्शनकामेभ्यो राज्ञ । अथ ह तस्मिन्नवसरे याज्ञवल्क्य आवव्राज आगतवानात्मनो योगक्षेमार्थ, राज्ञो वा विविदिषा दृष्ट्वाऽनुग्रहार्थम् । तमागत याज्ञवल्क्य यथावत्पूजा कृत्वोवाच होक्तवाञ्जनको— हे याज्ञवल्क्य किमर्थमचारी आगतोऽसि? किं पशूनिच्छन्पुनरपि, आहोस्विदण्वतान्सूक्ष्मातान्सूक्ष्मवस्तुनिर्णयान्तान्प्रश्नान्मत्त श्रोतुमिच्छन्निति । उभयमेव पशून्प्रश्नाश्च हे सम्राट् । सम्राडिति वाजपेययाजिनो लिगम् । यश्च आज्ञया राज्य प्रशास्ति स सम्राट तस्यामंत्रणं हे सम्राडिति । समस्तस्य वा भारतस्य वर्षस्य राजा ॥

यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छैलिनिरब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतन प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य । वागेवायतनमाकाश प्रतिष्ठा प्रज्ञेत्येनदुपासीत । का प्रज्ञता याज्ञवल्क्य । वागेव सम्राडिति होवाच । वाचा वै सम्राड् बधुः प्रज्ञायत ऋग्वेदो यजुर्वेद. सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषद श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यिष्ट हुतमाशितं पायितमयं च लोक परश्च लोक सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते वाग्वै सम्राट् परमं ब्रह्म नैन वाग्जहाति सर्वाण्येनं

भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एव विद्वानेतदुपास्ते । हस्त्यृषभ सहस्र ददामीति होवाच जनको वैदेह· । स होवाच याज्ञवल्क्य पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥२॥

कि तु यत्ते तुभ्यं कश्चिदब्रवीदाचार्य अनेकाचार्यसेवी हि भवान्, तच्छृणवामेति । इतर आह— अब्रवीदुक्तवान्मे ममाचार्यो, जित्वा नामत शिलिनस्यापत्य शैलिनि । वाग्वै ब्रह्मेति वाग्देवता ब्रह्मेति । आहेतरो—यथा मातृमान्माता यस्य विद्यते पुत्रस्य सम्यगनुशास्त्री अनुशासनकर्त्री स मातृमान । अत ऊर्ध्व पिता यस्यानुशास्ता स पितृमान । उपनयनादूर्ध्वमा समावर्तनादाचार्यो यस्यानुशास्ता स आचार्यवान् । एव शुद्धित्रयहेतुसयुक्त स साक्षादाचार्य स्वय न कदाचिदपि प्रामाण्याद्व्यभिचरति । स यथा ब्रूयाच्छिष्याय तथासौ जित्वा शैलिनिरुक्तवान्वाग्वै ब्रह्मेति । अवदतो हि कि स्यादिति । न हि मूकस्येहार्थममुत्रार्थ वा किचन स्यात् ।

किंतु अब्रवीदुक्तवास्ते तुभ्य तस्य ब्रह्मण आयतन प्रतिष्ठा च । आयतन नाम शरीरम् । प्रतिष्ठा त्रिष्वपि कालेषु य आश्रय । आहेतरो न मेऽब्रवीदिति । इतर आह— यद्येवमेकपाद्वै एतत् । एक पादो यस्य ब्रह्मणस्तदिदं एकपाद्ब्रह्म त्रिभि पादै शून्यमुपास्यमानमपि न फलाय भवतीत्यर्थ । यद्येवं, स त्वं विद्वान्सन्नोऽस्मभ्यं ब्रूहि हे याज्ञवल्क्येति । स चाह— वागेवाऽऽयतन वाग्देवस्य ब्रह्मणो वागेव करणमायतन शरीरं, आकाशोऽव्याकृताख्य प्रतिष्ठोत्पत्तिस्थितिलयकालेषु । प्रज्ञेत्येनदुपासीत । प्रज्ञेतीयमुपनिषद्ब्रह्मणश्चतुर्थ पाद । प्रज्ञेति कृत्वैनद्ब्रह्मोपासीत ।

का प्रज्ञता याज्ञवल्क्य ? कि स्वयमेव प्रज्ञा उत प्रज्ञानिमित्तम् । यथा आयतनप्रतिष्ठे ब्रह्मणो व्यतिरिक्ते तद्वत्किम् ? न । कथं तर्हि ? वागेव सम्राडिति होवाच । वागेव प्रज्ञेति होवाचोक्तवान्न व्यतिरिक्ता प्रज्ञेति । कथं पुनर्वागेव प्रज्ञेति, उच्यते— वाचा वै सम्राड् बंधु प्रज्ञायतेऽस्माकं बंधुरित्युक्ते प्रज्ञायते बधु । तथर्ग्वेदादि । इष्ट यागनिमित्त धर्मजातं हुतं होमनिमित्त च । आशितमन्नदाननिमित्त, पायित पानदाननिमित्तं, अय च लोक, इद च जन्म, परश्च लोक, प्रतिपत्तव्य च जन्म, सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते । अतो वाग्वै सम्राट् परमं ब्रह्म । नैनं यथोक्तब्रह्मविदं वाग्जहाति । सर्वाण्येन

भूतान्यभिक्षरन्ति बलिदानादिभि. । इह देवो भूत्वा पुन शरीरपातोत्तरकाल देवानप्येत्यपिगच्छति, य एवं विद्वानेतदुपास्ते । विद्यानिष्क्रयार्थं हस्तितुल्य ऋषभो हस्त्यृषभो यस्मिन्गोसहस्रे तद्धस्त्यृषभं सहस्र ददामीति होवाच जनको वैदेह । स होवाच याज्ञवल्क्य — अननुशिष्य शिष्य कृतार्थमकृत्वा शिष्याद्धनं न हरेतेति मे मम पिताऽमन्यत । ममाप्ययमेवाभिप्राय ॥२॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदक· शौल्बायन प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि कि स्यादित्यब्रवीत्तु ते तस्यायतन प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवायतनमाकाश प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट् कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र वधाशक भवति या दिशमेति प्राणस्यैव सम्राट् कामाय प्राणो वै सम्राट् परम ब्रह्म नैन प्राणो जहाति सर्वाण्येन भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एव विद्वानेतदुपास्ते हस्त्यृषभ सहस्र ददामीति होवाच जनको वैदेह स होवाच याज्ञवल्क्य पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥३॥

यदेव ते कश्चिदब्रवीदुदको नामत शुल्वस्यापत्य शौल्बायनोऽब्रवीत् । प्राणो वै ब्रह्मेति प्राणो वायुर्देवता पूर्ववत् । प्राण एव आयतनमाकाश प्रतिष्ठा । उपनिषत्— प्रियमित्येनदुपासीत । कथ पुन प्रियत्व ? प्राणस्य वै हे सम्राट् कामाय प्राणस्यार्थायायाज्यं याजयति पतितादिकमपि अप्रतिगृह्यस्याप्युग्रादे प्रतिगृह्णात्यपि । तत्र तस्या दिशि वधनिमित्तमाशक, वधाशका इत्यर्थो, या दिशमेति तस्कराद्याकीर्णा च तस्या दिशि वधाशका । तच्चैतत्सर्व प्राणस्य प्रियत्वे भवति, प्राणस्यैव सम्राट् कामाय । तस्मात्प्राणो वै सम्राट् परम ब्रह्म । नैनं प्राणो जहाति । समानमन्यत् ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे बर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतन प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य चक्षुरेवायतनमाकाश. प्रतिष्ठा

सत्यमित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट् पश्यन्तमाहुरद्राक्षीरिति स आहाद्राक्षमिति तत्सत्य भवति चक्षुर्वै सम्राट् परम ब्रह्म नैन चक्षुर्जहाति सर्वाण्येन भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एव विद्वानेतदुपास्ते हस्त्यृषभ सहस्र ददामीति होवाच जनको वैदेह स होवाच याज्ञवल्क्य पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥४॥

यदेव ते कश्चिद्वर्कुरिति नामतो वृष्णस्यापत्य वार्ष्ण । चक्षुर्वै ब्रह्मेति । आदित्यो देवता चक्षुषि । उपनिषत्—सत्यम् । यस्माच्छ्रोत्रेण श्रुतमनृतमपि स्यान्न तु चक्षुषा दृष्टम् । तस्माद्वै सम्राट् पश्यन्तमाहु —अद्राक्षीस्त्व हस्तिनमिति । स चेदद्राक्षमित्याह तत्सत्यमेव भवति । यस्त्वन्यो ब्रूयादहमश्रौषमिति । तद्व्यभिचरति । यत्तु चक्षुषा दृष्ट तदव्यभिचारित्वात्सत्यमेव भवति ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाज श्रोत्र वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवन्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्र वै ब्रह्मेत्यशृण्वतो हि कि स्यादित्यब्रवीत्तु ते तस्यायतन प्रतिष्ठा न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य श्रोत्रमेवाऽऽयतनमाकाश प्रतिष्ठाऽनत इत्येनदुपासीत काऽनतता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राडपि या का च दिश गच्छति नैवास्या अतं गच्छत्यनता हि दिशो दिशो वै सम्राट् श्रोत्र श्रोत्रं वै सम्राट् परम ब्रह्म नैन श्रोत्र जहाति सर्वाण्येन भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एव विद्वानेतदुपास्ते हस्त्यृषभ सहस्र ददामीति होवाच जनको वैदेह स होवाच याज्ञवल्क्य. पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥५॥

यदेव ते गर्दभीविपीत इति नामतो भारद्वाजो गोत्रत । श्रोत्र वै ब्रह्मेति । श्रोत्रे दिग्देवताऽनंत इत्येनदुपासीत । काऽनंतता श्रोत्रस्य ? दिश एव श्रोत्रस्यानत्यं यस्मात्तस्माद्वै सम्राट् प्राचीमुदीचीं वा या काचिदपि दिश गच्छति, नैवास्या अत गच्छति कश्चिदपि । अतोऽनंता हि दिश । दिशो वै सम्राट श्रोत्रम् । तस्माद्दिगानंत्यमेव श्रोत्रस्यानत्यम् ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे सत्यकामो जाबालो मनो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो

वै ब्रह्मेत्यमनसो हि किं स्यादित्यब्रवीत्तु ते तस्याऽऽयतन प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवाऽऽयतनमाकाश प्रतिष्ठाऽऽनद इत्येनदुपासीत कानंदता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट् स्त्रियमभिहार्यते तस्यां प्रतिरूप. पुत्रो जायते स आनदो मनो वै सम्राट् परम ब्रह्म नैन मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एव विद्वानतदुपास्ते हस्त्यृषभ सहस्र ददामीति होवाच जनको वैदेह स होवाच याज्ञवल्क्य पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥६॥

सत्यकाम इति नामतो जबालाया अपत्य जाबाल । चद्रमा मनसि देवता । आनंद इत्युपनिषत् । यस्मान्मन एवाऽऽनद , तस्मान्मनसा वै सम्राट् स्त्रियमभिकामयमानोऽभिहार्यते प्रार्थयत इत्यर्थ । तस्माद्या स्त्रियमभिकामयमानोऽभिहार्यते तस्या प्रतिरूपोऽनुरूप पुत्रो जायते । स आनदहेतु पुत्र । स येन मनसा निर्वर्त्यते तन्मन आनद ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्ध. शाकल्यो हृदय वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किं स्यादित्यब्रवीत्तु ते तस्याऽऽयतन प्रतिष्ठा न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवायतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदय वै सम्राट् सर्वेषा भूतानामायतन हृदय वै सम्राट् सर्वेषा भूतानां प्रतिष्ठा हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति हृदयं वै सम्राट् परमं ब्रह्म नैनं हृदयं जहाति सर्वाण्येन भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एव विद्वानेतदुपास्ते हस्त्यृषभ सहस्र ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥७॥ इति प्रथम ब्राह्मणम् ॥

विदग्ध शाकल्यो हृदय वै ब्रह्मेति । हृदयं वै सम्राट् सर्वेषा भूताना आयतनम् । नामरूपकर्मात्मकानि हि भूतानि हृदयाश्रयाणीत्यवोचाम शाकल्यब्राह्मणे हृदयप्रतिष्ठानि चेति । तस्मात् हृदये ह्येव सम्राट् सर्वाणि भूतानि

प्रतिष्ठितानि भवन्ति । तस्मात् हृदय स्थितिरित्युपासीत । हृदये च प्रजापतिः देवता ॥ इति प्रथमं ब्राह्मणम् ॥ ४ १ —

जनको ह वैदेह· कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन्रथ वा नाव वा समाददीतैवमेवैताभिरुपनिषद्भि समाहितात्माऽस्येव बृदारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमान· क्व गमिष्यसीति नाह तद्भगवन्वेद यत्र गमिष्यामीत्यथ वै तेऽह तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥१॥

जनको ह वैदेह । यस्मात्सविशेषणानि सर्वाणि ब्रह्माणि जानाति याज्ञवल्क्य, तस्मादाचार्यकत्व हित्वा जनक कूर्चादासनविशेषादुत्थाय उप समीपमवसर्पन् पादयोर्निपतन्नित्यर्थ । उवाचोक्तवान्-- नमस्ते तुभ्यमस्तु हे याज्ञवल्क्य । अनु मा शाधि अनुशाधि मामित्यर्थ । इतिशब्दो वाक्यपरिसमाप्त्यर्थ । स होवाच याज्ञवल्क्यो—यथा वै लोके हे सम्राट् महान्त दीर्घमध्वानमेष्यन्गमिष्यन् रथ वा स्थलेन गमिष्यन्नाव वा जलेन गमिष्यन्समाददीत । एवमेवैतानि ब्रह्माण्येताभिरुपनिषद्भिर्युक्तानि उपासीन समाहितात्माऽसि, अत्यंतमेताभिरुपनिषद्भि सयुक्तात्माऽसि । न केवलमुपनिषत्समाहित । एवं बृदारक पूज्यश्चाढ्यश्चेश्वरो न दरिद्र इत्यर्थ । अधीतवेदोऽधीतो वेदो येन स त्वमधीतवेद । उक्ताश्चोपनिषद आचार्यैस्तुभ्य स त्वमुक्तोपनिषत्कः । एवं सर्वविभूतिसंपन्नोऽपि सन्भयमभ्यस्थ एव परमात्मज्ञानेन विनाऽकृतार्थ एव तावदित्यर्थ । यावत्परं ब्रह्म न वेत्सि । इतोऽस्माद्देहाद्विमुच्यमान एताभिर्नौरथस्थानीयाभि समाहित क्व कस्मिन्गमिष्यसि, कि वस्तु प्राप्स्यसीति । नाहं तद्वस्तु भगवन्पूजावन्वेद जाने यत्र गमिष्यामीति । अथ यद्येव न जानीषे यत्र गत कृतार्थ स्या, अह वै ते तुभ्यं तद्वक्ष्यामि यत्र गमिष्यसीति । ब्रवीतु भगवानिति, यदि प्रसन्नो मा प्रति । शृणु ॥

इधो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्त वा एतमिंध सन्तमिद्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवा. प्रत्यक्षद्विष ॥२॥

इंधो ह वै नाम । इध इत्येवनामा । यश्चक्षुर्व ब्रह्मेति पुरोक्त आदित्यान्तर्गत पुरुष स एष योऽयं दक्षिणेऽक्षन्नक्षणि विशेषेण व्यवस्थित । स च

सत्यनामा। त वै एतं पुरुष दीप्तिगुणत्वात्प्रत्यक्ष नाम अस्येव इति। तामिधं सन्तमिद्र इत्याचक्षते परोक्षेण। यस्मात्परोक्षप्रिया इव हि देवा प्रत्यक्षद्विष प्रत्यक्षनामग्रहणं द्विषन्ति। एष त्व वैश्वानरमात्मानं संपन्नोऽसि॥

अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी विराट् तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेतदन्न य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरण यदेतदन्तर्हृदये जालकमिवाथैनयोरेषा सृति संचरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति यया केश. सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्येताभिर्वा एतदास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मन. ॥३॥

अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी य त्व वैश्वानरमात्मान सपन्नोऽसि तस्यास्येद्रस्य भोक्तुर्भोग्येषा पत्नी विराडन्न भोग्यत्वादेव। तदेतदन्न चात्ता चैक मिथुन स्वप्न। कथम्? तयोरेष इद्राण्या इद्रस्य चैष सस्ताव, संभूय यत्र सस्तव कुर्वाते अन्योन्य स एष सस्ताव। कोऽसौ? य एषोऽन्तर्हृदय आकाशोऽन्तर्हृदये हृदयस्य मासपिडस्य मध्ये। अथैनयोरेतद्वक्ष्यमाणमन्न भोज्यं स्थितिहेतु। कि तत्? य एषोऽन्तर्हृदये लोहितपिंडो लोहित एव पिडाकारापन्नो लोहितपिड। अन्न जग्ध द्वेधा परिणमते। यत्स्थूल तदधो गच्छति। यदन्यत्तत्पुनरग्निना पच्यमानं द्वेधा परिणमते। यो मध्यमो रस स लोहितादिक्रमेण पाचभौतिकं पिड शरीरमुपचिनोति। योऽणिष्ठो रस स एष लोहितपिड इद्रस्य लिगात्मनो हृदये मिथुनीभूतस्य। यं तैजसमाचक्षते। स तयोरिंद्रेद्राण्योर्हृदये मिथुनीभूतयो सूक्ष्मासु नाडीष्वनुप्रविष्ट स्थितिहेतुर्भवति। तदेतदुच्यते--अथैनयोरेतदन्नमित्यादि। किचान्यत्। अथैनयोरेतत्प्रावरणम्। भुक्तवतो स्वपतोश्च प्रावरण भवति लोके तत्सामान्यं हि कल्पयति श्रुति। किं तदिह प्रावरणम्? यदेतदतर्हृदये जालकामव अनेकनाडीछिद्रबहुलत्वाज्जालकमिव। अथैनयोरेषा सृतिर्मार्ग संचरतोऽनयेति सचरणी स्वप्नाज्जागरितदेशागमनमार्ग। का सा सृति? यैषा हृदयात् हृदयदेशादूर्ध्वाभिमुखी सती उच्चरति नाडी। तस्या परिमाणमिदमुच्यते—यथा लोके केशः सहस्रधा भिन्नोऽत्यतसूक्ष्मो भवत्येव सूक्ष्मा अस्य देहस्य सबंधिन्यो हिता नाम हिता इत्येव ख्याताः नाड्य। ताश्चान्तर्हृदये मास-

पिंडे प्रतिष्ठिता भवन्ति। हृदयाद्विप्ररूढास्ता सर्वत्र कदबकेसरवत्। एताभिः नाडीभिरत्यन्तसूक्ष्माभि एतदन्नमास्रवद्रच्छदास्रवति गच्छति। तदेतद्देवताशरीरमनेनान्नेन दामभूतेनोपचीयमान तिष्ठति। तस्माद्यस्मात्स्थूलेनान्नेनोपचित पिंड, इद तु देवताशरीरं लिग सूक्ष्मेणान्नेनोपचितं तिष्ठति। पिंडोपचयकरमप्यन्न प्रविविक्तमेव मूत्रपुरीषादिस्थूलमपेक्ष्य लिंगस्थितिकरं त्वन्न ततोऽपि सूक्ष्मतरम्। अत प्रविविक्ताहार पिंड। तस्मात्प्रविविक्ताहारादपि प्रविविक्ताहारतर एष लिगात्मा इवैव भवत्यस्माच्छरीराच्छरीरमेव शारीर तस्माच्छारीरात्। आत्मनो वैश्वानरात्तैजस सूक्ष्मान्नोपचितो भवति॥

तस्य प्राची दिक्प्राच· प्राणा दक्षिणा दिग्दक्षिणे प्राणा प्रतीची दिक्प्रत्यंचः प्राणा उदीची दिगुदंच प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवांच प्राणा सर्वा दिश· सर्वे प्राणा स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसगो नहि सज्यतेऽसितो न व्यथते न रिष्यत्यभय वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्य·। स होवाच जनको वैदेहोऽभय त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभय वेदयसे नमस्तेऽस्त्विमे विदेहा अयमहमास्मि॥४॥ इति द्वितीय ब्राह्मणम्॥

स एष हृदयभूतस्तैजस· सूक्ष्मभूतेन प्राणेन विधियमाण प्राण एव भवति। तस्याम्य विदुष क्रमेण वैश्वानरात्तैजस प्राप्तस्य हृदयात्मानमापन्नस्य हृदयात्मनश्च प्राणात्मानमापन्नस्य प्राची दिक्प्राच प्राग्गता प्राणा। तथा दक्षिणा दिग्दक्षिणे प्राणा। तथा प्रतीची दिक्प्रत्यंच प्राणाः। उदीची दिगुदच प्राणा। ऊर्ध्वा दिगूर्ध्वा प्राणा। अवाची दिगवाच प्राणा। सर्वा दिश सर्वे प्राणा। एवं विद्वान्क्रमेण सर्वात्मक प्राणमात्मत्वेनोपगतो भवति। त सर्वात्मान प्रत्यगात्मन्युपसहृत्य द्रष्टृर्हि द्रष्टृभावं नेति नेत्यात्मान तुरीयं प्रतिपद्यते। यमेष विद्वाननेन क्रमेण प्रतिपद्यते, स एष नेति नेत्यात्मेत्यादि न रिष्यतीत्यंतं व्याख्यातमेतत्। अभयं वै जन्ममरणादिनिमित्तभयशून्य हे जनक प्राप्तोऽसि, इति हैव किलोवाचोक्तवान्याज्ञवल्क्य। तदेतदुक्तं अथ वै तेऽह तद्वक्ष्यामि यत्र गमिष्यसीति। स होवाच जनको वैदेहोऽभयमेव त्वा त्वामपि गच्छताद्रच्छतु यस्त्व नोऽस्मान्हे याज्ञवल्क्य भगवन्पूजावन्नभयं ब्रह्म वेदयसे ज्ञापयसि प्रापितवानुपाधिकृताज्ञानव्यवधानापनयनेन इत्यर्थः।

किमन्यदह विद्यानिष्क्रयार्थ प्रयच्छामि, साक्षादात्मानमेव दत्तवते[1] अतो नमस्तेऽस्त्विमे विदेहास्तव यथेष्ट भुज्यन्तामयं चाहमस्मि दासभावे स्थित । यथेष्ट मा राज्य च प्रतिपद्यस्वेत्यर्थ ॥ इति द्वितीयं ब्राह्मणम् ॥ ४ २ —

जनकं ह वैदेहं याज्ञवल्क्यो जगामेत्यस्याभिसबन्ध । विज्ञानमय आत्मा साक्षादपरोक्षाद्ब्रह्म सर्वान्तर पर एव । 'नान्योऽतोऽस्ति द्रष्टा नान्यदतोऽस्ति द्रष्टृ' इत्यादिश्रुतिभ्य । स एष इह प्रविष्टो वदनादिलिग अस्ति व्यतिरिक्त इति मधुकाडेऽजातशत्रुसवादे प्राणादिकर्तृत्वभोक्तृत्वप्रत्याख्यानेनाधिगतोऽपि सन्पुन प्राणनादिलिगमुपन्यस्य औषस्तप्रश्ने प्राणनादिलिग य सामान्येनाधिगतः 'प्राणेन प्राणिति' इत्यादिना, 'दृष्टेर्द्रष्टा' इत्यादिना अलुप्तशक्तिस्वभावोऽधिगत । तस्य च परोपाधिनिमित्त ससारो यथा रज्जूषरशुक्तिकागगनादिषु सर्पोदकरजतमलिनत्वादि पराध्यारोपणनिमित्तमेव, न स्वत', तथा । निरुपाधिको निरुपाख्यो नेति नेतीति व्यपदेश्य साक्षादपरोक्षात्सर्वान्तर आत्मा ब्रह्माक्षरमतर्यामी प्रशास्ता औपनिषद पुरुषो विज्ञानमानन्द ब्रह्मेत्यधिगतम् । तदेव पुनरिवसज्ञ प्रविविक्ताहार , ततोऽन्तर्हृदये लिंगात्मा प्रविविक्ताहारतर । तत परेण जगदात्मा प्राणोपाधि । ततोऽपि प्रविलाप्य जगदात्मानमुपाधिभूत रज्ज्वादाविव सर्पादिक विद्यया, 'स एष नेति नेति' इति साक्षात्सर्वान्तर ब्रह्माधिगतम् । एवमभयं परिप्रापितो जनको याज्ञवल्क्येन आगमत सक्षेपत । अत्र च जाग्रत्स्वप्नसुषुप्तुरीयाण्युपन्यस्तानि अन्यप्रसगेन इध , प्रविविक्ताहारतर , सर्वे प्राणा', स एष नेति नेतीति । इदानी जाग्रत्स्वप्नादिद्वारेणैव महता तर्केण विस्तरतोऽधिगम कर्तव्य । अभयं प्रापयितव्यम् । सद्भावश्चात्मनो विप्रतिपत्त्याशंकानिराकरणद्वारेण । व्यतिरिक्तत्व शुद्धत्वं स्वयज्योतिष्ट्वं लुप्तशक्तिस्वरूपत्व निरतिशयानन्दस्वाभाव्यं अद्वैतत्वं चाधिगतव्यमितीदमारभ्यते । आख्यायिका तु विद्यासंप्रदानग्रहणविधिप्रकाशनार्था । विद्यास्तुतये च विशेषत । वरदानादिसूचनात् ॥

जनकं ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्थ ह यज्ञनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वर ददौ स ह कामप्रश्नमेव वव्रे त हास्मै ददौ त ह सम्राडेव पूर्वं पप्रच्छ ॥१॥

जनक ह वैदेह याज्ञवल्क्यो जगाम । स च गच्छन्नेवं मेने चिकितवान्न वदिष्ये किंचिदपि राज्ञे । गमनप्रयोजनं तु योगक्षेमार्थम् । न वदिष्य इत्येवं-संकल्पोऽपि याज्ञवल्क्यो यद्यज्जनक पृष्टवास्तत्तत्प्रतिपेदे । तत्र को हेतु संकल्पितस्यान्यथाकरणे इत्यत्राख्यायिकामाचष्टे । पूर्वत्र किल जनकयाज्ञवल्क्ययो संवाद आसीदग्निहोत्रे निमित्ते । तत्र जनकस्याग्निहोत्रविषय विज्ञानमुपलभ्य परितुष्टो याज्ञवल्क्यस्तस्मै जनकाय ह किल वर ददौ । स च जनको ह काम-प्रश्नमेव वर वव्रे वृतवान् त च वर हास्मै ददौ याज्ञवल्क्य । तेन वरप्रदान-सामर्थ्येन अव्याचिख्यासुमपि याज्ञवल्क्य तूष्णीं स्थितमपि सम्राडेव जनक पूर्व पप्रच्छ । तत्रैवानुक्तिर्ब्रह्मविद्याया कर्मणा विरुद्धत्वात् । विद्यायाश्च स्वातन्त्र्यात् । स्वतंत्रा हि ब्रह्मविद्या सहकारिसाधनातरनिरपेक्षा पुरुषार्थसाधनेति च ॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इति । आदित्यज्योति सम्राडिति होवाचादित्येनैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥२॥

हे याज्ञवल्क्येत्येव सबोध्याभिमुखीकरणाय, किंज्योतिरयं पुरुष इति, किमस्य पुरुषस्य ज्योतिर्येन ज्योतिषा व्यवहरति सोऽय किंज्योति ? अय प्राकृत कार्यकरणसघातरूप शिर पाण्यादिमान्पुरुष पृच्छ्यते । किमय स्वावयवसघातबाह्येन ज्योतिरतरेण व्यवहरति, आहोस्वित्स्वावयवसघातमध्यपातिना ज्योतिषा ज्योतिष्कार्यमयं पुरुषो निर्वर्तयति, इत्येतदभिप्रेत्य पृच्छति । किंचातो, यदि व्यतिरिक्तेन यदि वाऽव्यतिरिक्तेन ज्योतिषा ज्योतिष्कार्य निर्वर्तयति ? शृणु तत्र कारणम् । यदि व्यतिरिक्तेनैव ज्योतिषा ज्योतिष्कार्यनिर्वर्तकत्व अस्य स्वभावो निर्धारितो भवति, ततोऽदृष्टज्योति कार्यविषयेऽप्यनुमास्यामहे व्यतिरिक्तज्योतिर्निमित्तमेवेद कार्यमिति । अथाव्यतिरिक्तेनैव स्वात्मना ज्योतिषा व्यवहरति, ततोऽप्रत्यक्षेऽपि ज्योतिषि ज्योतिष्कार्यदर्शनेऽव्यतिरिक्तमेव ज्योतिरनुमेयम् । अथानियम एव, व्यतिरिक्तमव्यतिरिक्तं वा ज्योति पुरुषस्य व्यवहारहेतु , ततोऽनध्यवसाय एव ज्योतिर्विषये, इत्येव मन्वान पृच्छति जनको याज्ञवल्क्य— किंज्योतिरय पुरुष इति ॥

ननु एवमनुमानकौशले जनकस्य किं प्रश्नेन, स्वयमेव कस्मान्न प्रतिपद्यत इति । सत्यमेतत् । तथापि लिंगलिंगिसंबधविशेषाणा अत्यंतसौक्ष्म्यात् दुरवबो-

ध्यता मन्यते बहूनामपि पडिताना, किमुतैकस्य । अत एव हि धर्मसूक्ष्मनिर्णये परिषद्व्यापार इष्यते । पुरुषविशेषश्चापेक्ष्यते । दशावरा परिषत् त्रयो वैको वेति । तस्माद्यद्यप्यनुमानकौशलं राज्ञस्तथापि तु युक्तो याज्ञवल्क्य प्रष्टुम् । विज्ञानकौशलतारतम्योपपत्ते पुरुषाणाम् । अथवा श्रुति स्वयमेव आख्यायिकाव्याजेन अनुमानमार्गमुपन्यस्य अस्मान्बोधयति पुरुषमतिमनुसरन्ती ।

याज्ञवल्क्योऽपि जनकाभिप्रायाभिज्ञतया व्यतिरिक्तमात्मज्योतिर्बोधयिष्यञ्जनक व्यतिरिक्तप्रतिपादकमेव लिग प्रतिपेदे, यथा प्रसिद्धमादित्यज्योति सम्राडिति होवाच । कथम् ? आदित्येनैव स्वावयवसघातव्यतिरिक्तेन चक्षुषोऽनुग्राहकेण ज्योतिषाऽय प्राकृत पुरुष आस्ते उपविशति, पल्ययते पर्येति क्षेत्रमरण्य वा, तत्र गत्वा कर्म कुरुते, विपल्येति विपर्येति च यथागतम् । अत्यंतव्यतिरिक्तज्योतिष्ट्वप्रसिद्धताप्रदर्शनार्थं अनेकविशेषणम् । बाह्यानेकज्योति - प्रदर्शन च लिगस्याव्यभिचारित्वप्रदर्शनार्थम् । एवमेवैतद्याज्ञवल्क्य ॥२॥

अस्तमित आदित्ये याज्ञवल्क्य किज्योतिरेवाय पुरुष इति चद्रमा एवास्य ज्योतिर्भवतीति चद्रमसैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥३॥

तथाऽस्तमिते आदित्ये याज्ञवल्क्य किज्योतिरेवाय पुरुष इति । चद्रमा एवास्य ज्योति ॥

अस्तमित आदित्ये याज्ञवल्क्य चद्रमस्यस्तमिते किज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥४॥

अस्तमिते आदित्ये चंद्रमस्यस्तमितेऽग्निर्ज्योति. ॥

अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते शान्तेऽग्नौ किज्योतिरेवाय पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्व. पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥५॥

शान्तेऽग्नौ वाग्ज्योति. । वागिति शब्द परिगृह्यते । शब्देन विषयेण श्रोत्रमिंद्रियं दीप्यते । श्रोत्रेंद्रिये संप्रदीप्ते मनसि विवेक उपजायते । तेन मनसा बाह्या चेष्टा प्रतिपद्यते । "मनसा ह्येव पश्यति मनसा शृणोति" इति

ब्राह्मणम्। कथ पुनर्वाग्ज्योतिरिति, वाचो ज्योतिष्ट्वमप्रसिद्धमित्यत आह— तस्माद्वै सम्राडयस्माद्वाचा ज्योतिषाऽनुगृहीतोऽय पुरुषो व्यवहरति, तस्मात्प्रसिद्धमेतद्वाचो ज्योतिष्ट्वम्। कथं? अपि यत्र यस्मिन्काले प्रावृषि प्रायेण मेघाधकारे सर्वज्योति प्रत्यस्तमये स्वोऽपि पाणिर्हस्तो न विस्पष्टं निर्ज्ञायते, अथ तस्मिन्काले सर्वचेष्टानिरोधे प्राप्ते बाह्यज्योतिषोऽभावाद्यत्र वागुच्चरति, श्वा वा भषति गर्दभो वा रौति, उपैव तत्र न्येति। तेन शब्देन ज्योतिषा श्रोत्रमनसोर्नैरतर्य भवति। तेन ज्योतिष्कार्यत्वं वाक्प्रतिपद्यते। तेन वाचा ज्योतिषोपन्येत्येव उपगच्छत्येव तत्र सनिहितो भवतीत्यर्थ। तत्र च कर्म कुरुते विपल्येति। तत्र वाग्ज्योतिषो ग्रहण गंधादीनामुपलक्षणार्थम्। गवादिभिरपि हि घ्राणादिष्वनुगृहातेषु प्रवृत्तिनिवृत्त्यादयो भवन्ति। तेन तैरप्यनुग्रहो भवति कार्यकरणसंघातस्य। एवमेवैतद्याज्ञवल्क्य॥

अस्तमित आदित्ये याज्ञवल्क्य चद्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किज्योतिरेवाय पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति॥६॥

शान्ताया पुनर्वाचि गवादिष्वपि च शान्तेषु बाह्येष्वनुग्राहकेषु, सर्वप्रवृत्तिनिरोध प्राप्तोऽस्य पुरुषस्य। एतदुक्त भवति— जाग्रद्विषये बहिर्मुखानि करणानि चक्षुरादीन्यादित्यादिज्योतिर्भिरनुगृह्यमाणानि यदा, तदा स्फुटतरसव्यवहारोऽस्य पुरुषस्य भवतीति। एव तावज्जागरिते स्वावयवसंघातव्यतिरिक्तेनैव ज्योतिषा ज्योतिष्कार्यसिद्धिरस्य पुरुषस्य दृष्टा। तस्मात्ते वय मन्यामहे सर्वबाह्यज्योति प्रत्यस्तमयेऽपि स्वप्नसुषुप्तकाले जागरिते च तादृगवस्थाया स्वावयवसंघातव्यतिरिक्तेनैव ज्योतिषा ज्योतिष्कार्यसिद्धिरस्येति। दृश्यते च स्वप्ने ज्योतिष्कार्यसिद्धि बंधुसंगमनवियोगदर्शन देशान्तरगमनादि च। सषुप्ताच्चोत्थान सुखमहमस्वाप्स न किंचिदवेदिषमिति। तस्मादस्ति व्यतिरिक्तं किमपि ज्योति। किं पुनस्तच्छान्तायां वाचि ज्योतिर्भवतीति उच्यते— आत्मैवास्य ज्योतिर्भवतीति। आत्मेति कार्यकरणस्वावयवसंघातव्यतिरिक्तं कार्यकरणावभासक आदित्यादिबाह्यज्योतिर्वत्स्वयमन्येनानवभास्यमानमभिधीयते ज्योति। अत स्थं च तत्पारिशेष्यात्। कार्यकरणव्यतिरिक्तं तदिति तावत्सिद्धम्। यच्च कार्यकरणव्यतिरिक्तं कार्यकरणसंघातानुग्राहकं

च ज्योतिस्तद्वाह्यैश्चक्षुरादिकरणैरुपलभ्यमानं दृष्टम् । न तु तथा तच्चक्षुरादिभिरुपलभ्यते आदित्यादिज्योति षूपरतेषु । कार्यं तु ज्योतिषो दृश्यते यस्मात्तस्मादात्मनैवाय ज्योतिषा आस्ते पल्ययते कर्म कुरुते विपल्येतीति । तस्मान्नूनमत स्थ ज्योतिरित्यवगम्यते । किंच आदित्यादिज्योतिर्विलक्षण तदभौतिक च । स एव हेतुर्यच्चक्षुराद्यग्राह्यत्वं आदित्यादिवत् ॥

न, समानजातीयेनैवोपकारदर्शनात् । यदादित्यादिविलक्षण ज्योतिरान्तर सिद्धमिति, एतदसत् । कस्मात् ? उपक्रियमाणसमानजातीयेनैव आदित्यादिज्योतिषा कार्यकरणसघातस्य भौतिकस्य भौतिकेनैवोपकार क्रियमाणो दृश्यते । यथादृष्ट चेदमनुमेयम् । यदि नाम कार्यकरणादर्थान्तर तदुपकारकमादित्यादिवज्ज्योति, तथापि कार्यकरणसघातसमानजातायमेवानुमेयं, कार्यकरणसघातोपकारकत्वादादित्यादिज्योतिर्वत् । यत्पुनरत स्थत्वादप्रत्यक्षत्वाच्च वैलक्षण्यमुच्यते तच्चक्षुरादिज्योतिर्भिरनैकान्तिकम् । यतोऽप्रत्यक्षाण्यत स्थानि च चक्षुरादिज्योतींषि भौतिकान्येव । तस्मात्तव मनोरथमात्र, विलक्षणमात्मज्योतिः सिद्धमिति ।

कार्यकरणसघातभावभावित्वाच्च सघातधर्मत्वमनुमीयते ज्योतिष । सामान्यतो दृष्टस्य चानुमानस्य व्यभिचारित्वादप्रामाण्यम् । सामान्यतो दृष्टबलेन हि भवानादित्यादिवद्व्यतिरिक्त ज्योति साधयति कार्यकरणेभ्य । न च प्रत्यक्षमनुमानेन बाधितु शक्यते । अयमेव तु कार्यकरणसघात प्रत्यक्षं पश्यति शृणोति मनुते विजानाति च । यदि नाम ज्योतिरंतरमस्योपकारकं स्यादादित्यादिवत्, न तत् आत्मा स्याज्ज्योतिरंतरमादित्यादिवदेव । य एव तु प्रत्यक्षं दर्शनादिक्रिया करोति स एवात्मा स्यात्कार्यकरणसघातो, नान्य । प्रत्यक्षविरोधेऽनुमानस्याप्रामाण्यात् ॥

ननु अयमेव चेद्दर्शनादिक्रियाकर्ता आत्मा सघात, कथमविकलस्यैवास्य दर्शनादिक्रियाकर्तृत्वं कदाचिद्भवति कदाचिन्नेति । नैष दोष । दृष्टत्वात् । न हि दृष्टेऽनुपपन्न नाम । न हि खद्योते प्रकाशाप्रकाशकत्वेन दृश्यमाने कारणान्तरमनुमेयम् । अनुमेयत्वे च केनचित्सामान्यात्सर्व सर्वत्रानुमेयं स्यात् । तच्चानिष्टम् । न च पदार्थस्वभावो नास्ति । न ह्यग्नेरुष्णस्वाभाव्यं अन्यनिमित्तं, उदकस्य वा शैत्यम् । प्राणिधर्माधर्माद्यपेक्षमिति चेत् । धर्मा-

धर्मादेर्निमित्तान्तरापेक्षस्वभावप्रसग । अस्त्विति चेन्न । तदनवस्थाप्रसग । स चानिष्ट ॥

न । स्वप्नस्मृत्योर्दृष्टस्यैव दर्शनात् । यदुक्त स्वभाववादिना देहस्यैव दर्शनादिक्रिया न व्यतिरिक्तस्येति । तन्न । यदि हि देहस्यैव दर्शनादिक्रिया स्वप्ने दृष्टस्येव दर्शन न स्यात् । अथ स्वप्न पश्यन्दृष्टपूर्वमेव पश्यति न शाकद्वीपादिगतमदृष्टरूपम् । ततश्चैतन्मिद्ध भवति— य स्वप्ने पश्यति दृष्टपूर्व वस्तु, स एव पूर्व विद्यमाने चक्षुष्यद्राक्षीन्न देह इति । देहश्चेत् द्रष्टा स येनाद्राक्षीत्तस्मिन् उद्भूते चक्षुषि स्वप्ने तदेव दृष्टपूर्व न पश्येत् । अस्ति च लोके प्रसिद्धि पूर्व दृष्ट मया हिमवत शृगमद्याह स्वप्नेऽद्राक्षमिति उद्भूतचक्षुषामन्धानामपि । तस्मादनुद्भूतेऽपि चक्षुषि य स्वप्नदृक्स एव द्रष्टा न देह इत्यवगम्यते ॥

तथा स्मृतौ द्रष्टृस्मर्त्रोरेकत्वे सति य एव द्रष्टा स एव स्मर्ता । यदा चैव तदा निर्मीलिताक्षोऽपि स्मरन्दृष्टपूर्व यद्रूपं तत् दृष्टवदेव पश्यतीति । तस्माद्यन्निमीलितं तन्न द्रष्टृ । यन्निमीलिते चक्षुषि स्मरद्रूपं पश्यति तदेवानिमीलितेऽपि चक्षुषि द्रष्टृ आसीदित्यवगम्यते । मृते च देहेऽविकलस्यैव च रूपादिदर्शनाभावात् देहस्यैव द्रष्टृत्वे मृतेऽपि दर्शनादिक्रिया स्यात् । तस्माद्यदपाये देहे दर्शन न भवति, यद्भावे च भवति, तद्दर्शनादिक्रियाकर्तृ न देह इत्यवगम्यते ।

चक्षुरादीन्येव दर्शनादिक्रियाकर्तृणीति चेत् । न । यदहमद्राक्ष तत्स्पृशामीति भिन्नकर्तृकत्वे प्रतिसधानानुपपत्ते । मनस्तर्हीति चेत् न । मनसोऽपि विषयत्वात् रूपादिवत् द्रष्टृत्वायनुपपत्ति. । तस्मादत स्थ व्यतिरिक्तमादित्यादिवदिति सिद्धम् ॥

यदुक्त कार्यकरणसघातसमानजातीयमेव ज्योतिरतरमनुमेय, आदित्यादिभि तत्समानजातीयैरेव उपक्रियमाणत्वादिति । तदसत् । उपकार्योपकारकभावस्यानियमदर्शनात् । कथं ? पार्थिवैरिधनै पार्थिवत्वसमानजातायै तृणोलपादिभिरग्ने प्रज्वलनोपकार क्रियमाणो दृश्यते । न च तावता तत्समानजातीयैरेवाग्ने प्रज्वलनोपकार सर्वत्रानुमेय स्यात् । येनोदकेनापि प्रज्वलनोपकारो भिन्नजातीयेन वैद्युतस्याग्ने जाठरस्य च क्रियमाणो दृश्यते । तस्मात् उपकार्योपकारकभावे समानजातीयासमानजातीयनियमो नास्ति । कदाचित्समानजातीया मनुष्या मनुष्यैरेवोपक्रियन्ते, कदाचित्स्थावरपश्वादि-

भिश्च भिन्नजातीयै । तस्मादहेतु कार्यकरणसघातसमानजातीयैरेव आदित्यादि-ज्योतिर्भि उपकियमाणत्वादिति ।

यत्पुनरात्थ चक्षुरादिभिरादित्यादिज्योतिर्वत् अदृश्यत्वादित्यय हेतुर्ज्यो-तिरतरस्यान्त स्थत्व वैलक्षण्य च न साधयति, चक्षुरादिभिरनैकान्तिकत्वा-दिति । तदसत् । चक्षुरादिकरणेभ्योऽन्यत्वे सतीति हेतोर्विशेषणत्वोपपत्ते । कार्यकरणसघातधर्मत्व ज्योतिष इति यदुक्त, तन्न । अनुमानविरोधात् । आदि-त्यादिज्योतिर्वत्कार्यकरणसघातादर्वान्तर ज्योतिरिति ह्यनुमानमुक्तम् । तेन विरुध्यते इय प्रतिज्ञा कार्यकरणसघातधर्मत्व ज्योतिष इति । तद्भावभावित्व त्वसिद्ध, मृते देहे ज्योतिषोऽदर्शनात् । सामान्यतो दृष्टस्यानुमानस्याप्रामाण्ये सति पानभोजनादिसर्वव्यवहारलोपप्रसग । स चानिष्ट । पानभोजनादिषु हि क्षुत्पिपासादिनिवृत्तिमुपलब्धवत तत्सामान्यात्पानभोजनाद्युपादान दृश्यमान लोके न प्राप्नोति । दृश्यन्ते ह्युपलब्धपानभोजना सामान्यत पुन पानभोज-नान्तरै क्षुत्पिपासादिनिवृत्तिमनुमिन्वन्त तादर्थ्येन प्रवर्तमाना ।

यदुक्तमयमेव तु देहो दर्शनादिक्रियाकर्तेति, तत्प्रथममेव परिहृत स्वप्न-स्मृत्योर्देहादर्थान्तरभूतो द्रष्टेति । अनेनैव ज्योतिरतरस्य अनात्मत्वमपि प्रत्यु-क्तम् । यत्पुन खद्योतादे कादाचित्क प्रकाशाप्रकाशकत्वं, तदसत् । पक्षाद्य-वयवसंकोचविकासनिमित्तत्वात् प्रकाशाप्रकाशकत्वस्य । यत्पुनरुक्त, धर्माधर्म-योरवश्य फलदातृत्व स्वभावोऽभ्युपगतव्य इति । तदभ्युपगमे भवत सिद्धान्त-हानात् । एतेनानवस्थादोष प्रत्युक्त । तस्मादस्ति व्यतिरिक्तं चान्तस्थं ज्योतिरात्मेति ॥६॥

कतम आत्मेति योऽय विज्ञानमय प्राणेषु हृद्यंतर्ज्योति पुरुष स समान सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेम लोकमतिक्रामति मृत्यो रूपाणि ॥७॥

यद्यपि व्यतिरिक्तत्वादि सिद्धं, तथापि समानजातीयानुग्राहकत्वदर्शन-निमित्तभ्रान्त्या करणानामेवान्यतमो व्यतिरिक्तो वा इत्यविवेकत पृच्छति— कतम इति । न्यायसूक्ष्मताया दुर्विज्ञेयत्वादुपपद्यते भ्रान्ति । अथवा शरीर-व्यतिरिक्ते सिद्धेऽपि करणानि सर्वाणि विज्ञानवन्तीव, विवेकत आत्मनोऽनुप-लब्धत्वात् । अतोऽहं पृच्छामि कतम आत्मेति । कतमोऽसौ देहेन्द्रिय-

प्राणमनःसु यस्त्वयोक्त आत्मा । येन ज्योतिषाऽऽस्त इत्युक्तम् । अथवा योऽयमात्मा त्वयाऽभिप्रेतो विज्ञानमय । सर्व इमे प्राणा विज्ञानमया इव । एषु प्राणेषु कतम । यथा समुदितेषु ब्राह्मणेषु सर्व इमे तेजस्विन कतम एषु षडङ्गविदिति । पूर्वस्मिन्व्याख्याने कतम आत्मेत्येतावदेव प्रश्नवाक्य, योऽयं विज्ञानमय इति प्रतिवचनम् । द्वितीये तु व्याख्याने प्राणेष्वित्येवमंत प्रश्नवाक्यम् । अथवा सर्वमेव प्रश्नवाक्यं— विज्ञानमयो हृद्यन्तर्ज्योति पुरुष कतम इत्येतदन्तम् । योऽय विज्ञानमय इत्येतस्य शब्दस्य निर्धारितार्थविशेषविषयत्वं, कतम आत्मेतीतिशब्दस्य प्रश्नवाक्यपरिसमाप्त्यर्थत्व व्यवहितसबंधमंतरेण युक्तमिति कृत्वा, कतम आत्मेतीत्येवमतमेव प्रश्नवाक्य, योऽयमित्यादि पर सर्वमेव प्रतिवचनमिति निश्चीयते ॥

योऽयमित्यात्मन प्रत्यक्षत्वान्निर्देश । विज्ञानमयो विज्ञानप्रायो बुद्धिविज्ञानोपाधिसपर्काविवेकाद्विज्ञानमय इत्युच्यते । बुद्धिविज्ञानसपृक्त एव हि यस्मादुपलभ्यते, राहुरिव चद्रादित्यमपृक्त । बुद्धिर्हि सर्वार्थकरण तमसीव प्रदीपः पुरोवस्थित । 'मनसा ह्येव पश्यति मनसा शृणोति' इति ह्युक्तम् । बुद्धिविज्ञानालोकविशिष्टमेव हि सर्व विषयजातमुपलभ्यते, पुरोवस्थितप्रदीपालोकविशिष्टमिव तमसि । द्वारमात्राणि त्वन्यानि करणानि बुद्धे । तस्मात्तेनैव विशेष्यते विज्ञानमय इति । येषा परमात्मविज्ञप्तिविकार इति व्याख्यान तेषा 'विज्ञानमयो' 'मनोमय' इत्यादो विज्ञानमयशब्दस्य अन्यार्थदर्शनादश्रौतार्थताऽवसीयते । सदिग्धश्च पदार्थोऽन्यत्र निश्चितप्रयोगदर्शनान्निर्धारयितु शक्य । वाक्यशेषात् । निश्चितन्यायबलाद्वा । सर्वेरिति चोत्तरत्र पाठात् । हृद्यंत इति वचनाद्युक्त विज्ञानप्रायत्वमेव । प्राणेष्विति व्यतिरेकप्रदर्शनार्था सप्तमी । यथा वृक्षेषु पाषाण इति सामीप्यलक्षणा । प्राणेषु हि व्यतिरेकाव्यतिरेकता सदिह्यत आत्मन । प्राणेषु प्राणेभ्यो व्यक्तिरिक्त इत्यर्थ । यो हि येषु भवति स तद्व्यतिरिक्तो भवत्येव । यथा पाषाणेषु वृक्ष । हृदि तत्रैतत्स्यात्प्राणेषु प्राणजातायैव बुद्धे. स्यादित्यत आह— हृद्यंतरिति । हृच्छब्देन पुंडरीकाकारो मासपिंड, तात्स्थ्यात् बुद्धिर्हृत्तस्था हृदि बुद्धा । अंतरिति बुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थम् । ज्योतिरवभासात्मकवादात्मोच्यते । तेन ह्यवभासकेन आत्मना ज्योतिषा आस्ते पल्ययते कर्म कुरुते चेतनावानिव ह्ययं कार्यकरण-

पिंडो यथा आदित्यप्रकाशस्थो घट । यथा वा मरकतादिर्मणि क्षीरादिद्रव्ये प्रक्षिप्त परीक्षणाय आत्मच्छायमेव तत्क्षीरादिद्रव्यं करोति, तादृगेतदात्मज्योतिर्बुद्धेरपि हृदयात्सूक्ष्मत्वात् हृद्यत स्थमपि हृदयादिकं कार्यकरणसंघात चैकीकृत्य आत्मज्योतिश्छाय करोति । पारंपर्येण सूक्ष्मस्थूलतारतम्यात्सर्वान्तरतमत्वात् ।

बुद्धिस्तावत्स्वच्छत्वात् आनंतर्याच्च आत्मचैतन्यज्योति प्रतिच्छाया भवति । तेन हि विवेकिनामपि तत्र आत्माभिमानबुद्धि प्रथमा । ततोऽप्यानंतर्यान्मनसि चैतन्यावभासता बुद्धिसंपर्कात् । तत इंद्रियेषु । मन सयोगात् । ततोऽनंतरं शरीरे । इंद्रियसंपर्कात् । एवं पारंपर्येण कृत्स्न कार्यकरणसघातमात्मा चैतन्यस्वरूपज्योतिषाऽवभासयति । तेन हि सर्वस्य लोकस्य कार्यकरणसंघाते तद्वृत्तिषु चानियतात्माभिमानबुद्धि यथाविवेक जायते । तथा च भगवतोक्तं गीतासु— "यथा प्रकाशयत्येक कृत्स्न लोकमिम रवि । क्षेत्रं क्षेत्री तथा कृत्स्न प्रकाशयति भारत" "यदादित्यगत तेज" इत्यादि च । 'नित्योऽनित्याना चेतनश्चेतनानाम्' इति च काठके । 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति च । 'येन सूर्यस्तपति तेजसेद्ध' इति च मंत्रवर्ण । तेनाय हृद्यतर्ज्योति । पुरुष आकाशवत्सर्वगतत्वात्पूर्ण इति पुरुष । निरतिशयं चास्य स्वयज्योतिष्ट्व सर्वावभासकत्वात्स्वयमन्यानवभास्यत्वाच्च । स एष पुरुष स्वयमेव ज्योति स्वभावो यं त्वं पृच्छसि कतम आत्मेति ॥

बाह्याना ज्योतिषा सर्वकरणानुग्राहकाणा प्रत्यस्तमयेऽन्त करणद्वारेण हृद्यंतर्ज्योतिः पुरुष आत्माऽनुग्राहक करणानामित्युक्तम् । यदापि बाह्यकरणानुग्राहकाणा आदित्यादिज्योतिषा भाव, तदाप्यादित्यादिज्योतिषा परार्थत्वात्कार्यकरणसंघातस्याचैतन्ये स्वार्थानुपपत्ते स्वार्थज्योतिष आत्मनोऽनुग्रहाभावेऽयं कार्यकरणसंघातो न व्यवहाराय कल्पते । आत्मज्योतिरनुग्रहेणैव हि सर्वदा सर्व संव्यवहार । "यदेतद्धृदयं मनश्चैतत्संज्ञानम्" इत्यादिश्रुत्यन्तरात् । साभिमानो हि सर्वप्राणिसंव्यवहार । अभिमानहेतुं च मरकतमणिदृष्टान्तेनावोचाम ।

यद्यप्येवमेतत्तथापि जाग्रद्विषये सर्वकरणागोचरत्वादात्मज्योतिषो बुद्ध्यादिबाह्याभ्यंतरकार्यकरणव्यवहारसंनिपातव्याकुलत्वाच्च शक्यते तज्ज्योतिरात्माख्यं मुंजेषीकावाभिष्कृष्य दर्शयितुमित्यत स्वप्ने दिदर्शयिषु प्रक्रमते— स

समान सन्नुभौ लोकावनुसंचरति । य पुरुष स्वयमेव ज्योतिरात्मा स समानः सदृश सन् । केन ? प्रकृतत्वात्सन्निहितत्वाच्च हृदयेन । हृदि इति च हृच्छब्द-वाच्या बुद्धि प्रकृता संनिहिता च । तस्मात्तयैव सामान्यम् । किं पुन सामान्य ? अश्वमहिषवद्विवेकतोऽनुपलब्धि । अवभास्या बुद्धि , अवभासकं तदात्मज्योतिरालोकवत् । अवभास्यावभासकयो विवेकतोऽनुपलब्धि प्रसिद्धा । विशुद्धत्वाद्धयालोकोऽवभास्येन सदृशो भवति । यथा रक्तमवभासयन् रक्त-सदृशो रक्ताकारो भवति । यथा हरित नील लोहित च अवभासयन्नालोक तत्समानो भवति । तथा बुद्धिमवभासयन्बुद्धिद्वारेण कृत्स्नं क्षेत्रमवभासयति, इत्युक्तं मरकतमणिनिदर्शनेन । तेन सर्वेण समानो बुद्धिसामान्यद्वारेण । सर्वमय इति चात एव वक्ष्यति । तेनासौ कुतश्चित्प्रविभज्य भुजेषीकावत्स्वेन ज्योती-रूपेण दर्शायेतु न शक्यत इति, सर्वव्यापारं तत्राध्यारोप्य नामरूपगतं, ज्योतिर्धर्मं च नामरूपयो , नामरूपे चात्मज्योतिषि, सर्वो लोको मोमुह्यते— अयमात्मा नायमात्मा, एवधर्मा नैवधर्मा, कर्ताऽकर्ता, शुद्धोऽशुद्धो बद्धो मुक्त , स्थितो गत आगत , अस्ति नास्तात्यादिविकल्पै । अत समान सन्नुभौ लोकौ प्रतिपन्नप्रतिपत्तव्यौ इहलोकपरलोकौ उपात्तदेहेन्द्रियादिसघातत्यागान्यो-पादानसतानप्रबधशतसनिपातै अनुक्रमेण संचरति । धीसादृश्यमेवोभयलोक-संचरणहेतुर्न स्वत इति । तत्र नामरूपोपाधिसादृश्य भ्रान्तिनिमित्त यत्तदेव हेतुर्न स्वत , इत्येतदुच्यते— यस्मात्स समान सन्नुभौ लोकावनुक्रमेण संचरति । तदेतत्प्रत्यक्षमित्येतद्दर्शयति—यतो ध्यायतीव ध्यानव्यापारं करोतीव, चिंतयतीव, ध्यानव्यापारवर्ती बुद्धिं स तत्स्थेन चित्स्वभावज्योतीरूपेणावभासयन् तत्सदृश-स्तत्समान सन्ध्यायतीव, आलोकवदेव । अतो भवति चिंतयतीति भ्रान्तिर्लोकस्य । न तु परमार्थतो ध्यायति । तथा लेलायतीव अत्यर्थं चलतीव । तेष्वेव करणेषु बुद्ध्यादिषु वायुषु च चलत्सु तदवभासकत्वात्तत्सदृशं तदिति लेलायतीव । न तु परमार्थतश्चलनधर्मकं तदात्मज्योति ।

कथ पुनरेतदवगम्यते तत्समानत्वभ्रान्तिरेव उभयलोकसंचरणादिहेतुर्न स्वत इत्यस्यार्थस्य प्रदर्शनाय हेतुरुपदिश्यते—स आत्मा हि यस्मात्स्वप्नो भूत्वा। स यया धिया समान सा धीर्यद्यद्भवति तत्तदसावपि भवतीव । तस्माद्यदासौ स्वप्नो भवति स्वापवृत्तिं प्रतिपद्यते धी, तदा सोऽपि स्वप्नवृत्तिं प्रतिपद्यते । यदा

धीर्जिजागरिषति तदा असावपि । अत — स्वप्नो भूत्वा स्वप्नवृत्तिमवभासयन्धिय स्वापवृत्त्याकारो भूत्वेमं लोकं जागरितव्यवहारलक्षणं कार्यकरणसंघातात्मकं लौकिकशास्त्रीयव्यवहाराद्यपद अतिक्रामत्यतीत्य क्रामति विविक्तेन स्वेन आत्मज्योतिषा स्वप्रात्मिका धीवृत्तिमवभासयन्नवतिष्ठते यस्मात् तस्मात्स्वयंज्योतिस्वभाव एवासौ, विशुद्ध स कर्तृक्रियाकारकफलशून्य परमार्थतो, धीसादृश्यमेव तु उभयलोकसंचारादिसव्यवहारभ्रान्तिहेतु । मृत्यो रूपाणि, मृत्यु कर्माविद्यादिर्न तस्यान्यद्रूपं स्वत , कार्यकरणान्येवाम्य रूपाणि । अतस्तानि मृत्यो रूपाण्यतिक्रामति क्रियाफलाश्रयाणि ॥

ननु नास्त्येव धिया समानमन्यद्धियोऽवभासकमात्मज्योति । धीव्यतिरेकेण प्रत्यक्षेण वा अनुमानेन्न वाऽनुपलंभात् । यथाऽन्या तत्काल एव द्वितीया धी । यत्तु अवभास्यावभासकयो अन्यत्वेऽपि विवेकानुपलभात्सादृश्यमिति घटाद्यालोकयो । तत्र भवत्वन्यत्वेन आलोकस्योपलभात् घटादे , सश्लिष्टयो सादृश्यं भिन्नयोरेव । न च तथेह घटादेरिव धियोऽवभासकं ज्योतिरंतरं प्रत्यक्षेण वाऽनुमानेन वोपलभामहे । धीरेव हि चित्स्वरूपावभासकत्वेन स्वाकारा विषयाकारा च । तस्मान्नानुमानतो नापि प्रत्यक्षतो धियोऽवभासकं ज्योति शक्यते प्रतिपादयितुं व्यतिरिक्तम् ।

यदपि दृष्टान्तरूपमभिहितं अवभास्यावभासकयोर्भिन्नयोरेव घटाद्यालोकयो संयुक्तयो सादृश्यमिति । तत्राभ्युपगममात्रमस्माभिरुक्तम् । न तत्र घटाद्यवभास्यावभासकौ भिन्नौ । परमार्थतस्तु घटादिरेवावभासात्मक सालोक । अन्योऽन्यो हि घटादिरुत्पद्यते । विज्ञानमात्रमेव सालोक घटादिविषयाकारमवभासते । यदैव, तदा न बाह्यो दृष्टान्तोऽस्ति । विज्ञानलक्षणमात्रत्वात्सर्वस्य । एवं तस्यैव विज्ञानस्य ग्राह्यग्राहकाकारतामल परिकल्प्य, तस्यैव पुनर्विशुद्धिं परिकल्पयन्ति । तत् ग्राह्यग्राहकविनिर्मुक्तं विज्ञान स्वच्छीभूत क्षणिकं व्यवतिष्ठत इति केचित् । तस्यापि शान्तिं केचिदिच्छन्ति । तदपि विज्ञानं संवृतं ग्राह्यग्राहकांशविनिर्मुक्तं शून्यमेव घटादिबाह्यवस्तुवदित्यपरे माध्यमिका आचक्षते ॥

सर्वा एता कल्पना बुद्धिविज्ञानावभासकस्य व्यतिरिक्तस्यात्मज्योतिषोपह्ववादस्य श्रेयोमार्गस्य प्रतिपक्षभूता वैदिकस्य । तत्र येषा बाह्योऽर्थोऽस्ति तान्प्रत्युच्यते— न तावत् स्वात्मावभासकत्व घटादेः । तमस्यवस्थितो घटादिः

तावन्न कदाचिदपि स्वात्मनाऽवभास्यते । प्रदीपाद्यालोकसयोगेन तु नियमेनैवावभास्यमानो दृष्ट सालोको घट इति । संश्लिष्टयोरपि घटालोकयो. अन्यत्वमेव । पुन पुन संश्लेषे विश्लेषे च विशेषदर्शनाद्रज्जुघटयोरिव । अन्यत्वे च व्यतिरिक्तावभासकत्वम् । न स्वात्मनैव स्वमात्मानमवभासयति ।

ननु प्रदीप स्वात्मानमेवावभासयन्दृष्ट इति । न हि घटादिवत्प्रदीपदर्शनाय प्रकाशान्तरमुपाददते लौकिका । तस्मात्प्रदीप स्वात्मान प्रकाशयति । न । अवभास्यत्वाविशेषात् । यद्यपि प्रदीपोऽन्यस्यावभासक स्वयमवभासात्मकत्वात्तथापि व्यतिरिक्तचैतन्यावभास्यत्व न व्यभिचरति । घटादिवदेव । यदा चैवं, तदा व्यतिरिक्तावभास्यत्व तावदवश्यभावि । ननु यथा घटश्चैतन्यावभास्यत्वेऽपि व्यतिरिक्तमालोकान्तरमपेक्षते, नत्वेवं प्रदीपोऽन्यमालोकान्तरमपेक्षते । तस्मात्प्रदीपोऽन्यावभास्योऽपि सन्नात्मान घट चावभासयति । न । स्वत परतो वा विशेषाभावात् । यथा चैतन्यावभास्यत्व घटस्य, तथा प्रदीपस्यापि चैतन्यावभास्यत्वमविशिष्टम् । यत्तूच्यते, प्रदीप आत्मान घट चावभासयतीति । तदसत् । कस्मात् ? यदा आत्मान नावभासयति तदा कीदृश स्यात् । न हि तदा प्रदीपस्य स्वतो वा परतो वा विशेष कश्चिदुपलभ्यते । स ह्यवभास्यो भवति यस्यावभासकसंनिधौ असनिधौ च विशेष उपलभ्यते । न हि प्रदीपस्य स्वात्मसनिधिरसनिधिर्वा शक्य कल्पयितुम् । असति च कादाचित्के विशेषे आत्मानं प्रदीप प्रकाशयतीति मृषैवोच्यते ।

चैतन्यग्राह्यत्वं तु घटादिभिरविशिष्ट प्रदीपस्य । तस्माद्विज्ञानस्य आत्मग्राह्यग्राहकत्वे न प्रदीपो दृष्टान्त । चैतन्यग्राह्यत्व च विज्ञानस्य बाह्यविषयै अविशिष्टम् । चैतन्यग्राह्यत्वे च विज्ञानस्य, किं ग्राह्यविज्ञानग्राह्यतैव, किं वा ग्राहकविज्ञानग्राह्यतेति, तत्र सदिह्यमाने वस्तुनि, योऽन्यत्र दृष्टो न्याय स कल्पयितुं युक्तो, न तु दृष्टविपरीत । तथा च सति यथा व्यतिरिक्तेनैव ग्राहकेण बाह्याना प्रदीपाना ग्राह्यत्वं दृष्ट, तथा विज्ञानस्यापि चैतन्यग्राह्यत्वात्प्रकाशकत्वे सत्यपि प्रदीपवत् व्यतिरिक्तचैतन्यग्राह्यत्वं युक्तं कल्पयितुं, न त्वनन्यग्राह्यत्वम् । यश्चान्यो विज्ञानस्य ग्रहीता स आत्मा ज्योतिरंतरं विज्ञानात् । तदाऽनवस्थेति चेत् । न । ग्राह्यत्वमात्र हि तद्ग्राहकस्य वस्त्वतरत्वे लिंगमुक्तं

न्यायत । न त्वेकान्ततो ग्राहकत्वे तद्ग्राहकान्तरास्तित्वे वा कदाचिदपि लिंगं संभवति । तस्मान्न तदनवस्थाप्रसंग ।

विज्ञानस्य व्यतिरिक्तग्राह्यत्वे करणान्तरापेक्षायामनवस्थेति चेत् । न । नियमाभावात् । न हि सर्वत्रायं नियमो भवति । यत्र वस्त्वंतरेण गृह्यते वस्त्वंतर, तत्र ग्राह्यग्राहकव्यतिरिक्त करणान्तरं स्यादिति नैकान्तेन नियंतुं शक्यते । वैचित्र्यदर्शनात् । कथम्? घटस्तावत्स्वात्मव्यतिरिक्तेनात्मना गृह्यते । तत्र प्रदीपादिरालोको ग्राह्यग्राहकव्यतिरिक्त करणम् । न हि प्रदीपाद्यालोको घटांशश्चक्षुरंशो वा । घटवच्चक्षुर्ग्राह्यत्वेऽपि प्रदीपस्य, चक्षु प्रदीपव्यतिरेकेण न बाह्यमालोकम्थानीयं किंचित्करणान्तरमपेक्षते । तस्मान्नैव नियन्तु शक्यते— यत्र यत्र व्यतिरिक्तग्राह्यत्व तत्र तत्र करणान्तरं स्यादेवेति । तस्माद्विज्ञानस्य व्यतिरिक्तग्राहकग्राह्यत्वे न करणद्वाराऽनवस्था, नापि ग्राहकत्वद्वारा कदाचिदप्युपपादयितु शक्यते । तस्मात्सिद्ध विज्ञानव्यतिरिक्तमात्मज्योतिरंतरमिति ॥

ननु नास्त्येव बाह्योऽर्थो घटादि प्रदीपो वा विज्ञानव्यतिरिक्त । यद्धि यद्व्यतिरेकेण नोपलभ्यते तत्तावन्मात्र वस्तु दृष्टम् । यथा स्वप्नविज्ञानग्राह्यं घटपटादिवस्तु । स्वप्नविज्ञानव्यतिरेकेण अनुपलभात्स्वप्नघटप्रदीपादे स्वप्नविज्ञानमात्रताऽवगम्यते, तथा जागरितेऽपि घटप्रदीपादेर्जाग्राद्विज्ञानव्यतिरेकेणानुपलंभाज्जाग्रद्विज्ञानमात्रतेव युक्ता भवितुम् । तस्मान्नास्ति बाह्योऽर्थो घटप्रदीपादिः विज्ञानमात्रमेव तु सर्वम् । तत्र यदुक्तं विज्ञानस्य व्यतिरिक्तावभास्यत्वाद्विज्ञानव्यतिरिक्तमस्ति ज्योतिरंतर घटादेरिवेति, तन्मिथ्या । सर्वस्य विज्ञानमात्रत्वे दृष्टान्ताभावात् । न । यावत्तावदभ्युपगमात् । ननु बाह्योऽर्थो भवता एकान्तेनैव नाभ्युपगम्यते । ननु मया नाभ्युपगम्यत एव । न । विज्ञानं घट प्रदीप इति च शब्दार्थपृथक्त्वाद्यावत्तावदपि बाह्यमर्थान्तर अवश्यमभ्युपगंतव्यम् । विज्ञानादर्थान्तरं वस्तु न चेदभ्युपगम्यते, विज्ञानं घट पट इत्येवमादीना शब्दानामेकार्थत्वे पर्यायशब्दत्वं प्राप्नोति । तथा साधनाना फलस्य चैकत्वे, साध्यसाधनभेदोपदेशशास्त्रानर्थक्यप्रसंग । तत्कर्तुरज्ञानप्रसंगो वा ॥

किंचान्यत् । विज्ञानव्यतिरेकेण वादिप्रतिवादिवाददोषाभ्युपगमात् । न ह्यात्मविज्ञानमात्रमेव वादिप्रतिवादिवादस्तद्दोषो वाऽभ्युपगम्यते, निराकर्तव्य-

त्वात्प्रतिवाद्यादीनाम् । न ह्यात्मीयं विज्ञानं निराकर्तव्यमभ्युपगम्यते, स्वयं वा आत्मा कस्यचित् । तथा च सति सर्वसंव्यवहारलोपप्रसंग । न च प्रतिवाद्यादय स्वात्मनैव गृह्यन्त इत्यभ्युपगम । व्यतिरिक्तग्राह्या हि तेऽभ्युपगम्यन्ते । तस्मात्तद्वत्सर्वमेव व्यतिरिक्तग्राह्य वस्तु, जाग्रद्विषयत्वात्, जाग्रद्वस्तु प्रतिवाद्यादिवदिति सुलभो दृष्टान्त । सतत्संतरवद्विज्ञानान्तरवच्चेति । तस्माद्विज्ञानवादिनाऽपि न शक्यं विज्ञानव्यतिरिक्तं ज्योतिरंतरं निराकर्तुम् ।

स्वप्ने विज्ञानव्यतिरेकाभावादयुक्तमिति चेत् । न । अभावादपि भावस्य वस्त्वंतरत्वोपपत्ते । भवतैव तावत्स्वप्ने घटादिविज्ञानस्य भावभूतत्वमभ्युपगतम् । तदभ्युपगम्य तद्व्यतिरेकेण घटाद्यभाव उच्यते । स विज्ञानविषयो घटादिर्यद्यभावो यदि वा भाव स्यादुभयथापि घटादिविज्ञानस्य भावभूतत्वमभ्युपगतमेव न तु तन्निवर्तयितुं शक्यते । तन्निवर्तकन्यायाभावात् । एतेन सर्वस्य शून्यता प्रत्युक्ता । प्रत्यगात्मग्राह्यता च आत्मनोऽहमिति मीमासकपक्ष. प्रत्युक्त ॥

यत्तूक्तं सालोकोऽन्यश्चान्यश्च घटो जायत इति । तदसत् । क्षणान्तरेऽपि स एवाय घट इति प्रत्यभिज्ञानात् । सादृश्यात्प्रत्यभिज्ञान कृत्तोत्थितकेशनखादिष्विवेति चेत् । न । तत्रापि क्षणिकत्वस्यासिद्धत्वात् । जात्येकत्वाच्च । कृत्तेषु पुनरुत्थितेषु च केशनखादिषु केशनखत्वजाते एकत्वात्केशनखत्वप्रत्यय, तन्निमित्तोऽभ्रान्त एव । न हि दृश्यमानलूनोत्थितकेशनखादिषु व्यक्तिनिमित्त स एवेति प्रत्ययो भवति । कस्यचिद्दीर्घकालव्यवहितदृष्टेषु च तुल्यपरिमाणेषु, तत्कालीनवालादितुल्या इमे केशनखाद्या इति प्रत्ययो भवति, न तु त एवेति । घटादिषु पुनर्भवति स एवेति प्रत्यय । तस्मान्न समो दृष्टान्त ।

प्रत्यक्षेण हि प्रत्यभिज्ञायमाने वस्तुनि तदेवेति, न चान्यत्वमनुमातुं युक्तं प्रत्यक्षविरोधे लिंगस्य आभासत्वोपपत्ते । सादृश्यप्रत्ययानुपपत्तेश्च । ज्ञानस्य क्षणिकत्वात् । एकस्य हि वस्तुदर्शिनो वस्त्वतरदर्शने सादृश्यप्रत्यय स्यात् । न तु वस्तुदर्शी एको वस्त्वंतरदर्शनाय क्षणान्तरमवतिष्ठते । विज्ञानस्य क्षणिकत्वात्सकृद्वस्तुदर्शनेनैव क्षयोपपत्ते । तेनेदं सदृशमिति हि सादृश्यप्रत्ययो भवति । तेनेति दृष्टस्मरणमिदमिति वर्तमानप्रत्यय । तेनेति दृष्टं स्मृत्वा यावदिदमिति वर्तमानक्षणकालमवतिष्ठेत । तत· क्षणिकवादहानि । अथ तेनेत्येवोपक्षीण. स्मार्त. प्रत्यय, इदमिति चान्य एव वार्तमानिक प्रत्यय क्षीयते,

तत सादृश्यप्रत्ययानुपपत्ति तेनेदं सदृशमिति अनेकदर्शिन एकस्याभावात् । व्यपदेशानुपपत्तिश्च द्रष्टव्यदर्शनेनैवोपक्षयाद्विज्ञानस्येदं पश्याम्यदोऽद्राक्षमिति व्यपदेशानुपपत्तिर्दृष्टवतो व्यपदेशक्षणानवस्थानात् । अथावतिष्ठेत क्षणिकवादहानि । अथादृष्टवतो व्यपदेश सादृश्यप्रत्ययश्च, तदानीं जात्यंधस्येव रूपविशेषव्यपदेश तत्सादृश्यप्रत्ययश्च सर्वमंधपरंपरेति प्रसज्येत सर्वज्ञशास्त्रप्रणयनादि । न चैतदिष्यते । अकृताभ्यागमकृतविप्रणाशदोषौ तु प्रसिद्धतरौ क्षणवादे ।

दृष्टव्यपदेशहेतु पूर्वोत्तरसहित एक एव हि शृंखलावत्प्रत्ययो जायत इति चेत् । तेनेद सदृशमिति च । न । वर्तमानातीतयो भिन्नकालत्वात् । तत्र वर्तमानप्रत्यय एक शृंखलावयवस्थानीयोऽतीतश्चापर, तौ प्रत्ययौ भिन्नकालौ । तदुभयप्रत्ययविषयस्पृक्चेत् शृंखलाप्रत्यय तत क्षणद्वयव्यापित्वादेकस्य विज्ञानस्य पुन क्षणवादहानि । ममतवतादिविशेषानुपपत्तेश्च सर्वसंव्यवहारलोपप्रसग ।

सर्वस्य च स्वसंवेद्यविज्ञानमात्रत्वे, विज्ञानस्य च स्वच्छावबोधावभासमात्रस्वाभाव्याभ्युपगमात् तद्दर्शिनश्चान्यस्याभावे अनित्यदु खशून्यानात्मत्वाद्यनेककल्पनानुपपत्ति । न च दाडिमादेरिव विरुद्धानेकाशवत्त्वं विज्ञानस्य । स्वच्छावभासस्वाभाव्याद्विज्ञानस्य । अनित्यदु खादीना विज्ञानाशत्वे च सति अनुभूयमानत्वात् व्यतिरिक्तविषयत्वप्रसग । अथ अनित्यदु खाद्यात्मैकत्वमेव विज्ञानस्य, तदा तद्वियोगाद्विशुद्धिकल्पनानुपपत्ति । संयोगिमलवियोगाद्धि विशुद्धिर्भवति । यथा आदर्शप्रभृतीनाम् । न तु स्वाभाविकेन धर्मेण कस्यचिद्वियोगो दृष्ट । न ह्यग्ने स्वाभाविकेन प्रकाशेन औष्ण्येन वा वियोगो दृष्ट । यदपि पुष्पगुणाना रक्तत्वादीना द्रव्यान्तरयोगेण वियोजनं दृश्यते, तत्रापि संयोगपूर्वत्वमनुमीयते । बीजभावनया पुष्पफलादीना गुणान्तरोत्पत्तिदर्शनात् । अतो विज्ञानस्य विशुद्धिकल्पनानुपपत्ति ।

विषयविषय्याभासत्वं च यन्मलं परिकल्प्यते विज्ञानस्य, तदप्यन्यसंसर्गाभावादनुपपन्नम् । न ह्यविद्यमानेन विद्यमानस्य ससर्ग स्यात् । असति चान्यसंसर्गे यो धर्मो यस्य दृष्ट स तत्स्वभावत्वान्न तेन वियोगमर्हति । यथा-

ऽग्नेरौष्ण्यं सवितुर्वा प्रभा। तस्मादनित्यसंसर्गेण मलिनत्वं तद्विशुद्धिश्च विज्ञानस्येतीय कल्पना अंधपरंपरैव प्रमाणशून्येत्यवगम्यते।

यदपि तस्य विज्ञानस्य निर्वाणं पुरुषार्थं कल्पयन्ति, तत्रापि फलाश्रयानुपपत्ति। कटकविद्धस्य हि कंटकवेधजनितदु खनिवृत्ति फल, न तु कंटकविद्धमरणे तद्दु खनिवृत्तिफलस्याश्रय उपपद्यते। तद्वत्सर्वनिर्वाणेऽसति च फलाश्रये पुरुषार्थकल्पना व्यर्थैव। यस्य हि पुरुषशब्दवाच्यस्य सत्त्वस्य आत्मनो विज्ञानस्य चार्थः परिकल्प्यते, तस्य पुन पुरुषस्य निर्वाणे कस्यार्थ पुरुषार्थ इति स्यात्। यस्य पुनरस्त्यनेकार्थदर्शी विज्ञानव्यतिरिक्त आत्मा, तस्य दृष्टस्मरणदु खसयोगवियोगादि सर्वमेवोपपन्न अन्यसयोगनिमित्त कालुष्य तद्वियोगनिमित्ता च विशुद्धिरिति। शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादर क्रियते ॥७॥

स वा अय पुरुषो जायमान शरीरमभिसपद्यमानः पाप्मभि. ससृज्यते स उत्क्रामन्म्रियमाण पाप्मनो विजहाति ॥८॥

यथैवेहैकस्मिन्देहे स्वप्नो भूत्वा मृत्यो रूपाणि कार्यकरणान्यतिक्रम्य स्वप्ने स्व आत्मज्योतिष्यास्ते, एव स वै प्रकृत पुरुषोऽयं जायमान। कथं जायमान इत्युच्यते—शरीरं देहेंद्रियसघातमभिसपद्यमान शरीरे आत्मभावमापद्यमान इत्यर्थ। पाप्मभि पाप्मसमवायिभिर्धर्माधर्माश्रयै कार्यकरणैरित्यर्थ। संसृज्यते सयुज्यते। स एवोत्क्रामञ्छरीरान्तरमूर्ध्वं क्रामन्गच्छन्म्रियमाण इत्येतस्य व्याख्यानमुत्क्रामन्निति। तानेव संश्लिष्टान्पाप्मरूपान्कार्यकरणलक्षणान्विजहाति तैर्विमुज्यते तान्परित्यजति। यथाऽयं स्वप्नजाग्रद्वृत्त्योर्वर्तमाने एवैकस्मिन्देहे पाप्मरूपकार्यकरणोपादानपरित्यागाभ्यामनवरतं सचरति धिया समानः सन्, तथा सोऽयं पुरुष उभाविहलोकपरलोकौ जन्ममरणाभ्या कार्यकरणोपादानपरित्यागौ अनवरतं प्रतिपद्यमान आ संसारमोक्षात्सचरति। तस्मात्सिद्धमस्य आत्मज्योतिषोऽन्यत्वं कार्यकरणरूपेभ्य पाप्मभ्य, संयोगवियोगाभ्याम्। नहि तद्धर्मत्वे सति तैरेव सयोगो वियोगो वा युक्त ॥८॥

ननु न स्तोऽस्योभौ लोकौ यौ जन्ममरणाभ्यामनुक्रमेण संचरति स्वप्नजागरिते इव। स्वप्नजागरिते तु प्रत्यक्षमवगम्येते न त्विहलोकपरलोकौ केनचित्प्रमाणेन। तस्मादेते एव स्वप्नजागरिते इहलोकपरलोकाविति। उच्यते—

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इद च परलोकस्थानं च सध्य तृतीय स्वप्नस्थान तस्मिन्सध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थान च । अथ यथाक्रमोऽय परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनदांश्च पश्यति स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्राय पुरुषः स्वयं ज्योतिर्भवति ॥९॥

तस्यैतस्य पुरुषस्य वै द्वे एव स्थाने भवतो, न तृतीय चतुर्थ वा । के ते ? इद च यत्प्रतिपन्न वर्तमान जन्म शरीरेंद्रियविषयवेदनाविशिष्ट स्थान प्रत्यक्षतोऽनुभूयमानम् । परलोक एव स्थानं परलोकस्थानम् । तच्च शरीरादिवियोगोत्तरकालानुभाव्यम् । ननु स्वप्नोऽपि परलोक । तथा च सति द्वे एवेत्यवधारणमयुक्तम् । न । कथं तर्हि ? मध्य तत् । इहलोकपरलोकयोर्य सधिस्तस्मिन्भव सध्यं यत्तृतीय तत्स्वप्नस्थानम् । तेन स्थानद्वित्वावधारणम् । नहि ग्रामयो संधिस्ता- वेव ग्रामावपेक्ष्य तृतीयत्वपरिगणनमर्हति । कथ पुनस्तस्य परलोकस्थानस्यास्तित्वमवगम्यते, यदपेक्ष्य स्वप्नस्थान मध्य भवेत् । यतस्तस्मिन्सध्ये स्वप्नस्थाने तिष्ठन्भवन्वर्तमान एत उभे स्थाने पश्यति । के ते उभे ? इद च परलोकस्थान च । तस्मात्त स्वप्नजागरितव्यतिरेकेणोभौ लोकौ, यो धिया समान सन्ननुसचरति जन्ममरणसतानप्रबधेन ।

कथं पुन स्वप्ने स्थित सन्नुभौ लोकौ पश्यति, किमाश्रय., केन विधिनेति । उच्यते— अथ कथ पश्यतीति । शृणु । यथाक्रम आक्रामत्यनेनेत्याक्रम आश्रयोऽवष्टंभ इत्यर्थ । यादृश आक्रमोऽस्य सोऽयं यथाक्रम । अयं पुरुष परलोकस्थाने प्रतिपत्तव्ये निमित्ते, यथाक्रमो भवति यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्मपूर्वप्रज्ञालक्षणेन युक्तो भवतीत्यर्थ । तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्ताकुरीभावमिव बीजं तमाक्रममाक्रम्यावष्टभ्याश्रित्य उभयान्पश्यति । बहुवचन धर्माधर्मफलानेकत्वात् उभयानुभयप्रकारानित्यर्थ । कास्तान् ? पाप्मन पापफलानि । न तु पुनः साक्षादेव पाप्मना दर्शनं संभवति तस्मात्पापफलानि दुःखानीत्यर्थ । आनंदाश्च धर्मफलानि सुखानीत्येतत् । तानुभयान्पाप्मन आनंदाश्च पश्यति जन्मान्तरदृष्टवासनामयान् । यानि च प्रतिपत्तव्यजन्मविषयाणि क्षुद्रधर्माधर्मफलानि, धर्माधर्म-

प्रयुक्तो देवतानुग्रहाद्वा पश्यति । तत्कथमवगम्यते परलोकस्थानभावितत्पाप्मानंददर्शनं स्वप्न इति। उच्यते— यस्मादिह जन्मन्यननुभाव्यमपि पश्यति बहु। न च स्वप्नो नामापूर्वं दर्शनम् । पूर्वदृष्टस्मृतिर्हि स्वप्न प्रायेण । तेन स्वप्नजागरितस्थानव्यतिरेकेण स्त उभौ लोकौ ।

यदादित्यादिबाह्यज्योतिषामभावेऽयं कार्यकरणसंघात पुरुषो येन व्यतिरिक्तेन आत्मना ज्योतिषा व्यवहरतीत्युक्तम् । तदेव नास्ति । यत् आदित्यादिज्योतिषामभावगमन, यत्रेद विविक्त स्वयज्योतिरुपलभ्येत । येन सर्वदैवायं कार्यकरणसंघात संसृष्ट एवोपलभ्यते । तस्मादसत्समोऽसन्नेव वा स्वेन विविक्तस्वभावेन ज्योतीरूपेणात्मेति । अथ क्वाचिद्विविक्त स्वेन ज्योतीरूपेणोपलभ्येत बाह्याध्यात्मिकभूतभौतिकसंसर्गशून्य , ततो यथोक्त सर्वं भविष्यतीत्येतदर्थमाह— स य प्रकृत आत्मा यत्र यस्मिन्काले प्रस्वपिति प्रकर्षेण स्वापमनुभवति, तदा किमुपादान केन विधिना स्वपिति संध्यं स्थानं प्रतिपद्यत इत्युच्यते— अस्य दृष्टस्य लोकस्य जागरितलक्षणस्य, सर्वावत सर्वमवतीति सर्वावानयं लोक कार्यकरणसंघातो विषयवेदनासयुक्त । सर्वावत्त्वमस्य व्याख्यातमन्नत्रयप्रकरणे "अथो अयं वा आत्मा" इत्यादिना । सर्वा वा भूतभौतिकमात्रा अस्य ससर्गकारणभूता विद्यन्ते इति सर्ववान्सर्ववानेव सर्वावास्तस्य सर्वावतो मात्रामेकदेशमवयव अपादायापच्छिद्य आदाय गृहीत्वा दृष्टजन्मवासनावासित सन्नित्यर्थ । स्वयमात्मनैव विहत्य देहं पातयित्वा नि सबोधमापाद्य । जागरिते ह्यादित्यादीना चक्षुरादिष्वनुग्रहो देहव्यवहारार्थ । देहव्यवहारश्चात्मनो धर्माधर्मफलोपभोगप्रयुक्त· तद्धर्माधर्मफलोपभोगोपरमणमस्मिन्देहे आत्मकर्मोपरमकृतमित्यात्माऽस्य विहन्तेत्युच्यते । स्वयं निर्माय निर्माण कृत्वा वासनामय स्वप्नदेह मायामयमिव । निर्माणमपि तत्कर्मापेक्षत्वात्स्वयकर्तृकमुच्यते— स्वेन आत्मीयेन भासा मात्रोपादानलक्षणेन भासा दीप्त्या प्रकाशेन, सर्ववासनात्मकेन अत करणवृत्तिप्रकाशेनेत्यर्थः । सा हि तत्र विषयभूता सर्ववासनामयी प्रकाशते । सा तत्र स्वयं भा उच्यते । तेन स्वेन भासा विषयभूतेन स्वेन च ज्योतिषा तद्विषयिणा विविक्तरूपेण अलुप्तदृक्स्वभावेन तद्भारूपं वासनात्मकं विषयीकुर्वन्प्रस्वपिति । यदेवं वर्तनं तत्प्रस्वपितीत्युच्यते । अत्रैतस्यामवस्थायां एतस्मिन्काले ऽयं पुरुष आत्मा स्वयमेव विविक्तज्योतिर्भवति बाह्याध्यात्मिकभूतभौतिकसंसर्गरहितं ज्योतिर्भवति ।

नन्वस्य लोकस्य मात्रोपादानं कृतं कथं तस्मिन्सत्यत्रायं पुरुष स्वयं-ज्योतिर्भवतीत्युच्यते? नैष दोष। विषयभूतमेव हि तत्। तेनैव चात्रायं पुरुष स्वयं ज्योतिर्दर्शयितुं शक्य। न त्वन्यथाऽसति विषये कस्मिंश्चित्सुषुप्त-काल इव। यदा पुन सा भा वासनात्मिका विषयभूता उपलभ्यमाना भवति, तदा असि कोशादिव निष्कृष्ट सर्वसंसर्गरहितं चक्षुरादिकार्यकरणव्यावृत्तस्व-रूपं अलुप्तदृगात्मज्योति स्वेन रूपेणावभासयत् गृह्यते। तेनात्रायं पुरुष स्वयं ज्योतिर्भवतीति सिद्धम् ॥९॥

नन्वत्र कथ पुरुष स्वय ज्योतिर्येन जागरित इव ग्राह्यग्राहकादिलक्षण सर्वो व्यवहारो दृश्यते, चक्षुराद्यनुग्राहकाश्च आदित्याद्या लोका तथैव दृश्यन्ते यथा जागरिते? तत्र कथं विशेषावधारण क्रियतेऽत्रायं पुरुष स्वय ज्योति-र्भवतीति? उच्यते— वैलक्षण्यात्स्वप्नदर्शनस्य। जागरिते हि इद्रियबुद्धिमन-आलोकादिव्यापारसकीर्ण आत्मज्योति। इह तु स्वप्ने इंद्रियाभावात् तदनु-ग्राहकादित्याद्यालोकाभावाच्च विविक्तं केवल भवति तस्माद्विलक्षणम्। ननु तथैव विषया उपलभ्यन्ते स्वप्नेऽपि यथा जागरिते। तत्र कथमिंद्रियाभावाद्वै-लक्षण्यमुच्यत इति। शृणु—

न तत्र रथा न रथयोगा न पंथानो भवन्त्यथ रथान्रथयोगान्पथ सृजते न तत्रानंदा मुद. प्रमुदो भवन्त्यथानंदान्मुद: प्रमुद. सृजते न तत्र वेशान्ता: पुष्करिण्य: स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिणी. स्रवन्ती सृजते स हि कर्ता ॥१०॥

न तत्र विषया स्वप्ने रथादिलक्षणा। तथा न रथयोगा। रथेषु युज्यन्ते इति रथयोगा अश्वादयस्तत्र न विद्यन्ते। न च पंथानो रथमार्गा भवन्ति। अथ रथान्रथयोगान्पथश्च सृजते स्वयम्। कथ पुन सृजते रथादिसाधनाना वृक्षादीनामभावे। उच्यते— ननूक्तं 'अस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय' इति अंत करणवृत्तिरस्य लोकस्य वासना मात्रा तामपादाय रथादिवासनारूपान्त करणवृत्ति तदुपलब्धिनिमित्तेन कर्मणा चोद्य-माना दृश्यत्वेन व्यवतिष्ठते। तदुच्यते स्वयं निर्मायेति। तदेवाह रथादीन्सृजत इति। ननु तत्र करणं वा, करणानुग्राहकाणि वा आदित्यादिज्योतींषि, तदवभास्या वा रथादयो विषया विद्यन्ते। तद्वासनामात्रं तु केवलं तदुपलब्धि-

कर्मनिमित्तचोदितोद्भूतान्त करणवृत्त्याश्रयं दृश्यते। तद्यस्य ज्योतिषो दृश्यतेऽलुप्तदृशस्तदात्मज्योतिरत्र केवलमसिरिव कोशाद्विविक्तम्।

तथा न तत्रानंदा सुखविशेषा, मुदो हर्षा पुत्रादिलाभनिमित्ता, प्रमुदस्त एव प्रकर्षोपेता। अथ चानंदादीन्सृजते। तथा न तत्र वेशान्ता पल्वला, पुष्करिण्यस्तडागा, स्रवन्त्यो नद्यो भवन्ति। अथ वेशान्तादीन्सृजते वासनामात्ररूपान्। यस्मात्स हि कर्ता। तद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्महेतुत्वेनेत्यवोचाम तस्य कर्तृत्वं न तु साक्षादेव तत्र क्रिया संभवति, साधनाभावात्। न हि कारकमतरेण क्रिया सभवति। नच तत्र हस्तपादादीनि क्रियाकारकाणि सभवन्ति। यत्र तु तानि विद्यन्ते जागरिते, तत्र आत्मज्योतिरवभासितै कार्यकरणै रथादिवासनाश्रयान्त करणवृत्त्युद्भवनिमित्तं कर्म निर्वर्त्यते। तेनोच्यते स हि कर्तेति। तदुक्त 'आत्मनैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते' इति। तत्रापि न परमार्थत स्वत. कर्तृत्व चैतन्यज्योतिषोऽवभासकत्वव्यतिरेकेण। यच्चैतन्यात्मज्योतिषा अत करणद्वारेणावभासयति कार्यकरणानि, तदवभासितानि कर्मसु व्याप्रियन्ते कार्यकरणानि, तत्र कर्तृत्वमुपचर्यते आत्मन। यदुक्त 'ध्यायतीव लेलायतीव' इति तदेवान्वयते स हि कर्तेति इह हेत्वर्थम् ॥१०॥

तदेते श्लोका भवन्ति —

स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति।
शुक्रमादाय पुनरैति स्थान हिरण्मय पुरुष एकहंसः ॥११॥

तदेत एतस्मिन्नुक्तेऽर्थ एते श्लोका मंत्रा भवन्ति। स्वप्नेन स्वप्नभावेन शारीरं शरीरमभिप्रहत्य निश्चेष्टमापाद्यासुप्त स्वयमलुप्तदृगादिशक्तिस्वाभाव्यात्सुप्तान्वासनाकारोद्भूतान् अंत करणवृत्त्याश्रयान्बाह्याध्यात्मिकान्सर्वानेव भावान्स्वेन रूपेण प्रत्यस्तमितान्सुप्तानभिचाकशीति अलुप्तया आत्मदृष्टया पश्यत्यवभासयतीत्यर्थ। शुक्रं शुद्धं ज्योतिष्मदिद्रियमात्ररूपमादाय गृहीत्वा पुन कर्मणे जागरितस्थानमैत्यागच्छति हिरण्मयो हिरण्मय इव चैतन्यज्योतिस्वभाव पुरुष एकहंस, एक एव हन्तीत्येकहंस। एको जाग्रत्स्वप्नेहलोक परलोकादिन्गच्छतीत्येकहस. ॥

प्राणेन रक्षन्नवरं कुलाय बहिष्कुलायादमृतश्चरित्वा।
स ईयतेऽमृतो यत्र कामं हिरण्मयः पुरुष एकहंस. ॥१२॥

तथा प्राणेन पंचवृत्तिना रक्षन्परिपालयन्नन्यथा मृतभ्रान्ति स्यात् । अवरं निकृष्टमनेकाशुचिसंघातत्वादत्यंतबीभत्सं कुलाय नीडं शरीरं स्वयं तु बहिस्तस्मात्कुलायाच्चरित्वा । यद्यपि शरीरस्थ एव स्वप्नं पश्यति तथापि तस्संबंधाभावात्तत्स्थ इव आकाशो बहिश्चरित्वेत्युच्यते । अमृत स्वयममरणधर्मेयते गच्छति यत्र काम, यत्र यत्र कामो विषयेषु उद्भूतवृत्तिर्भवति तं तं कामं वासनारूपेणोद्भूत गच्छति ॥

स्वप्नान्त उच्चावचमीयमानो रूपाणि देव कुरुते बहूनि ।
उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥१३॥

किच स्वप्नांते स्वप्नस्थाने उच्चावचमुच्चं देवादिभाव अवच तिर्यगादिभाव निकृष्ट तदुच्चावचमीयमानो गम्यमान प्राप्नुवन् रूपाणि देवो द्योतनवान्कुरुते निर्वर्तयति वासनारूपाणि बहून्यसख्येयानि । उतापि स्त्रीभि सह मोदमान इव जक्षदिव हसन्निव वयस्ये । उतेवापि भयानि बिभेत्येभ्य इति भयानि सिंहव्याघ्रादीनि पश्यन्निव ॥

आराममस्य पश्यन्ति न त पश्यति कश्चनेति । त नायतं बोधयेदित्याहु. । दुर्भिषज्य हास्मै भवति यमेष न प्रतिपद्यते । अथो खल्वाहुर्जागरितदेश एवास्यष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुष. स्वय ज्योतिर्भवति सोऽह भगवते सहस्र ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥१४॥

आराममारमणमाक्रीडामनेन निर्मिता वासनारूपा अस्यात्मन पश्यन्ति सर्वे जना । ग्रामं नगरं स्त्रियं अन्नाद्यमित्यादिवासनानिर्मित आक्रीडनरूपम् । न तं पश्यति तं न पश्यति कश्चन । कष्ट भो वर्ततेऽत्यंतविविक्तं दृष्टिगोचरापन्नमप्यहो भाग्यहीनता लोकस्य । यच्छक्यदर्शनमप्यात्मानं न पश्यतीति लोकं प्रत्यनुक्रोशं दर्शयति श्रुति । अत्यंतविविक्त स्वयं ज्योतिरात्मा स्वप्ने भवतीत्यभिप्राय ।

त नायत बोधयेदित्याहु । प्रसिद्धिरपि लोके विद्यते स्वप्न आत्मज्योतिषो व्यतिरिक्तत्वे । कासौ । तमात्मानं सुप्तमायतं सहसा भृशं न बोधयदित्याहुरेवं कथयन्ति चिकित्सकादयो जना लोके । नूनं ते पश्यन्ति जाग्रद्देहादिंद्रियद्वारतोऽपसृत्य केवलो बहिर्वर्तत इति, यत आहुस्त नायतं बोधयेदिति । तत्र च

दोष पश्यन्ति— भृशं ह्यसौ बोध्यमानस्तानीन्द्रियद्वाराणि सहसा प्रतिबोध्यमानो न प्रतिपद्यत इति । तदेतदाह— दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते । यमिन्द्रियद्वारदेशं यस्मादेशाच्छुक्रमादायापसृत तमिन्द्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते । कदाचिद्व्यत्यासेनेन्द्रियमात्रा प्रवेशयति । तत आध्यबाधिर्यादि-दोषप्राप्तौ दुर्भिषज्यं दु खभिषक्कर्मता हास्मै देहाय भवति, दु खेन चिकित्स-नीयोऽसौ देहो भवतीत्यर्थ । तस्मात्प्रसिद्धयापि स्वप्ने स्वयज्योतिष्ट्वमस्य गम्यते ।

स्वप्नो भूत्वाऽतिक्रान्तो मृत्यो रूपाणीति तस्मात्स्वप्ने स्वयं ज्योतिरात्मा । अथो अपि खल्वन्य आहु जागरितदेश एवास्यैष य स्वप्न । न संभ्य स्थाना-न्तरमिहलोकपरलोकाभ्या व्यतिरिक्त, कि तर्हीहलोक एव जागरितदेश । यद्येवं, किंचात ? शृण्वतो यद्भवति, यदा जागरितदेश एवाय स्वप्न, तदायमात्मा कार्यकरणेभ्यो न व्यावृत्तस्तैर्मिश्रीभूत । अतो न स्वयं ज्योतिरात्मेत्यत स्वयं-ज्योतिष्ट्वबाधनाय अन्ये आहु जागरितदेश एवास्यैष इति । तत्र च हेतुमा-चक्षते– जागरितदेशत्वे यानि हि यस्माद्धस्त्यादीनि पदार्थजातानि जाग्रज्जागरित-देशे पश्यति लौकिक, तान्येव सुप्तोऽपि पश्यतीति । तदसत् । इंद्रियोपरमात् । उपरतेषु हीद्रियेषु स्वप्नान्पश्यति । तस्मान्नान्यस्य ज्योतिषस्तत्र संभवोऽस्ति । तदुक्त 'न तत्र रथा न रथयोगा' इत्यादि । तस्मादत्रायं पुरुष स्वयं ज्योतिर्भवत्येव ।

स्वयं ज्योतिरात्मा अस्तीति स्वप्ननिदर्शनेन प्रदर्शितम् । अतिक्रामति मृत्यो रूपाणीति च । क्रमेण संचरन्निहलोकपरलोकादीन् इहलोकपरलोकादि-व्यतिरिक्त । तथा जाग्रत्स्वप्नकुलाभ्या व्यतिरिक्त । तत्र च क्रमसंचारान्नि-त्यश्चेत्येतत्प्रतिपादितं याज्ञवल्क्येन । अतो विद्यानिष्क्रयार्थं सहस्रं ददामीत्याह जनक । सोऽहमेवं बोधितस्त्वया भगवते तुभ्यं सहस्र ददामि । विमोक्षश्च कामप्रश्नो मयाभिप्रेत । तदुपयोग्ययं तादर्थ्यात्तदेकदेश एव । अतस्त्वा नियो-क्ष्यामि समस्तकामप्रश्ननिर्णयश्रवणेन विमोक्षायात ऊर्ध्वं ब्रूहीति । येन ससारा-द्विप्रमुच्येयं, त्वत्प्रसादात् । विमोक्षपदार्थैकदेशनिर्णयहेतो सहस्रदानम् ॥१४॥

यत्प्रस्तुतं 'आत्मनैवाय ज्योतिषास्ते' इति, तत्प्रत्यक्षत· प्रतिपादितं 'अत्रायं पुरुष स्वयं ज्योतिर्भवति' स्वप्ने । यत्तूक्तं 'स्वप्नो भूत्वेमं लोकमति-

क्रामति मृत्यो रूपाणि' इति, तत्रैतदाशक्यते मृत्यो रूपाण्येवातिक्रामति न मृत्युम्। प्रत्यक्षं ह्येतत्स्वप्ने कार्यकरणव्यावृत्तस्यापि मोदत्रासादिदर्शनम। तस्मान्नूनं नैवायं मृत्युमतिक्रामति। कर्मणो हि मृत्यो कार्यं मोदत्रासादि दृश्यते। यदि च मृत्युना बद्ध एवायं स्वभावत, ततो विमोक्षो नोपपद्यते। न हि स्वभावात्कश्चिद्विमुच्यते। अथ स्वभावो न भवति मृत्यु, ततस्तस्मान्मोक्ष उपपत्स्यते। यथासौ मृत्युरात्मीयो धर्मो न भवति तथा प्रदर्शनाय—अत ऊर्ध्वं विमोक्षाय ब्रूहीत्येव जनकेन पर्यनुयुक्तो याज्ञवल्क्य तादिदर्शयिषया प्रवृत्ते—

स वा एष एतस्मिन्सप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्य च पाप च। पुनः प्रतिन्याय प्रतियोन्याद्रवति स्वप्नायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसगो ह्यय पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽह भगवते सहस्र ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१५॥

स वै प्रकृत स्वयं ज्योति पुरुष एष य स्वप्ने प्रदर्शित एतस्मिन्सप्रसादे। सम्यक्प्रसीदत्यस्मिन्निति सप्रसाद। जागरिते देहेंद्रियव्यापारशतसंनिपातजं हित्वा कालुष्यं तेभ्यो विप्रमुक्त ईषत्प्रसीदति स्वप्ने। इह तु सुषुप्ते सम्यक्प्रसीदतीत्यत सुषुप्तं संप्रसाद उच्यते। 'तीर्णो हि तदा सर्वाञ्शोकान्' इति 'सलिल एको द्रष्टा' इति हि वक्ष्यति सुषुप्तस्थमात्मानम्। स वा एष एतस्मिन्संप्रसादे क्रमेण संप्रसन्न सन्सुषुप्ते स्थित्वा। कथं संप्रसन्न ? स्वप्नात्सुषुप्तं प्रविविक्षु स्वप्नावस्थ एव रत्वा रतिमनुभूय मित्रबधुजनदर्शनादिना चरित्वा विहृत्यानेकधा चरणफल श्रममुपलभ्येत्यर्थ। दृष्ट्वैव न कृत्वेत्यर्थ। पुण्य च पुण्यफलं, पापं च पापफलम्। न तु पुण्यपापयो साक्षाद्दर्शनमस्तीत्यवोचाम। तस्मान्न पुण्यपापाभ्यामनुबद्ध.। यो हि करोति पुण्यपापे स ताभ्यामनुबध्यते। न हि दर्शनमात्रेण तदनुबद्ध स्यात्। तस्मात्स्वप्नो भूत्वा मृत्युमतिक्रामत्येव, न मृत्युरूपाण्येव केवलम्। अतो न मृत्योरात्मस्वभावत्वाशंका। मृत्युश्चेत्स्वभावोऽस्य स्वप्नेऽपि कुर्यात्। न तु करोति। स्वभावश्चेत्क्रिया स्यात् अनिर्मोक्षतैव स्यात्। ननु स्वभाव स्वप्नेऽभावात्। अतो विमोक्षोऽस्योपपद्यते मृत्यो पुण्यपापाभ्याम्। ननु जागरितेऽस्य स्वभाव एव। न। बुद्ध्याद्युपाधिकृतं हि तत्। तच्च प्रतिपादितं साद्दश्यात् 'ध्यायतीव लेलायतीव' इति। तस्मादेकान्तेनैव स्वप्ने मृत्युरूपातिक्रमणान्न स्वाभाविकत्वाशंका अनि-

मोक्षता वा। तत्र चरित्वेति चरणफल श्रममुपलभ्येत्यर्थ। तत सप्रसादानुभवोत्तरकालं पुन प्रतिन्याय यथान्यायं यथागतं, निश्चित आयो न्याय, अयनमायो निर्गमनं, पुन पूर्वगमनवैपरीत्येन यदागमन स प्रतिन्याय। यथागतं पुनरागच्छतीत्यर्थ। प्रतियोनि यथास्थानम्। स्वप्नस्थानाद्धि सुषुप्तं प्रतिपन्न सन्यथास्थानमेव पुनरागच्छति। प्रतियोनि आद्रवति स्वप्नायैव स्वप्नस्थानायैव।

ननु स्वप्ने न करोति पुण्यपापे तयो फलमेव पश्यतीति कथमवगम्यते? यथा जागरिते तथा करोत्येव स्वप्नेऽपि तुल्यत्वादर्शनस्येति, अत आह— स आत्मा यकिचित्तत्र स्वप्ने पश्यति पुण्यपापफल, अनन्वागतोऽननुबद्धस्तेन दृष्टेन भवति, नैवानुबद्धो भवति। यदि हि स्वप्ने कृतमेव तेन स्यात्तेनानुबध्येत। स्वप्नादुत्थितोऽपि समन्वागत स्यात्। न च तल्लोके स्वप्नकृतकर्मणा अन्वागतत्वप्रसिद्धि। न हि स्वप्नकृतेनागसा आगस्कारिणमात्मान मन्यते कश्चित्। न च स्वप्नदृश आग श्रुत्वा लोकस्त गर्हति परिहरति वा। अतोऽनन्वागत एव तेन भवति। तस्मात्स्वप्ने कुर्वन्निवोपलभ्यते, न तु क्रियाऽस्ति परमार्थत। 'उतेव स्त्रीभि सह मोदमान' इति श्लोक उक्त। आख्यातारश्च स्वप्नस्य सह इवशब्देनाचक्षते हस्तिनोऽय घटीकृता यावन्तीव मया दृष्टा इति। अतो न तस्य कर्तृत्वमिति।

कथं पुनरस्याकर्तृत्वमिति। कार्यकरणैर्मूर्तै संश्लेषो मूर्तस्य, स तु क्रियाहेतुर्दृष्ट.। न ह्यमूर्त कश्चित्क्रियावान्दृश्यते। अमूर्तश्चात्मा, अतोऽसंग। यस्माच्चासगोऽयं पुरुष तस्मादनन्वागतस्तेन स्वप्नदृष्टेन। अत एव न क्रियाकर्तृत्वमस्य कथंचिदुपपद्यते। कार्यकरणसश्लेषेण हि कर्तृत्व स्यात्स च संश्लेषः संगोऽस्य नास्ति यतोऽसंगो ह्ययं पुरुष। तस्मादमृत.। एवमेवैतद्याज्ञवल्क्य। सोऽहं भगवते सहस्र ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहि। मोक्षपदार्थैकदेशस्य कर्मप्रविवेकस्य सम्यग्दर्शितत्वात्। अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१५॥

स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्र ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१६॥

तत्र 'असंगो ह्ययं पुरुष' इत्यसंगताऽकर्तृत्वे हेतुरुक्त। उक्तं च पूर्वं

कर्मवशात्स ईयते यत्र काममिति । कामश्च संग । अतोऽसिद्धो हेतुरुक्तो 'असगो ह्यय पुरुष' इति । न त्वेतदस्ति । कथ तर्हि असंग एवेत्येतदुच्यते—स वा एष एतस्मिन्स्वप्ने स वा एष पुरुष सप्रसादात्प्रत्यागत स्वप्ने रत्वा चरित्वा यथाकाम दृष्ट्वैव पुण्य च पाप चेति सर्व पूर्ववत् । बुद्धान्तायैव जागरितस्थानाय । तस्मादसंग एवाय पुरुष । यदि स्वप्ने सगवान्स्यात्कामी, ततः तत्सगजैर्दोषै बुद्धान्ताय प्रत्यागतो लिप्येत ॥१६॥

यथाऽसौ स्वप्नेऽसंगत्वात्स्वप्नसगजैर्दोषै जागरिते प्रत्यागतो न लिप्यते, एवं जागरितसंगजैरपि दोषैर्न लिप्यत एव बुद्धान्ते । तदेतदुच्यते—

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पाप च पुनः प्रतिन्याय प्रतियोन्याद्रवति स्वप्नान्तायैव ॥१७॥

स वा एष एतस्मिन्बुद्धान्ते जागरिते रत्वा चरित्वेत्यादि पूर्ववत् । स यत्तत्र बुद्धान्ते किंचित्पश्यत्यनन्वागतस्तेन भवति असगो ह्यय पुरुष इति । ननु दृष्ट्वेवेति कथमवधार्यते? करोति च तत्र पुण्यपापे । तत्फल च पश्यति । न । कारकावभासकत्वेन कर्तृत्वोपपत्ते । 'आत्मनैवाय ज्योतिषा आस्ते' इत्यादिना आत्मज्योतिषाऽवभासित कार्यकरणसघातो व्यवहरति । तेनास्य कर्तृत्वमुपचर्यते, न स्वत कर्तृत्वम् । यथाचोक्त 'ध्यायतीव लेलायतीव' इति । बुद्ध्याद्युपाधिकृतमेव न स्वत । इह तु परमार्थापेक्षयोपाधिनिरपेक्ष उच्यते—दृष्ट्वैव पुण्यं च पाप च न कृत्वेति । तेन न पूर्वापरव्याघाताशका । यस्मान्निरुपाधिक परमार्थतो न करोति, न लिप्यते क्रियाफलेन । तथा च भगवतोक्तं—"अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्यय । शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते" इति । तथा सदसदान तु कामप्रविवेकस्य दर्शितत्वात् । तथा 'स वा एष एतस्मिन्स्वप्ने' 'स वा एष एतस्मिन्बुद्धान्ते' इत्येताभ्या कंडिकाभ्यामसगतैव प्रतिपादिता । यस्मात् बुद्धान्ते कृतेन स्वप्नान्तं गत संप्रसन्नोऽसबद्धो भवति स्तेन्यादिकार्यादर्शनात् तस्मात्लिष्वपि स्थानेषु स्वतोऽसंग एवायम् । अताऽमृत स्थानत्रयधर्मविलक्षण । प्रतियोन्याद्रवति स्वप्नान्तायैव। संप्रसादायेत्यर्थ । दर्शनवृत्ते स्वप्नस्य स्वप्नशब्देनाभिधानदर्शनात् अंतशब्देन च विशेषणोपपत्ते । 'एतस्मा अंताय धावति' इति च सुषुप्तं दर्शयिष्यति । यदि पुनरेवमुच्यते—'स्वप्नान्ते रत्वा चरित्वा' 'एतावुभावतावनुसचरति स्वप्नान्तं च

बुद्धान्तं च' इति दर्शनात् स्वप्नान्तायैव इत्यत्रापि दर्शनवृत्तिरेव स्वप्न उच्यत इति, तथापि न किंचित् दुष्यति। असंगता हि सिषाधयिषिता सिध्यत्येव। तस्माज्जागरिते दृष्ट्वैव पुण्यं च पाप च रत्वा चरित्वा च स्वप्नान्तमागतो न जागरितदोषेणानुगतो भवति ॥१७॥

एवमयं पुरुष आत्मा स्वय ज्योति कार्यकरणविलक्षण तत्प्रयोजकाभ्या कामकर्मभ्या विलक्षणो यस्मादसंगो ह्ययं पुरुष, असंगत्वादित्ययमर्थ 'स वा एष एतस्मिन्संप्रसादे' इत्याद्याभिस्तिसृभि कडिकाभि प्रतिपादित। तत्रासगतैव आत्मन। कुतो, यस्माज्जागरितात्स्वप्न, स्वप्नाच्च संप्रसाद, संप्रसादाच्च पुन स्वप्न, क्रमेण बुद्धान्त जागरितं, बुद्धान्ताच्च पुन स्वप्नान्तं, इत्येवमनुक्रमसंचारेण स्थानत्रयस्य व्यतिरेक साधित। पूर्वमप्युपन्यस्तोऽयमर्थ 'स्वप्नो भूत्वेमं लोकमति मृत्यो रूपाणि' इति त विस्तरेण प्रतिपाद्य केवलं दृष्टान्तमात्रमवशिष्टं तद्वक्ष्यामीत्यारभ्यते —

तद्यथा महामत्स्य उभे कूले अनुसचरति पूर्वं चापरं चैवमेवाय पुरुष एतावुभावंतावनुसचरति स्वप्नान्तं च बुद्धान्तं च ॥१८॥

तत्तत्रैतस्मिन्यथाप्रदर्शितेऽर्थे दृष्टान्तोऽयमुपादीयते यथा लोके महामत्स्यो महाश्चासौ मत्स्यश्च नादेयेन स्रोतसाऽहार्य इत्यर्थ। स्रोतश्च विष्टभयति स्वच्छदचारी उभे कूले नद्या पूर्व चापरं चानुक्रमेण संचरति। सचरन्नपि कूलद्वयं तन्मध्यवर्तिना उदकस्रोतोवेगेन न परवशीक्रियते। एवमेवाय पुरुष एतावुभौ अतौ अनुसचरति। कौ तौ? स्वप्नान्तं च बुद्धान्तं च। दृष्टान्तप्रदर्शनफलं तु मृत्युरूप। कार्यकरणसंघात सह तत्प्रयोजकाभ्या कामकर्मभ्या अनात्मधर्म, अय चात्मा एतस्माद्विलक्षण इति विस्तरतो व्याख्यातम् ॥१८॥

अत्र च स्थानत्रयानुसंचारेण स्वयंज्योतिष आत्मन कार्यकरणसघातव्यतिरिक्तस्य कामकर्मभ्या विविक्ततोक्ता। स्वतो नायं संसारधर्मवानुपाधिनिमित्तमेव त्वस्य संसारित्वं अविद्याध्यारोपितमित्येष समुदायार्थ उक्त। तत्र च जाग्रत्स्वप्नसुषुप्तस्थानाना त्रयाणा विप्रकीर्णरूप उक्तो, न पुंजीकृत्येकत्र दर्शितः। यस्माज्जागरिते ससंग समृत्यु सकार्यकरणसंघात उपलक्ष्यतेऽविद्यया। स्वप्ने तु कामसंयुक्तो मृत्युरूपविनिर्मुक्त उपलभ्यते। सुषुप्ते पुन संप्रसन्नोऽसगो भवतीत्यसगताऽपि दृश्यते। एकवाक्यतया तूपसंह्रियमाणं फलं

नित्यमुक्तबुद्धशुद्धस्वभावताऽस्य नैकत्र पुंजीकृत्य प्रदर्शितेति तत्प्रदर्शनाय कंडिकारभ्यते। सुषुप्ते ह्येवंरूपताऽस्य वक्ष्यमाणा 'तद्वा अस्यैतदतिच्छंदा अपहतपाप्माऽभयं रूप' इति। यस्मादेवंरूपं विलक्षणं सुषुप्तं प्रविविक्षति। तत्कथमित्याह— दृष्टान्तेनास्यार्थस्य प्रकटीभावो भवतीति तत्र दृष्टान्त उपादीयते—

तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः सहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्न पश्यति ॥१९॥

तद्यथाऽस्मिन्नाकाशे भौतिके श्येनो वा सुपर्णो वा। सुपर्णशब्देन क्षिप्रश्येन उच्यते। यथा आकाशेऽस्मिन्विहृत्य विपरिपत्य श्रान्तो नानापरिपतनलक्षणेन कर्मणा परिखिन्न, सहत्य पक्षौ सगमय्य सप्रसार्य पक्षौ, सम्यग्लीयते अस्मिन्निति संलयो नीडो, नीडायैव ध्रियते स्वात्मनैव धार्यते स्वयमेव। यथायं दृष्टान्त, एवमेवाय पुरुष एतस्मा एतस्मै अताय धावति। अंतशब्दवाच्यस्य विशेषणं— यत्र यस्मिन्नते सुप्तो न कचन न कंचिदपि काम कामयते। तथा च न कंचन स्वप्न पश्यति। न कंचन कामामिति स्वप्नबुद्धान्तयो अविशेषेण सर्व. काम प्रतिषिध्यते कचन इत्यविशेषिताभिधानात्। तथा न कचन स्वप्नमिति। जागरितेऽपि यद्दर्शनं तदपि स्वप्नं मन्यते श्रुति अत आह न कचन स्वप्नं पश्यतीति। तथा च श्रुत्यंतरं 'तस्य त्रय आवसथास्त्रय स्वप्ना' इति। यथा दृष्टान्ते पक्षिण परिपतनजश्रमापनुत्तये स्वनीडोपसर्पण एव जाग्रत्स्वप्नयो कार्यकरणसयोगजक्रियाफलै संयुज्यमानस्य पक्षिण परिपतनज इव श्रमो भवति। तच्छ्रमापनुत्तये स्वात्मनो नीडमायतनं सर्वससारधर्मविलक्षण सर्वक्रियाकारकफलायासशून्य स्वमात्मानं प्रविशति ॥१९॥

यदि अस्यायं स्वभाव सर्वसंसारधर्मशून्यता, परोपाधिनिमित्त चास्य संसारधर्मित्वम्। यन्निमित्तं चास्य परोपाधिकृत संसारधर्मित्वं, सा चाविद्या। तस्या अविद्याया कि स्वाभाविकत्वं आहोस्वित्कामकर्मादिवदागंतुकत्वम्। यदि चागंतुकत्वं ततो विमोक्ष उपपद्यते। तस्याश्चागतुकत्वे कोपपत्ति., कथ वा नात्मधर्मोऽविद्या, इति सर्वानर्थबीजभूताया अविद्याया सतत्त्वावधारणार्थं परा कंडिका आरभ्यते—

ता वा अस्यैता हिता नाम नाड्यो यथा केश सहस्रधा भिन्नस्तावता-

ऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिंगलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैन घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेद सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक ॥२०॥

ता वै अस्य शिर पाण्यादिलक्षणस्य पुरुषस्यैता हिता नाम नाड्यो, यथा केश सहस्रधा भिन्नस्तावता तावत्परिमाणेनाणिम्ना अणुत्वेन तिष्ठन्ति । ताश्च शुक्लस्य रसस्य नीलस्य पिंगलस्य हरितस्य लोहितस्य पूर्णा एतै शुक्लत्वादिभी रसविशेषै पूर्णा इत्यर्थ । एते च रसाना वर्णविशेषा वातपित्तश्लेष्मणा इतरेतरसंयोगवैषम्यविशेषाद्विचित्रा बहवश्च भवन्ति । तास्वेवविधासु नाडीषु सूक्ष्मासु बालाग्रसहस्रभेदपरिमाणासु शुक्लादिरसपूर्णासु सकलदेहव्यापिनीषु सप्तदशक लिंग वर्तते । तदाश्रिता सर्वा वासना उच्चावचसंसारधर्मानुभवजनिता । तल्लिंग वासनाश्रय सूक्ष्मत्वात्स्वच्छं स्फटिकमणिकल्प नाडीगतरसोपाधिसंसर्गवशात् धर्माधर्मप्रेरितोद्भूतवृत्तिविशेष स्त्रीरथहस्त्याद्याकारविशेषैर्वासनाभि प्रत्यवभासते । अथैव सति यत्र यस्मिन्काले केचन शत्रवोऽन्ये वा तस्करा मामागत्य घ्नन्तीति मृषैव वासनानिमित्त प्रत्ययोऽविद्याख्यो जायते तदेतदुच्यते— एन स्वप्नदश घ्नन्तीवेति । तथा जिनन्तीव वशीकुर्वन्तीव । न केचन घ्नन्ति नापि वशाकुर्वन्ति, केवलं त्वविद्यावासनोद्भवनिमित्त भ्रान्तिमात्रम् । तथा हस्तीवैन विच्छाययति विच्छादयति विद्रावयति धावयतीवेत्यर्थ । गर्तमिव पतति गर्त जीर्णकूपादिकमिव पतन्तमात्मानमुपलक्षयति । तादृशी ह्यस्य मृषा वासना उद्भवति अत्यंतनिकृष्टाऽधर्मोद्भासितान्त करणवृत्त्याश्रया दु खरूपत्वात् । कि बहुना, यदेव जाग्रद्भय पश्यति हस्त्यादिलक्षण, तदेव भयरूप अत्रास्मिन्स्वप्ने विनैव हस्त्यादिरूप भयमविद्यावासनया मृषैवोद्भूतया मन्यते । अथ पुनर्यत्राविद्याऽपकृष्यमाणा विद्या चोत्कृष्यमाणा किंविषया किंलक्षणा चेत्युच्यते— अथ पुनर्यत्र यस्मिन्काले देव इव स्वयं भवति । देवताविषया विद्या यदोद्भूता जागरितकाले, तदोद्भूतया वासनया देवमिवात्मान मन्यते । स्वप्नेऽपि तदुच्यते— देव इव राजेव राज्यस्थोऽभिषिक्त स्वप्नेऽपि राजाहमिति मन्यते राजवासनावासित । एवं अत्यंतप्रक्षीयमाणाऽविद्या उद्भूता च विद्या सर्वात्मविषया यदा, तदा स्वप्नेऽपि तद्भावभावितोऽहमेवेदं सर्वोऽस्मीति मन्यते । स य सर्वात्मभाव

सोऽस्यात्मन परमो लोक परम आत्मभाव स्वाभाविक । यत्तु सर्वात्मभावादर्वाग्बालाग्रमात्रमप्यन्यत्वेन दृश्यते नाहमस्मीति, तदवस्थाऽविद्या । तया अविद्यया ये प्रत्युपस्थापिता अनात्मभावा लोका तेऽपरमा स्थावरान्ता । तान्सव्यवहारविषयाल्लोकानपेक्ष्याय सर्वात्मभाव समस्तोऽनतरोऽबाह्य सोऽस्य परमो लोक । तस्मादपकृष्यमाणायामविद्याया विद्याया च काष्ठा गताया सर्वात्मभावो मोक्ष । यथा स्वयज्योतिष्ट्व स्वप्ने प्रत्यक्षत उपलभ्यते तद्वद्विद्याफलमुपलभ्यत इत्यर्थ ।

तथाऽविद्यायामपयुत्कृष्यमाणाया तिरोधायमानाया च विद्यायामविद्याया फलं प्रत्यक्षत एवोपलभ्यते 'अथ यत्रैन घ्नन्तीव जिनन्तीव' इति । ते एते विद्याविद्याकार्ये सर्वात्मभाव परिच्छिन्नात्मभावश्च । विद्यया शुद्धया सर्वात्मा भवति । अविद्यया चासर्वो भवति । अन्यत कुतश्चित्प्रविभक्तो भवति । यत प्रविभक्तो भवति तेन विरुध्यते । विरुद्धत्वाद्धन्यते जीयते विच्छाद्यते च । असर्वविषयत्वे च भिन्नत्वादेतद्भवति । समस्तस्तु सन्कुतो भिद्यते येन विरुध्येत, विरोधाभावे केन हन्यते जीयते विच्छाद्यते च । अत इदमविद्याया सतत्त्वमुक्त भवति —सर्वात्मान सन्तमसर्वात्मत्वेन ग्राहयति । आत्मनोऽन्यद्वस्त्वंतरमविद्यमान प्रत्युपस्थापयति । आत्मानमसर्वमापादयति । ततस्तद्विषय कामो भवति । यतो भिद्यते कामत क्रियामुपादत्ते । तत फलम्— तदेतदुक्तम् । वक्ष्यमाण च 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादि । इदमविद्याया सतत्त्व सह कार्येण प्रदर्शितम् । विद्यायाश्च कार्य सर्वात्मभाव प्रदर्शितोऽविद्याया विपर्ययेण । सा चाविद्या नात्मन स्वाभाविको धर्मो, यस्माद्विद्यायामुत्कृष्यमाणाया स्वयमपचीयमाना सती काष्ठा गताया विद्याया परिनिष्ठिते सर्वात्मभावे सर्वात्मना निवर्तते, रज्ज्वामिव सर्पज्ञान रज्जुनिश्चये । तच्चोक्तं 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादि । तस्मान्नात्मधर्मोऽविद्या । न हि स्वाभाविकस्योच्छित्ति कदाचिदपपद्यते सवितुरिवौष्ण्यप्रकाशयो । तस्मात्तस्या मोक्ष उपपद्यते ॥२०॥

तद्वा अस्यैतदतिच्छंदा अपहतपाप्माभय रूपम् । तद्यथा प्रियया स्त्रिया सपरिष्वक्तो न बाह्य किचन वेद नान्तरमेवमेवाय पुरुष. प्राज्ञेनात्मना

संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् ॥२१॥

इदानी योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यं, स प्रत्यक्षतो निर्दिश्यते यत्राविद्याकामकर्माणि न सन्ति । तदेतत्प्रस्तुतं— 'यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति' इति । तदेतद्वा अस्य रूपं यः सर्वात्मभाव सोऽस्य परमो लोक इत्युक्तस्तदतिच्छंदा अतिच्छदमित्यर्थ । रूपपरत्वात् । छंद· कामोऽतिगतश्छंदो यस्माद्रूपात्तदतिच्छंदं रूपम् । अन्योऽसौ सान्तश्छंद शब्दो गायत्र्यादिच्छंदोवाची । अयं तु कामवचनोऽत स्वरात एव । तथापि अतिच्छंदा इति पाठ स्वाध्यायधर्मो द्रष्टव्य । अस्ति च लोके कामवचनप्रयुक्त छंदशब्द स्वच्छंद परच्छंद इत्यादौ । अतोऽतिच्छंदं इत्येवमुपनेयं कामवर्जितमेतद्रूपमित्यस्मिन्नर्थे । तथाऽपहतपाप्म । पाप्मशब्देन धर्माधर्मावुच्येते । 'पाप्मभि संसृज्यते' 'पाप्मनो विजहाति' इत्युक्तत्वात् । अपहतपाप्म धर्माधर्मवर्जितमित्येतत् । किंच, अभयम् । भयं हि नामाविद्याकार्यम् । 'अविद्यया भयं मन्यते' इति ह्युक्तम् । तत्कार्यद्वारेण कारणप्रतिषेधोऽयम् । अभयं रूपमित्यविद्यावर्जितमित्येतत् । यदेतद्विद्याफलं सर्वात्मभाव , तदेतदतिच्छंदापहतपाप्माभयं रूपं सर्वसंसारधर्मवर्जितमतोऽभयं रूपमेतत् । इदं च पूर्वमेवोपन्यस्तं अतीतानंतरब्राह्मणसमाप्तौ 'अभय वै जनक प्राप्तोऽसि' इत्यागमत । इह तु तर्कत प्रपंचित दर्शितागमार्थप्रत्ययदार्ढ्याय ।

अयमात्मा स्वय चैतन्यज्योति स्वभाव सर्वं स्वेन चैतन्यज्योतिषाऽवभासयति— स यत्तत्र किंचित्पश्यति रमते चरति जानाति चेत्युक्तम् । स्थितं चैतन्न्यायतो नित्यं स्वरूपं चैतन्यज्योतिष्ट्वमात्मन । स यद्यात्मा अत्राविनष्टः स्वेनैव रूपेण वर्तते कस्मादयमहमस्मीत्यात्मान वा बहिर्वेमानि भूतानीति जाग्रत्स्वप्नयोरिव न जानातीत्यत्रोच्यते । श्रृण्वत्राज्ञानहेतुम् । एकत्वमेवाज्ञानहेतु । तत्कथमिति उच्यते । दृष्टान्तेन हि प्रत्यक्षीभवति विवक्षितोऽर्थ इत्याह— तत्तत्र यथा लोके प्रिययेष्टया स्त्रिया संपरिष्वक्तः सम्यक्परिष्वक्त कामयन्त्या कामुकः सन्न बाह्यमात्मन किंचन किंचिदपि वेद मत्त अन्यद्वस्त्विति, न चान्तरं, अयमहमस्मि सुखी दु खी वेति । अपरिष्वक्तस्तु तया प्रविभक्तो जानाति सर्वमेव बाह्यमाभ्यंतरं च । परिष्वंगोत्तरकालं त्वेकत्वापत्तेर्न जानाति । एवमेव यथा

दृष्टान्तोऽयं पुरुष क्षेत्रज्ञो भूतमात्रासंसर्गत सैधवखिल्यवत्प्रविभक्तो जलादौ चंद्रादिप्रतिबिंबवत्कार्यकरण इह प्रविष्ट, सोऽय पुरुष प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा संपरिष्वक्त सम्यक्परिष्वक्त एकीभूतो निरंतर सर्वात्मा, न बाह्यं किंचन वस्त्वंतरं नाप्यान्तरमात्मनि अयमहमस्मि सुखी दु खी वेति वेद। तत्र चैतन्यज्योति स्वभावत्वे कस्मादिह न जानातीति यदप्राक्षी, तत्रायं हेतुर्मयोक्त एकत्वं यथा स्त्रीपुंसयो संपरिष्वक्तयो। तत्रार्थान्नानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति। नानात्वे च कारण—आत्मनो वस्त्वंतरस्य प्रत्युपस्थापिकाऽविद्येत्युक्तम्। तत्र चाविद्याया यदा प्रविविक्तो भवति, तदा सर्वैणैकत्वमेवास्य भवति। ततश्च ज्ञानज्ञेयादिकारकविभागेऽसति, कुतो विशेषविज्ञानप्रादुर्भाव कामो वा संभवति स्वाभाविके स्वरूपस्थ आत्मज्योतिषि।

यस्मादेवं सर्वैकत्वमेवास्य रूप अतस्तद्वा अस्यात्मन स्वयंज्योति-स्वभावस्येतद्रूपमाप्तकाम यस्मात्समस्तमेतत्तस्मादाप्ता कामा अस्मिन् रूपे तदिदमाप्तकामम्। यस्य ह्यन्यत्वेन प्रविभक्त काम तदनाप्तकाम भवति। यथा जागरितावस्थाया देवदत्तादिरूपं, न त्विदं तथा कुतश्चित्प्रविभज्यते अतस्तदाप्तकाम भवति। किमन्यस्माद्वस्स्वतराच्च प्रविभज्यते आहोस्विदात्मैव तद्वस्त्वतरमत आह— नान्यदस्त्यात्मन। कथम्? यत आत्मकाम आत्मैव कामा यस्मिन् रूपेऽन्यत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयो-तस्यात्मैव अन्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादात्मकामम्। अत एवाकाममेतद्रूपं काम्यविषयाभावात्। शोकान्तर शोकच्छिद्रं शोकशून्यमित्येतत् शोकमध्यमिति वा, सर्वथाप्यशोकमेतद्रूपं शोकवर्जितमित्यर्थ ॥२१॥

अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदाः। अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चांडालोऽचांडालः पौल्कसोऽपौल्कस श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागत पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वान्शोकान्हृदयस्य भवति ॥२२॥

प्रकृत स्वयंज्योतिरात्माऽविद्याकामकर्मविनिर्मुक्त इत्युक्तम्। असगस्वादात्मन आगतुकत्वाच्च तेषाम्। तत्रैवमाशंका जायते। चैतन्यस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्रीपुंसयोरिव सपरिष्वक्तयोरित्युक्तम्। तत्र प्रासगिकमेतदुक्तं कामकर्मादिवत्स्वयंज्योतिष्ट्वमप्यस्यात्मनो न स्वभाव, यस्मात्संप्रसादे

नोपलभ्यते । इत्याशंकाया प्राप्ताया तन्निराकरणाय स्त्रीपुंसयो दृष्टान्तोपादानेन विद्यमानस्यैव स्वयंज्योतिष्ट्वस्य सुषुप्तेऽग्रहणमेकीभावाद्धेतो न तु कामकर्मादिवदागंतुकम् । इत्येतत्प्रासंगिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्तयति । अत्र चैतत्प्रकृतं अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं, यत्सुषुप्ते आत्मनो गृह्यते प्रत्यक्षत इति । तदेतद्यथाभूतमेवाभिहित सर्वसबधातीतमेतत् रूपमिति । यस्मादत्रैतस्मिन्सुषुप्तस्थाने अतिच्छदापहतपाप्माभयमेतत् रूप तस्मादत्र पिता जनक । तस्य च जनयितृत्वाद्यात्पितृत्व पुत्र प्रति तत्कर्मनिमित्त, तेन च कर्मणाऽयमसंबद्धोऽस्मिन्काले । तस्मात्पितापुत्रसबधनिमित्तात्कर्मणो विनिर्मुक्तत्वात्पिताऽप्यपिता भवति । तथा पुत्रोऽपि पितुरपुत्रो भवतीति सामर्थ्याद्गम्यते । उभयोर्हि संबंधनिमित्त कर्म । तदयमतिक्रान्तो वर्तते । 'अपहतपाप्मा' इति ह्युक्तम् ।

तथा माताऽमाता । लोका कर्मणा जेतव्या जिताश्च तत्कर्मसंबंधाभावाल्लोका अलोका । तथा देवा कर्मागभूता तत्कर्मसबधात्क्षयाद्देवा अदेवा । तथा वेदा साध्यसाधनसबधाभिधायका मंत्रलक्षणाश्चाभिधायकत्वेन कर्मागभूता, अधीता अध्येतव्याश्च कर्मनिमित्तमेव सबध्यन्ते पुरुषेण । तत्कर्मातिक्रमणादेतस्मिन्काले वेदा अप्यवेदा सपद्यन्ते ।

न केवलं शुभकर्मसबधातीत , किं तर्हि, अशुभैरप्यत्यतघोरै कर्मभि असबद्ध एवाय वर्तत इत्येतमर्थमाह— अत्र स्तेनो ब्राह्मणसुवर्णहर्ता भ्रूणघ्ना सह पाठादवगम्यते । स तेन घोरेण कर्मणैतस्मिन्काले विनिर्मुक्तो भवति । येनायं कर्मणा महापातकी स्तेन उच्यते । तथा भ्रूणहाऽभ्रूणहा । तथा चाडालो न केवल प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्त , किं तर्हि, सहजेनापि अत्यंतनिकृष्टजातिप्रापकेणापि विनिर्मुक्त एवायम् । चाडालो नाम शूद्रेण ब्राह्मण्यामुत्पन्न , चंडाल एव चाडाल । स जातिनिमित्तेन कर्मणाऽसंबद्धत्वादचाडालो भवति । पौल्कस पुल्कस एव पौल्कस शूद्रेणैव क्षत्रियायामुत्पन्न । सोऽप्यपुल्कसो भवति । तथा आश्रमलक्षणैश्च कर्मभिरसंबद्धो भवतीत्युच्यते । श्रमण परिव्राट् यत्कर्मनिमित्तो भवति स तेन विनिर्मुक्तत्वादश्रमण । तथा तापसो वानप्रस्थोऽतापस । सर्वेषा वर्णाश्रमादीना उपलक्षणार्थमुभयोर्ग्रहणम् ।

किं बहुना? अनन्वागत नान्वागतमनन्वागतं असंबद्धमित्येतत् पुण्येन

शास्त्रविहितेन कर्मणा, तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन। रूपपरत्वान्नपुसकलिंगम्। 'अभय रूपं' इति ह्युनुवर्तते। किं पुनरसंबद्धत्वे कारणमिति तद्धेतुरुच्यते— तीर्णोऽतिक्रान्तो हि यस्मादेवरूपस्तदा तस्मिन्काले सर्वाञ्छोकाञ्शोकाः कामा। इष्टविषयप्रार्थना हि तद्विषयवियोगे शोकत्वमापद्यते। इष्टं हि विषयमप्राप्त वियुक्तं चोद्दिश्य चिंतयानस्तद्गुणान्संतप्यते पुरुषोऽत शोको रति काम इति पर्याया। यस्मात्सर्वकामातीतो ह्यत्राय भवति। 'न कंचन काम कामयते' 'अतिच्छंदा' इति ह्युक्त, तत्प्रक्रियापतितोऽयं शोकशब्द कामवचन एव भवितुमर्हति। कामश्च कर्महेतु। वक्ष्यति हि 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते' इति। अत सर्वकामातितीर्णत्वाद्युक्तमुक्त अनन्वागत पुण्येनेत्यादि।

हृदयस्य हृदयमिति पुडरीकाकारो मासपिंडस्तत्स्थमंतःकरण बुद्धि हृदयमित्युच्यते। तात्स्थ्यान्मचक्रोशनवत्। हृदयस्य बुद्धेर्ये शोका। बुद्धिसंश्रया हि ते। 'काम संकल्पो विचिकित्सेत्यादि सर्व मन एव' इत्युक्तत्वात्। वक्ष्यति च 'कामा येऽस्य हृदि श्रिता' इति। आत्मसश्रयभ्रान्त्यपनोदाय हीदं वचनं, हृदि श्रिता हृदयस्य शोका इति च। हृदयकरणसबधातीतश्चायं अस्मिन्काले ऽतिक्रामति मृत्यो रूपाणीति ह्युक्तम्। हृदयकरणसबंधातीतत्वात्तत्सश्रयकामसंबंधातीतो भवतीति युक्ततरं वचनम्॥

ये तु वादिनो हृदि श्रिता कामा वासनाश्च हृदयसंबधिनमात्मानमुपसृप्योपश्लिष्यान्ति, हृदयवियोगेऽपि च आत्मन्यवतिष्ठन्ते पुटतैलस्थ इव पुष्पादिगध इत्याचक्षते। तेषा 'काम संकल्पो' 'हृदये ह्येव रूपाणि' 'हृदयस्य शोका' इत्यादीना वचनानामानर्थक्यमेव। हृदयकरणोत्पाद्यत्वादिति चेत्। न। 'हृदि श्रिता' इति विशेषणात्। नहि हृदयस्य करणमात्रत्वे 'हृदि श्रिता' इति वचनं समंजस, 'हृदये ह्येव रूपाणि प्रतिष्ठितानि' इति च। आत्मविशुद्धेश्च विवक्षितत्वात् हृच्छ्रयणवचनं यथार्थमेव युक्तम्। 'प्रायतीव लेलायतीव' इति च श्रुतेरन्यार्थसभवात्। 'कामा येऽस्य हृदि श्रिता' इति विशेषणादात्माश्रया अपि सन्तीति चेत्। न। अनाश्रितापेक्षत्वात्। नात्र आश्रयान्तरमपेक्ष्य ये हृदीति विशेषणं, किं तर्हि ये ह्यनाश्रिता कामा तानपेक्ष्य विशेषणम्। ये त्वप्ररूढा भविष्या भूताश्च प्रतिपक्षतो निवृत्ता ते नैव हृदि श्रिताः। संभाव्यन्ते च

ते । अतो युक्तं तानपेक्ष्य विशेषणं— ये प्ररूढा वर्तमाना विषये ते सर्वे प्रमुच्यन्त इति । तथापि विशेषणानर्थक्यमिति चेत् । न । तेषु यत्नाधिक्याद्धेयार्थत्वात् । इतरथा अश्रुतमनिष्टं च कल्पित स्यादात्माश्रयत्वं कामानाम् । न 'कंचन कामं कामयते' इति प्राप्तप्रतिषेधादात्माश्रयत्व कामाना श्रुतमेवेति चेत् । न । 'सधी स्वप्नो भूत्वा' इति परनिमित्तत्वात्कामाश्रयत्वप्राप्ते । असंगवचनाच्च । न हि कामाश्रयत्वेऽसंगवचनमुपपद्यते । संगश्च काम इत्यवोचाम । 'आत्मकाम ' इति श्रुतेरात्मविषयोऽस्य कामो भवतीति चेत् । न । व्यतिरिक्तकामाभावार्थत्वात्तस्या । वैशेषिकादितन्त्रन्यायोपपन्नमात्मन कामाद्याश्रयत्वमिति चेत् । न । 'हृदि श्रिता' इत्यादिविशेषश्रुतिविरोधादनपेक्ष्यास्ता वैशेषिकादितंत्रोपपत्तय । श्रुतिविरोधे न्यायाभासत्वोपगमात् । स्वयज्योतिष्ट्वबाधनाच्च । कामादीना च स्वप्ने केवलदृशिमात्रविषयत्वात्स्वयंज्योतिष्ट्व सिद्ध स्थित च बाध्येत । आत्मसमवायित्वे दृश्यत्वानुपपत्ते , चक्षुर्गतविशेषवत् । द्रष्टुर्हि दृश्यमर्थान्तरभूतमिति द्रष्टु स्वयंज्योतिष्ट्वं सिद्धम् । तद्बाधितं स्याद्यदि कामाद्याश्रयत्वं परिकल्प्येत । सर्वशास्त्रार्थविप्रतिषेधाच्च । परस्यैकदेशकल्पनाया कामाद्याश्रयत्वे च सर्वशास्त्रार्थजातं कुप्येत । एतच्च विस्तरेण चतुर्थेऽवोचाम । महता हि प्रयत्नेन कामाद्याश्रयत्वकल्पनाः प्रतिषेद्धव्या , आत्मन परेणैकत्वशास्त्रार्थसिद्धये । तत्कल्पनाया पुन क्रियमाणाया शास्त्रार्थ एव बाधित स्यात् । यथेच्छादीनामात्मधर्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्च उपनिषच्छास्त्रार्थेन न संगच्छन्ते, तथेयमपि कल्पना उपनिषच्छास्त्रार्थबाधनान्नादरणीया ॥२२॥

स्त्रीपुसयोरिवैकत्वान्न पश्यतीत्युक्तं, स्वयं ज्योतिरिति च । स्वयंज्योतिष्ट्वं नाम चैतन्यात्मस्वभावता । यदि हि अग्न्युष्णत्वादिवच्चैतन्यात्मस्वभाव आत्मा स कथमेकत्वेऽपि हि स्वभावं जह्यान्न जानीयात् ? अथ न जहाति, कथमिह सुषुप्ते न पश्यति ? विप्रतिषिद्धमेतत्— चैतन्यमात्मस्वभावो न जानाति चेति । न विप्रतिषिद्धं, उभयमप्येतदुपपद्यते एव । कथम्—

यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥२३॥

यद्वै सुषुप्ते तन्न पश्यति पश्यन्वै तत्तत्र पश्यन्नेव न पश्यति । यत्तत्र सुषुप्ते

न पश्यतीति जानीषे तन्न तथा गृह्णीया । कस्मात्? पश्यन्वै भवति तत्र । नन्वेवं न पश्यतीति सुषुप्ते जानीमो, यतो न चक्षुर्वा मनो वा दर्शने करणं व्यापृतमस्ति । व्यापृतेषु हि दर्शनश्रवणादिषु पश्यतीति व्यवहारो भवति शृणोतीति वा । नच व्यापृतानि करणानि पश्याम । तस्मान्न पश्यत्येवायम् । न हि । किं तर्हि पश्यन्नेव भवति । कथम्? न हि यस्मात् द्रष्टुर्दृष्टिकर्तुर्या दृष्टिस्तस्या दृष्टेर्विपरिलोपो विनाश स न विद्यते । यथाऽग्नेरौष्ण्यं यावदग्निभावि, तथायं चात्मा द्रष्टाऽविनाशी, अतोऽविनाशित्वादात्मनो दृष्टिरप्यविनाशिनी, यावत् द्रष्टृभाविनी हि सा ।

ननु विप्रतिषिद्धमिदमभिधीयते द्रष्टु सा दृष्टिर्न विपरिलुप्यत इति च । दृष्टिश्च द्रष्ट्रा क्रियते । दृष्टिकर्तृत्वाद्धि द्रष्टेत्युच्यते । क्रियमाणा च द्रष्ट्रा दृष्टिर्न विपरिलुप्यत इति चाशक्य वक्तुम् । ननु न विपरिलुप्यत इति वचनादविनाशिनी स्यात् । न । वचनस्य ज्ञापकत्वात् । न हि न्यायप्राप्तो विनाशकृतकस्य वचनशतेनापि वारयितुं शक्यते । वचनस्य यथाप्राप्तार्थज्ञापकत्वात् । नैष दोष । आदित्यादिप्रकाशकत्ववत् दर्शनोपपत्ते । यथा आदित्यादयो नित्यप्रकाशस्वभावा एव सन्त स्वाभाविकेन नित्येनैव प्रकाशेन प्रकाशयन्ति । न त्वप्रकाशात्मानः सन्त प्रकाश कुर्वन्त प्रकाशयन्तीत्युच्यन्ते । किं तर्हि, स्वभावेनैव नित्येन प्रकाशेन । तथाऽयमप्यात्मा अविपरिलुप्तस्वभावया दृष्टया नित्यया द्रष्टेत्युच्यते । गौणं तर्हि द्रष्टृत्वम् । न । एवमेव मुख्यत्वोपपत्ते । यदि त्वन्यथाऽप्यात्मनो द्रष्टृत्व दृष्ट, तदाऽस्य द्रष्टृत्वस्य गौणत्वं, न त्वात्मनोऽन्यो दर्शनप्रकारोऽस्ति । तदेवमेव मुख्यं द्रष्टृत्वमुपपद्यते नान्यथा । यथा आदित्यादीना प्रकाशयितृत्वं नित्येनैव स्वाभाविकेनाक्रियमाणेन प्रकाशेन, तदेव च प्रकाशयितृत्वं मुख्यं, प्रकाशयितृत्वान्तरानुपपत्ते । तस्मान्न द्रष्टुर्दृष्टिर्विपरिलुप्यते इति न विप्रतिषेधगंधोऽप्यास्ति ।

ननु अनित्यक्रियाकर्तृविषय एव तृच्प्रत्ययान्तस्य शब्दस्य प्रयोगो दृष्टो यथा छेत्ता भेत्ता गंतेति, तथा द्रष्टेत्यत्रापीति चेत् । न । प्रकाशयितेति दृष्टत्वात् । भवतु प्रकाशकेष्वन्यथाऽसंभवान्न त्वात्मनीति चेत् । न । दृष्टविपरिलोपश्रुते । पश्यामि न पश्यामीत्यनुभवदर्शनान्नेति चेत् । न । करणव्यापारविशेषापेक्षत्वात् । उद्धतचक्षुषा च स्वप्ने आत्मदृष्टे अविपरिलोपदर्शनात् । तस्माद-

विपरिलुप्तस्वभावैव आत्मनो दृष्टि । अतस्तयाऽविपरिलुप्तया दृष्ट्या स्वयं-ज्योति स्वभावया पश्यन्नेव भवति सुषुप्ते ।

कथ तर्हि न पश्यतीति । उच्यते— न तु तदस्ति । किं तत् ? द्वितीयं विषयभूतम् । किविशिष्टम् ? ततो द्रष्टुरन्यदन्यत्वेन विभक्त यत्पश्येद्यदुपलभेत । यद्धि तद्विशेषदर्शनकारणमंत करणं चक्षू रूप च, तदविद्ययाऽन्यत्वेन प्रत्युपस्थापितमासीत् । तदेतस्मिन्काले एकीभूतम् । आत्मन परेण परिष्वगात् । द्रष्टुर्हि परिच्छिन्नस्य विशेषदर्शनाय करणमन्यत्वेन व्यवतिष्ठते । अयं तु स्वेन सर्वात्मना संपरिष्वक्त स्वेन परेण प्राज्ञेनात्मना प्रिययेव पुरुष । तेन न पृथक्त्वेन व्यवस्थितानि करणानि विषयाश्च । तदभावाद्विशेषदर्शन नास्ति । करणादिकृत हि तन्नात्मकृतम् । आत्मकृतामिव प्रत्यवभासते । तस्मान्तत्कृतेयं भ्रान्ति आत्मनो दृष्टि परिलुप्यत इति ॥२३॥

यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त यज्जिघ्रेत् ॥२४॥ यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त यद्रसयेत् ॥२५॥ यद्वै तन्न वदति वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त यद्वदेत् ॥२६॥ यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतु. श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त यच्छृणुयात् ॥२७॥ यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि मंतुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥२८॥ यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति न हि स्प्रष्टु· स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥२९॥ यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त यद्विजानीयात् ॥३०॥

समानमन्यत् । यद्वै तन्न जिघ्रति । यद्वै तन्न रसयते । यद्वै तन्न वदति । यद्वै तन्न शृणोति । यद्वै तन्न मनुते । यद्वै तन्न स्पृशति । यद्वै तन्न विजाना-

तीति । मननविज्ञानयो दृष्ट्यादिसहकारित्वेऽपि सति चक्षुरादिनिरपेक्षो भूत-भविष्यद्वर्तमानविषयव्यापारो विद्यत इति पृथग्ग्रहणम् ॥

किं पुनर्दृष्ट्यादीना अग्नेरौष्ण्यप्रकाशनज्वलनादिवद्धर्मभेद, आहोस्विद-भिन्नस्यैव धर्मस्य परोपाधिनिमित्त धर्मान्यत्वमिति । अत्र केचिद्व्याचक्षते— आत्मवस्तुन स्वत एवैकत्व नानात्व च । यथा गोर्गोद्रव्यतयैकत्व, सास्नादीना धर्माणा परस्परतो भेद । यथा स्थूलेष्वेकत्व नानात्वं च, तथा निरवयवेष्वमू-र्तवस्तुष्वेकत्व नानात्व चानुमेयम् । सर्वत्राव्यभिचारदर्शनादात्मनोऽपि तद्वदेव दृष्ट्यादीना परस्पर नानात्व, आत्मना चैकत्वमिति । न । अन्यपरत्वात् । न हि दृष्ट्यादिधर्मभेदप्रदर्शनपरामिद वाक्य यद्वै तदित्यादि । किं तर्हि, यदि चैतन्यात्मज्योति, कथ न जानाति सुषुप्ते ? नन्वमतो न चेतन्यात्मज्योति इत्येवमाशकाप्राप्तौ, तन्निराकरणायैतदारब्ध यद्वै तदित्यादि । यदस्य जाग्रत्स्व-प्नयोश्चक्षुराद्यनेकोपाधिद्वार चैतन्यात्मज्योति स्वाभाव्य उपलक्षित दृष्ट्याद्यभिधे-यव्यवहारापन्नं, सुषुप्ते उपाधिभेदव्यापारनिवृत्तौ अनुद्भास्यमानत्वादनुपलक्ष्य-माणस्वभावमपि उपाधिभेदेन भिन्नमिव यथाप्राप्तानुवादेनैव विद्यमानत्वमु-च्यते । तत्र दृष्ट्यादिधर्मभेदकल्पना विवक्षितार्थाऽनभिज्ञतया । सैन्धवघनव-त्प्रज्ञानैकरसघनश्रुतिविरोधाच्च । 'विज्ञानमानंदम् 'सत्य ज्ञानम्' 'प्रज्ञानं ब्रह्म' इत्यादिश्रुतिभ्यश्च । शब्दप्रवृत्तेश्च । लौकिकी च शब्दप्रवृत्तिश्चक्षुषा रूप विजानाति, श्रोत्रेण शब्द विजानाति, रसनेनान्नस्य रस विजानाति, इति च सर्वत्रैव च दृष्ट्यादिशब्दाभिधेयाना विज्ञानशब्दवाच्यतामेव दर्शयति । शब्द-प्रवृत्तिश्च प्रमाणम् । दृष्टान्तोपपत्तेश्च । यथा हि लोके स्वच्छस्वाभाव्ययुक्त-स्फटिक तान्निमित्तमेव केवल हरितनीललोहिताद्युपाधिभेदसंयोगात्तदाकारत्वं भजते । न च स्वच्छस्वाभाव्यव्यतिरेकेण हरितनीललोहितादिलक्षणा धर्मभेदा स्फटिकस्य कल्पयितुं शक्यन्ते । तथा चक्षुराद्युपाधिभेदसंयोगात्प्रज्ञानघनस्वभा-वस्यैव आत्मज्योतिषो दृष्ट्यादिशक्तिभेद उपलक्ष्यते । प्रज्ञानघनस्य स्वच्छस्वा-भाव्यात्स्फटिकस्वच्छस्वाभाव्यवत् । स्वयज्योतिष्ट्वाच्च । यथा च आदित्यज्योति अवभास्यभेदै सयुज्यमानं हरितनीलपीतलोहितादिभेदैरविभाज्यं तदाका-राभास भवति, तथा च कृत्स्न जगदवभासयच्चक्षुरादीनि च तदाकार भवति । तथा चोक्त 'आत्मनैवायं ज्योतिषास्ते' इत्यादि ।

न च निरवयवेष्वनेकात्मता शक्यते कल्पयितुम्। दृष्टान्ताभावात्। यदप्याकाशस्य सर्वगतत्वादिधर्मभेद परिकल्प्यते, परमाण्वादीना च गंधरसाद्यनेकगुणत्वं, तदपि निरूप्यमाण परोपाधिनिमित्तमेव भवति। आकाशस्य तावत्सर्वगतत्वं नाम न स्वतो धर्मोऽस्ति। सर्वोपाधिसंश्रयाद्धि सर्वत्र स्वेन रूपेण सत्त्वमपेक्ष्य सर्वगतत्वव्यवहार। न त्वाकाश क्वचिद्गतो वाऽगतो वा स्वत। गमनं हि नाम देशान्तरस्थस्य देशान्तरेण संयोगकारणम्। सा च क्रिया नैवाविशेषे सभवति। एव धर्मभेदा नैव सन्त्याकाशे। तथा परमाण्वादावपि। परमाणुर्नाम पृथिव्या गंधघनाया परमसूक्ष्मोऽवयवो गंधात्मक एव। न तस्य पुनर्गंधवत्त्व नाम शक्यते कल्पयितुम्। अथ तस्यैव रसादिमत्त्व स्यादिति चेन्न। तत्राप्यबादिसंसर्गानिमित्तत्वात्। तस्मान्न निरवयवस्यानेकधर्मवत्त्वे दृष्टान्तोऽस्ति। एतेन दृगादिशक्तिभेदाना पृथक्चक्षूरूपादिभेदेन परिणामभेदकल्पना परमात्मनि प्रत्युक्ता ॥२४–३०॥

यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥३१॥

जाग्रत्स्वप्नयोरिव यद्विजानीयात्तत् द्वितीयं प्रविभक्तमन्यत्वेन नास्तीत्युक्तम्। अत सुषुप्ते न विजानाति विशेषम्। ननु यद्यस्यायमेव स्वभाव, किंनिमित्तमस्य विशेषविज्ञानं स्वभावपरित्यागेन? अथ विशेषविज्ञानमेवास्य स्वभाव, कस्मादेष विशेषं न विजानातीति? उच्यते शृणु। यत्र यस्मिञ्जागरिते स्वप्ने वा अन्यदिव आत्मनो वस्त्वतरमिवाविद्यया प्रत्युपस्थापित भवति, तत्र तस्मादविद्याप्रत्युपस्थापितादन्य अन्यमिव आत्मानं मन्यमान असति आत्मनः प्रविभक्ते वस्त्वंतरेऽसति चात्मनि तत प्रविभक्ते, अन्योऽन्यत्पश्येदुपलभेत। तच्च दर्शित स्वप्ने प्रत्यक्षतो 'घ्नन्तीव जिनन्तीव' इति। तथाऽन्योऽन्यज्जिघ्रेद्रसयेद्वदेच्छृणुयान्मन्वीत स्पृशेद्विजानीयादिति ॥

सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्य एषाऽस्य परमा गतिरेषाऽस्य परमा सपदेषोऽस्य परमो लोक एषोऽस्य परम आनंद एतस्यैवानदस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥३२॥

यत्र पुन साऽविद्या सुषुप्ते वस्त्वंतरप्रत्युपस्थापिका शान्ता, तेनान्यत्वेन अविद्याप्रविभक्तस्य वस्तुनोऽभावात्तत्केन कं पश्येज्जिघ्रेद्विजानीयाद्वा। अत एवैनैव हि प्राज्ञेनात्मना स्वयंज्योति स्वभावेन सपरिष्वक्त समस्त संप्रसन्न आप्तकाम आत्मकाम सलिलवत्स्वच्छीभूत सलिल इव सलिल एको द्वितीयस्याभावात्। अविद्यया हि द्वितीय प्रविभज्यते। सा च शान्ताऽत्र अत एक। द्रष्टा दृष्टेरविपरिलुप्तस्वादात्मज्योति स्वभावाया। अद्वैतो द्रष्टव्यस्य द्वितीयस्याभावात्। एतदमृतमभयम्। एष ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोक। पर एवायमस्मिन्काले व्यावृत्तकार्यकरणोपाधिभेद स्वे आत्मज्योतिषि शान्तसर्वसंबंधो वर्तते हे सम्राट्। इति हैवं हैनं जनकमनुशशास अनुशिष्टवान् याज्ञवल्क्य इति श्रुतिवचनमेतत्।

कथं वाऽनुशशास? एषाऽस्य विज्ञानमयस्य परमा गति। यास्त्वन्या देहग्रहणलक्षणा ब्रह्मादिस्तबपर्यंता अविद्याकल्पितास्ता गतयोऽतोऽपरमा अविद्याविषयत्वात्। इयं तु देवत्वादिगतीना कर्मविद्यासाध्याना परमोत्तमा य समस्तात्मभावो, यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानातीति। एषैव च परमा सपत्सर्वासा संपदा विभूतीनामिय परमा स्वाभाविकत्वादस्या। कृतका ह्यन्या सपद। तथैषोऽस्य परमो लोक। येऽन्ये कर्मफलाश्रया लोकास्तेऽस्मादपरमा। अय तु न केनचन कर्मणा मीयते, स्वाभाविकत्वात्। एषोऽस्य परमो लोक। तथैषोऽस्य परम आनंद। यान्यन्यानि विषयेंद्रियसंबंधजनितान्यानदजातानि तान्यपेक्ष्य एषोऽस्य परम आनंदो, नित्यत्वात्। 'यो वै भूमा तत्सुखम्' इति श्रुत्यंतरात्। यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं मर्त्यममुख्यं सुखम्। इदं तु तद्विपरीतम्। अत एवैषोऽस्य परम आनंद। एतस्यैवानंदस्य मात्रा कलामविद्याप्रत्युपस्थापिता विषयेन्द्रियसंबंधकालविभाव्यामन्यानि भूतान्युपजीवन्ति। कानि तानि? तत एवानदादविद्यया प्रविभज्यमानस्वरूपाण्यन्यत्वेन तानि ब्रह्मण परिकल्प्यमानान्यन्यानि सन्त्युपजीवन्ति भूतानि विषयेन्द्रियसंपर्कद्वारेण विभाव्यमानाम् ॥३२॥

स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपति सर्वैर्मानुष्यकैर्भोगैः संपन्नतम. स मनुष्याणां परम आनंदोऽथ ये शत मनुष्याणामानंदाः स एक पितृणा जितलोकानामानंदोऽथ ये शतं पितृणां जितलोकानामानंदा

स एको गधर्वलोक आनदोऽथ ये शत गधर्वलोक आनदा. स एक कर्मदेवानामानदो ये कर्मणा देवत्वमभिसंपद्यन्तेऽथ ये शत कर्मदेवानामानदा· स एक आजानदेवानामानदा यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानदा स एक प्रजापतिलोक आनदो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शत प्रजापतिलोक आनदा स एको ब्रह्मलोक आनदो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनद एष ब्रह्मलोक सम्राडिति होवाच याज्ञवल्क्य सोऽह भगवते सहस्र ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयाचकार मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥३३॥

यस्य परमानदस्य मात्रा अवयवा ब्रह्मादिभिर्मनुष्यपर्यंतैर्भूतैरुपजीव्यन्ते, तदानदमात्राद्वारेण मात्रिण परमानदमाविजिगमयिषन्नाह, सैन्धवलवणशकलैरिव लवणशैलम् । स य कश्चिन्मनुष्याणा मध्ये राद्ध ससिद्धोऽविकल समग्रावयव इत्यर्थ । समृद्ध उपभोगोपकरणसपन्नो भवति । किंचान्येषा समानजातीयानामधिपति स्वतत्र पतिर्न माडलिक । सर्व समस्तै , मानुष्यकैरिति दिव्यभोगोपकरणनिवृत्त्यर्थ, मनुष्याणामेव यानि भोगोपकरणानि तै सपन्नानामप्यतिशयेन सपन्न सपन्नतम स मनुष्याणा परम आनंद । तत्र आनदानदिनोरभेदनिर्देशान्न अर्थान्तरभूतत्वमित्येतत् । परमानंदस्यैवेय विषयविषय्याकारेण मात्रा प्रसूतेति ह्युक्त 'यत्र वा अन्यदिव स्यात्' इत्यादिवाक्येन । तस्माद्युक्तोऽयं 'परम आनद' इत्यभेदनिर्देश । युधिष्ठिरादितुल्यो राजाऽत्रोदाहरणम् । इष्ट मनुष्यानदमादि कृत्वा शतगुणोत्तरोत्तरक्रमेणोत्क्रम्य परमानंद यत्र भेदो निवर्तते तमाविर्गमयति । अत्रायमानद शतगुणोत्तरोत्तरक्रमेण वर्धमानो यत्र बुद्धिकाष्ठामनुभवति, यत्र गणितभेदो निवर्तते, अन्यदर्शनश्रवणमननाभावात् तं परमानद विवक्षन्नाह— अथ ये मनुष्याणामेवंप्रकारा. शतमानंदभेदा स एक पितृणाम् । तेषा विशेषण जितलोकानामिति । श्राद्धादिकर्मभि पितॄस्तोषयित्वा तेन कर्मणा जितो लोको येषा ते जितलोका पितर. । तेषां पितृणा जितलोकाना मनुष्यानंदशतगुणीकृतपरिमाण एक आनंदो भवति । सोऽपि शतगुणीकृतो गंधर्वलोके एक आनदो भवति । स च शतगुणीकृत कर्मदेवानामेक आनद । अग्निहोत्रादिश्रौतकर्मणा ये देवत्वं

प्राप्नुवन्ति ते कर्मदेवा । तथैव आजानदेवानामेक आनद । आजानत एव उत्पत्तित एव ये देवास्ते आजानदेवा । यश्च श्रोत्रियोऽधीतवेदो, अवृजिनो वृजिन पापं तद्रहितो यथोक्तकारीत्यर्थ । अकामहतो वीततृष्ण आजानदेवेभ्योऽर्वाग्यावन्तो विषयास्तेषु । तस्य चैवंभूतस्य आजानदेवै समान आनद इत्येतदन्वाकृष्यते च—शब्दात् । तच्छतगुणीकृतपरिमाण प्रजापतिलोके एक आनदो विराट्शरीरे । तथा तद्विज्ञानवाञ्श्रोत्रियोऽवीतवेदश्च अवृजिन इत्यादि पूर्ववत् । तच्छतगुणाकृतपरिमाण एक आनंदो ब्रह्मलोके हिरण्यगर्भात्मनि । यश्चेत्यादि पूर्ववदेव । अत परं गणितनिवृत्ति. । एष परम आनद इत्युक्त । यस्य च परमानदस्य ब्रह्मलोकाद्यानदा मात्रा उदधेरिव विप्रुष । एवं शतगुणोत्तरोत्तरवृद्ध्युपेता आनदा यत्रैकता यान्ति, यश्च श्रोत्रियप्रत्यक्षोऽयैष एव संप्रसादलक्षण परम आनद । तत्र हि नान्यत्पश्यति नान्यच्छृणोति । अतो भूमा, भूमत्वादमृत । इतरे तद्विपरीता । अत्र च श्रोत्रियत्वावृजिनत्वे तुल्ये । अकामहतत्वकृतो विशेष आनदशतगुणवृद्धिहेतु । अत्रैतानि साधनानि श्रोत्रियत्वावृजिनत्वाकामहतत्वानि तस्य तस्यानंदस्य प्राप्तौ अर्थादभिहितानि । यथा कर्माण्यग्निहोत्रादीनि देवाना देवत्वप्राप्तौ । तत्र च श्रोत्रियत्वावृजिनत्वलक्षणे कर्मणी अवरभूमिष्वपि समाने इति न उत्तरानंदप्राप्तिसाधने अभ्युपेयेते । अकामहतत्वं तु वैराग्यतारतम्योपपत्ते उत्तरोत्तरभूम्यानदप्राप्तिसाधनमित्यवगम्यते । स एष परम आनदो वितृष्णश्रोत्रियप्रत्यक्षोऽधिगत । तथा च वेदव्यास — "यच्च कामसुख लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते नार्हत षोडशी कलाम्" इति ॥

एष ब्रह्मलोको हे सम्राडिति होवाच याज्ञवल्क्य । सोऽहमेवमनुशिष्टो भगवते तुभ्य सहस्रं ददामि गवाम् । अत ऊर्ध्व विमोक्षायैव ब्रूहीति व्याख्यातमेतत् । अत्र ह विमोक्षायेत्यस्मिन्वाक्ये याज्ञवल्क्यो बिभयाचकार भीतवान् । याज्ञवल्क्यस्य भयकारणमाह श्रुति । न याज्ञवल्क्यो वक्तृत्वसामर्थ्याभावाद्भीतवानज्ञानाद्वा । किं तर्हि, मेधावी राजा सर्वेभ्यो मा मामंतेभ्य प्रश्ननिर्णयावसानेभ्य उदरौत्सीदावृणोदवरोधं कृतवानित्यर्थ । यद्यन्मया निर्णीतं प्रश्नरूपं विमोक्षार्थं तत्तदेकदेशत्वेनैव कामप्रश्नस्य गृहीत्वा पुन पुनर्मा पर्यनुयुक्तं एव, मेधावि-वादित्येतद्भयकारणं सर्वं मदीयं विज्ञानं कामप्रश्नव्याजेनोपादित्सतीति ॥३३॥

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्य च पाप च पुन प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥३४॥

अत्र विज्ञानमय स्वय ज्योतिरात्मा स्वप्ने प्रदर्शित । स्वप्नान्तबुद्धान्त-संचारेण कार्यकरणव्यतिरिक्तता । कामकर्मप्रविवेकश्च संगतया महामत्स्य-दृष्टान्तेन प्रदर्शित । पुनश्चाविद्याकार्य स्वप्न एव ध्नन्तावेत्यादिना प्रदर्शितम् । अर्थादविद्याया सतत्त्व निर्वारितं अतद्धर्माध्यारोपणरूपत्वमनात्मधर्मत्व च । तथा विद्यायाश्च कार्य प्रदर्शित सर्वात्मभाव स्वप्न एव प्रत्यक्षत 'सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक' इति । तत्र च सर्वात्मभाव स्वभावोऽस्य, एवं अविद्याकामकर्मादिसर्वससारधर्मसबंधातीत रूपमस्य साक्षात्सुषुप्ते गृह्यते इत्ये-तद्विज्ञापितम् । स्वय ज्योतिरात्मैष परम आनद । एष विद्याया विषय । स एष परम सप्रसाद सुखस्य च परा काष्ठा । इत्येतदेवमतेन ग्रथेन व्याख्यातम् । तच्चैतत्सर्व विमोक्षपदार्थस्य दृष्टान्तभूत बंधनस्य च । ते चैते मोक्षबधने सहेतुके सप्रपचे निर्दिष्टे विद्याविद्याकार्ये, तत्सर्व दृष्टान्तभूतमेवेति, तद्दार्ष्टान्तिकस्थानीये मोक्षबधने सहेतुके कामप्रश्नार्थभूते त्वया वक्तव्ये इति पुन पर्यनुयुंक्ते जनको अत ऊर्ध्व विमोक्षायैव ब्रूहीति ।

तत्र महामत्स्यवत्स्वप्नबुद्धान्तौ असग सचरत्येक आत्मा स्वयंज्योति इत्युक्तम् । यथा चासौ कार्यकरणानि मृत्युरूपाणि परित्यजन्नुपाददानश्च महामत्स्यवत्स्वप्नबुद्धान्तावनुसचरति, तथा जायमानो म्रियमाणश्च तैरेव मृत्यु-रूपै सयुज्यते वियुज्यते च । 'उभौ लोकावनुसचरति' इति संचरणं स्वप्न-बुद्धान्तानुसंचारस्य दार्ष्टान्तिकत्वेन सूचितम् । तदिह विस्तरेण सनिमित्तं संचरण वर्णयितव्यमिति तदर्थोऽयमारभ । तत्र च बुद्धान्तात्स्वप्नान्त अयमा-त्माऽनुप्रवेशित । तस्मात्संप्रसादस्थान मोक्षदृष्टान्तभूतम् । तत प्रच्याव्य बुद्धान्ते ससारव्यवहार प्रदर्शयितव्य इति तेनास्य संबंध । स वै बुद्धान्ता-त्स्वप्नातकेभेण सप्रसन्न एष एतस्मिन्सप्रसादे स्थित्वा, तत पुनरीषत्प्रच्युत स्वप्नान्ते रत्वा चरित्वेत्यादि पूर्ववत् बुद्धान्तायैव आद्रवति ॥३४॥

तद्यथाऽन सुसमाहितमुत्सर्जेद्यादेवमेवाय शारीर आत्मा प्राज्ञेना-त्मनाऽन्वारूढ उत्सर्जन्याति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥३५॥

इत आरभ्यास्य संसारो वर्ण्यते । यथाऽयमात्मा स्वप्नान्तात् बुद्धान्तं

आगत, एवमयमस्माद्देहोद्देहान्तर प्रतिपत्स्यत इत्याहात्र दृष्टान्तम् । तत्तत्र यथा लोकेऽन शकट, सुसमाहित सुष्ठु मृश वा समाहित भाडोपस्करेण उलूखलमुसलशूर्पपिठरादिनाऽन्नाद्येन च सपन्नं सभारेण आक्रान्तमित्यर्थ । तथा भाराक्रान्त सदुत्सर्जच्छब्दं कुर्वद्यथा यायाद्गच्छेत् शाकटिकेनाधिष्ठितं सत् । एवमेव यथोक्तो दृष्टान्तोऽयं शारीर शरीरे भव । कोऽसौ ? आत्मा लिंगोपाधि । य स्वप्नबुद्धान्ताविव जन्ममरणाभ्या पाप्मससर्गवियोगलक्षणाभ्या इहलोकपरलोकावनुसचरति । यस्योत्क्रमणमनु प्राणाद्युत्क्रमण स प्राज्ञेन परेण आत्मना स्वयंज्योति स्वभावेन अन्वारूढोऽधिष्ठितोऽवभास्यमान । तथा चोक्त 'आत्मनैवायं ज्योतिषास्ते पल्ययते' इति । उत्सर्जन्याति । तत्र चैतन्यात्मज्योतिषा भास्ये लिंगे प्राणप्रवाने गच्छति, तदुपाधिरप्यात्मा गच्छतीव । तथा श्रुत्यतरम्— 'कस्मिन्नहम्' इत्यादि 'यायतीव' इति च । अत एवोक्तं प्राज्ञेनात्मनाऽन्वारूढ इति । अन्यथा प्राज्ञेनैकीभूत शकटवत्कथमुत्सर्जन्याति । तेन लिंगोपाधिरात्मा उत्सर्जन्मर्मसु निकृत्यमानेषु दु खवेदनया आर्त शब्दं कुर्वन्याति गच्छति । तत्कस्मिन्काल इति उच्यते— यत्रैतद्भवति । एतदिति क्रियाविशेषणम् । ऊर्ध्वोच्छ्वासी, यत्रोर्ध्वोच्छ्वासित्व अस्य भवतीत्यर्थ । दृश्यमानस्याप्ययनुवदन वैराग्यहतो । ईदृश कष्ट खल्वय संसार । येनोत्क्रान्तिकाले मर्मसु उत्कृत्यमानेषु स्मृतिलोपो दु खवेदनार्तस्य पुरुषार्थसाधनप्रतिपत्तौ चासामर्थ्य परवशीकृतचित्तस्य । तस्माद्यावदियमवस्था नागमिष्यति, तावदेव पुरुषार्थसाधनकर्तव्यताया अप्रमत्तो भवेदित्याह कारुण्यात् श्रुति ॥ ३५ ॥

स यत्रायमणिमान न्येति जरया वोपतपता वाऽणिमान निगच्छति तद्यथाम्र वोदुबर वा पिप्पल वा बधनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽगेभ्य सप्रमुच्य पुन प्रतिन्याय प्रतियोन्याद्रवति प्राणायैव ॥३६॥

तदस्योर्ध्वोच्छ्वासित्वं कस्मिन्काले किंनिमित्तं कथं किमर्थ वा स्यादित्येतदुच्यते— सोऽय प्राकृत शिर पाण्यादिमान्पिंडो यत्र यस्मिन्काले ऽयमणिमानं अणोर्भावमणुत्व कार्श्यमित्यर्थ । न्येति निगच्छति । किंनिमित्त ? जरया वा स्वयमेव कालपक्वफलवज्जीर्ण कार्श्य गच्छति । उपतपतीत्युपतपज्ज्वरादिरोग तेनोपतपता वा । उपतप्यमानो हि रोगेण विषमाग्नितयाऽन्नं भुक्तं न जरयति, ततोऽन्नरसेनानुपचीयमान पिंड कार्श्यमापद्यते । तदुच्यते उपतपता वेति ।

अणिमानं निगच्छति । यदा अत्यंतकार्श्यं प्रतिपन्नो जरादिनिमित्तै, तदोर्ध्वोच्छ्वासी भवति । यदोर्ध्वोच्छ्वासी, तदा मृशाहितसंभारशकटवदुत्सर्जन्याति । जराभिभवो रोगादिपीडनं कार्श्यापत्तिश्च शरीरवतोऽवश्यंभाविन एतेऽनर्था इति वैराग्यायेदमुच्यते ।

यदासौ उत्सर्जन्याति तदा कथं शरीर विमुंचतीति दृष्टान्त उच्यते— तत्तत्र यथा आम्रं वा फलं, उदुबर वा पिप्पल वा फलम् । विषमोनेकदृष्टान्तोपादान मरणस्यानियतनिमित्तत्वख्यापनार्थम् । अनियतानि हि मरणस्य निमित्तान्यसंख्यातानि च । एतदपि वैराग्यार्थमेव । यस्मादयमनेकमरणनिमित्तवास्तस्मात्सर्वदा मृत्योरास्ये वर्तत इति । बधनात् बध्यते येन बृंतेन सह स बधनकारणो रसो, यस्मिन्वा बध्यते इति बृतमेवोच्यते बधनं, तस्माद्रसात् बृंताद्वा बधनात्प्रमुच्यते वाताद्येनकनिमित्तम । एवमेवायं पुरुषो लिंगात्मा लिगोपाधिरेभ्योऽगेभ्य चक्षुरादिदेहावयवेभ्य संप्रमुच्य सम्यङनिर्लेपेन प्रमुच्य । न सुषुप्तगमनकाल इव प्राणेन रक्षन् । किं तर्हि सह वायुनोपसहृत्य । पुन प्रतिन्यायं पुन शब्दात्पूर्वमन्याय देहादेहान्तरमसकृद्गतवान्यथा स्वप्नबुद्धातो पुन पुनर्गच्छति तथा, पुन प्रतिन्याय प्रतिगमन यथागतमित्यर्थ । प्रतियोनि योनिं योनि प्रति कर्मश्रुतादिवशादाद्रवति । किमर्थम् ? प्राणायैव प्राणव्यूहायैवेत्यर्थ । सप्राण एव हि गच्छति, तत प्राणायैवेति विशेषणमनर्थकम् । प्राणव्यूहाय हि गमन देहादेहान्तर प्रति । तेन त्यस्य कर्मफलोपभोगार्थसिद्धि, न प्राणसत्तामात्रेण । तस्मात्तादर्थ्यार्थ युक्त विशेषण प्राणव्यूहायेति ॥३६॥

तत्रास्येदं शरीरं परित्यज्य गच्छतो नान्यस्य देहान्तरस्योपादाने सामर्थ्य अस्ति, देहेन्द्रियवियोगात् । न चान्येऽस्य मृत्यस्थानीया गृहमिव राज्ञे शरीरान्तर कृत्वा प्रतीक्षमाणा विद्यन्ते । अथैवं सति कथमस्य शरीरान्तरोपादानमिति । उच्यते— सर्वं त्यस्य जगत्स्वकर्मफलोपभोगसाधनत्वायोपात्तं, स्वकर्मफलोपभोगाय चायं प्रवृत्तो देहादेहान्तरं प्रतिपित्सु । तस्मात्सर्वमेव जगत्स्वकर्मणा प्रयुक्त तत्कर्मफलोपभोगयोग्य साधनं कृत्वा प्रतीक्षत एव । "कृत लोक पुरुषोऽभिजायते" इति श्रुते । यथा स्वप्नाज्जागरितं प्रतिपित्सो । तत्कथमिति लोकप्रसिद्धो दृष्टान्त उच्यते—

तद्यथा राजानमायान्तमुग्रा प्रत्येनस सूतग्रामण्योऽन्नै पानैरावसथैः

प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवं हैवंविदं सर्वाणि भूतानि प्रतिकल्पन्त इदं ब्रह्मायातीदमागच्छतीति ॥३७॥

तत्तत्र यथा राजान राज्याभिषिक्तमायान्त स्वराष्ट्रे, उग्रा जातिविशेषा क्रूरकर्माणो वा प्रत्येनस, प्रति प्रत्येनसि पापकर्मणि नियुक्ता प्रत्येनस तस्करादिदण्डनादौ नियुक्ता सूताश्च ग्रामण्यश्च सूतग्रामण्य सूता वर्णसकर-जातिविशेषा ग्रामण्यो ग्रामनेतारस्ते पूर्वमेव राज्ञ आगमन बुद्ध्वा, अन्नैर्भोज्य-भक्ष्यादिप्रकारै, पानैर्मदिरादिभि, आवसथैश्च प्रासादादिभि प्रतिकल्पन्ते निष्पन्नैरेव प्रतीक्षन्तेऽय राजा आयात्ययमागच्छतीत्येव वदन्त । यथाय दृष्टान्त, एव हैवंविदं कर्मफलस्य वेदितारं ससारिणमित्यर्थ । कर्मफल हि प्रस्तुत तदेवं-शब्देन परामृश्यते । सर्वाणि भूतानि शरीरकर्तृणि करणानुग्रहीतृणि चादित्या-दीनि, तत्कर्मप्रयुक्तानि कृतैरेव कर्मफलोपभोगसाधनै प्रतीक्षन्ते । इदं ब्रह्म भोक्तृ कर्तृ च अस्माकमायाति तथेदमागच्छतीत्येवमेव च कृत्वा प्रतीक्षन्त इत्यर्थ ॥३७॥

तद्यथा राजान प्रयियासन्तमुग्रा प्रत्येनस सूतग्रामण्योऽभिसमाय-न्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥३८॥ इति तृतीय ब्राह्मणम् ॥

तमेव जिगमिषु के सह गच्छन्ति । ये वा गच्छन्ति ते कि तत्क्रियाप्रणुन्ना आहोस्वित्तत्कर्मवशात्स्वयमेव गच्छन्ति परलोकशरीरकर्तृणि च भूतानीति । अत्रोच्यते दृष्टान्त — तद्यथा राजानं प्रयियासन्त प्रकर्षेण यातुमिच्छन्तमुग्रा प्रत्येनस सूतग्रामण्यस्त यथाऽभिसमयन्त्याभिमुख्येन समायन्त्येकीभावेन तमभिमुखा आयन्त्यनाज्ञप्ता एव राज्ञा केवल तज्ज्ञिगमिषाभिज्ञा, एवमेवेममा-त्मानं भोक्तारमतकाले मरणकाले सर्वे प्राणा वागादयोऽभिसमायन्ति । तत्रैत-दूर्ध्वोच्छ्वासी भवतीति व्याख्यातम् ॥ इति तृतीयं ब्राह्मणम् ॥ ४ ३ —

स यत्रायमात्मा । ससारोपवर्णन प्रस्तुतम् । 'तत्रायं पुरुष एभ्यो-ऽगेभ्य संप्रमुच्य' इत्युक्तम् । तत्संप्रमोक्षण कस्मिन्काले कथ वेति सविस्तरं ससरणं वर्णयितव्यमित्यार-भ्यते—

स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव न्येत्यथैनमेते प्राणा अभि-

समायन्ति स एतास्तेजोमात्रा समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुष. पुरुष पराङ्पर्यावर्ततेऽथारूपज्ञो भवति ॥१॥

सोऽयमात्मा प्रस्तुतो यत्र यस्मिन्कालेऽबल्यमबलभावं नि एत्य गत्वा । यद्देहस्य दौर्बल्य तदात्मन एव दौर्बल्यमित्युपचर्यतेऽबल्यं न्येत्येति । न ह्यसौ स्वतोऽमूर्तत्वादबलभावं गच्छति । तथा समोहमिव संमूढता संमोहो विवेकाभाव· संमूढतामिव न्येति निगच्छति । न चास्य स्वत संमोहोऽसंमोहो वाऽस्ति, नित्यचैतन्यज्योति स्वभावत्वात् । तेनेवशब्द संमोहमिव न्येतीति । उत्क्रान्तिकाले हि करणोपसंहारनिमित्तो व्याकुलीभाव आत्मन इव लक्ष्यते लौकिकै । तथा च वक्तारो भवन्ति, संमूढ संमूढोऽयमिति ।

अथवा उभयत्र इवशब्दप्रयोगो योज्य । अबल्यमिव न्येत्य समोहमिव न्येतीति । उभयस्य परोपाधिनिमित्तत्वाविशेषात् । समानकर्तृकनिर्देशाच्च । अथास्मिन्काले एते प्राणा वागादय एनमात्मानमभिसमायन्ति । तदाऽस्य शारीरस्यात्मनोऽगेभ्य सप्रमोक्षणम् । कथ पुन सप्रमोक्षण, केन वा प्रकारेण आत्मानमभिसमायन्तीति । उच्यते— स आत्मा एतास्तेजोमात्रा , तेजसो मात्रास्तेजोमात्रास्तेजोवयवा रूपादिप्रकाशकत्वाच्चक्षुरादीनि करणानीत्यर्थ । ता एता समभ्याददान सम्यङ्निर्लेपेनाभ्याददान आभिमुख्येन आददान संहरमाण । तत्स्वप्रापेक्षया विशेषणं समिति । ननु स्वप्ने निर्लेपेन सम्यगादानम् । अस्ति त्वादानमात्रम् । 'गृहीता वाग्गृहीतं चक्षु ' 'अस्य लोकस्य सर्वावतो मात्रामपादाय' 'शुक्रमादाय' इत्यादि वाक्येभ्य ॥

हृदयमेव पुण्डरीकाकाश अन्ववक्रामत्यन्वागच्छति हृदयेऽभिव्यक्तविज्ञानो भवतीत्यर्थ । बुद्ध्यादिविक्षेपोपसंहारे सति । न हि तस्य स्वतश्चलनं विक्षेपोपसंहारादिविक्रिया वा । 'ध्यायतीव लेलायतीव' इत्युक्तत्वात् । बुद्ध्याद्युपाधिद्वारैव हि सर्वविक्रियाऽध्यारोप्यते तस्मिन् । कदा पुनस्तस्य तेजोमात्राभ्यादानमिति । उच्यते— स यत्रैष चक्षुषि भवश्चाक्षुष पुरुष आदित्याशो भोक्तु कर्मणा प्रयुक्तो यावद्देहधारणं तावच्चाक्षुषोऽनुग्रहं कुर्वन्वर्तते । मरणकाले त्वस्य चक्षुरनुग्रहं परित्यजति, स्वमादित्यात्मानं प्रतिपद्यते । तदेतदुक्तं 'यत्रास्य पुरुषस्य मृतस्याग्निं वाग्प्येति वात प्राणश्चक्षुरादित्यं' इत्यादि । पुनर्देहग्रहणकाले संश्रयिष्यन्ति । तथा स्वप्स्यत प्रबुध्यतश्च । तदेतदाह— चाक्षुष पुरुषो यत्र यस्मि-

न्काले पराङ्पर्यावर्तते परि समतात्पराङ्व्यावर्तत इति। अथात्रास्मिन्कालेऽ-रूपज्ञो भवति, मुमूर्षू रूपं न जानाति। तदा अयमात्मा चक्षुरादितेजोमात्रा सम-ग्याददानो भवति स्वप्नकाल इव ॥१॥

एकी भवति न पश्यतीत्याहुरेकी भवति न जिघ्रतीत्याहुरेकी भवति न रसयत इत्याहुरेकी भवति न वदतीत्याहुरेकी भवति न शृणोतीत्याहुरेकी भवति न मनुत इत्याहुरेकी भवति न स्पृशतीत्याहुरेकी भवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्र प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवा-न्ववक्रामति। तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥२॥

एकी भवति करणजात स्वेन लिगात्मना। तदैनं पार्श्वस्था आहुर्न पश्यतीति। तथा घ्राणदेवतानिवृत्तौ घ्राणमेकी भवति लिगात्मना। तदा न जिघ्रतीत्याहु। समानमन्यत्। जिह्वाया सोमो वरुणो वा देवता, तन्नि-वृत्त्यपेक्षया न रसयत इत्याहु.। तथा न वदति न शृणोति न मनुते न स्पृशति न विजानातीत्याहु। तदोपलक्ष्यते देवतानिवृत्ति करणाना च हृदय एकीभाव। तत्र हृदय उपसंहृतेषु करणेषु योऽन्तर्व्यापार स कथ्यते— तस्य हैतस्य प्रकृतस्य हृदयस्य हृदयच्छिद्रस्येतत्। अग्रं नाडीमुख निर्गमन-द्वारं प्रद्योतते स्वप्नकाल इव स्वेन भासा तेजोमात्रादानकृतेन स्वेनैव ज्योतिषा आत्मनैव च। तेनात्मज्योतिषा प्रद्योतेन हृदयाग्रेणैष आत्मा विज्ञानमयो लिगोपाधिर्निर्गच्छति निष्क्रामति। तथा आथर्वणे 'कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत' इति।

तत्र च आत्मचैतन्यज्योति सर्वदाभिव्यक्ततरम्। तदुपाधिद्वारा ह्यात्मनि जन्ममरणगमनागमनादिसर्वविक्रियालक्षण सव्यवहार। तदात्मकं हि द्वादशविधं करण बुद्ध्यादि, तत्सूत्र तज्जीवनं सोऽन्तरात्मा जगतस्तस्थुषश्च। तेन प्रद्योतेन हृदयाग्रप्रकाशेन निष्क्रममाण केन मार्गेण निष्क्रामतीति उच्यते— चक्षुष्टो वा। आदित्यलोकप्राप्तिनिमित्त ज्ञानं कर्म वा यदि स्यात्। मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेत्। अन्येभ्यो वा शरीरदेशेभ्य शरीरावयवेभ्यो यथा-कर्म यथाश्रुतम्। तं विज्ञानात्मानमुत्क्रामन्त परलोकाय प्रस्थितं परलोकाय

उद्भूताकूतमित्यर्थ । प्राण सर्वाधिकारिस्थानीयो राज्ञ इवानूत्क्रामति । तं च प्राणमनूत्क्रामन्तं वागादय सर्वे प्राणा अनूत्क्रामन्ति ॥

यथाप्रधानान्वाचिख्यासा इय न तु क्रमेण सार्थवद्गमनमिह विवक्षितम् । तदेष आत्मा सविज्ञानो भवति स्वप्न इव विशेषविज्ञानवान्भवति कर्मवशान्न स्वतन्त्र । स्वातंत्र्येण हि सविज्ञानत्वे सर्व कृतकृत्य स्यात् । नैष तु तल्लभ्यते । अत एवाह व्यास "सदा तद्भावभावित" इति । कर्मणा तद्भाव्यमानेन अत करणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्वो लोक एतस्मिन्काले सविज्ञानो भवति । सविज्ञानमेव च गतव्य अन्ववक्रामत्यनुगच्छति विशेषविज्ञानोद्भासितमेवेत्यर्थ । तस्मात्तत्काले स्वातंत्र्यार्थ योगधर्मानुसेवनं परिसख्यानाभ्यासश्च विशिष्टपुण्योपचयश्च श्रद्दधानै परलोकार्थिभिरप्रमत्तै कर्तव्य इति । सर्वशास्त्राणा यत्नतो विधेयोऽर्थो दुश्चरिताच्चोपरमणम् । न हि तत्काले शक्यते किंचित्सपादयितुम् । कर्मणा नीयमानस्य स्वातंत्र्याभावात् । 'पुण्यो वै पुण्येन कर्मणा भवति पाप पापेन' इत्युक्तम् । एतस्य ह्यनर्थस्योपशमोपायविधानाय सर्वशाखोपनिषद प्रवृत्ता । न हि तद्विहितोपायानुसेवनं मुक्त्वा आत्यंतिकोऽस्यानर्थस्य उपशमोपायोऽस्ति । तस्मादत्रैव उपनिषद्विहितोपाये यत्नपरैर्भवितव्यमित्येष प्रकरणार्थ ॥

शकटवत्संभृतसभार उत्सर्जन्यातीत्युक्तं, किं पुनस्तस्य परलोकाय प्रवृत्तस्य पथ्यदनं शाकटिकसंभारस्थानीयं, गत्वा वा परलोकं यद्भुंक्ते शरीराद्यारंभक च यत्तत्किमिति । उच्यते— त परलोकाय गच्छन्तमात्मानं विद्याकर्मणी, विद्या च कर्म च विद्याकर्मणी विद्या सर्वप्रकारा विहिता प्रतिषिद्धा च, अविहिताऽप्रतिषिद्धा च । तथा कर्म विहितं प्रतिषिद्धं च अविहितमप्रतिषिद्धं च, समन्वारभेते सम्यगन्वारभेते अन्वालभेते अनुगच्छत । पूर्वप्रज्ञा च । पूर्वानुभूतविषया प्रज्ञा पूर्वप्रज्ञा अतीतकर्मफलानुभववासनेत्यर्थ । सा च वासना अपूर्वकर्मारंभे कर्मविपाके चागं भवति । तेनासावप्यन्वारभते । न हि तया वासनया विना कर्म कर्तुं फलं चोपभोक्तुं शक्यते । न ह्यनभ्यस्ते विषये कौशलमिंद्रियाणा भवति । पूर्वानुभववासनाप्रवृत्ताना त्विंद्रियाणामिह अभ्यासमंतरेण कौशलमुपपद्यते । दृश्यते च केषाचित्कासुचित्क्रियासु चित्रकर्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलं, कासुचिदत्यंतसौकर्ययुक्तास्वपि

अकौशलं केषाचित्। तथा विषयोपभोगेषु स्वभावत एव केषाचित्कौशलाकौशले दृश्येते। तच्चैतत्सर्वं पूर्वप्रज्ञोद्भवानुद्भवनिमित्तम्। तेन पूर्वप्रज्ञया विना कर्मणि वा फलोपभोगे वा न कस्यचित्प्रवृत्तिरुपपद्यते। तस्मादेतत्त्रय शाकटिकस-भारस्थानीयं परलोकपथ्यदन विद्याकर्मपूर्वप्रज्ञाख्यम्। यस्माद्विद्याकर्मणी पूर्व-प्रज्ञा च देहान्तरप्रतिपत्त्युपभोगसाधनं, तस्माद्विद्याकर्मादि शुभमेव समाचरेत्, यथा इष्टदेहसयोगोपभोगो स्यातामिति प्रकरणार्थ ॥२॥

एवं विद्यादिसंभारसंभृतो देहान्तरं प्रतिपद्यमानो, मुक्त्वा पूर्व देह पक्षीव वृक्षान्तर देहान्तर प्रतिपद्यते। अथवा आतिवाहिकेन शरीरान्तरेण कर्मफल-जन्मदेशं नीयते। किंचात्रस्थस्यैव सर्वगताना करणाना वृत्तिलाभो भवत्या-होस्विच्छरीरस्थस्य सकुचितानि करणानि मृतस्य भिन्नघटप्रदीपप्रकाशवत्सर्वतो व्याप्य पुनर्देहान्तरारभे सकोचमुपगच्छन्ति। किंच मनोमात्र वैशेषिकसमय इव देहान्तरारंभे देश प्रति गच्छति, किवा कल्पनान्तरमेव वेदान्तसमय इति, उच्यते— 'त एते सर्व एव समा सर्वेऽनंता' इति श्रुते सर्वात्मकानि तावत्करणानि। सर्वात्मकप्राणसश्रयाच्च। तेषामाध्यात्मिकाधिभौतिकपरिच्छेद प्राणिकर्मज्ञानभावनानिमित्त। अत तद्वशात्स्वभावत सर्वगतानामनतानामपि प्राणाना कर्मज्ञानवासनानुरूपेणैव देहान्तरारंभवशात्प्राणाना वृत्ति सकुचति विकसति च। तथाचोक्त 'सम प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकै समोऽनेन सर्वेण' इति। तथा चेद वचनमनुकूलम्— 'स यो हैतानंतानुपास्ते' इत्यादि 'तं यथा यथोपासते' इति च। तत्र वासना पूर्वप्रज्ञाख्या विद्याकर्मतत्रा जलूकावत्सततैव स्वप्नकाल इव कर्मकृत देहाद्देहान्तरमारभते हृदयस्थैव। पुनर्देहान्तरारभे देहान्तर पूर्वाश्रयं विमुचती-त्येतस्मिन्नर्थे दृष्टान्त उपादीयते—

तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्यात्मानमुप-संहरत्येवमेवायमात्मेद शरीरं निहत्याविद्या गमयित्वान्यमाक्रममाक्रम्यात्मान-मुपसंहरति ॥३॥

तत्तत्र देहान्तरसचारे इदं निदर्शनम्। यथा येन प्रकारेण तृणजला-युका तृणजलूका तृणस्यातमवसानं गत्वा प्राप्य अन्यं तृणान्तरमाक्रमं, आक्र-म्यत इत्याक्रमस्तमाक्रममाक्रम्याश्रित्य, आत्मानमात्मन पूर्वावयवमुपसंहरत्यं-

त्यावयवस्थाने । एवमेवायमात्मा य प्रकृत संसारीदं शरीर पूर्वोपात्तं निहत्य स्वप्न प्रतिपित्सुरिव पातयित्वा अविद्या गमयित्वा अचेतनं कृत्वा स्वात्मोपसंहारेण, अन्यमाक्रम तृणान्तरमिव तृणजलूका शरीरान्तर गृहीत्वा प्रसारितया वासनया आत्मानमुपसंहरति, तत्र आत्मभावमारभते । यथा स्वप्ने देहान्तरमारभते स्वप्नदेहान्तरस्थ एव शरीरारंभदेश आरभ्यमाणे देहे जंगमे स्थावरे वा ॥

तत्र च कर्मवशात्करणानि लब्धवृत्तीनि सहन्यन्ते । बाह्यं च कुशमृत्तिकास्थानीयं शरीरमारभ्यते । तत्र च करणव्यूहमपेक्ष्य वागाद्यनुग्रहायाग्न्यादिदेवता सश्रयन्ते । एष देहान्तरारभविधि ॥३॥

तत्र देहान्तरारंभे नित्योपात्तमेवोपादानमुपमृद्योपमृद्य देहान्तरमारभते, आहोस्विदपूर्वमेव पुन पुनरादत्ते, इति अत्रोच्यते दृष्टान्त.—

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतर कल्याणतर रूप तनुत एवमेवायमात्मेद शरीर निहत्याविद्यां गमयित्वान्यन्नवतर कल्याणतर रूपं कुरुते पित्र्य वा गांधर्वं वा दैव वा प्राजापत्य वा ब्राह्म वान्येषां वा भूतानाम् ॥४॥

तत्तत्रैतस्मिन्नर्थे । यथा पेशस्कारी पेश सुवर्ण तत्करोतीति पेशस्कारी सुवर्णकार , पेशस सुवर्णस्य मात्रामपादायापच्छिद्य गृहीत्वा अन्यत्पूर्वस्माद्रचनाविशेषान्नवतरमभिनवतर कल्याणात्कल्याणतर रूप तनुते निर्मिनोति । एवमेवायमात्मेत्यादि पूर्ववत् । नित्योपात्तान्येव पृथिव्यादीन्याकाशान्तानि पच भूतानि यानि 'द्वे वाव ब्रह्मणो रूपे' इति चतुर्थे व्याख्यातानि पेशस्थानीयानि, तान्येवोपमृद्योपमृद्य, अन्यदन्यच्च देहान्तर नवतरं कल्याणतरं रूपं संस्थानविशेष देहान्तरमित्यर्थ । कुरुते पित्र्य वा पितृभ्यो हित पितृलोकोपभोगयोग्यं इत्यर्थ । गाधर्व गधर्वाणामुपभोगयोग्यं, तथा देवाना दैव, प्रजापते प्राजापत्य, ब्रह्मण इद ब्राह्म वा । यथाकर्म यथाश्रुतं अन्येषा वा भूताना संबधि शरीरान्तर कुरुत इत्यभिसंबध्यते ॥४॥

येऽस्य बचनसंज्ञका उपाधिभूता , यै संयुक्तस्तन्मयोऽयमिति विभाव्यते, ते पदार्था पुजीकृत्यैकत्र प्रतिनिर्दिश्यन्ते—

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय प्राणमयश्चक्षुर्मयः

श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममय क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्य पुण्येन कर्मणा भवति पाप पापेन । अथो खल्वाहु काममय एवाय पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥५॥

स वा अय य एव संसरत्यात्मा ब्रह्मैव पर एव, योऽशनायाद्यतीत । विज्ञानमयो विज्ञान बुद्धिस्तेनोपलक्ष्यमाणस्तन्मय । 'कतम आत्मेति योऽय विज्ञानमय प्राणेषु' इति ह्युक्तम् । विज्ञानमयो विज्ञानप्रायो यस्मात्तद्धर्मत्वमस्य विभाव्यते 'ध्यायतीव लेलायतीव' इति । तथा मनोमयो मन संनिकर्षान्मनोमय । तथा प्राणमय प्राण. पंचवृत्तिस्तन्मयो, येन चेतनश्चलतीव लक्ष्यते । तथा चक्षुर्मयो रूपदर्शनकाले । एव श्रोत्रमय शब्दश्रवणकाले । एवं तस्य तस्येद्रियस्य व्यापारोद्भवे तत्तन्मयो भवति ।

एव बुद्धिप्राणद्वारेण चक्षुरादिकरणमय सञ्शरीरारंभकपृथिव्यादिभूतमयो भवति । तत्र पार्थिवशरीरारंभे पृथिवीमयो भवति । तथा वरुणादिलोकेषु आप्यशरीरारभे आपोमयो भवति । तथा वायव्यशरीरारंभे वायुमयो भवति । तथा आकाशशरीरारभे आकाशमयो भवति । एवमेतानि तैजसानि देवशरीराणि । तेष्वारभ्यमाणेषु तन्मयस्तेजोमयो भवति । अतो व्यतिरिक्तानि पश्वादिशरीराणि नरकप्रेतादिशरीराणि चातेजोमयानि । तान्यपेक्ष्याह— अतेजोमय इति । एवं कार्यकरणसधातमय सन्नात्मा प्राप्तव्य वस्त्वतर पश्यन्निदं मया प्राप्तमदो मया प्राप्तव्यमित्येवं विपरीतप्रत्ययस्तदभिलाष काममयो भवति । तस्मिन्कामे दोषं पश्यत तद्विषयाभिलाषप्रशमे चित्त प्रसन्नमकलुषं शान्त भवति, तन्मयोऽकाममय । एव तस्मिन्विहते कामे केनचित्स काम क्रोधत्वेन परिणमते, तेन तन्मयो भवन्क्रोधमय । स क्रोध केनचिदुपायेन निवर्तितो यदा भवति तदा प्रसन्नमनाकुलं चित्त सदक्रोध उच्यते, तेन तन्मय । एवं कामक्रोधाभ्या अकामक्रोधाभ्या च तन्मयो भूत्वा, धर्ममयोऽधर्ममयश्च भवति । न हि कामक्रोधादिभिर्विना धर्मादिप्रवृत्तिरुपपद्यते । "यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितम्" इति स्मरणात् ॥

धर्ममयोऽधर्ममयश्च भूत्वा सर्वमयो भवति। समस्तं धर्माधर्ममयो कार्यं यावत्किंचिद्व्याकृत, तत्सर्व धर्माधर्ममयो फल तत्प्रतिपद्यमानस्तन्मयो भवति। कि बहुना, तदेतत्सिद्धमस्य यदयमिदमयो गृह्यमाणविषयादिमय तस्मादयमदोमय। अद इति परोक्ष कार्येण गृह्यमाणेन निर्दिश्यते। अनंता ह्यत करणे भावनाविशेषा। नैव ते विशेषतो निर्देष्टु शक्यन्ते। तस्मिंस्तस्मिन्क्षणे कार्यतोऽवगम्यन्ते, इदमस्य हृदि वर्ततेऽदोऽस्येति। तेन गृह्यमाणकार्येण इदंमयतया निर्दिश्यते परोक्षोऽन्त स्थो व्यवहारोऽयमिदानीमदोमय इति। सक्षेपतस्तु यथा कर्तु यथा वा चरितु शीलमस्य सोऽय यथाकारी यथाचारी, स तथा भवति। करण नाम नियता क्रिया विधिप्रतिषेवादिगम्या, चरण नामानियतमिति विशेष.। साधुकारी साधुर्भवतीति यथाकारित्यस्य विशेषण, पापकारी पापो भवतीति च यथाचारीत्यस्य॥

ताच्छील्यप्रत्ययोपादानात् अत्यततात्पर्यतेव तन्मयत्व, न तु तत्कर्ममात्रेणेत्याशंक्याह पुण्य पुण्येन कर्मणा भवति पाप पापेनेति। पुण्यपापकर्ममात्रेणैव तन्मयता स्यान्न तु ताच्छील्यमपेक्षते। ताच्छील्ये तु तन्मयत्वातिशय इत्यय विशेष। तत्र कामक्रोधादिपूर्वकपुण्यापुण्यकारिता सर्वमयत्वे हेतु, संसारस्य कारण, देहाद्देहान्तरसंचारस्य च। एतत्प्रयुक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते। तस्मात्पुण्यापुण्ये संसारस्य कारणम्। एतद्विषयौ हि विधिप्रतिषेधौ। अत्र शास्त्रस्य साफल्यमिति॥

अथो अप्यन्ये बधमोक्षकुशला खल्वाहु — सत्य कामादिपूर्वके पुण्यापुण्ये शरीरग्रहणकारणं, तथापि कामप्रयुक्तो हि पुरुष पुण्यापुण्ये कर्मणी उपचिनोति। कामप्रहाणे तु कर्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति। उपचिते अपि पुण्यापुण्ये कर्मणी कामशून्ये फलारभके न भवत। तस्मात्काम एव संसारस्य मूलम्। तथाचोक्तमाथर्वणे 'कामान्य कामयते मन्यमान स कामभिर्जायते तत्र तत्र' इति। तस्मात्काममय एवाय पुरुषो यदन्यमयत्वं तदकारणं विद्यमानमपीत्यतोऽवधारयति काममय एवेति। यस्मात्स च काममय सन्यादृशेन कामेन यथाकामो भवति, तत्क्रतुर्भवति। स काम ईषदभिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति, सोऽविहन्यमान स्फुटीभवन्क्रतुत्वमापद्यते। क्रतुर्नामाध्यवसायो निश्चयो यदनंतरा क्रिया प्रवर्तते। यत्क्रतुः

भवति यादृक्कामकार्येण क्रतुना यथारूपः क्रतुरस्य सोऽय यत्क्रतुर्भवति, तत्कर्म कुरुते, यद्विषय क्रतुस्तत्फलनिर्वृत्तये यद्योग्य कर्म, तत्कुरुते निर्वर्तयति । यत्कर्म कुरुते तदभिसंपद्यते, तदीय फलमभिसंपद्यते । तस्मात्सर्वमयत्वेऽस्य संसारित्वे च काम एव हेतुरिति ॥५॥

तदेष श्लोको भवति । तदेव सक्त सह कर्मणैति लिग मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किचेह करोत्ययम् । तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ॥६॥

तत्तस्मिन्नर्थे एष श्लोको मंत्रोऽपि भवति । तदेवैति तदेव गच्छति, सक्त आसक्तस्तत्रोद्भूताभिलाष सन्नित्यर्थ । कथमेति ? सह कर्मणा यत्कर्म फलासक्त सन्नकरोत्तेन कर्मणा सहैव तदेति तत्फलमेति । कि तत् ? लिंग मन । मन प्रधानत्वाल्लिगस्य मनो लिगमित्युच्यते । अथ वा लिग्यतेऽवगम्यतेऽवगच्छति येन तल्लिग तन्मनो यत्र यस्मिन्निषक्त निश्चयेन सक्तमुद्भूताभिलाषमस्य ससारिण । तदभिलाषो हि तत्कर्म कृतवान् । तस्मात्तन्मनोऽभिषगवशादेवास्य तेन कर्मणा तत्फलप्राप्ति । तेनैतत्सिद्धं भवति, कामो मूलं समारस्येति । अत । उच्छिन्नकामस्य विद्यमानान्यपि कर्माणि ब्रह्मविदो वंध्याप्रसवानि भवन्ति । 'पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयन्ति कामा ' इति श्रुते ॥

किच प्राप्यात कर्मण. । प्राप्य भुक्त्वा अंतमवसान यावत्कर्मण फलपरिसमाप्ति कृत्वेत्यर्थ । कस्य कर्मणोऽन्त प्राप्येत्युच्यते— तस्य यत्किंच कर्मेहास्मिल्लोके करोति निर्वर्तयत्यय, तस्य कर्मण फलं भुक्त्वा अत प्राप्य तस्माल्लोकात्पुनरैत्यागच्छत्यस्मै लोकाय कर्मणे । अय हि लोक कर्मप्रधान तेनाह कर्मण इति पुन कर्मकरणाय । पुन कर्म कृत्वा फलासंगवशात्पुनरमु लोक यातीत्येवम् । इति नु एवं नु कामयमान संसरति । यस्मात्कामयमान एवंवं संसरत्यथ तस्मादकामयमानो न क्वचित्संसरति ॥

फलासक्तस्य हि गतिरुक्ता । अकामस्य हि कियानुपपत्ते कामयमानो मुच्यत एव । कथं पुनरकामयमानो भवति ? योऽकामो भवत्यसावकामयमान । कथमकामतेत्युच्यते— यो निष्कामो यस्मान्निर्गता कामा सोऽयं निष्काम. ।

कथ कामा निर्गच्छन्ति ? य आप्तकामो भवत्यात्मा कामा येन स आप्तकाम । कथमाप्यन्ते कामा ? आत्मकामत्वेन । यस्यात्मैव नान्य कामयितव्यो वस्त्वतरभूत पदार्थो भवति । आत्मैव अनंतरोऽबाह्य कृत्स्न प्रज्ञानघन एकरसो नोर्ध्व न तिर्यङ्नाव आत्मनोऽन्यत्कामयितव्यं वस्त्वतरम् । यस्य सर्व आत्मैवाभूत्तत्केन क पश्येच्छृणुयान्मन्वीत विजानीयाद्वा, एव विजानन्क कामयेत । ज्ञायमानो ह्यन्यत्वेन पदार्थ कामयितव्यो भवति न चासावन्यो ब्रह्मविद आप्तकामस्यास्ति । य एवात्मकामतया आप्तकाम स निष्कामोऽकामोऽकामयमानश्चेति मुच्यते । न हि यस्य आत्मैव सर्व भवति, तस्यानात्मा कामयितव्योऽस्ति । अनात्मा चान्य कामयितव्य सर्व चात्मैवाभूदिति विप्रतिषिद्धम् । सर्वात्मदर्शीन कामयितव्याभावात्कर्मानुपपत्ति ॥

ये तु प्रत्यवायपरिहारार्थ कर्म कल्पयन्ति ब्रह्मविदोऽपि, तेषा नात्मैव सर्व भवति । प्रत्यवायस्य जिहासितव्यस्य आत्मनोऽन्यस्य अभिप्रेतत्वात् । येन चाशनायाद्यतीतो नित्य प्रत्यवायासबद्धो विदित आत्मा, तं वय ब्रह्मविदिति ब्रूम । नित्यमेव अशनायाद्यतीतमात्मान पश्यति । यस्माच्च जिहासितव्यमन्यमुपादेय वा यो न पश्यति, तस्य कर्म न शक्यत एव सबधुम् । यस्त्वब्रह्मावित्तस्य भवत्येव प्रत्यवायपरिहारार्थ कर्मेति न विरोध । अत कामाभावादकामयमानो न जायते, मुच्यत एव ॥

तस्यैवकामयमानस्य कर्माभावे गमनकारणाभावात्प्राणा वागादयो, नोत्कामन्ति नोर्ध्व क्रामन्ति देहात् । स च विद्वानात्मकाम आत्मकामतयैहैव ब्रह्मभूत. । सर्वात्मनो हि ब्रह्मणो दृष्टान्तत्वेन प्रदर्शितमेतद्रूप 'तद्वा अस्यैतदाप्तकामात्मकाममकाम रूपं' इति । तस्य हि दार्ष्टान्तिकभूतोऽयमर्थ उपसंहियतेऽथाकामयमान इत्यादिना । स कथमेवभूतो मुच्यत इत्युच्यते— यो हि सुषुप्तावस्थामिव निर्विशेषमद्वैतमलुप्तचिद्रूपज्योति स्वभावमात्मान पश्यति, तस्यैवाकामयमानस्य कर्मभावे गमनकारणाभावात्प्राणा वागादयो नोत्कामन्ति । किन्तु विद्वान्स इहैव ब्रह्म यद्यपि देहवानिव लक्ष्यते, स ब्रह्मैव सन्ब्रह्माप्येति । यस्मान्न हि तस्याब्रह्मत्वपरिच्छेदहेतव कामा सन्ति तस्मादिहैव ब्रह्मैव सन्ब्रह्माप्येति न शरीरपातोत्तरकालम् । न हि विदुषो मृतस्य भावान्तरापत्तिर्जीवतोऽन्यो भावो, देहान्तरप्रतिसंधानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते । भावा-

न्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोऽर्थ आत्मैकत्वाख्य स बाधितो भवेत्। कर्महेतुकश्च मोक्ष प्राप्नोति, न ज्ञाननिमित्त इति। स चानिष्ट । अनित्यत्व च मोक्षस्य प्राप्नोति। न हि क्रियानिर्वृत्तोऽर्थो नित्यो दृष्ट । नित्यश्च मोक्षोऽभ्युपगम्यते। 'एष नित्यो महिमा' इति मंत्रवर्णात् ॥

न च स्वाभाविकात्स्वभावादन्यन्नित्य कल्पयितुं शक्यम् । स्वाभाविकश्चेदग्न्युष्णवदात्मन स्वभाव, स न शक्यते पुरुषव्यापारानुभावीति वक्तुम्। न ह्यग्नेरौष्ण्यं प्रकाशो वाऽग्निव्यापारानतरानुभावी। अग्निव्यापारानुभावी स्वाभाविकश्चेति विप्रतिषिद्धम्। ज्वलनव्यापारानुभावित्व उष्णप्रकाशयोरिति चेत्। न। अन्योपलब्धिव्यवधानापगमाभिव्यक्त्यपेक्षत्वात्। ज्वलनादिपूर्वकमग्नि उष्णप्रकाशगुणाभ्यामभिव्यज्यते तत्राग्न्यपेक्षया। किं तर्ह्यन्यदृष्टे अग्नेरौष्ण्यप्रकाशौ धर्मौ व्यवहितौ, कस्यचित् दृष्टया त्वसंबध्यमानौ, ज्वलनापेक्षया व्यवधानापगमे दृष्टेरभिव्यज्येते। तदपेक्षया भ्रांतिरुपजायते ज्वलनपूर्वकावेतौ उष्णप्रकाशौ धर्मौ जाताविति ॥

यद्युष्णप्रकाशयोरपि स्वाभाविकत्व न स्यात्। य. स्वाभाविकोऽग्नेर्धर्म तमुदाहरिष्याम। न च स्वाभाविको धर्म एव नास्ति पदार्थानामिति शक्यं वक्तुम्। न च निगडभंग इवाभावभूतो मोक्षो बधननिवृत्तिरुपपद्यते। परमात्मैकत्वाभ्युपगमात् 'एकमेवाद्वितीय' इति श्रुते। न चान्यो बद्धोऽस्ति, यस्य निगडनिवृत्तिवत् बंधननिवृत्तिर्मोक्ष स्यात्। परमात्मव्यतिरेकेणान्यस्याभावं विस्तरेणावादिष्म। तस्मादविद्यानिवृत्तिमात्रे मोक्षव्यवहार इति चावोचाम। यथा रज्ज्वादौ सर्पाद्यज्ञाननिवृत्तौ सर्पादिनिवृत्ति ॥

येऽप्याचक्षते मोक्षे विज्ञानान्तरमानंदातरं चाभिव्यज्यत इति, तैर्वक्तव्यो अभिव्यक्तिशब्दार्थ। यदि तावल्लौकिक्येव उपलब्धिविषयव्याप्ति अभिव्यक्तिशब्दार्थ, ततो वक्तव्यं— किं विद्यमानमभिव्यज्यतेऽविद्यमानमिति वा। विद्यमान चेत् यस्य मुक्तस्य तदभिव्यज्यते तस्य आत्मभूतमेव तदिति, उपलब्धिव्यवधानानुपपत्ते नित्याभिव्यक्तत्वान्मुक्तस्याभिव्यज्यत इति विशेषवचनमनर्थकम्। अथ कदाचिदेवाभिव्यज्यते, उपलब्धिव्यवधानादनात्मभूत तदिति अन्यथोऽभिव्यक्तिप्रसंग। तथाचाभिव्यक्तिसाधनापेक्षता। उपलब्धिसमानाश्रयत्वे तु व्यवधानकल्पनानुपपत्ते सर्वदाऽभिव्यक्ति अनभिव्यक्तिर्वा। नत्वं-

तरालकल्पनाया प्रमाणमस्ति । न च समानाश्रयाणा एकस्यात्मभूताना धर्माणा इतरेतरविषयविषयित्व सभवति । विज्ञानसुखयोश्च प्रागभिव्यक्ते संसारित्वं अभिव्यक्त्युत्तरकाल च मुक्तत्वं यस्य, सोऽन्य परस्मान्नित्याभिव्यक्तज्ञानस्वरूपात् अत्यतवैलक्षण्यात् शैत्यमिवोष्ण्यात् । परमात्मभेदकल्पनाया च वैदिक कृतान्त परित्यक्त स्यात् । मोक्षस्यैदानीमिव निर्विशेषत्वे तदर्थाधिकयत्नानुपपत्ति शास्त्रवैयर्थ्य च प्राप्नोताऽति चेन्न । अविद्याश्रमापोहार्थत्वात् । न हि वस्तुतो मुक्ताऽमुक्ततत्वविशेषोऽस्ति । आत्मनो नित्यैकरूपत्वात् । किंतु तद्विषयाऽविद्यापोह्यते शास्त्रोपदेशजनिताविज्ञानेन । प्राक्तदुपदेशप्राप्ते तदर्थश्च प्रयत्न उपपद्यत एव ॥

अविद्यावतोऽविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मन स्यादिति चेत् । न । अविद्याकल्पनाविषयत्वाभ्युपगमात् रज्जूषरशुक्तिकागगनाना सर्पोदकरजतमलिनत्वादिवददोष इत्यवोचाम । तिमिरातिमिरदृष्टिवत् अविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेष स्यादिति चेत् । न । 'ध्यायतीव ललायतीव' इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् । अनेकव्यापारसंनिपातजनितत्वाच्चाविद्याश्रमस्य । विषयत्वोपपत्तेश्च । यस्य चाविद्याश्रमो घटादिवद्विविक्तो गृह्यते स नाविद्याश्रमवान । अह न जाने मुग्धोऽस्मीति प्रत्ययदर्शनादविद्याश्रमवत्त्वमेवेति चेत् । न । तस्यापि विवेकग्रहणात् । न हि यो यस्य विवेकेन ग्रहीता स तस्मिन्भ्रान्त इत्युच्यते । तस्य च विवेकग्रहण तस्मिन्नेव च भ्रम इति विप्रतिषिद्धम् । न जाने मुग्धोऽस्मीति दृश्यत इति ब्रवीषि, तद्दर्शनश्चाज्ञान मुग्धरूपता दृश्यत इति च, तद्दर्शनस्य विषयो भवति कर्मतामापद्यत इति । तत्कथ कर्मभूत सत्कर्तृस्वरूपदृशिविशेषणं अज्ञानमुग्धते स्याताम्? अथ दृशिविशेषणत्व तयो कथं कर्म स्याता दृशिना व्याप्येते? कर्म हि कर्तृक्रियया व्याप्यमान भवति । अन्यश्च व्याप्यमन्यद्व्यापकं, न तेनैव तद्व्याप्यते । वद कथमेवं सति अज्ञानमुग्धते दृशिविशेषणे स्याताम्? न चाज्ञानविवेकदर्शी अज्ञानमात्मन कर्मभूतमुपलभमान उपलब्धृधर्मत्वेन गृह्णाति शरीरे कार्यरूपादिवत्तथा । सुखदु खेच्छाप्रयत्नादीन्सर्वो लोको गृह्णातीति चेत् । तथापि ग्रहीतुर्लोकस्य विविक्ततैवाभ्युपगता स्यात् । न जानेऽह त्वदुक्तं मुग्ध एवेति चेत् । भवत्वज्ञो मुग्धो, यस्त्वेवंदर्शी त भ्रममुग्धं प्रतिजानीमहे वयम् । तथा

व्यासेनोक्तम्—इच्छादि कृत्स्नं क्षेत्रं क्षेत्री प्रकाशयतीति। "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्स्वविनश्यन्तम्" इत्यादि शतश उक्तम्। तस्मान्नात्मन स्वतो बद्धमुक्तज्ञानाज्ञानकृतो विशेषोऽस्ति। सर्वदा समैकरसस्वाभाव्याभ्युपगमात्॥

ये त्वतोऽन्यथा आत्मवस्तु परिकल्प्य बंधमोक्षादिशास्त्रं चार्थवादमापादयन्ति ते उत्सहन्ते खेऽपि शाकुन पदं द्रष्टुं, ख वा मुष्टिना आकृष्टु, चर्मवद्वेष्टितुम्। वयं तु तत्कर्तुमशक्ता। सर्वदा समैकरसमद्वैतं अविक्रियमजमजरममरममृतमभय आत्मतत्त्व ब्रह्मैव स्म, इत्येष सर्ववेदान्तनिश्चितोर्थ इत्येवं प्रतिपद्यामहे। तस्माद्ब्रह्माप्येतीत्युपचारमात्रमेतत् विपरीतग्रहवद्देहसततेर्विच्छेदमात्रं विज्ञानफलमपेक्ष्य॥६॥

स्वप्नबुद्धान्तगमनदृष्टान्तस्य दार्ष्टान्तिक ससारो वर्णित.। संसारहेतुश्च विद्याकर्मपूर्वप्रज्ञा वर्णिता। येश्चोपाधिभूतै कार्यकरणलक्षणभूतै परिवेष्टित ससारित्वमनुभवति तानि चोक्तानि। तेषा साक्षात्प्रयोजकौ धर्माधर्मावितिपूर्वपक्ष कृत्वा, काम एवेत्यवधारितम्। यथा च ब्राह्मणेनायमर्थोऽवधारित, एव मन्त्रेणापीति बंधं बधकारणं चोक्त्वोपसंहृतं प्रकरण 'इति नु कामयमान' इति। 'अथाकामयमान' इत्यारभ्य सुषुप्तदृष्टान्तस्य दार्ष्टान्तिकभूत सर्वात्मभावो मोक्ष उक्त.। मोक्षकारण च आत्मकामतया यदाप्तकामत्वमुक्तं, तच्च सामर्थ्यान्नात्मज्ञानमंतरेण आत्मकामतया आप्तकामत्वामिति सामर्थ्याद्ब्रह्मविद्यैव मोक्षकारणमित्युक्तम्। अतो यद्यपि कामो मूलमित्युक्तं, तथापि मोक्षकारणविपर्ययेण बधकारणमविद्येत्येतदप्युक्तमेव भवति। अत्रापि मोक्षो मोक्षसाधनं च ब्राह्मणेनोक्तम्। तस्यैव दृढीकरणाय मत्र उदाहियते श्लोकशब्दवाच्य—

तदेष श्लोको भवति। यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति। तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेद शरीर शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेह.॥७॥

तत्तस्मिन्नेवार्थ एष श्लोको मत्रो भवति। यदा यस्मिन्काले सर्वे समस्ताः कामास्तृष्णाप्रभेदा प्रमुच्यन्ते। आत्मकामस्य ब्रह्मविद समूलतो विशीर्यन्ते।

ये प्रसिद्धा लोके इहामुत्रार्था पुत्रवित्तलोकैषणालक्षणा अस्य प्रसिद्धस्य पुरुषस्य हृदि बुद्धौ श्रिता आश्रिता । अथ तदा मर्त्यो मरणधर्मा सन्कामवियोगात्समूलतोऽमृतो भवति । अर्थादनात्मविषया कामा अविद्यालक्षणा मृत्यव इत्येतदुक्तं भवति । अतो मृत्युवियोगे विद्वाञ्जीवन्नेवामृतो भवति । अत्रास्मिन्नेव शरीरे वर्तमानो ब्रह्म समश्नुते ब्रह्मभावं मोक्ष प्रतिपद्यत इत्यर्थ । अतो मोक्षो न देशान्तरगमनाद्यपेक्षते । तस्माद्विदुषो नोत्क्रामन्ति प्राणा यथावस्थिता एव स्वकारणे पुरुषे समवनीयन्ते । नाममात्रं त्ववशिष्यत इत्युक्तम् ॥

कथं पुन समवनीतेषु प्राणेषु देहे च स्वकारणे प्रलीने विद्वान्मुक्तोऽत्रैव सर्वात्मा सन्वर्तमान. पुनः पूर्ववद्देहित्व ससारित्वलक्षण न प्रतिपद्यत इति । अत्रोच्यते—तत्तत्रायं दृष्टान्तो, यथा लोकेऽहि सर्पस्तस्य निर्ल्वयनी निर्मोक सा अहिनिर्ल्वयनी वल्मीके सर्पाश्रये वल्मीकादाविल्यर्थ । मृता प्रत्यस्ता प्रक्षिप्ताऽनात्मभावेन सर्पेण परित्यक्ता शयीत वर्तेत । एवमेव यथायं दृष्टान्त, इद शरीर सर्पस्थानीयेन मुक्तेनानात्मभावेन परित्यक्तं मृतमिव शेते ॥

अथेतर सर्पस्थानीयो मुक्त सर्वात्मभूत सर्पवत्तत्रैव वर्तमानोऽप्यशरीर एव न पूर्ववत्पुन सशरीरो भवति । कामकर्मप्रयुक्तशरीरात्मभावेन हि पूर्व सशरीरो मर्त्यश्च । तद्वियोगादथेदानीमशरीरोऽत एव चामृत । प्राण प्राणितीति प्राण । 'प्राणस्य प्राण' इति हि वक्ष्यमाणे श्लोके । प्राणबंधन हि 'सोम्य मन ' इति च श्रुत्यंतरे । प्रकरणवाक्यसामर्थ्याच्च पर एवात्मात्र प्राणशब्दवाच्य । ब्रह्मैव परमात्मैव । किं पुनस्तत्? तेज एव विज्ञानं ज्योति येनात्मज्योतिषा जगदवभास्यमानं प्रज्ञानेत्रं विज्ञानज्योतिष्मत्सदविभ्रशद्वर्तते ॥

य कामप्रश्नो विमोक्षार्थो याज्ञवल्क्येन वरो दत्तो जनकाय, सहेतुको बंधमोक्षार्थलक्षणो दृष्टान्तदार्ष्टान्तिकभूत स एष निर्णीत सविस्तरो जनकयाज्ञवल्क्याख्यायिकारूपधारिण्या श्रुत्या । संसारविमोक्षोपाय उक्त प्राणिभ्य । इदानीं श्रुति स्वयमेवाह विद्यानिष्क्रयार्थं जनकेनैवमुक्तमिति । कथं? सोऽहमेवं विमोक्षितस्त्वया भगवते तुभ्यं विद्यानिष्क्रयार्थं सहस्रं ददामीति हैवं किलोवाचोक्तवाञ्जनको वैदेह । अत्र कस्माद्विमोक्षपदार्थे निर्णीते विदेहराज्यमात्मानमेव च न निवेदयति, एकदेशोक्ताविव सहस्रमेव ददाति? तत्र कोऽभिप्राय इति ॥

अत्र केचिद्वर्णयन्ति— अध्यात्मविद्यारसिको जनक श्रुतमप्यर्थं पुनर्मैत्रे शुश्रूषति। अतो न सर्वमेव निवेदयति। श्रुत्वाऽभिप्रेतं याज्ञवल्क्यात्पुनरंते निवेदयिष्यामीति हि मन्यते। यदि चात्रैव सर्वं निवेदयामि, निवृत्ताभिलाषोऽयं श्रवणादिति मत्वा श्लोकान्न वक्ष्यतीति च भयात्सहस्रदानं शुश्रूषालिंगज्ञापनायेति। सर्वमप्येतदसत्पुरुषस्येव प्रमाणभूताया श्रुतेर्व्याजानुपपत्तेः। अर्थशेषोपपत्तेश्च। विमोक्षपदार्थे उक्तेऽप्यात्मज्ञानसाधने, आत्मज्ञानशेषभूत सर्वैषणापरित्याग सन्यासाख्यो वक्तव्योऽर्थशेषो विद्यते। तस्मात् श्लोकमात्रशुश्रूषाकल्पना अनृज्वी। अगतिका हि गति पुनरुक्तार्थकल्पना। सा चायुक्ता सत्या गतौ। न च तत्स्तुतिमात्रमित्यवोचाम। नन्वेवं सति 'अत ऊर्ध्वं विमोक्षायैव' इति वक्तव्यम्। नैष दोष। आत्मज्ञानवदप्रयोजक संन्यास पक्षे प्रतिपत्तिकर्मवदिति हि मन्यते। "सन्यासेन तनु त्यजेत्" इति स्मृते। साधनत्वपक्षेऽपि न 'अत ऊर्ध्वं विमोक्षायैव' इति प्रश्नमर्हति, मोक्षसाधनभूतात्मज्ञानपरिपाकार्थत्वात् ॥७॥

तदेते श्लोका भवन्ति। अणु. पंथा विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव। तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥८॥

आत्मकामस्य ब्रह्मविदो मोक्ष इत्येतस्मिन्नर्थे मत्रब्राह्मणोक्ते विस्तरप्रतिपादका एते श्लोका भवन्ति। अणु सूक्ष्म पंथा दुर्विज्ञेयत्वाद्विततो विस्तीर्णो विस्पष्टतरणहेतुत्वाद्वा वितर इति पाठान्तरान्मोक्षसाधनो ज्ञानमार्ग पुराण चिरंतनो नित्यश्रुतिप्रकाशितत्वान्न तार्किकबुद्धिप्रभवकुदृष्टिमार्गवदर्वाक्कालिको, मा स्पृष्टो मया लब्ध इत्यर्थ। यो हि येन लभ्यते स तं स्पृशतीव संबध्यते। तेनाय ब्रह्मविद्यालक्षणो मोक्षमार्गो मया लब्धत्वान्मा स्पृष्ट इत्युच्यते। न केवलं मया लब्ध, किंत्वनुवित्तो मयैव। अनुवेदनं नाम विद्याया परिपाकापेक्षया फलावसानतानिष्ठा प्राप्ति। भुजेरिव तप्त्यवसानता। पूर्वं तु ज्ञानप्राप्तिसंबधमात्रमेवेति विशेष ॥

किमसावेव मत्रदृगेको ब्रह्मविद्याफल प्राप्तो नान्य प्राप्तवान्येन अनुवित्तो मयैवेत्यवधारयति। नैष दोष। अस्या फलमात्मसाक्षिक अनुत्तममिति ब्रह्मविद्याया स्तुतिपरत्वात्। एवं हि कृतार्थास्माभिमानकरं आत्मप्रत्ययसाक्षिकमात्मज्ञानं किमतः परमन्यत्स्यादिति ब्रह्मविद्या स्तौति। न तु पुनरन्यो

ब्रह्मवित्तत्फलं न प्राप्नोतीति । 'तद्यो यो देवानाम्' इति सर्वार्थश्रुते । तदेवाह— तेन ब्रह्मविद्यामार्गेण धीरा प्रज्ञावन्तोऽन्येऽपि ब्रह्मविद इत्यर्थ । अपियन्त्यपिगच्छन्ति ब्रह्मविद्याफलं मोक्ष स्वर्ग लोकम् । स्वर्गलोकशब्द त्रिविष्टपवाच्यपि सन्निह प्रकरणान्मोक्षाभिधायक । इतोऽस्माच्छरीरपातादूर्ध्वं जीवन्त एव विमुक्ता सन्त ॥८॥

तस्मिञ्छुक्लमुत नीलमाहु पिगल हरितं लोहितं च । एष पथा ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥९॥

तस्मिन्मोक्षसाधनमार्गे विप्रतिपत्तिर्मुमुक्षूणाम् । कथम्[1] तस्मिन् शुक्ल शुद्ध विमलमाहु. केचिन्मुमुक्षवो, नीलमन्ये पिगलमन्ये इरित लोहितं च यथा दर्शनम् । नाड्यस्त्वेता सुषुम्नाद्या श्लेष्मादिरससपूर्णा शुक्लस्य नीलस्य पिगलस्येत्याद्युक्तत्वात् । आदित्य वा मोक्षमार्गमेवविधं मन्यन्ते— 'एष शुक्ल एष नील' इत्यादिश्रुत्यतरात् । दर्शनमार्गस्य च शुक्लादिवर्णासभवात् । सर्वथापि तु प्रकृताद्ब्रह्मविद्यामार्गादन्य एते शुक्लादय ॥

ननु शुक्ल शुद्धोऽद्वैतमार्ग । न । नीलपीतादिशब्दैर्वर्णवाचकै सह अनुद्रवणात् । याञ्छुक्लादीन्योगिनो मोक्षपथानाहुर्न ते मोक्षमार्गा । संसारविषया एव हि ते । 'चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्य' इति शरीरदेशाग्नि सरणसंबधात् ब्रह्मादिलोकप्रापका हि ते । तस्मादयमेव मोक्षमार्गो य आत्मकामत्वेन आप्तकामतया सर्वकामक्षये गमनानुपपत्तौ प्रदीपनिर्वाणवच्चक्षुरादीना कार्यकरणानामत्रैव समवनय इत्येष ज्ञानमार्ग पथा ब्रह्मणा परमात्मस्वरूपेणैव ब्राह्मणेन त्यक्तसर्वैषणेन अनुवित्त । तेन ब्रह्मविद्यामार्गेण ब्रह्मविदन्योऽप्येति । कीदृशो ब्रह्मवित्तेनैतीत्युच्यते— पूर्वं पुण्यकृत् भूत्वा पुनस्त्यक्तपुत्राद्येषण. परमात्मतेजस्यात्मानं सयोज्य तस्मिन्नभिनिर्वृत्त तैजसश्चात्मभूत इहैवेत्यर्थ । ईदृशो ब्रह्मवित्तेन मार्गेणैति ॥

न पुन पुण्यादिसमुच्चयकारिणो ग्रहणं, विरोधादित्यवोचाम । "अपुण्यपुण्योपरमे यं पुनर्भवनिर्भया । शान्ता संन्यासिनो यान्ति तस्मै मोक्षात्मने नम" इति च स्मृते । "त्यज धर्ममधर्मं च" इत्यादिपुण्यापुण्यत्यागोपदेशात् । "निराशिषमनारंभं निर्नमस्कारमस्तुतिम् । अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदु ॥" "नैतादृशं ब्राह्मणस्यास्ति वित्त यथैकता समता सत्यता च । शीलं

स्थितिर्दंडनिधानमार्जवं ततस्ततश्चोपरम क्रियाभ्य ।" इत्यादिस्मृतिभ्यश्च । उपदेक्ष्यति चेहापि तु "एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् ।" इति कर्मप्रयोजनाभावे हेतुमुक्त्वा 'तस्मादेवविच्छान्तो दान्त' इत्यादिना सर्वक्रियोपरमम् । तस्माद्यथाव्याख्यातमेव पुण्यकृत्त्वम् । अथवा यो ब्रह्मवित्तेनैति स पुण्यकृत्तेजसश्चेति ब्रह्मवित्स्तुतिरेषा । पुण्यकृति तैजसे च योगिनि महाभाग्यं प्रसिद्धं लोके, ताभ्यामतो ब्रह्मविस्तूयते प्रख्यातमहाभाग्यस्वाल्लोके ॥९॥

अंधं तम प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रता. ॥१०॥

अंधमदर्शनात्मकं तम संसारनियामकं प्रविशन्ति प्रतिपद्यन्ते । के? येऽविद्या विद्यातोऽन्या साध्यसाधनलक्षणामुपासते कर्मानुवर्तन्त इत्यर्थः । तत तस्मादपि भूय इव बहुतरमिव तम प्रविशन्ति । के? य उ विद्याया अविद्यावस्तुप्रतिपादिकाया कर्मार्थाया त्रय्यामेव विद्याया रता अभिरता । विधिप्रतिषेधपर एव वेदो नान्योऽस्तीति उपनिषदर्थानपेक्षिण इत्यर्थ ॥

अनंदा नाम ते लोका अधेन तमसावृता ।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जना ॥११॥

यदि तेऽदर्शनलक्षण तम प्रविशन्ति, को दोष इत्युच्यते— अनंदा अनानंदा असुखा नाम ते लोका. तेनाधेनादर्शनलक्षणेन तमसाऽऽवृता व्याप्ता ते तस्याज्ञानतमसो गोचरा । तांस्ते प्रेत्य मृत्वाऽभिगच्छन्त्यभियान्ति । के? येऽविद्वास । किं सामान्येनाविद्वत्तामात्रेण? नेत्युच्यते— अबुध । बुधेरवगमनार्थस्य धातो क्विप्प्रत्ययान्तस्य रूपम् । आत्मावगमवर्जिता इत्यर्थः । जना प्राकृता एव जननधर्मिणो वेत्येतत् ॥

आत्मानं चेद्विजानीयादयमस्मीति पूरुष ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥१२॥

आत्मानं स्वं परं सर्वप्राणिमनीषितज्ञं हृत्स्थमशनायादिधर्मातीतं चेद्यदि विजानीयात्सहस्रेषु कश्चित् । चेदित्यात्मविद्याया दुर्लभत्वं दर्शयति । कथं? अयं पर आत्मा सर्वप्राणिप्रत्ययसाक्षी यो नेति नेतीत्याद्युक्तो, यस्मान्नान्योऽस्ति द्रष्टा श्रोता मंता विज्ञाता सम सर्वभूतस्थो नित्यशुद्धबुद्धमुक्तस्वभावोऽस्मि भवामीति,

पूरुष पुरुष । स किमिच्छन् तत्स्वरूपव्यतिरिक्तमन्यद्वस्तु फलभूतं किमिच्छन्कस्य वाऽन्यस्य आत्मनो व्यतिरिक्तस्य कामाय प्रयोजनाय । न हि तस्यात्मन एष्टव्यं फलम् । न चाप्यात्मनोऽन्योऽस्ति, यस्य कामायेच्छति, सर्वस्यात्मभूतत्वात् । अत किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेद्भ्रंशेत् । शरीरोपाधिकृतदु खमनु दु खी स्यात् । शरीरतापमनुतप्येत । अनात्मदर्शिनो हि तद्व्यतिरिक्तवस्त्वतरेप्सो । ममेदं स्यात्पुत्रस्येदं भार्याया इदं इत्येवमीहमान पुन-पुनर्जननमरणप्रबंधरूढ शरीररोगमनु रुज्यते । सर्वात्मदर्शिनस्तु तदसंभवः इत्येतदाह ॥

यस्यानुवित्त. प्रतिबुद्ध आत्माऽस्मिन्संदेह्ये गहने प्रविष्टः ।
स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥१३॥

किच यस्य ब्राह्मणस्यानुवित्तोऽनुलब्ध प्रतिबुद्ध साक्षात्कृत । कथ? अहमस्मि परं ब्रह्मेत्येवं प्रत्यगात्मत्वेनावगत आत्माऽस्मिन्संदेह्ये संदेहेऽनेकानर्थसंकटोपचये, गहने विषमेऽनेकशतसहस्रविवेकविज्ञानप्रतिपक्षे विषमे प्रविष्ट । स यस्य ब्राह्मणस्यानुवित्त प्रतिबोधेनेत्यर्थ । स विश्वकृद्विश्वस्य कर्ता । कथ विश्वकृत्त्वं, तस्य किं विश्वकृदिति नामेत्याशंक्याह—स हि यस्मात्सर्वस्य कर्ता न नाममात्रं, न केवलं विश्वकृत्परप्रयुक्त सन् । कि तर्हि तस्य लोक सर्व । किमन्यो लोकोऽन्योऽसावित्युच्यते—स उ लोक एव । लोकशब्देनात्मोच्यते । तस्य सर्व आत्मा स च सर्वस्यात्मेत्यर्थ । य एष ब्राह्मणेन प्रत्यगात्मा प्रतिबुद्धतयाऽनुवित्त आत्माऽनर्थसकटे गहने प्रविष्ट, स न ससारी किंतु पर एव । यस्माद्विश्वस्य कर्ता सर्वस्यात्मा, तस्य च सर्व आत्मा । एक एवाद्वितीय पर एवास्मीत्यनुसंधातव्य इति श्लोकार्थ. ॥

इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदिर्महती विनष्टि ।
ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥१४॥

किंचेहैव अनेकानर्थसंकुले सन्तो भवन्तोऽज्ञानदीर्घनिद्रामोहिता सन्त, कथंचिदिव ब्रह्मतत्त्वमात्मत्वेनाथ विद्म विजानीम, तदेतद्ब्रह्म प्रकृतम् । अहो वयं कृतार्था इत्यभिप्राय· । यदेतद्ब्रह्म विजानीमस्तन्न चेद्विदितवन्तो वयं, वेदनं वेदो वेदोऽस्यास्तीति वेदी वेद्येव वेदिर्न वेदिरवेदि. । ततोहमवेदि. स्याम् । यद्यवेदि. स्यां, को दोष स्यात्? महती अनंतपरिणामा जन्ममरणादिलक्षणा

विनष्टिर्विनशनम् । अहो वयमस्मान्महतो विनशनान्निर्मुक्ता, यदद्वय ब्रह्म विदितवन्त इत्यर्थ । यथा च वयं ब्रह्म विदित्वा अस्माद्विनशनाद्विप्रमुक्ता एवं तद्विदुरमृतास्ते भवन्ति । ये पुनर्नैव ब्रह्म विदुस्ते इतरे ब्रह्मविद्भ्योऽन्येऽब्रह्मविद इत्यर्थ । दु खमेव जन्ममरणादिलक्षणमेवापियन्ति प्रतिपद्यन्ते । न कदाचिदप्यविदुषा ततो विनिवृत्तिरित्यर्थ । दु खमेव हि ते आत्मत्वेनोपगच्छन्ति ॥

यदैतमनुपश्यत्यात्मान देवमंजसा ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥१५॥

यदा पुनरेतमात्मानं कथंचित्परमकारुणिकं कंचिदाचार्यं प्राप्य ततो लब्धप्रसाद सन्ननु पश्चात्पश्यति साक्षात्करोति स्वमात्मान, देव द्योतनवन्तं दातारं वा सर्वप्राणिकर्मफलाना यथाकर्मानुरूपं अंजसा साक्षादीशानं स्वामिन भूतभव्यस्य कालत्रयस्येत्येतत् । न तत तस्मादीशानादेवादात्मान विशेषेण जुगुप्सते गोपायितुमिच्छति । सर्वो हि लोक ईश्वरादुन्निमिच्छति भेददर्शी । अयं त्वेकत्वदर्शी न बिभेति कुतश्चन । अतो न तदा विजुगुप्सते । यदेशान देवमजसा आत्मत्वेन पश्यति न तदा निंदति वा कचित् । सर्वमात्मान हि पश्यति । स एवं पश्यन्कमसौ निंद्यात् ॥

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते ।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥१६॥

किच यस्मादीशानादर्वाग्यस्मादन्यविषय एवेत्यर्थ । संवत्सर कालात्मा सर्वस्य जनिमत परिच्छेत्ता, यमपरिच्छिंदन्नर्वागेव वर्ततेऽहोभि स्वावयवैरहोरात्रैरित्यर्थः । तज्ज्योतिषा ज्योतिरादित्यादि ज्योतिषामवभासकत्वादायुरित्युपासते देवा, अमृतं ज्योतिरतोऽन्यन्म्रियते, न हि ज्योति । सर्वस्य ह्येतज्ज्योतिरायु । आयुर्गुणेन यस्मादेवा तज्ज्योतिरुपासते तस्मादायुष्मन्तस्ते । तस्मादायुष्कामेण आयुर्गुणेनोपास्य ब्रह्मेत्यर्थ ॥

यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः ।
तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥१७॥

किंच यस्मिन्यत्र ब्रह्मणि, पंच पंचजना गंधर्वादय पंचैव संख्याता गंधर्वा पितरो देवा असुरा रक्षासि निषादपंचमा वा वर्णा, आकाशश्चाव्याकृताख्यो यस्मिन्सूत्रमोतं च प्रोतं च, यस्मिन्प्रातिष्ठित । 'एतस्मिन्नु खल्वक्षरे

गार्ग्यकाश ' इत्युक्तम् । तमेवात्मानममृतं ब्रह्म मन्येऽहं न चाहमात्मानं ततोऽन्यत्वेन जाने । किं तर्हि ? अमृतोऽहं ब्रह्म विद्वान्सन्नज्ञानमात्रेण तु मर्त्योऽहमासं, तदपगमाद्विद्वानहममृत एव ॥

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥१८॥

किंच तेन हि चैतन्यात्मज्योतिषाऽवभास्यमान प्राण आत्मभूतेन प्राणिति, तेन प्राणस्यापि प्राण स तं प्राणस्य प्राणम् । तथा चक्षुषोऽपि चक्षुरुत श्रोत्रस्यापि श्रोत्रम् । ब्रह्मशक्त्यधिष्ठिताना हि चक्षुरादीना दर्शनादिसामर्थ्यम् । स्वत काष्ठलोष्टसमानि हि तानि चैतन्यात्मज्योति – शून्यानि । मनसोऽपि मन इति ये विदुश्चक्षुरादिव्यापारानुमितास्तित्व प्रत्यगात्मान न विषयभूतं ये विदुस्ते निचिक्युर्निश्चयेन ज्ञातवन्तो ब्रह्म पुराण चिरंतनमग्र्यमग्रे भवम् । 'तद्यदात्मविदो विदु ' इति ह्याथर्वणे ॥

मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन ।
मृत्यो. स मृत्युमाप्नोति य इह नानेव पश्यति ॥१९॥

तद्ब्रह्मदर्शने साधनमुच्यते मनसैव परमार्थज्ञानसंस्कृतेन आचार्योपदेशपूर्वक चानुद्रष्टव्यम् । तत्र च दर्शनविषये ब्रह्मणि नेह नानास्ति किंचिदपि । असति नानात्वे, नानात्वमध्यारोपयत्यविद्यया । स मृत्योर्मरणान्मृत्युं मरणमाप्नोति । कोऽसौ ? य इह नानेव पश्यति । अविद्याध्यारोपणव्यतिरेकेण नास्ति परमार्थतो द्वैतमित्यर्थ ॥

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ।
विरज पर आकाशादज आत्मा महान्ध्रुवः ॥२०॥

यस्मादेवं तस्मादेकधैवैकेनैव प्रकारेण विज्ञानघनैकरसप्रकारेण आकाशवन्निरंतरेणानुद्रष्टव्यम् । यस्मादेतद्ब्रह्म अप्रमयमप्रमेयम् । सर्वैकत्वात् । अन्येन ह्यन्यत्प्रमीयते, इद त्वेकमेवातोऽप्रमेयम् । ध्रुवं नित्यं कूटस्थमविचालीत्यर्थ । ननु विरुद्धमिदमुच्यतेऽप्रमेयं ज्ञायत इति च । ज्ञायत इति प्रमाणैर्मीयत इत्यर्थ, अप्रमेयमिति च तत्प्रतिषेध । नैष दोष । अन्यवस्तुवत् अनागमप्रमाणप्रमेयत्वप्रतिषेधार्थत्वात् । यथाऽन्यानि वस्तून्यागमनिरपेक्षै प्रमाणैर्विषयीक्रियन्ते, न तथैतदात्मतत्त्व प्रमाणान्तरेण विषयीकर्तुं शक्यते । सर्वस्यात्मत्वे केन कं

पश्येद्विजानीयादिति प्रमातृप्रमाणादिव्यापारप्रतिषेधेनैव आगमोऽपि विज्ञापयति, न त्वभिधानाभिधेयलक्षणवाक्यधर्मांगीकरणेन । तस्मान्न आगमेनापि स्वर्गमेवादिवत्तत्प्रतिपाद्यते । प्रतिपादयित्रात्मभूत हि तत् । प्रतिपादयितु प्रतिपादनस्य प्रतिपाद्यविषयत्वात् । भेदे हि सति तद्भवति ॥

ज्ञान च तस्मिन्परात्मभावनिवृत्तिरेव । न तस्मिन्साक्षादात्मभावः कर्तव्यो, विद्यमानत्वादात्मभावस्य । नित्यो ह्यात्मभाव· सर्वस्यातद्विषय इव प्रत्यवभासते । तस्मादतद्विषयाभासनिवृत्तिव्यतिरेकेण न तस्मिन्नात्मभावो विधीयते । अन्यात्मभावनिवृत्तौ आत्मभाव स्वात्मनि स्वाभाविको य स केवलो भवतीत्यात्मा ज्ञायत इत्युच्यते । स्वतश्चाप्रमेय प्रमाणान्तरेण न विषयीक्रियते इति उभयमप्यविरुद्धमेव । विरजो विगतरजो रजो नाम धर्माधर्मादिमल तद्रहित इत्येतत् । पर परो व्यतिरिक्त सूक्ष्मो व्यापी वा आकाशादप्यव्याकृताख्यात् । अजो न जायते । जन्मप्रतिषेधादुत्तरेऽपि भावविकारा प्रतिषिद्धा । सर्वेषा जन्मादित्वात् । आत्मा महान्परिमाणतो महत्तर सर्वस्मात् । ध्रुवोऽविनाशी ॥२०॥

तमेव धीरो विज्ञाय प्रज्ञा कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापन हि तदिति ॥२१॥

तमीदृशमात्मानमेव धीरो धीमान्विज्ञायोपदेशत शास्त्रतश्च, प्रज्ञा शास्त्राचार्योपदिष्टविषया जिज्ञासापरिसमाप्तिकरीं कुर्वीत ब्राह्मण । एवं प्रज्ञाकरणसाधनानि सन्यासशमदमोपरमतितिक्षासमाधानानि कुर्यादित्यर्थ । नानुध्यायान्नानुचिंतयेद्बहून्प्रभूताञ्छब्दान् । तत्र बहुत्वप्रतिषेधात्केवलात्मैकत्वप्रतिपादका स्वल्पा शब्दा अनुज्ञायन्ते । 'ओमित्येव ध्यायथ आत्मानम्' 'अन्या वाचो विमुंचथ' इति चाथर्वणे । वाचो विग्लापन विशेषेण ग्लानिकर श्रमकर हि यस्मात् तत्तद्बहुशब्दाभिध्यानमिति ॥

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनि-

भवति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽय लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः । स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसगो न हि सज्यतेऽसितो न व्यथते न रिष्यत्येतमु हैवैते न तरत इत्यत पापमकरवमित्यतः कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः ॥२२॥

सहेतुकौ बधमोक्षावभिहितौ मंत्रब्राह्मणाभ्याम् । श्लोकैश्च पुनर्मोक्षस्वरूपं विस्तरेण प्रतिपादितम् । एवमेतस्मिन्नात्मविषये सर्वो वेदो यथोपयुक्तो भवति, तत्तथा वक्तव्यमिति तदर्थेयं कंडिका आरभ्यते । तच्च यथाऽस्मिन्प्रपाठकेऽभिहित सप्रयोजनमनूद्यात्रैवोपयोग कृत्स्नस्य वेदस्य काम्यराशिवर्जितस्येत्येवमर्थ उक्तार्थानुवाद 'स वा एष' इत्यादि । स इत्युक्तपरामर्शार्थ । कोऽसावुक्त परामृश्यते, तं प्रति निर्दिशति य एष विज्ञानमय इति । अतीतानंतरवाक्योक्तसंप्रत्ययो मा भूदिति य एष । कतम एष इत्युच्यते विज्ञानमय प्राणेष्विति । उक्तवाक्योल्लिंगनं संशयनिवृत्त्यर्थम् । उक्तं हि पूर्वं जनकप्रश्नारंभे 'कतम आत्मेति योऽय विज्ञानमय प्राणेषु' इत्यादि । एतदुक्तं भवति— योऽयं विज्ञानमय प्राणेष्वित्यादिना वाक्येन प्रतिपादित स्वयं ज्योतिरात्मा, स एष कामकर्माविद्याना अनात्मधर्मत्वप्रतिपादनद्वारेण मोक्षित परमात्मभावमापादितः पर एवायं नान्य इति । एष स साक्षान्महानज आत्मेत्युक्त. । योऽयं विज्ञानमय प्राणेष्विति यथाव्याख्यातार्थ एव । य एषोऽन्तर्हृदये हृदयपुंडरीकमध्ये य एष आकाशो बुद्धिविज्ञानसंश्रय, तस्मिन्नाकाशे बुद्धिविज्ञानसहिते शेते तिष्ठति । अथवा संप्रसादकालेऽन्तर्हृदये य एष आकाश पर एवात्मा निरुपाधिको विज्ञानमयस्य स्वस्वभाव, तस्मिन्स्वस्वभावे परमात्मन्याकाशाख्ये शेते । चतुर्थे एतद्व्याख्यातं "कैष तदाऽभूत्" इत्यस्य प्रतिवचनत्वेन । स च सर्वस्य ब्रह्मेंद्रादेर्वशी । सर्वो ह्यस्य वशे वर्तते । उक्तं च 'एतस्य वा अक्षरस्य प्रशासने' इति । न केवलं वशी, सर्वस्येशान ईशिता च ब्रह्मेंद्रप्रभृतीनाम् । ईशितृत्वं च कदाचिज्जातिकृतं यथा राजकुमारस्य बलवत्तरानपि भृत्यान्प्रति,

तद्वन्मा भूदित्याह—सर्वस्याधिपतिः अधिष्ठाय पालयिता स्वतंत्र इत्यर्थः। न राजपुत्रवदमात्यादिभृत्यतन्त्र। त्रयमप्येतदृशित्वादि हेतुहेतुमद्रूपम्। यस्मात्सर्वस्याधिपति, ततोऽसौ सर्वस्येशान। यो हि यमधिष्ठाय पालयति स तं प्रतीष्ट एवेति प्रसिद्धम्। यस्माच्च सर्वस्येशान, तस्मात्सर्वस्य वशीति। किंचान्यत्स एवंभूतो हृद्यंतर्ज्योति पुरुषो विज्ञानमयो न साधुना शास्त्रविहितेन कर्मणा भूयान्भवति, न वर्धते पूर्ववस्यात केनचिद्धर्मेण। नो एव शास्त्रप्रतिषिद्धेनासाधुना कर्मणा कनीयानल्पतरो भवति, पूर्ववस्थातो न हीयत इत्यर्थः। किंच सर्वो ह्यधिष्ठानपालनादि कुर्वन्परानुग्रहपीडाकृतेन धर्माधर्माख्येन युज्यते। अस्यैव तु कथं तदभाव इति उच्यते—यस्मादेष सर्वेश्वर सन्कर्मणोऽपीशितु भवत्येव शीलमस्य, तस्मान्न कर्मणा सबध्यते। किंचैष भूताधिपतिर्ब्रह्मादिस्तंबपर्यंताना भूतानामधिपतिरित्युक्तार्थ पदम्॥

एष भूताना तेषामेव पालयिता रक्षिता। एष सेतु। किंविशिष्ट इत्याह–विधरणो वर्णाश्रमादिव्यवस्थाया विधारयिता। तदाह—एषा भूरादीना ब्रह्मलोकान्ताना लोकानामसभेदायासाभिन्नमर्यादायै। परमेश्वरेण सेतुवदविधार्यमाणा लोका सभिन्नमर्यादा स्यु। अतो लोकानामसभेदाय सेतुभूतोऽय परमेश्वरो, य स्वयज्योतिरात्मैव। एवंवित्सर्वस्य वशीत्यादि ब्रह्मविद्याया फलमेतन्निर्दिष्टम्। 'किं ज्योतिरयं पुरुष' इत्येवमादिषष्ठप्रपाठकविहितायामेतस्या ब्रह्मविद्यायामेवफलाया काम्यैकदेशवर्जितं कृत्स्नं कर्मकाडं तादर्थ्येन विनियुज्यते। तत्कथमित्युच्यते—तमेतमेवंभूतमौपनिषद पुरुषं वेदानुवचनेन मंत्रब्राह्मणाध्ययनेन नित्यस्वाध्यायलक्षणेन विविदिषन्ति वेदितुमिच्छन्ति। के? ब्राह्मणा। ब्राह्मणग्रहणमुपलक्षणार्थम्। अविशिष्टो ह्यधिकारस्त्रयाणा वर्णानाम्। अथवा कर्मकाडेन मंत्रब्राह्मणेन वेदानुवचनेन विविदिषन्ति। कथं विविदिषन्तीत्युच्यते यज्ञेनेत्यादि॥

ये पुनर्मंत्रब्राह्मणलक्षणेन वेदानुवचनेन प्रकाश्यमानं विविदिषन्तीति व्याचक्षते, तेषामारण्यकमात्रमेव वेदानुवचनं स्यात्। न हि कर्मकाडेन परआत्मा प्रकाश्यते। 'तं त्वौपनिषदं' इति विशेषश्रुते। वेदानुवचनेनेति च अविशेषितत्वात्समस्तग्राहीदं वचनम्। न च तदेकदेशोत्सर्गो युक्त। ननु त्वत्पक्षेऽपि उपनिषद्वर्जमित्येकदेशत्वं स्यात्। न। आद्यव्याख्यानेऽविरोधा-

दस्मत्पक्षे नैष दोषो भवति । यदा वेदानुवचनशब्देन नित्य स्वाध्यायो विधीयते तदोपनिषदपि गृहीतैवेति वेदानुवचनशब्दार्थैकदेशो न परित्यक्तो भवति । यज्ञादिसहपाठाच्च । यज्ञादीनि कर्माण्येवानुक्रमिष्यन्वेदानुवचनशब्दं प्रयुक्ते । तस्मात्कर्मैव वेदानुवचनशब्देनोच्यत इति गम्यते । कर्म हि नित्यस्वाध्याय ॥

कथ पुनर्नित्यस्वाध्यायादिभि कर्मभिरात्मानं विविदिषन्ति? नैव हि तान्यात्मानं प्रकाशयन्ति यथोपनिषद । नैष दोष । कर्मणा विशुद्धिहेतुत्वात् । कर्मभि सस्कृता हि विशुद्धात्मान शक्नुवन्त्यात्मानमुपनिषत्प्रकाशितमप्रतिबंधेन वेदितुम् । तथा ह्याथर्वणे—'विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान' इति । स्मृतिश्च—"ज्ञानमुत्पद्यते पुसा क्षयात्पापस्य कर्मण" इत्यादि ॥

कथ पुनर्नित्यानि कर्माणि सस्कारार्थानीत्यवगम्यते? "स ह वा आत्मयाजी यो वेदेद मेऽनेनागं संस्क्रियत इद मेऽनेनागमुपधीयते" इत्यादिश्रुते । सर्वेषु च स्मृतिशास्त्रेषु कर्माणि संस्कारार्थान्येव आचक्षते "अष्टाचत्वारिंशत्संस्कारा" इत्यादिषु । गीतासु च—"यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् । सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषा" इति । यज्ञेनेति द्रव्ययज्ञा ज्ञानयज्ञाश्च संस्कारार्था । सस्कृतस्य च विशुद्धसत्वस्य ज्ञानोत्पत्ति अप्रतिबंधेन भविष्यति । अतो यज्ञेन विविदिषन्ति । दानेन । दानमपि पापक्षयहेतुत्वाद्धर्मबुद्धिहेतुत्वाच्च । तपसा, तप इत्यविशेषेण कृच्छ्रचाद्रायणादिप्राप्तौ विशेषणमनाशकेनेति । कामानशनमनाशकं न तु भोजननिवृत्ति । भोजननिवृत्तौ म्रियत एव नात्मवेदनम् । वेदानुवचनयज्ञदानतपःशब्देन सर्वमेव नित्यं कर्मोपलक्ष्यते । एवं काम्यवार्जितं नित्यं कर्मजातं सर्वमात्मज्ञानोत्पत्तिद्वारेण मोक्षसाधनत्वं प्रतिपद्यते । एवं कर्मकाडेनास्य एकवाक्यतावगति । एवं यथोक्तेन न्यायेन एतमेवात्मान विदित्वा यथाप्रकाशित मुनिर्भवति, मननान्मुनिर्योगी भवतीत्यर्थ । एतमेव विदित्वा मुनिर्भवति नान्यम् । नन्वन्यवेदनेऽपि मुनित्वं स्यात् कथमवधार्यत एतमेवेति? बाढं, अन्यवेदनेऽपि मुनिर्भवेत् । किंत्वन्यवेदने न मुनिरेव स्यात्किं तर्हि, कर्म्यपि भवेत्स । एतत्वौपनिषद पुरुषं विदित्वा मुनिरेव स्यान्न तु कर्मी । अतोऽसाधारणं मुनित्वं विवक्षितमस्येत्यवधारयति एतमेवेति । एतस्मिन्हि विदिते केन कं पश्येदित्येवं क्रियासंभवान्मनन-

मेव स्यात्। किंच एतमेवात्मानं स्व लोकमिच्छन्त प्रार्थयन्त प्रव्राजिन-प्रव्रजनशीला प्रव्रजन्ति प्रकर्षेण व्रजन्ति, सर्वाणि कर्माणि संन्यस्यन्तीत्यर्थः॥

एतमेव लोकमिच्छन्त इत्यवधारणान्न बाह्यलोकत्रयेप्सूना पारिव्राज्येऽधिकार इति गम्यते। न हि गंगाद्वारं प्रतिपित्सु काशीदेशनिवासी पूर्वाभिमुख प्रैति। तस्माद्बाह्यलोकत्रयार्थिना पुत्रकर्मापरब्रह्मविद्या साधनम्। "पुत्रेणायं लोको जय्यो नान्येन कर्मणा" इत्यादि श्रुते। अतस्तदर्थिभि पुत्रादिसाधनं प्रत्याख्याय न पारिव्राज्यं प्रतिपत्तु युक्तम्। अतत्साधनत्वात्पारिव्राज्यस्य। तस्मादेतमेव लोकमिच्छन्त प्रव्रजन्तीति युक्तमवधारणम्। आत्मलोकप्राप्तिर्हि अविद्यानिवृत्तौ स्वात्मन्यवस्थानमेव। तस्मादात्मान चेल्लोकमिच्छति य, तस्य सर्व क्रियोपरम एव आत्मलोकसाधन मुख्यमंतरंगम्। यथा पुत्रादिरेव बाह्यलोक-त्रयस्य। पुत्रादिकर्मण आत्मलोकं प्रत्यसाधनत्वात्। असंभवन च विरुद्धत्व-मवोचाम। तस्मादात्मान लोकमिच्छन्त प्रव्रजन्त्येव, सर्वक्रियाभ्यो निर्वर्ते-रन्नेवेत्यर्थ। यथा च बाह्यलोकत्रयार्थिन प्रतिनियतानि पुत्रादीनि साधनानि विहितानि, एवमात्मलोकार्थिन सर्वैषणानिवृत्ति पारिव्राज्य ब्रह्मविदो विधी-यत एव॥

कुत पुनस्ते आत्मलोकार्थिन प्रव्रजन्त्येवेत्युच्यते? तत्र अर्थवादवाक्य-रूपेण हेतु दर्शयति। एतद्ध स्म वै तत्। तदेतत्पारिव्राज्ये कारणमुच्यते— ह स्म वै किल पूर्वेऽतिक्रान्तकालीना विद्वास आत्मज्ञा प्रजा कर्मापरब्रह्म-विद्या च। प्रजोपलक्षितं हि त्रयमेतद्बाह्यलोकत्रयसाधन निर्दिश्यते प्रजामिति। प्रजा किं? न कामयन्ते। पुत्रादिलोकत्रयसाधन नानुतिष्ठन्तीत्यर्थ। नन्व-परब्रह्मदर्शनमनुतिष्ठन्त्येव। तद्बलाद्धि व्युत्थानम्। न। अपवादात्। 'ब्रह्म त परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' 'सर्व तं परादात्' इत्यपरब्रह्मदर्शनमप्यपवद-त्येव। अपरब्रह्मणोऽपि सर्वमन्यान्तर्भावात्। 'यत्र नान्यत्पश्यति' इति च। पूर्वापरबाह्यान्तरदर्शनप्रतिषेधाच्च 'अपूर्वमनपरमनंतरमबाह्य' इति। 'तत्केन क पश्येद्विजानीयात्' इति च। तस्मान्न आत्मदर्शनव्यतिरेकेणान्यत् व्युत्थान-कारणमपेक्षते॥

क पुनस्तेषामभिप्राय इत्युच्यते— किं प्रयोजनं फलं साध्यं करिष्याम-प्रजया साधनेन। प्रजा हि बाह्यलोकसाधन निर्ज्ञाता। स च बाह्यलोको

नास्त्यस्माकमात्मव्यतिरिक्त । सर्वं ह्यस्माकमात्मभूतमेव, सर्वस्य च वयमात्मभूता. । आत्मा च न आत्मत्वादेव न केनचित्साधनेनोत्पाद्य आप्यो विकार्य संस्कार्यो वा । यदप्यात्मयाजिन संस्कारार्थं कर्मेति, तदपि कार्यकरणात्मदर्शनविषयमेव । इद मेऽनेनाग संस्क्रियते इत्यंगागित्वादिश्रवणात् । न हि विज्ञानघनैकरसनैरंतर्यदर्शिन अंगागिसंस्कारोपधानदर्शन सभवति । तस्मान्न किंचित्प्रजादिसाधनै करिष्याम । अविदुषा हि तत्प्रजादिसाधनै कर्तव्यं फलम् । न हि मृगतृष्णिकायामुदकपानाय तदुदकदर्शी प्रवृत्त इति तत्रोषरमात्रमुदकाभाव पश्यतोऽपि प्रवृत्तिर्युक्ता । एवमस्माकमपि परमार्थात्मलोकदर्शिना प्रजादिसाधनसाध्ये मृगतृष्णिकादिसमेऽविद्वद्दर्शनविषये न प्रवृत्तिर्युक्तेत्यभिप्राय ॥

. तदेतदुच्यते— येषामस्माकं परमार्थदर्शिना न अयमात्मा अशनायादिविनिर्मुक्त साध्यसाधुभ्यामविकार्योऽय लोक फलमभिप्रेतम् । न चास्यात्मन साध्यसाधनादिसर्वससारधर्मविनिर्मुक्तस्य साधन किंचिदेषितव्यम् । साध्यस्य हि साधनान्वेषणा क्रियते । असाध्यस्य साधनान्वेषणाया हि जलबुद्धया स्थल इव तरण कृत स्यात् । खे वा शाकुनपदान्वेषणम् । तस्मादेतं आत्मानं विदित्वा प्रव्रजेयुरेव ब्राह्मणा., न कर्मारभेरन्नित्यर्थ । यस्मात्पूर्वे ब्राह्मणा एव विद्वास· प्रजामकामयमाना । त एवं साध्यसाधनसव्यवहारं निंदन्तोऽविद्वद्विषयोऽयमिति कृत्वा, किं कृतवन्त इत्युच्यते— ते ह स्म किल पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीत्यादि व्याख्यातम् ॥

तस्मादात्मानं लोकमिच्छन्त प्रव्रजन्ति प्रव्रजेयुः, इत्येष विधिरर्थवादेन संगच्छते । न हि सार्थवादस्यास्य लोकस्तुत्याभिमुख्यमुपपद्यते । प्रव्रजन्तीत्यस्यार्थवादरूपो हि एतद्ध स्म इत्यादिरुत्तरो ग्रथ । अर्थवादश्चेन्नार्थवादान्तरमपेक्षेत । अपेक्षते तु एतद्ध स्मेत्यायर्थवादं प्रव्रजन्तीत्येतत् ॥

यस्मात्पूर्वे विद्वास प्रजादिकर्मभ्यो निवृत्ता प्रव्रजितवन्त एव, तस्मादधुनातना अपि प्रव्रजन्ति प्रव्रजेयु, इत्येवं संबध्यमानं न लोकस्तुत्यभिमुखं भवितुमर्हति । विज्ञानसमानकर्तृकत्वोपदेशादित्यादिना अवोचाम । वेदानुवचनादिसहपाठाच्च । यथा आत्मवेदनसाधनत्वेन विहिताना वेदानुवचनादीनां यथार्थत्वमेव, नार्थवादत्वं, तथा तैरेव सह पठितस्य पारिव्राज्यस्य आत्मलोक-

प्राप्तिसाधनत्वेन अर्थवादत्वमयुक्तम् । फलविभागोपदेशाच्च । 'एतमेवात्मानं लोक विदित्वा' इत्यन्यस्माद्वाद्याल्लोकादात्मान फलान्तरत्वेन प्रविभजति । यथा 'पुत्रेणैवायं लोको जय्यो नान्येन कर्मणा, कर्मणा पितृलोक' इति । न च प्रव्रजन्तीत्येतत्प्राप्तवल्लोकस्तुतिपरम् । प्रधानवच्चार्थवादापेक्षम् । सकृत् श्रुतं स्यात् । तस्मात् भ्रान्तिरेवैषा लोकस्तुतिपरामिति ॥

न चानुष्ठेयेन पारिव्राज्येन स्तुतिरुपपद्यते । यदि पारिव्राज्यमनुष्ठेयमपि सदन्यस्तुत्यर्थं स्यात् दर्शपूर्णमासादीनामप्यनुष्ठेयाना स्तुत्यर्थता स्यात् । न चान्यत्र कर्तव्यता एतस्माद्विषयान्निर्ज्ञाता यत इह स्तुत्यर्थो भवेत् । यदि पुन क्वचिद्विधि परिकल्प्येत पारिव्राज्यस्य, स इहैव मुख्यो नान्यत्र संभवति । यदप्यनधिकृतविषये पारिव्राज्यं परिकल्प्यते, तत्र वृक्षाद्यारोहणाद्यपि पारिव्राज्यवत्कल्प्येत । कर्तव्यत्वेन अनिर्ज्ञातत्वाविशेषात् । तस्मात्स्तुतित्वगंधोऽप्यत्र न शक्य कल्पयितुम् ॥

यद्ययमात्मा लोक इष्यते, किमर्थं तत्प्राप्तिसाधनत्वेन कर्माण्येव नारभेरन् किं पारिव्राज्येनेति । अत्रोच्यते— अस्यात्मलोकस्य कर्मभिरसंबंधात् । यमात्मानमिच्छन्त प्रव्रजेयु , स आत्मा साधनत्वेन फलत्वेन च उत्पाद्यत्वादिप्रकाराणामन्यतमत्वेनापि कर्मभिर्न सबध्यते । तस्मात्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते इत्यादिलक्षण । यस्मादेवंलक्षण आत्मा कर्मफलसाधनासंबंधी सर्वसंसारधर्मविलक्षण अशनायाद्यतीत अस्थूलादिधर्मवान् अजोऽजरोऽमरोऽमृतोऽभय सैधवघनवद्विज्ञानैकरसस्वभाव स्वयज्योति एक एवाद्वय अपूर्वोऽनपरोऽनंतरोऽबाह्य इत्येतदागमतस्तर्कतश्च स्थापितं, विशेषतश्चेह जनकयाज्ञवल्क्यसंवादेऽस्मिन्, तस्मादेवंलक्षण आत्मनि विदित आत्मत्वेन नैव कर्मारंभ उपपद्यते । तस्मादात्मा निर्विशेष । न हि चक्षुष्मान्पथि प्रवृत्तोऽहनि कूपे कंटके वा पतति । कृत्स्नस्य च कर्मफलस्य विद्याफलेऽन्तर्भावात् । न चायत्नप्राप्ये वस्तुनि विद्वान्यत्नमातिष्ठति । "अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत् । इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेत्" । "सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते" इति गीतासु । इहापि चैतस्यैव परमानंदस्य ब्रह्मवित्प्राप्यस्यान्यानि भूतानि मात्रामुपजीवन्तीत्युक्तम् । अतो ब्रह्मविदां न कर्मारंभ ॥

यस्मात्सर्वैषणाविनिवृत्त स एष नेति नेत्यात्मानमात्मत्वेनोपगम्य तद्रूपेणैव वर्तते, तस्मादेतमेवविदं नेति नेत्यात्मभूत उ हैवैते वक्ष्यमाणे न तरतो न प्राप्नुत, इति युक्तमेवेति वाक्यशेष । के ते इत्युच्यते— अतोऽस्मान्निमित्ताच्छरीरधारणादिहेतो, पापमपुण्यं कर्माकरवं कृतवानस्मि, कष्टं खलु मम वृत्त अनेन पापेन कर्मणाह नरक प्रतिपत्स्ये, इति योऽयं पश्चात्पाप कर्म कृतवत परिताप, स एनं नेति नेत्यात्मभूतं न तरति । तथा अत कल्याण फलविषयकामान्निमित्तात् यज्ञदानादिलक्षण पुण्य शोभन कर्म कृतवानस्मि । अतोऽहमस्य फलं सुखमुपभोक्ष्ये देहान्तर इत्येषोऽपि हर्षस्तं न तरति । उभे उ हैवैष ब्रह्मविदेते कर्मणी तरति पुण्यपापलक्षणे । एवं ब्रह्मविदः संन्यासिन उभे अपि कर्मणी क्षीयेते पूर्वजन्मनि कृते ये ते, इह जन्मनि कृते ये ते च । अपूर्वे च नारभ्येते । किंच नैन कृताकृते, कृत नित्यानुष्ठानमकृत तस्यैवाक्रिया, ते अपि कृताकृते, एन न तपत । अनात्मज्ञ हि कृतं फलदानेनाकृत प्रत्यवायोत्पादनेन तपत । अय तु ब्रह्मविदात्मविद्याग्निना सर्वाणि कर्माणि भस्मीकरोति । "यथैधासि समिद्धोऽग्नि" इत्यादिस्मृते । शरीरारभकयोस्तु उपभोगेनैव क्षय । अतो ब्रह्मविदकर्मसबंधी ॥२२॥

तदेतदृचाऽभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् । तस्यैवं स्यात्पदवित्त विदित्वा न लिप्यते कर्मणा पापकेनेति । तस्मादेवविच्छान्तो दान्त उपरतस्तितिक्षु समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैन पाप्मा तरति सर्वं पाप्मान तरति नैन पाप्मा तपति सर्वं पाप्मान तपति विपापो विरजोऽविचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोक सम्राडेन प्रापितोऽसीति होवाच याज्ञवल्क्य. सोऽहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति ॥२३॥

तदेतद्वस्तु ब्राह्मणेनोक्तमृचा मंत्रेणाभ्युक्तं प्रकाशितम् । एष नेति नेत्यादिलक्षणो नित्यो महिमा । अन्ये तु महिमान कर्मकृता इत्यनित्या । अयं तु तद्विलक्षणो महिमा स्वाभाविकत्वान्नित्यो ब्रह्मविदो ब्राह्मणस्य त्यक्तसर्वैषणस्य । कुतोऽस्य नित्यत्वमिति हेतुमाह— कर्मणा न वर्धते शुभलक्षणेन कृतेन वृद्धिलक्षणा विक्रिया न प्राप्नोति । अशुभेन कर्मणा नो कनीयान्नाप्यपक्षयलक्षणा विक्रियां प्राप्नोति । उपचयापचयहेतुभूता एव हि सर्वा विक्रिया

इत्येताभ्या प्रतिषिध्यन्ते । अतोऽविक्रियत्वान्नित्य एष महिमा । तस्मात्तस्यैव महिम्न स्याद्धवेत्पदवित्पदस्य वेत्ता । पद्यते गम्यते ज्ञायत इति महिम्न स्वरूपमेव पदं तस्य पदस्य वेदिता । किं तत्पदवेदनेन स्यादित्युच्यते— त विदित्वा महिमानं न लिप्यते न सबध्यते कर्मणा पापकेन धर्माधर्मलक्षणेन । उभयमपि पापकमेव विदुष ॥

यस्मादेवमकर्मसबधी एष ब्राह्मणस्य महिमा नेति नेत्यादिलक्षण, तस्मादेवविच्छान्तो बाह्येंद्रियव्यापारत उपशान्त, तथा दान्तोऽन्त करणतृष्णातो निवृत्त, उपरत सर्वैषणाविनिर्मुक्त सन्यासी, तितिक्षुर्द्वंद्वसहिष्णु समाहित इंद्रियात करणचलनरूपाद्यावृत्त्य ऐकाग्र्यरूपेण समाहितो भूत्वा । तदेतदुक्तं पुरस्तात् 'बाल्य च पाडित्य च निर्विद्य' इति । आत्मन्येव स्वे कार्यकरणसंघाते आत्मानं प्रत्यक्चेतयितारं पश्यति । तत्र किं तावन्मात्र परिच्छिन्न[1] नेत्युच्यते— सर्वं समस्तमात्मानमेव पश्यति, नान्यदात्मव्यतिरिक्त वालाग्रमात्रमप्यस्तीत्येव पश्यति । मननान्मुनिर्भवति, जाग्रत्स्वप्नसुषुप्ताख्यं स्थानत्रयं हित्वा । एव पश्यन्तं ब्राह्मणं नैन पाप्मा पुण्यपापलक्षणस्तरति, न प्राप्नोति । अयं तु ब्रह्मवित् सर्वं पाप्मानं तरत्यात्मभावेनैव व्याप्नोत्यतिक्रामति । नैनं पाप्मा कृताकृतलक्षण तपति इष्टफलप्रत्यवायोत्पादनाभ्याम् । सर्व पाप्मानमय तपति ब्रह्मवित्सर्वात्मदर्शनवह्निना भस्मीकरोति । स एष एवंविद्विपापो विगतधर्माधर्मो, विरजो विगतरजो, रज कामो विगतकाम , अविचिकित्स छिन्नसशय , अहमस्मि सर्वात्मा पर ब्रह्मेति निश्चितमतिर्ब्राह्मणो भवति ॥

अयं त्वेवभूत एतस्यामवस्थाया मुख्यो ब्राह्मणः प्रागेतस्माद्ब्रह्मस्वरूपावस्थानाद्गौणमस्य ब्राह्मण्यम् । एष ब्रह्मलोको, ब्रह्मैव लोको ब्रह्मलोको मुख्यो निरुपचरित सर्वात्मभावलक्षणो, हे सम्राट् । एनं ब्रह्मलोक परिप्रापितोऽसि अभयं नेति नेत्यादिलक्षणमिति होवाच याज्ञवल्क्य ॥

एवं ब्रह्मभूतो जनको याज्ञवल्क्येन ब्रह्मभावमापादित. प्रत्याह— सोऽहं त्वया ब्रह्मभावमापादित सन्भगवते तुभ्यं विदेहान्देशान्मम राज्यं समस्तं ददामि, मां च सह विदेहैर्दास्याय दासकर्मणे ददामीति च शब्दात्संबध्यते ॥

परिसमापिता ब्रह्मविद्या सह संन्यासेन सागा सेतिकर्तव्यताका । परिसमाप्त परमपुरुषार्थ । एतावत्पुरुषेण कर्तव्यं, एषा निष्ठैषा परा गति, एतन्नि श्रेयसं, एतत्प्राप्य कृतकृत्यो ब्राह्मगो भवत्येतत्सर्ववेदानुशासनमिति ॥२३॥

स वा एष महानज आत्माऽन्नादो वसुदानो विंदते वसु य एव वेद ॥२४॥

योऽय जनकयाज्ञवल्क्याख्यायिकाया व्याख्यात आत्मा स वा एष महानज आत्माऽन्नाद सर्वभूतस्थ सर्वान्नानामत्ता, वसुदानो वसु धनं सर्वप्राणिकर्मफल तस्य दाता, प्राणिना यथाकर्म फलेन योजयितेत्यर्थ । तमेतमजमन्नादं वसुदानमात्मानं अन्नादवसुदानगुणाभ्या युक्त यो वेद, स सर्वभूतेष्वात्मभूतोऽन्नमत्ति, विदते च वसु सर्व कर्मफलजातं लभते सर्वात्मत्वादेव, य एव यथोक्त वेद । अथवा दृष्टफलार्थिभिरप्येवगुण उपास्य । तेनान्नादो वसोश्च लब्धा, दृष्टेनैव फलेनान्नातृत्वेन गोश्वादिना चास्य योगो भवतीत्यर्थ ॥

स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभय वै ब्रह्माभय हि वै ब्रह्म भवति य एव वेद ॥२५॥ इति चतुर्थं ब्राह्मणम् ॥

इदानीं समस्तस्यैव आरण्यकस्य योऽर्थ उक्त, स समुच्चित्यास्या कंडिकाया निर्दिश्यते, एतावान्समस्तारण्यकार्थ इति । स वा एष महानज आमाऽजरो न जीर्यत इति, न विपरिणमत इत्यर्थ । अमरो, यस्माच्चाजरस्तस्मादमरो, न म्रियत इत्यमर । यो हि जायते जीर्यते च, स विनश्यति म्रियते वा । अय त्वजत्वादजरत्वाच्चाविनाशी यतोऽत एवामृत । यस्माज्जनिप्रभृतिभि त्रिभिर्भावविकारैर्वर्जित तस्मादितेररपि भावविकारैस्त्रिभि तत्कृतैश्च कामकर्ममोहादिभिर्मृत्युरूपैर्वर्जित इत्येतत् । अभयोऽत एव । यस्माच्चैव पूर्वोक्तविशेषण, तस्माद्भयवर्जितः । भयं च हि नामाविद्याकार्यं, तत्कार्यप्रतिषेधेन भावविकारप्रतिषेधेन चाविद्याया प्रतिषेध सिद्धो वेदितव्य । अभय आत्मा एवंगुणविशिष्ट किमसौ ब्रह्म परिवृढं निरतिशय महदित्यर्थ । अभयं वै ब्रह्म । प्रसिद्धमेतल्लोकेऽभयं ब्रह्मेति । तस्माद्युक्त एवंगुणविशिष्ट आत्मा ब्रह्मेति ॥

य एवं यथोक्तमात्मानमभयं ब्रह्म वेद, सोऽभय हि वै ब्रह्म भवति । एष सर्वस्या उपनिषद संक्षिप्तोऽर्थ उक्त । एतस्यैवार्थस्य सम्यक्प्रबोधाय उत्पत्तिस्थितिप्रलयादिकल्पना क्रियाकारकफलाध्यारोपणा च आत्मनि कृता ।

तदपोहेन च नेति नेतीत्यध्यारोपितविशेषापनयद्वारेण पुन तत्त्वमावेदितम् । यथा एकप्रभृत्यापरार्धसंख्यास्वरूपपरिज्ञानाय रेखाध्यारोपणं कृत्वैकेयं रेखा दशेयं शतेयं सहस्रेयमिति ग्राहयति, अवगमयति संख्यास्वरूपं केवलं, न तु सख्याया रेखात्मत्वमेव । यथाच अकारादीन्यक्षराणि विजिग्राहयिषु पत्रमर्षीरेखादिसंयोगोपायमास्थाय वर्णाना सतत्त्वमावेदयति, न पत्रमष्याद्यात्मतामक्षराणा ग्राहयति, तथा चेह उत्तरत्याद्यनेकोपायमास्थायैक ब्रह्मतत्त्वमावेदितम् । पुन तत्कल्पितोपायजनितविशेषपरिशोधनार्थं नेति नेतीति तत्त्वोपसहार. कृत । तदुपसहृतं पुन परिशुद्ध केवलमेव सफल ज्ञानं अंतेऽस्या कडिकायामिति ॥२५॥ इति चतुर्थ ब्राह्मणम् ॥ ४ ४ —

आगमप्रधानेन मधुकाडेन ब्रह्मतत्त्व निर्धारितम् । पुनस्तस्यैव उपपत्तिप्रधानेन याज्ञवल्क्यीयेन काडेन पक्षप्रतिपक्षपरिग्रह कृत्वा विगृह्यवादेन विचारितम् । शिष्याचार्यसंबधेन च षष्ठे प्रश्नप्रतिवचनन्यायेन सविस्तरं विचार्योपसंहृतम् । अथेदानी निगमनस्थानीय मैत्रेयीब्राह्मणमारभ्यते । अय च न्यायो वाक्यकोविदै. परिगृहीतो— "हेत्वपदेशात्प्रतिज्ञाया पुनर्वचन निगमनं" इति । अथवा आगमप्रधानेन मधुकाडेन यदमृतत्वमावनं ससन्यासमात्मज्ञानमभिहितं, तदेव तर्केणाप्यमृतत्वसाधनं ससंन्यासमात्मज्ञानमधिगम्यते । तर्कप्रधानं हि याज्ञवल्क्यीयं काडम् । तस्माच्छास्त्रतर्काभ्या निश्चितमेतद्यदेतदात्मज्ञान ससंन्यास अमृतत्वसाधनमिति । तस्मात् शास्त्रश्रद्धावद्भि अमृतत्वप्रतिपित्सुभि. एतत्प्रतिपत्तव्यमिति । आगमोपपत्तिभ्या हि निश्चितोऽर्थ श्रद्धेयो भवत्यव्यभिचारादिति । अक्षराणा तु चतुर्थे यथा व्याख्यातोऽर्थ, तथा प्रतिपत्तव्योऽत्रापि । यान्यक्षराण्यव्याख्यातानि तानि व्याख्यास्याम ॥

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥१॥

अथेति हेतूपदेशानंतर्यप्रदर्शनार्थं । हेतुप्रधानानि हि वाक्यान्यतीतानि । तदनंतरमागमप्रधानेन प्रतिज्ञातोऽर्थो निगम्यते मैत्रेयीब्राह्मणेन । ह-शब्दो वृत्तावद्योतक । याज्ञवल्क्यस्यर्षे किल द्वे भार्ये पत्न्यौ बभूवतुरास्ता, मैत्रेयी

च नामत एकाऽपरा कात्यायनी नामत । तयोर्भार्ययोर्मैत्रेयी ह किल ब्रह्मवादिनी ब्रह्मवदनशीला बभूव आसीत् । स्त्रीप्रज्ञा, स्त्रिया योचिता सा स्त्रीप्रज्ञा, सैव यस्या प्रज्ञा गृहप्रयोजनान्वेषणालक्षणा सा स्त्रीप्रज्ञैव तर्हि तस्मिन्काले आसीत्कात्यायनी । अथैवं सति ह किल याज्ञवल्क्योऽन्यत् पूर्वस्माद्गार्हस्थ्यलक्षणात् वृत्तात् पारिव्राज्यलक्षणं वृत्तमुपाकरिष्यन्नुपचिकीर्षु सन् ॥

मैत्रेयीति होवाच याज्ञवल्क्य प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हंत तेऽनया कात्यायन्याऽन्त करवाणीति ॥२॥

हे मैत्रेयीति ज्येष्ठा भार्यामामंत्रयामास । आमंत्र्य चोवाच ह—प्रव्रजिष्यन्पारिव्राज्य करिष्यन्वै अरे मैत्रेय्यस्मात्स्थानाद्गार्हस्थ्यादहमस्मि भवामि । मैत्रेय्यनुजानीहि माम् । हतेच्छसि यदि, तेऽनया कात्यायन्याऽन्तं करवाणीत्यादि व्याख्यातम् ॥

सा होवाच मैत्रेयी यन्नु म इय भगो. सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्या न्वह तेनामृताहो३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवित तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥३॥

सा होवाच मैत्रेयी येनाह नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥४॥

सैवमुक्तोवाच मैत्रेयी— सर्वेय पृथिवी वित्तेन पूर्णा स्यान्नु किं स्या, किमह वित्तसाध्येन कर्मणाऽमृता आहो न स्यामिति । नेति होवाच याज्ञवल्क्य इत्यादि समानमन्यत् ॥३-४॥

स होवाच याज्ञवल्क्य प्रिया वै खलु नो भवती सती प्रियमवृधद्धत तर्हि भवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥५॥

स होवाच प्रियैव पूर्व खलु नोऽस्मभ्यं भवती, भवन्ती सती, प्रियमेवावृधद्वर्धितवती निर्धारितवत्यसि । अतस्तुष्टोऽहम् । हतेच्छसि चेदमृतत्वसाधनं ज्ञातु हे भवति, ते तुभ्यं तदमृतत्वसाधनं व्याख्यास्यामि ॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय

पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्रा. प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्त प्रियं भवति । न वा अरे पशूनां कामाय पशव प्रिया भवन्त्यात्मनस्तु कामाय पशव प्रिया भवन्ति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रिय भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्र प्रियं भवति । न वा अरे लोकाना कामाय लोका प्रिया भवन्त्यात्मनस्तु कामाय लोका प्रिया भवन्ति । न वा अरे देवानां कामाय देवा प्रिया भवन्त्यात्मनस्तु कामाय देवा प्रिया भवन्ति । न वा अरे वेदानां कामाय वेदा प्रिया भवन्त्यात्मनस्तु कामाय वेदा. प्रिया भवन्ति । न वा अरे भूताना कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रिय भवति । आत्मा वा अरे द्रष्टव्य श्रोतव्यो मंतव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् ॥६॥

आत्मनि खल्वरे मैत्रेयि दृष्टे । कथ दृष्ट आत्मनीति, उच्यते— पूर्वं आचार्यागमाभ्यां श्रुते, पुनस्तर्केणोपपत्त्या मते विचारिते । श्रवणं त्वागममात्रेण, मते उपपत्त्या, पश्चाद्विज्ञाते एवमेतन्नान्ययेति निर्धारिते । किं भवतीत्युच्यते— इदं विदितं भवति । इद सर्वमिति यदात्मनोऽन्यत् । आत्मव्यतिरेकेणाभावात् ॥

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्र त परादाद्योऽन्यत्रात्मन क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान्वेद भूतानि तं परादुर्योऽन्यत्रात्ममो भूतानि वेद सर्वं तं परादाद्योऽन्यत्रात्मन. सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा ॥७॥

स यथा दुंदुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीत ॥८॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शंखस्य तु ग्रहणेन शंखध्मस्य वा शब्दो गृहीतः ॥९॥ स यथा वीणायै वाद्यमानायै न बाह्या-

म्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥१०॥

तमयथार्थदार्शिनं परादात्पराकुर्यात्कैवल्यासंबंधिनं कुर्यादयमनात्मस्वरूपेण मा पश्यतीत्यपराधादिति भाव ॥७—१०॥

स यथाद्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यद्ग्वेदो यजुर्वेद· सामवेदोऽथर्वाङ्गिरस इतिहास पुराण विद्या उपनिषद श्लोका. सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्ट हुतमाशितं पायितमयं च लोकः परश्च लोक. सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥११॥

स यथा सर्वासामपा समुद्र एकायनमेव सर्वेषा स्पर्शानां त्वगेकायनमेव सर्वेषा गधाना नासिके एकायनमेव सर्वेषां रसानां जिह्वैकायनमेवं सर्वेषां रूपाणा चक्षुरेकायनमेव सर्वेषा शब्दाना श्रोत्रमेकायनमेवं सर्वेषां संकल्पानां मन एकायनमेव सर्वासां विद्याना हृदयमेकायनमेवं सर्वेषां कर्मणां हस्तावेकायनमेव सर्वेषामानदानामुपस्थ एकायनमेव सर्वेषां विसर्गाणा पायुरेकायनमेव सर्वेषामध्वना पादावेकायनमेव सर्वेषा वेदानां वागेकायनम् ॥१२॥

चतुर्थे शब्दनिश्वासेनैव लोकाद्यर्थनिश्वास. सामर्थ्यादुक्तो भवतीति पृथङ्नोक्त । इह तु सर्वशास्त्रार्थोपसहार इति कृत्वा अर्थप्राप्तोऽप्यर्थ स्पष्टीकर्तव्य इति पृथगुच्यते ॥

स यथा सैंधवघनोऽनतरोऽबाह्य कृत्स्नो रसघन एवैव वा अरेऽयमात्माऽनंतरोऽबाह्य कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्य. ॥१३॥

सर्वकार्यप्रलये विद्यानिमित्ते सैंधवघनवदनंतरोऽबाह्य कृत्स्न प्रज्ञानघन एक आत्मावतिष्ठते । पूर्वं तु भूतमात्रासंसर्गविशेषाल्लब्धविशेषविज्ञान सन् । तस्मिन्प्रविलापिते विद्यया विशेषविज्ञाने तन्निमित्ते च भूतसंसर्गे न प्रेत्य संज्ञास्तीत्येवं याज्ञवल्क्येनोक्ता ॥

सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमापीपिपन्न वा अहमिमं

विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा ॥१४॥

सा होवाच—अत्रैव मा भगवानेतस्मिन्नेव वस्तुनि प्रज्ञानघन एव, न प्रेत्य सज्ञास्तीति, मोहान्त मोहमध्यं, आपीपिपदापीपददवगमितवानसि, संमोहितवानसीत्यर्थ । अतो न वा अहमिममात्मान उक्तलक्षणं विजानामि विवेकत इति । स होवाच नाहं मोह ब्रवीम्यविनाशी वा अरेऽयमात्मा यत. । विनष्टुं शीलमस्येति विनाशी न विनाश्यविनाशी, विनाशशब्देन विक्रियाऽविनाशीत्यविक्रिय आत्मेत्यर्थ । अरे मैत्रेयि, अयमात्मा प्रकृतोऽनुच्छित्तिधर्मा । उच्छित्तिरुच्छेद , उच्छेदोऽन्तो विनाश , उच्छित्तिर्धर्मोऽस्येत्युच्छित्तिधर्मा, नोच्छित्तिधर्माऽनुच्छित्तिधर्मा । नापि विक्रियालक्षणो नाप्युच्छेदलक्षणो विनाशोऽस्य विद्यते इत्यर्थ ॥

यत्र हि द्वैतमिव भवति तदितर इतर पश्यति तदितर इतर जिघ्रति तदितर इतर रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतर स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन क पश्येत्तत्केन क जिघ्रेत्तत्केन क रसयेत्तत्केन कमभिवदेत्तत्केन क शृणुयात्तत्केन क मन्वीत तत्केन क स्पृशेत्तत्केन कं विजानीयाद्येनेद सर्वं विजानाति तं केन विजानीयात्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसंगो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥१५॥

॥ इति पंचमं ब्राह्मणम् ॥

चतुर्ष्वपि प्रपाठकेष्वेक आत्मा तुल्यो निर्धारित परं ब्रह्म । उपायविशेषस्तु तस्याधिगमेऽन्यश्चान्यश्च । उपेयस्तु स एवात्मा यश्चतुर्थे 'अथात आदेशो नेति नेति' इति निर्दिष्ट । स एव पंचमे प्राणोपन्यासेन शाकल्ययाज्ञवल्क्यसंवादे निर्धारित । पुन पंचमसमाप्तौ पुनर्जनकयाज्ञवल्क्यसंवादे । पुनरिहोपनिषत्समाप्तौ । चतुर्णामपि प्रपाठकानामेतदात्मनिष्ठता, नान्योऽतराले कश्चिदपि विवक्षितोऽर्थ , इत्येतत्प्रदर्शनायान्ते उपसंहार स एष नेति नेत्यादि ॥

अस्मात्प्रकारशतेनापि निरूप्यमाणे तत्त्वे नेति नेत्यात्मैव निष्टा, नान्या उपलभ्यते तर्केण वा आगमेन वा । तस्मादेतदेवामृतत्वसाधन यदेतन्नेति नेत्यात्मपरिज्ञान सर्वसंन्यासश्च इत्येतमर्थमुपसजिहीर्षन्नाह— एतावदेतावन्मात्र यदेतन्नेति नेतीत्यद्वैतात्मदर्शन, इदं चान्यसहकारिकारणनिरपेक्षमेवारे मैत्रेय्यमृतत्वसाधनम् । यत्पृष्टवत्यसि, यदेव भगवान्वेद तदेव मे ब्रूह्यमृतत्वसाधनमिति, तदेतावदेवेति विज्ञेय त्वया, इति हैव किलामृतत्वसाधनमात्मज्ञान प्रियायै भार्यायै उक्त्वा याज्ञवल्क्य किं कृतवान्यत्पूर्व प्रतिज्ञात 'प्रव्रजिष्यन्नस्मि' इति तच्चकार विजहार प्रव्रजितवानित्यर्थ । परिसमाप्ता ब्रह्मविद्या सन्यासपर्यवसाना । एतावानुपदेश , एतद्वेदानुशासन, एषा परमनिष्ठा, एष पुरुषार्थकर्तव्यतान्त इति ॥

इदानी विचार्यते शास्त्रार्थविवेकप्रतिपत्तये । यत आकुलानि हि वाक्यानि दृश्यन्ते "यावज्जीवमग्निहोत्र जुहुयात्" "यावज्जीवं दर्शपूर्णमासाभ्या यजेत" "कुर्वन्नेवेह कर्माणि जिजीविषेच्छत समा " "एतद्वै जरामर्य सत्र यदग्निहोत्रम्" इत्यादानि ऐकाश्रम्यज्ञापकानि । अन्यानि च आश्रमान्तरप्रतिपादकानि वाक्यानि 'विदित्वा व्युत्थाय प्रव्रजन्ति' "ब्रह्मचर्य समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत्" "यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा" इति, "द्वावेव पंथानावनुनिष्क्रान्ततरौ भवत क्रियापथश्चैव पुरस्तात्सन्यासश्च तयो सन्यास एवातिरेचयति" इति, 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशु' इत्यादीनि । तथा स्मृतयश्च "ब्रह्मचर्यवान्प्रव्रजति" "अविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेत्" "तस्याश्रमविकल्पमेके ब्रुवते" तथा— "वेदानधीत्य ब्रह्मचर्येण पुत्रपौत्रानिच्छेत्पावनार्थं पितृणाम् । अग्नीनाधाय विधिवच्चेष्टयज्ञो वनं प्रविश्याथ मुनिर्बुभूषेत्" । "प्राजापत्या निरूप्येष्टिं सर्ववेदसदक्षिणाम् । आत्मन्यग्नीन्समारोप्य ब्राह्मण प्रव्रजेद्गृहात्" इत्याद्या ॥

एव व्युत्थानविकल्पक्रमयथेष्टाश्रमप्रतिपत्तिप्रतिपादकानि हि श्रुतिस्मृतिवाक्यानि शतश उपलभ्यन्ते । इतरेतरविरुद्धानि । आचारश्च तद्विदाम् । विप्रतिपत्तिश्च शास्त्रार्थप्रतिपत्तृणां बहुविदामपि । अतो न शक्यते शास्त्रार्थो मंदबुद्धिभिर्विवेकेन प्रतिपत्तुम् । परिनिष्ठितशास्त्रन्यायबुद्धिभिरेव ह्येषा वाक्याना विषयविभाग शक्यतेऽवधारयितुम् । तस्मादेषा विषयविभागज्ञापनाय यथाबुद्धिसामर्थ्यं विचारयिष्याम ॥

यावज्जीवश्रुत्यादिवाक्यानां अन्यार्थासंभवात्क्रियावसानत्व एव वेदार्थस्य "त यज्ञपात्रैर्दहन्ति" इत्यंत्यकर्मश्रवणात् जरामर्यश्रवणाच्च । लिंगाच्च 'भस्मान्तं शरीरं' इति । न हि पारिव्राज्यपक्षे भस्मान्तता शरीरस्य स्यात् । स्मृतिश्च "निषेकादिश्मशानान्तो मंत्रैर्यस्योदितो विधि । तस्य शास्त्रेऽधिकारोऽस्मिञ्ज्ञेयो नान्यस्य कस्यचित्" इति ॥

समंत्रकं हि यत्कर्म वेदेनेह विधीयते तस्य श्मशानान्तता दर्शयति स्मृति । अधिकाराभावप्रदर्शनाच्च अत्यंतमेव श्रुत्यधिकाराभावोऽकर्मिणो गम्यते । अग्न्युद्वासनापवादाच्च "वरिहा वा एष देवाना योऽग्निमुद्वासयते" इति ॥

ननु व्युत्थानादिविधानाद्वैकल्पिकं क्रियावसानत्वं वेदार्थस्य । न । अन्यार्थत्वात् व्युत्थानादिश्रुतीनाम् । "यावज्जीवमग्निहोत्रं जुहोति" "यावज्जीवं दर्शपूर्णमासाभ्या यजेत" इत्येवमादीना जीवनमात्रनिमित्तत्वाद्यदा न शक्यतेऽन्यार्थता कल्पयितु, तदा व्युत्थानादिवाक्यानां कर्मानधिकृतविषयत्वसंभवात् । 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छत समा.' इति च मंत्रवर्णाज्जरया वा ह्येवास्मान्मुच्यते मृत्युना वेति च जरामृत्युभ्यामन्यत्र कर्मवियोगच्छिद्रासंभवात्कार्मिणा श्मशानान्तत्वं न वैकल्पिकम् । काणकुब्जादयोऽपि कर्मण्यनधिकृता अनुग्राह्या एव श्रुत्येति व्युत्थानाद्याश्रमान्तरविधान नानुपपन्नम् । पारिव्राज्यक्रमविधानस्य अनवकाशत्वमिति चेत् । न । विश्वजित्सर्वमेधयो यावज्जीवविध्यपवादत्वात् । यावज्जीवाग्निहोत्रादिविधे विश्वजित्सर्वमेधयोरेवापवादस्तत्र च क्रमप्रतिपत्तिसंभवो "ब्रह्मचर्य समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत्" इति । विरोधानुपपत्ते । न ह्येवंविषयत्वे पारिव्राज्यक्रमविधानवाक्यस्य कश्चिद्विरोध क्रमप्रतिपत्ते । अन्यविषयपरिकल्पनाया तु यावज्जीवविधानश्रुति स्वविषयात्सकोचिता स्यात् । क्रमप्रतिपत्तेस्तु विश्वजित्सर्वमेधविषयत्वान्न कश्चिद्बाध ॥

न, आत्मज्ञानस्यामृतत्वहेतुत्वाभ्युपगमात् । यत्तावत् 'आत्मेत्येवोपासीत' इत्यारभ्य 'स एष नेति नेति' एतदंतेन ग्रंथेन यदुपसंहृतमात्मज्ञानं, तदमृतत्वसाधनमित्यभ्युपगतं भवता । तत्रैतावदेवामृतत्वसाधनं अन्यनिरपेक्षमित्येतन्न मृष्यते । तत्र भवन्तं पृच्छामि किमर्थमात्मज्ञानं मर्षयति भवानिति । शृणु तत्र कारणं— यथा स्वर्गकामस्य स्वर्गप्राप्त्युपायमजानतोऽग्निहोत्रादि स्वर्गप्राप्तिसाधनं ज्ञापयति, तथेहाप्यमृतत्वप्राप्तिप्सोः अमृतत्वप्राप्त्युपायमजानतो 'यदेव

भगवान्वेद तदेव मे ब्रूहि' इत्येवमाकाक्षितममृतत्वसाधनं 'एतावदेर' इत्येवमादौ वेदने ज्ञाप्यत इति । एवं तर्हि, यथा ज्ञापितमग्निहोत्रादि स्वर्गसाधनमभ्युपगम्यते, तथेहाप्यात्मज्ञानम् । यथा ज्ञाप्यते तथाभूतमेव अमृतत्वसाधनमात्मज्ञान अभ्युपगतु युक्तम् । तुल्यप्रामाण्यादुभयत्र ॥

यद्येवं किं स्यात्? सर्वकर्महेतूपमर्दकत्वादात्मज्ञानस्य विद्योद्भवे कर्मनिवृत्ति स्यात् । दाराग्निसबद्धाना तावदग्निहोत्रादिकर्मणा भेदबुद्धिविषयसंप्रदानकारकसाध्यत्वम् । अन्यबुद्धिपरिच्छेद्या ह्यग्न्यादिदेवता सप्रदानकारकभूता अतएव न हि तत्कर्म निर्वर्त्यते । यया हि सप्रदानकारकबुद्धया सप्रदानकारकं कर्म साधत्वेनोपदिश्यते सेह विद्यया निवर्त्यते 'अन्योऽसावन्योऽहमस्मीति न स वेद' 'देवास्त परादुर्योऽन्यत्रात्मनो देवान्वेद' 'मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति' 'एकधैवानुद्रष्टव्य' 'सर्वमात्मान पश्यति' इत्यादिश्रुतिभ्य । न च देशकालनिमित्ताद्यपेक्षत्व, व्यवस्थितात्मवस्तुविषयत्वादात्मज्ञानस्य । क्रियायास्तु पुरुषतत्रत्वात्स्याद्देशकालनिमित्ताद्यपेक्षत्वम् । ज्ञान तु वस्तुतत्रत्वान्न देशकालनिमित्ताद्यपेक्षते । यथाऽग्निरुष्ण आकाशोऽमूर्त इति, तथा आत्मविज्ञानमपि ॥

नन्वेव सति प्रमाणभूतस्य कर्मविधेर्निरोध स्यात् । नच तुल्यप्रमाणयोरितरेतरनिरोधो युक्त । न । स्वाभाविकभेदबुद्धिमात्रानिरोधकत्वात् । नहि विध्यतरनिरोधकमात्मज्ञान, स्वाभाविकभेदबुद्धिमात्र निरुणद्धि । तथापि हेत्वपहारात्कर्मानुपपत्ते विधिनिरोध एव स्यादिति चेत् । न । कामप्रतिषेधात्काम्यप्रवृत्तिनिरोधवददोषात् । यथा स्वर्गकामो यजेतेति स्वर्गसाधने यागे प्रवृत्तस्य कामप्रतिषेधविधे कामे विहते काम्ययागानुष्ठानप्रवृत्तिर्निरुध्यते । न चैतावता काम्यविधिर्निरुद्धो भवति । कामप्रतिषेधविधिना काम्यविधे अनर्थकत्वज्ञानात्प्रवृत्त्यनुपपत्ते निरुद्ध एव स्यादिति चेत् । भवत्वेवं कर्मविधिनिरोधोऽपि । यथा कामप्रतिषेधे काम्यविधे , एवं प्रामाण्यानुपपत्ति , इति चेत् । अननुष्ठेयत्वेऽनुष्ठातुरभावात् अनुष्ठानविध्यानर्थक्यात् अप्रामाण्यमेव कर्मविधीनामिति चेत् । न । प्रागात्मज्ञानात्प्रवृत्त्युपपत्ते । स्वाभाविकस्य क्रियाकारकफलभेदविज्ञानस्य प्रागात्मज्ञानात्कर्महेतुत्वमुपपद्यत एव । यथा कामविषये दोषविज्ञानोत्पत्ते प्राक्काम्यकर्मप्रवृत्तिहेतुत्वं स्यादेव स्वर्गादीच्छाया स्वाभाविक्याः, तद्वत् ।

तथा सति अनर्थार्थो वेद इति चेत् । न । अर्थानर्थयोरभिप्रायतंत्रत्वात् । मोक्षमेकं वर्जयित्वा अन्यस्याविद्याविषयत्वात् । पुरुषाभिप्रायतंत्रौ ह्यर्थानर्थौ । मरणादिकाम्येष्टिदर्शनात् । तस्माद्यावदात्मज्ञानविधेराभिमुख्यं, तावदेव कर्मविषय । तस्मान्न आत्मज्ञानसहभावित्वं कर्मणामित्यत सिद्धं आत्मज्ञानमेवामृतत्वसाधन 'एतावदरे खल्वमृतत्व' इति । कर्मनिरपेक्षत्वाज्ज्ञानस्य । अतो विदुषस्तावत्पारिव्राज्यं सिद्धं, सप्रदानादिकर्मकारकजात्यादिशून्याविक्रियब्रह्मात्मदृढप्रतिपत्तिमात्रेण वचनमंतरेणापि उक्तन्यायत ॥

तथाच व्याख्यातमेतत्— 'येषा नोऽयमात्माय लोक' इति हेतुवचनेन, पूर्वे विद्वास प्रजामकामयमाना व्युत्तिष्ठन्तीति पारिव्राज्य विदुषामात्मलोकावबोधादेव । तथाच विविदिषोरपि सिद्ध पारिव्राज्यम् । 'एतमेवात्मान लोकमिच्छन्त प्रव्रजन्ति' इति वचनात् । कर्मणा चाविद्वद्विषयत्वमवोचाम । अविद्याविषये च उत्पत्त्यादिविकारसंस्कारार्थानि कर्माणीत्यत आत्मसंस्कारद्वारेण आत्मज्ञानसाधनत्वमपि कर्मणामवोचाम, यज्ञादिभिर्विविदिषन्तीति ॥

अथैव सति अविद्वद्विषयाणामाश्रमकर्मणा बलाबलविचारणाया, आत्मज्ञानोत्पादन प्रति यमप्रधानाना अमानित्वादीना मानसाना च ध्यानज्ञानवैराग्यादीना सनिपत्योपकारकत्वम् । हिंसारागद्वेषादिबाहुल्यात् बहुक्लिष्टकर्मविमिश्रिता इतरे, इत्यत पारिव्राज्य मुमुक्षूणा प्रशमन्ति— "त्याग एव हि सर्वेषामुक्तानामपि कर्मणाम् । वैराग्यं पुनरेतस्य मोक्षस्य परमोऽवधि" ॥ "किं ते धनेन किमु बधुभिस्ते कि ते दारैर्ब्राह्मण यो मरिष्यसि । आत्मानमन्विच्छ गुहा प्रविष्ट पितामहास्ते क्व गता पिता च" । एव साख्ययोगशास्त्रेषु च सन्यासो ज्ञान प्रति प्रत्यासन्न उच्यते । कामप्रवृत्त्यभावाच्च । कामप्रवृत्तेर्हि ज्ञानप्रतिकूलता सर्वशास्त्रेषु प्रसिद्धा । तस्माद्विरक्तस्य मुमुक्षो विनापि ज्ञानेन 'ब्रह्मचर्यादेव प्रव्रजेत्' इत्याद्युपपन्नम् ॥

ननु सावकाशत्वादनधिकृतविषयमेतदित्युक्त, यावज्जीवश्रुत्युपरोधात् । नैष दोषः । नितरा सावकाशत्वाद्यावज्जीवश्रुतीनाम् । अविद्वत्कामिकर्तव्यतां ह्यवोचाम सर्वकर्मणाम् । न तु निरपेक्षमेव जीवननिमित्तमेव कर्तव्यं कर्म । प्रायेण हि पुरुषा कामबहुला । कामश्च अनेकविषयोऽनेककर्मसाधनसाध्यश्च । अनेकफलसाधनानि च वैदिकानि कर्माणि दाराग्निसंबंधपुरुषकर्तव्यानि, पुनः

पुनश्च अनुष्ठीयमानानि बहुफलानि कृष्यादिवत् वर्षशतसमाप्तीनि च गार्हस्थ्ये वाऽरण्ये वा। अतस्तदपेक्षया यावज्जीवश्रुतय.। 'कुर्वन्नेवेह कर्माणि' इति च मंत्रवर्ण.। तस्मिंश्च पक्षे विश्वजित्सर्वमेधयो कर्मपरित्याग। यस्मिंश्च पक्षे यावज्जीवानुष्ठानं, तदा श्मशानान्तत्वं भस्मान्तता च शरीरस्य। इतरवर्णापेक्षया वा यावज्जीवश्रुतिः। न हि क्षत्रियवैश्ययोः पारिव्राज्यप्रतिपत्तिरस्ति। तथा "मैत्रेयस्योदितो विधि" "ऐकाश्रम्यं त्वाचार्या" इत्येवमादीना क्षत्रियवैश्यापेक्षत्वम्। तस्मात्पुरुषसामर्थ्यज्ञानवैराग्यकामाद्यपेक्षया व्युत्थानविकल्पक्रमपारिव्राज्य प्रतिपत्तिप्रकारा न विरुध्यन्ते। अनधिकृताना च पृथग्विधानात्पारिव्राज्यस्य "स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा" इत्यादिना। तस्मात्सिद्धानि आश्रमान्तराण्यधिकृतानामेव ॥१५॥ इति पंचम ब्राह्मणम् ॥ ४ ५ —

अथ वश पौतिमाष्यो गौपवनाद्गौपवन पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवन. कौशिकात्कौशिक कौंडिन्यात्कौंडिन्य शांडिल्याच्छांडिल्यः कौशिकाच्च गौतमाच्च गौतम. ॥१॥ आग्निवेश्यादाग्निवेश्यो गार्ग्यादार्ग्यो गार्ग्यादार्ग्यो गौतमाद्गौतम सैतवात्सैतव पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यंदिनायनान्माध्यंदिनायन सौकरायणात्सौकरायण काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनि ॥२॥ घृतकौशिकाद्घृतकौशिक पाराशर्यायणात्पाराशर्यायण पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणश्चैवणेश्चैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो मांटेर्मांटिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्य शांडिल्याच्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौंडिन्याद्विदर्भीकौंडिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रव पथ सौभरात्पंथाः सौभरोऽयास्याद्गांगिरसादयास्य आंगिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ह्याथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्यो. प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यश्वेर्व्यश्टि. सनारोः सनारुः सनातनात्सनातनः सनसा-

त्सनग. परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नम ॥३॥ इति षष्ठं ब्राह्मणम् ॥ इति बृहदारण्यकोपनिषदि चतुर्थोऽध्याय. ॥

अथानंतरं याज्ञवल्कीयस्य काडस्य वंश आरभ्यते यथा मधुकांडस्य वश । व्याख्यानं तु पूर्ववत् । ब्रह्म स्वयंभु ब्रह्मणे नम ॐइति ॥ इति बृहदारण्यकोपनिषद्भाष्ये चतुर्थोऽध्याय ॥

॥ पंचमोऽध्यायः ॥

ॐ पूर्णमद पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ ख ब्रह्म । ख पुराणं वायुर खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदेनेन यद्वेदितव्यम् ॥ इति प्रथम ब्राह्मणम् ॥

पूर्णमद इत्यादि खिलकाडमारभ्यते । अध्यायचतुष्टयेन यदेव साक्षादपरोक्षाद्ब्रह्म, य आत्मा सर्वान्तरो निरुपाधिकोऽशनायाद्यतीतो नेति नेतीति व्यपदेश्यो निर्धारितो, यद्विज्ञान केवलममृतत्वसाधन, अधुना तस्यैवात्मन सोपाधिकस्य शब्दार्थादिव्यवहारविषयापन्नस्य पुरस्तादनुक्तान्युपासनानि कर्मभिरविरुद्धानि प्रकृष्टाभ्युदयसाधनानि क्रममुक्तिभाजि च । तानि वक्तव्यानीति पर संदर्भ । सर्वोपासनशेषत्वेनोकारो दम दान दयामित्येतानि च विधित्सितानि । पूर्णमद , पूर्ण न कुतश्चिद्व्यावृत्तं व्यापीत्येतत् । निष्ठा च कर्तरि द्रष्टव्या । अद इति परोक्षाभिधायि सर्वनाम तत्पर ब्रह्मेत्यर्थ. । तत्संपूर्णमाकाशवद्व्यापि निरंतरं निरुपाधिकं च । तदेवेदं सोपाधिकं नामरूपस्थं व्यवहारापन्न पूर्ण स्वेन रूपेण परमात्मना व्याप्येव, नोपाधिपरिच्छिन्नेन विशेषात्मना । तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात्कारणात्मन उदच्यते उद्रिच्यते उद्गच्छतीत्येतत् । यद्यपि कार्यात्मनोद्रिच्यते तथापि यत्स्वरूपं पूर्णत्व परमात्मभाव तन्न जहाति, पूर्णमेवोद्रिच्यते । पूर्णस्य कार्यात्मनो ब्रह्मण पूर्ण पूर्णत्वं, आदाय गृहीत्वा आत्मस्वरूपैकरसत्वमापद्य विद्ययाऽविद्याकृतं भूतमात्रोपा-

धिससर्गजं, अन्यत्वावभासं तिरस्कृत्य, पूर्णमेवानंतरमबाह्यं प्रज्ञानघनैकरसस्वभावं केवलं ब्रह्मावशिष्यते ॥

यदुक्तं 'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्तस्मात्तत्सर्वमभवत्' इति एषोऽस्य मंत्रस्यार्थ. । तत्र ब्रह्मेत्यस्यार्थ पूर्णमद इति । इदं पूर्णमिति ब्रह्म वा इदमग्र आसीदित्यस्यार्थ । तथा च श्रुत्यंतरम्— 'यदेवेह तदमुत्र यदमुत्र तदन्विह' इति । अतोऽद शब्दवाच्य पूर्ण ब्रह्म तदेवेद पूर्ण कार्यस्य नामरूपोपाधिसयुक्त अविद्ययोद्रिक्तम् । तस्मादेव परमार्थस्वरूपादन्यदिव प्रत्यवभासमानम् । तद्यदात्मानमेव पर पूर्ण ब्रह्म विदित्वाऽहमद पूर्ण ब्रह्मास्मीत्येव पूर्णमादाय तिरस्कृत्यापूर्णस्वरूपता अविद्याकृता नामरूपोपाधिसंपर्कजामेतया ब्रह्मविद्यया पूर्णमेव केवलमवशिष्यते । तथा चोक्त 'तस्मात्तत्सर्वमभवत्' इति ॥

य सर्वोपनिषदर्थो ब्रह्म स एषोऽनेन मंत्रेणानूद्यते उत्तरसंबंधार्थम् । ब्रह्मविद्यासाधनत्वेन हि वक्ष्यमाणानि साधनानि ओकारदमदानदयाख्यानि विविदिषितानि, खिलप्रकरणसबंधात्सर्वोपासनागभूतानि च ॥

अत्रैके वर्णयन्ति— पूर्णात्कारणात्पूर्ण कार्यमुद्रिच्यते । उद्रिक्त कार्यं वर्तमानकालेऽपि पूर्णमेव परमार्थवस्तुभूत द्वैतरूपेण । पुन प्रलयकाले पूर्णस्य कार्यस्य पूर्णतामादाय आत्मनि वित्वा पूर्णमेवावशिष्यते कारणरूपम् । एवं उत्पत्तिस्थितिप्रलयेषु त्रिष्वपि कालेषु कार्यकारणयो पूर्णतैव । सा चैकैव पूर्णता कार्यकारणयोर्भेदेन व्यपदिश्यते । एव च द्वैताद्वैतात्मकमेकं ब्रह्म । यथा किल समुद्रो जलतरगफेनबुद्बुदाद्यात्मक एव, यथा च जलं सत्यं तदुद्भवाश्च तरगफेनबुद्बुदादय समुद्रात्मभूता एव आविर्भावतिरोभावधर्मिण परमार्थसत्या एव । एव सर्वमिदं द्वैत परमार्थसत्यमेव जलतरगादिस्थानीय, समुद्रजलस्थानीय तु परं ब्रह्म । एवं च किल द्वैतस्य सत्यत्वे कर्मकाडस्य प्रामाण्य, यदा पुनर्द्वैत द्वैतमिवाविद्याकृतं मृगतृष्णिकावदनृत, अद्वैतमेव परमार्थत, तदा किल कर्मकाड विषयाभावादप्रमाणं भवति । तथा च विरोध एव स्यात् । वेदैकदेशभूतोपनिषत्प्रमाण, परमार्थद्वैतवस्तुप्रतिपादकत्वात् । अप्रमाणं कर्मकाडं असद्द्वैतविषयत्वात् । तद्विरोधपरिजिहीर्षया श्रुत्यैतदुक्तं कार्यकारणयो सत्यत्वं समुद्रत्वपूर्णमद इत्यादिनेति ॥

तदसत् । विशिष्टविषयापवादविकल्पयोरसभवात् । न हीय सुविवक्षिता कल्पना । कस्मात् ? यथा क्रियाविषये उत्सर्गप्राप्तस्यैकदेशेऽपवाद क्रियते । यथा 'अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य' इति हिंसा सर्वभूतविषया उत्सर्गेण निवारिता तीर्थे विशिष्टविषये ज्योतिष्टोमादावनुज्ञायते । नच तथा वस्तुविषये इहाद्वैत ब्रह्मोत्सर्गेण प्रतिपाद्य पुनस्तदेकदेशेऽपवदितु शक्यते । ब्रह्मणोऽद्वैतत्वादेवैकदेशानुपपत्ते । तथा विकल्पानुपपत्तेश्च । यथा "अतिरात्रे षोडशिन गृह्णाति" "नातिरात्रे षोडशिन गृह्णाति" इति ग्रहणाग्रहणयो पुरुषाधीनत्वाद्विकल्पो भवति । न त्विह तथा वस्तुविषये द्वैत वा स्यादद्वैत वेति विकल्प संभवत्यपुरुषतन्त्रत्वादात्मवस्तुन । विरोधाच्च द्वैताद्वैतत्वयोरेकस्य । तस्मान्न सुविवक्षितेयं कल्पना ।

श्रुतिन्यायविरोधाच्च । सैधवघनवत्प्रज्ञानैकरसघन निरतर पूर्वापरबाह्याभ्यंतरभेदविवर्जित सबाह्याभ्यतरमज 'नेति नेति' 'अस्थूलमनण्वहस्वमजरमभयममृत' इत्येवमाद्या श्रुतयो निश्चितार्था सशयविपर्यासाशंकारहिता सर्वा समुद्रे प्रक्षिप्ता स्युरकिंचित्करत्वात् । तथा न्यायविरोधोऽपि सावयवस्यानेकात्मकस्य क्रियावतो नित्यत्वानुपपत्ते । नित्यत्वं चात्मन. स्मृत्यादिदर्शनादनुमीयते । तद्विरोधश्च प्राप्तोत्यनित्यत्वे । भवत्कल्पनानर्थक्यं च । स्फुटमेव चाम्मिन्पक्षे कर्मकाडानर्थक्यम् । अकृताभ्यागमकृतविप्रणाशप्रसगात् ॥

ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे समुद्रादिदृष्टान्ता विद्यन्ते । कथमुच्यते भवतैकस्य द्वैताद्वैतत्व विरुद्धमिति ? न । अन्यविषयत्वात् । नित्यनिरवयववस्तु विषय हि विरुद्धत्वमवोचाम द्वैताद्वैतत्वस्य, न कार्यविषये सावयवे । तस्मात् श्रुतिस्मृतिन्यायविरोधादनुपपन्नेयं कल्पना । अस्या. कल्पनाया वरमुपनिषत्परित्याग एव । अभ्येयत्वाच्च न शास्त्रार्थेयं कल्पना । नहि जननमरणाद्यनर्थशतसहस्रभेदसमाकुलं समुद्रवनादिवत्सावयवं अनेकरस ब्रह्म ध्येयत्वेन विज्ञेयत्वेन वा श्रुत्योपदिश्यते । प्रज्ञानघनता चोपदिशति । 'एकधैवानुद्रष्टव्यं' इति च । अनेकधादर्शनापवादाच्च 'मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति' इति । यच्च श्रुत्या निंदितं तन्न कर्तव्यम् । यच्च न क्रियते न स शास्त्रार्थ । ब्रह्मणोऽनेकरसत्वमनेकधात्व च द्वैतरूपं निदितत्वान्न द्रष्टव्यम् । अतो न

शास्त्रार्थ । यस्त्वेकरसत्वं ब्रह्मण तत् द्रष्टव्यत्वात्प्रशस्तं प्रशस्तत्वाच्च शास्त्रार्थो भवितुमर्हति ॥

यत्तूक्त वेदैकदेशस्याप्रामाण्यं कर्मविषये द्वैताभावादद्वैते च प्रामाण्यमिति। तन्न । यथाप्राप्तोपदेशार्थत्वात् । न हि द्वैतमद्वैतं वा वस्तु जातमात्रमेव पुरुषं ज्ञापयित्वा पश्चात्कर्म वा ब्रह्मविद्या वोपदिशति शास्त्रम् । न चोपदेशार्हं द्वैतं, जातमात्रप्राणिबुद्धिगम्यत्वात् । न च द्वैतस्यानृतत्वबुद्धि प्रथममेव कस्यचित्स्यात् । येन द्वैतस्य सत्यत्वमुपदिश्य पश्चादात्मन प्रामाण्यं प्रतिपादयेच्छास्त्रम् । नापि पाषडिभिरपि प्रस्थापिता शास्त्रस्य प्रामाण्य न गृह्णीयु । तस्माद्यथाप्राप्तमेव द्वैतमविद्याकृत स्वाभाविकमुपादाय स्वाभाविक्यैवाविद्यया युक्ताय रागद्वेषादिदोषवते यथाभिमतपुरुषार्थसाधन कर्म उपदिशत्यग्रे । पश्चात्प्रसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवते तद्विपरीतौदासीन्यस्वरूपावस्थानफलार्थिने तदुपायभूतामात्मैकत्वदर्शनात्मिका ब्रह्मविद्यामुपदिशति । अथैव सति तदौदासीन्यस्वरूपावस्थाने फले प्राप्ते शास्त्रस्य प्रामाण्यं प्रत्यर्थित्वं निवर्तते । तदभावच्छास्त्रस्यापि शास्त्रत्व तं प्रति निवर्तत एव । तथा प्रतिपुरुष परिसमाप्त शास्त्रमिति न शास्त्रविरोधगवोऽप्यस्ति । अद्वैतज्ञानावसानत्वात् शास्त्रशिष्यशासनादिद्वैतभेदस्य । अन्यतमावस्थाने हि विरोध स्यादवस्थितस्य । इतरेतरापेक्षत्वात्तु शास्त्रशिष्यशासनाना नान्यतमोऽप्यवतिष्ठते । सर्वसमाप्तौ तु कस्य विरोध आशंक्येताद्वैते केवले शिवे सिद्धे । नाप्यविरोधवता, अत एव ॥

अथाप्यभ्युपगम्य ब्रूम — द्वैताद्वैतात्मकत्वेऽपि शास्त्राविरोधस्य तुल्यत्वात् । यदापि समुद्रादिवत् द्वैताद्वैतात्मकमेक ब्रह्माभ्युपगच्छामो, नान्यद्वस्त्वंतर, तदापि भवदुक्ताच्छास्त्रविरोधान्न मुच्यामहे । कथम् ? एक हि परं ब्रह्म द्वैताद्वैतात्मकं, तच्छोकमोहाद्यतीतत्वादुपदेशं न काङ्क्षति । न चोपदेष्टाऽन्यो ब्रह्मण । द्वैताद्वैतरूपस्य ब्रह्मण एकस्यैवाभ्युपगमात् । अथ द्वैतविषयस्यानेकत्वादन्योन्योपदेशो, न ब्रह्मविषय उपदेश , इति चेत् । तदा द्वैताद्वैतात्मकमेकमेव ब्रह्म नान्यदस्तीति विरुध्यते । यस्मिन्द्वैतविषयेऽन्योन्योपदेश सोऽन्यो द्वैतं चान्यदेवेति समुद्रदृष्टान्तो विरुद्ध । न च समुद्रोदकैकत्ववद्विज्ञानैकत्वे ब्रह्मणोन्यत्र उपदेशग्रहणादिकल्पना संभवति । न हि हस्तादिद्वैताद्वैतात्मके देवदत्ते वाक्कर्णयो देवदत्तैकदेशभूतयोः वागुपदेष्ट्री कर्ण केवल उपदेशस्य ग्रहीता,

देवदत्तस्तु नोपदेष्टा नाप्युपदेशस्य ग्रहीतेति कल्पयितु शक्यते । समुद्रैकोदकात्मत्ववदेकविज्ञानवत्त्वाद्देवदत्तस्य । तस्मात् श्रुतिन्यायाविरोधश्चाभिप्रेतार्थासिद्धिश्च एवकल्पनाया स्यात् । तस्माद्यथाव्याख्यात एवास्माभि पूर्णमद इत्यस्य मन्त्रस्यार्थ ॥

ॐ ख ब्रह्मेति मन्त्र । अय चान्यत्राविनियुक्त इह ब्राह्मणेन ध्यानकर्मणि विनियुज्यते । अत्र च ब्रह्मेति विशेष्याभिधान, खमिति विशेषणम् । विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशो नीलोत्पलवत्ख ब्रह्मेति । ब्रह्मशब्दो बृहद्वस्तुमात्रास्पदोऽविशेषितोऽता विशेष्यते ख ब्रह्मेति । यत्तत्ख ब्रह्म तदोशब्दवाच्य ओशब्दस्वरूपमेव वा । उभयथापि सामानाधिकरण्यमविरुद्धम् । इह च ब्रह्मोपासनसाधनत्वार्थमोशब्द प्रयुक्त । तथाच श्रुत्यंतरात् 'एतदालंबन श्रेष्ठमेतदालबन परम्' 'ओमित्यात्मान युर्जात' 'ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' 'ओमित्येवं ध्यायथ आत्मानम्' इत्यादे । अन्यार्थासंभवाच्चोपदेशस्य । यथान्यत्र 'ओमिति शसत्योमित्युद्गायति' इत्येवमादौ स्वाध्यायारंभापवर्गयोश्च ओकारप्रयोगो विनियोगादवगम्यते, नच तथार्थान्तरमिहावगम्यते । तस्माद्ध्यानसाधनत्वेनैव इहोकारशब्दस्योपदेश । यद्यपि ब्रह्मात्मादिशब्दा ब्रह्मणो वाचका , तथापि श्रुतिप्रामाण्याद्ब्रह्मणो नेदिष्ठमभिधानमोकार । अत एव ब्रह्मप्रतिपत्तिविद पर साधनम् । तच्च द्विप्रकारेण, प्रतीकत्वेनाभिधानत्वेन च । प्रतीकत्वेन । यथा विष्ण्वादिप्रतिमाऽभेदेन, एवमोकारो ब्रह्मेति प्रतिपत्तव्य । तथा ह्योकारालबनस्य ब्रह्म प्रसीदति, 'एतदालबन श्रेष्ठमेतदालंबनं परम् । एतदालबन ज्ञात्वा ब्रह्मलोके महीयते' इति श्रुते ॥

तत्र खमिति भौतिके खे प्रतीतिर्मा भूदित्याह— ख पुराण चिरंतन खं परमात्माकाशमित्यर्थ । यत्तत्परमात्माकाश पुराणं ख तच्चक्षुराद्यविषयत्वान्निरालंबनमशक्यं ग्रहातुमिति श्रद्धाभक्तिध्या भावविशेषेण चोकारे आवेशयति । यथा विष्ण्वंगांकिताया शिलादिप्रतिमाया विष्णुं लोक एवम् । वायुरं खं, वायुरस्मिन्वियत इति वायुरं, खं खमात्रं खमित्युच्यते न पुराण खमित्येवमाह स्म । कोऽसौ ? कौरव्यायणीपुत्र । वायुरे हि खे मुख्य खशब्दव्यवहार । तस्मान्मुख्ये सप्रत्ययो युक्त इति मन्यते । तत्र यदि पुराण खं, ब्रह्म निरुपाधिस्वरूपं, यदि वा वायुरं खं सोपाधिकं ब्रह्म, सर्वथाप्योंकार प्रतीकत्वेनैव प्रतिमावत्सा-

धनत्वं प्रतिपद्यते । 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' इति श्रुत्यन्तरात् । केवलं खशब्दार्थे विप्रतिपत्ति ॥

वेदोऽयमोंकारो, वेद विजानात्यनेन यद्वेदितव्यम् । तस्माद्वेद ॐकारो वाचकोऽभिधानम् । तेनाभिधानेन यद्वेदितव्यं ब्रह्म प्रकाश्यमानमभिधीयमानं वेद, साधको विजानात्युपलभते । तस्माद्वेदोऽयमिति ब्राह्मणा विदु । तस्माद्ब्राह्मणानामभिधानत्वेन साधनत्वमभिप्रेतमोंकारस्य । अथवा वेदोऽयमित्यादयर्थवाद । कथमोंकारो ब्रह्मण प्रतीकत्वेन विहित । ॐ ख ब्रह्मेति सामानाधिकरण्यात्तस्य स्तुतिरिदानी वेदत्वेन । सर्वो ह्यय वेद ॐकार एव । एतत्प्रभव एतदात्मक सर्व ऋग्यजु सामादिभेदाभिन्न एष ओंकार 'तद्यथा शकुनि सर्वाणि पर्णानि' इत्यादिश्रुत्यन्तरात् । इतश्चाय वेद ॐकारो यद्वेदितव्य सत्सर्व वेदितव्यमोंकारेणैव वेदनेन । अतोऽयमोंकारो वेद । इतरस्यापि वेदस्य वेदत्व अत एव । तस्माद्विशिष्टोऽयमोंकार साधनत्वेन प्रतिपत्तव्य इति । अथवा वेद स । कोऽसौ ? य ब्राह्मणा विदुरोंकारम् । ब्राह्मणाना ह्यसौ प्रणवोद्गीथादिविकल्पैर्विज्ञेय । तस्मिन्हि प्रयुज्यमाने साधनत्वेन सर्वो वेद प्रयुक्तो भवतीति ॥१॥ इति प्रथम ब्राह्मणम् ॥ ५.१ —

त्रया प्राजापत्या प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥१॥

अधुना दमादिसाधनत्रयविधानार्थोऽयमारभ — त्रयस्त्रिसख्याका प्राजापत्या प्रजापतेरपत्यानि प्राजापत्या, ते किं ? प्रजापतौ पितरि ब्रह्मचर्य शिष्यत्ववृत्तेर्ब्रह्मचर्यस्य प्राधान्याच्छिष्या सन्तो ब्रह्मचर्यमूषुरुषितवन्त इत्यर्थ । के ते ? विशेषतो देवा मनुष्या असुराश्च । ते चोषित्वा ब्रह्मचर्य किमकुर्वन्नित्युच्यते — तेषा देवा ऊचु पितर प्रजापतिम् । किमिति । ब्रवीतु कथयतु नोऽस्मभ्य यदनुशासनं भवानिति । तेभ्य एवमर्थिभ्यो हैतदक्षरं वर्णमात्रमुवाच द इति । उक्त्वा च तान्पप्रच्छ पिता किं व्यज्ञासिष्टा३ इति । मयोपदेशार्थमभिहितस्याक्षरस्यार्थं विज्ञानवन्त आहोस्विन्नेति । देवा ऊचुर्व्यज्ञासिष्मेति,

विज्ञातवन्तो वयम् । यद्येवमुच्यता किं मयोक्तमिति । देवा ऊचुर्दाम्यत अदान्ता यूय स्वभावतोऽतो दान्ता भवतेति नोऽस्मानात्थ कथयसि । इतर आह ओमिति सम्यग्व्यज्ञासिष्टेति ॥

अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥२॥

समानमन्यत् । स्वभावतो लुब्धा यूयमतो यथाशक्ति संविभजत दत्तेति नोऽस्मानात्थ । किमन्यत् ब्रूयान्नो हितमिति मनुष्या ॥

अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति तदेतत्त्रय शिक्षेद्दम दान दयामिति ॥३॥ इति द्वितीय ब्राह्मणम् ॥

तथा असुरा दयध्वमिति । क्रूरा यूय हिंसादिपरा, अतो दयध्व प्राणिषु दया कुरुतेति । तदेतत्प्रजापतेरनुशासन अद्याप्यनुवर्तत एव । य पूर्व प्रजापतिर्देवादीननुशशास सोऽद्याप्यनुशास्त्येव देव्या स्तनयित्नुलक्षणया वाचा । कथमेषा श्रूयते दैवी वाक् ? कार्षा स्तनयित्नु । द द द इति, दाम्यत दत्त दयध्वमित्येषा वाक्यानामुपलक्षणाय त्रिर्दकार उच्चार्यतेऽनुकृति । न तु स्तनयित्नुशब्दस्त्रिरेव संख्यानियमस्य लोकेऽप्रसिद्धत्वात् । यस्मादद्यापि प्रजापतिर्दाम्यत दत्त दयध्वमित्यनुशास्त्येव, तस्मात्कारणादेतत्त्रयम् । किं तत्त्रय इत्युच्यते दम दान दयामिति शिक्षेदुपादद्यात्प्रजापते अनुशासनमस्माभि कर्तव्यमित्येव मति कुर्यात् । तथा च स्मृति — "त्रिविधं नरकस्येद द्वार नाशनमात्मन । काम क्रोधस्तथा लोभस्तस्मादेतत्त्रय त्यजेत्" इति । अस्य हि विधे शेष पूर्व । तथापि देवादीनुद्दिश्य किमर्थ दकारत्रयमुच्चरितवान्प्रजापति पृथगनुशासनार्थिभ्य । ते वा कथ विवेकेन प्रतिपन्ना प्रजापतेर्मनोगतं समानेनैव दकारवर्णमात्रेणेति पराभिप्रायज्ञा विकल्पयन्ति ॥

अत्रैक आहु — अदान्तत्वादानत्वादयालुत्वं अपराधित्वमात्मनो मन्यमाना शंकिता एव प्रजापतावूषु किं नो वक्ष्यतीति । तेषा च दकारश्रवणमा-

त्रादेव आत्माशकावशेन तदर्थप्रतिपत्तिरभूत् । लोकेऽपि हि प्रसिद्ध पुत्रा शिष्याश्चानुशास्या सन्ता दोषान्निवर्तयितव्या इति । अतो युक्त प्रजापते दकारमात्रोच्चारणम् । दमादित्रये च दकारान्वयादात्मनो दोषानुरूप्येण देवादीना विवेकेन प्रत्तिपत्तुं चेति । फल त्वेतदात्मदोषज्ञाने सति दोषान्निवर्तयितुं शक्यते-ऽत्पेनाप्युपदेशेन, यथा देवादयो दकारमात्रेणेति ॥

नन्वेतत्त्रयाणा देवादीनामनुशासन देवादिभिरपि एकैकमेवोपादेय, अथत्वेऽपि न तु त्रय मनुष्यै शिक्षितव्यमिति । अत्रोच्यते— पूर्वै देवादिभि विशिष्टैरनुष्ठितमेतत्त्रय, तस्मान्मनुष्यैरेव शिक्षितव्यमिति । तत्र दयालुत्व-स्याननुष्ठेयत्व स्यात् । कथ ? असुरैरप्रशस्तैरनुष्ठितत्वादिति चेत् । न । तुत्य-त्वात्त्रयाणाम् । अतोऽन्योऽत्राभिप्राय प्रजापते पुत्रा देवादयस्त्रय । पुत्रे-भ्यश्च हितमेव पित्रोपदेष्टव्यम । प्रजापतिश्च हितज्ञो नान्ययोपदिशति । तस्मात्पुत्रानुशासन प्रजापते परममेतद्धितम् । अतो मनुष्यैरेवैतत्त्रय शिक्षि-तव्यमिति । अथवा न देवा असुरा वान्ये केचन विद्यन्ते मनुष्येभ्य । मनु-ष्याणामेवादान्ता येऽन्येरुत्तमर्गुण संपन्नास्ते देवा । लोभप्रधाना मनुष्या । तथा हिंसापरा क्रूरा असुरा । ते एव मनुष्या अदान्तत्वादिदोषत्रयमपेक्ष्य देवादिशब्दभाजो भवन्ति, इतराश्च गुणान्सत्त्वरजस्तमास्यपेक्ष्य । अतो मनु-ष्यैरेव शिक्षितव्यमेतत्त्रयमिति । तदपेक्षयैव प्रजापतिनोपदिष्टत्वात् । तथा हि मनुष्या अदान्ता लुब्धा क्रूराश्च दृश्यन्ते । तथाच स्मृति — "काम क्रोधस्तथा लोभस्तस्मादेतत्त्रय त्यजेत' इति ॥३॥ इति द्वितीयं ब्राह्मणम् ॥ ५२ —

दमादिसाधनत्रय सर्वोपासनशेष विहितम । दान्तोऽलुब्धो दयालु सन्सर्वोपासनेष्वधिक्रियते । तत्र निरुपाधिकस्य ब्रह्मणो दर्शनमतिक्रान्तम् । अथाधुना सोपाधिकस्य तस्यैवाभ्युदयफलानि वक्तव्यानीत्येवमर्थोऽयमारंभ —

एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्व तदेतत्त्र्यक्षर हृदयमिति ह इत्येक-मक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षर ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोक य एवं वेद ॥१॥ इति तृतीयं ब्राह्मणम् ॥

एष प्रजापतिर्यत् हृदय प्रजापतिरनुशास्तीत्यनन्तरमेवाभिहितम्। क पुनरस्यावनुशास्ता प्रजापतिरिति। उच्यते— एष प्रजापति। कोऽसौ? यत् हृदय हृदयमिति हृदयस्था बुद्धिरुच्यते। यस्मिन्शाकल्यब्राह्मणान्ते नामरूपकर्मणामुपसंहार उक्तो दिग्विभागद्वारेण, तदेतत्सर्वभूतप्रविष्ट सर्वभूतात्मभूत हृदय प्रजापति प्रजाना स्रष्टा। एतद्ब्रह्म बृहत्त्वात्सर्वात्मत्वाच्च ब्रह्म। एतत्सर्वम्। उक्त पंचमाध्याये हृदयस्य सर्वत्वम्। तत्सर्व यस्मात्तस्मादुपास्य हृदयं ब्रह्म। तत्र हृदयनामाक्षरविषयमेव तावदुपासनमुच्यते। तदेतत् हृदयमिति नाम त्र्यक्षर, त्रीण्यक्षराण्यस्येति त्र्यक्षरम्। कानि पुनस्तानि त्रीण्यक्षराण्युच्यन्ते। ह इत्येकमक्षरम्। आभिहरन्ति हृतेराहृतिकर्मणो ह इत्येतद्रूपमिति यो वेद, यस्मात् हृदयाय ब्रह्मणे स्वाश्चेन्द्रियाण्यन्ये च विषया शब्दादय स्व स्व कार्यमभिहरन्ति, हृदय च भोक्त्रर्थमभिहरति। अतो हृदयनाम्नो ह इत्येतदक्षरमिति यो वेद, अस्मै विदुषेऽभिहरन्ति स्वाश्च ज्ञातयोऽन्ये चामबद्धा। बलिमिति वाक्यशेष। विज्ञानानुरूप्येणैतत्फलम्। तथा द इत्येतदप्येकमक्षरम्। एतदपि दानार्थस्य ददातेर्द इत्येतद्रूप हृदयनामाक्षरत्वेन निबद्धम्। अत्रापि हृदयाय ब्रह्मणे स्वाश्च करणान्यन्ये च विषया स्व स्व वीर्य ददति, हृदय च भोक्त्रे ददाति स्व वीर्य, अतो दकार इत्येव यो वेद, अस्मै ददति स्वाश्चान्ये च। तथा यमित्येतदप्येकमक्षरम्। इणो गत्यर्थस्य यमित्येतत् रूप अस्मिन्नाम्नि निबद्धमिति यो वेद, स स्वर्ग लोकमेति। एव नामाक्षरादपीदृश विशिष्ट फल प्राप्नोति, किमु वक्तव्य हृदयस्वरूपोपासनादिति हृदयस्तुतये नामाक्षरोपन्यास॥ इति तृतीय ब्राह्मणम्॥ ५ ३.—

तद्वै तदेतदेव तदास सत्यमेव स यो हैत महद्यक्ष प्रथमज वेद सत्य ब्रह्मेति जयतीमाल्लोकाञ्जित इन्वसावसद्य एवमेतन्महद्यक्ष प्रथमजं वेद सत्य ब्रह्मेति सत्य ह्येव ब्रह्म॥१॥ इति चतुर्थं ब्राह्मणम्॥

तस्यैव हृदयाख्यस्य ब्रह्मण सत्यमित्युपासन विधित्सन्नाह— तत् तदिति हृदय ब्रह्म परामृष्टम्। वै इति स्मरणार्थम्। तद्यत् हृदय ब्रह्म स्मर्यत इत्येकस्तच्छब्द। तदेतदुच्यते प्रकारान्तरेणेति द्वितीयस्तच्छब्द। किं पुनस्तत्प्रकारान्तरम्? एतदेव तदित्येतच्छब्देन संबध्यते तृतीयस्तच्छब्द। एतदिति

वक्ष्यमाण बुद्धौ सन्निधाकृत्याह । आस बभूव । किं पुनरेतदेवास? यदुक्तं हृदय ब्रह्मेति तदिति तृतीयस्तच्छब्दो विनियुक्त । किं तदिति विशेषतो निर्दिशति— सत्यमेव । सच्च त्यच्च मूर्त चामूर्तं च सत्य ब्रह्म, पचभूतात्मकमित्येतत् । स य कश्चित्सत्यात्मानमेत महन्महत्त्वाद्यक्ष पूज्य प्रथमज प्रथमजात सर्वस्मात्ससारिण एतदेवाग्रे जात ब्रह्म अत प्रथमज, वेद विजानाति सत्यं ब्रह्मेति । तस्येद फलमुच्यते— यथा सत्येन ब्रह्मणेमे लोका आत्मसात्कृता जिता, एवं सत्यात्मान ब्रह्म महद्यक्ष प्रथमज वेद स जयतामाल्लोकान् । किंच जितो वशीकृत, इन्वित्थ, यथा ब्रह्मणाऽयं शत्रुरिति वाक्यशेष । असच्चासद्ब्रह्मवेदसौ शत्रुर्जितो भवेदत्यर्थ । कस्यैतत्फलमिति पुनर्निगमयति— य एवमेतन्महद्यक्षं प्रथमज वेद सत्य ब्रह्मेति । अतो विद्यानुरूप फल युक्तम् । सत्य ह्येव यस्माद्ब्रह्म ॥ इति चतुर्थ ब्राह्मणम् ॥ ५.४—

आप एवेदमग्र आसुस्ता आप सत्यमसृजन्त सत्य ब्रह्म ब्रह्म प्रजापति प्रजापतिर्देवान्ते देवा सत्यमेवोपासते तदेतत्त्र्यक्षर सत्यमिति स इत्येकमक्षर तीत्येकमक्षर यमित्येकमक्षर प्रथमोत्तमे अक्षरे सत्य मध्यतोऽनृतं तदेतदनृतमुभयत सत्येन परिगृहीत सत्यभूयमेव भवति नैवं विद्वासमनृत हिनस्ति ॥१॥

सत्यस्य ब्रह्मण स्तुत्यर्थमिदमाह । महद्यक्ष प्रथमजमित्युक्त, तत्कथ प्रथमजत्वमिति उच्यते— आप एवेदमग्र आसु । आप इति कर्मसमवायिन्योऽग्निहोत्राद्याहुतय । अग्निहोत्राद्याहुते द्रवात्मकत्वादप्त्वम् । ताश्च आप अग्निहोत्रादिकर्मापवर्गोत्तरकाल केनचिददृष्टेन सूक्ष्मेणात्मना कर्मसमवायित्वमपरित्यजन्त्य इतरभूतसहिता एव न केवला । कर्मसमवायित्वात्तु प्राधान्यमपामिति । सर्वाण्येव भूतानि प्रागुत्पत्तेरव्याकृतावस्थानि कर्तृसहितानि निर्दिश्यन्ते आप इति । ता आपो बीजभूता जगतोऽव्याकृतात्मनाऽवस्थिता । ता एवेदं सर्वं नामरूपविकृत जगदग्र आसुर्नान्यत्किंचिद्विकारजातमासीत् । ता पुनरापः सत्यमसृजन्त । तस्मात्सत्यं ब्रह्म प्रथमजम् । तदेतद्धिरण्यगर्भस्य सूत्रात्मनो जन्म, यदव्याकृतस्य जगतो व्याकरणम् । तस्मत्य ब्रह्म कुत? महत्त्वात् । कथ महत्त्वमित्याह— यस्मात्सर्वस्य स्रष्टृ । कथ? यत्सत्य ब्रह्म, तत्प्रजापतिं प्रजाना पतिं विराज सूर्यादिकरणमसृजतेत्यनुषग । प्रजापतिर्देवान्स विराट्-

प्रजापतिर्देवानसृजत। यस्मात्सर्वमेव क्रमेण सत्याद्ब्रह्मणो जात, तस्मान्महत्सत्य ब्रह्म। कथ पुनर्यक्षमिति। उच्यते— त एव सृष्टा देवा पितरमपि विराजमतीत्य तदेव सत्य ब्रह्मोप सत। अत एतत्प्रथमज महद्यक्षम्। तस्मात्सर्वात्मनापास्य तत्। तस्यापि सत्यस्य ब्रह्मणो नाम सत्यमिति। तदेतत्त्र्यक्षरम्। कानि तान्यक्षराणीत्याह— स इत्येकमक्षरम्। तीत्येकमक्षरम्। तीति ईकारानुबंधो निर्देशार्थ। यमित्येकमक्षरम्। तत्र तेषा प्रथमोत्तमे अक्षरे सकारयकारौ सत्यम्। मृत्युरूपाभावात्। मध्यतो मध्येऽनृतम्। अनृत हि मृत्यु। मृत्युनृतयो तकारसामान्यात्। तदेतदनृत तकाराक्षर मृत्युरूपमुभयत सत्येन सकारयकारलक्षणेन परिगृहीत व्याप्त अतर्भावित सत्यरूपाभ्या। अतोऽकिंचित्करं तत्सत्यभूयमेव सत्यबाहुल्यमेव भवति। एव सत्यबाहुल्य सर्वस्य मृत्योरनृतस्याकिंचित्करत्व च यो विद्वास्तमेव विद्वासमनृत कदाचित्प्रमादोक्त न हिनस्ति॥

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मडले पुरुषो यश्चाय दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठित प्राणैरयममुष्मिन्नन्य यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मडल पश्यति नैनमेते रश्मय प्रत्यायन्ति॥२॥

अस्याधुना सत्यस्य ब्रह्मण सस्थानविशेषो उपासनमुच्यते— तद्यत्। किं तत्? सत्य ब्रह्म प्रथमज, किं? असौ स। कोऽसौ? आदित्य। क पुनरसावादित्यो? य एष। क एष, य एतस्मिन्नादित्यमंडले पुरुषोऽभिमानी सोऽसौ सत्य ब्रह्म। यश्चायमध्यात्म योऽय दक्षिणेऽक्षन्नक्षणि पुरुष। च शब्दात्स च सत्य ब्रह्मेति सबंध। तावेतावादित्याक्षिस्थौ पुरुषावेकस्य सत्यस्य ब्रह्मण सस्थानविशेषौ यस्मात्तस्मादन्योन्यस्मिन्नितरेतरास्मन् आदित्यश्चाक्षुषे चाक्षुषश्चादित्ये प्रतिष्ठितौ। अध्यात्माधिदेवतयो अन्योन्योपकार्योपकारकत्वात्। कथ प्रतिष्ठितावित्युच्यते— रश्मिभि प्रकाशेनानुग्रहं कुर्वन्नेष आदित्योऽस्मिश्चाक्षुषेऽध्यात्मे प्रतिष्ठित। अय च चाक्षुष प्राणैरादित्यमनुगृह्णन्नमुष्मिन्नादित्येऽधिदैव प्रतिष्ठित। सोऽस्मिञ्छरीरे विज्ञानमयो भोक्ता यदा यस्मिन्काले उत्क्रमिष्यन्भवति, तदासौ चाक्षुष आदित्यपुरुषो रश्मीनुपसंहृत्य केवलेनौदासीन्येन रूपेण व्यवतिष्ठते। तदायं विज्ञानमय पश्यति शुद्धमेव केवलं

विरश्मि एतन्मडल चद्रमडलमिव । तदेतदरिष्टदर्शन प्रासगिक प्रदर्श्यते । कथं नाम पुरुष करणीये यत्नवान्स्यादिति । नैन चाक्षुष पुरुषमुररीकृत्य त प्रत्यनुग्रहायैते रश्मय स्वामिकर्तव्यवशात्पूर्वमागच्छन्तोऽपि पुनस्तत्कर्मक्षय-मनुरुध्यमाना इव नोपयन्ति न प्रत्यागच्छन्त्येनम् । अतोऽवगम्यते परस्परोपकार्योपकारकभावात् सत्यस्यैवैकस्यात्मन अशौ एताविति ॥

य एष एतस्मिन्मडले पुरुषस्तस्य भूरिति शिर एकं शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मान जहाति च य एव वेद ॥३॥

तत्र योऽसौ क ' य एष एतस्मिन्मडले पुरुष सत्यनामा तस्य व्याहृतयोऽवयवा । कथम् । भूरिति येय व्याहृति सा तस्य शिर । प्राधम्यात् । तत्र सामान्य स्वयमेवाह श्रुति — एकमेकसख्यायुक्त शिर तथैतदक्षरमेक भूरिति । भुव इति बाहू द्वित्वसामान्यात् । द्वौ बाहू द्वे एते अक्षरे । तथा स्वरिति प्रतिष्ठा । द्वे प्रतिष्ठे द्वे एते अक्षरे । प्रतिष्ठे पादौ प्रतितिष्ठत्याभ्या इति । तस्यास्य व्याहृत्यवयवस्य सत्यस्य ब्रह्मण उपनिषद्रहस्यमभिधानम् । येनाभिधानेनाभिधायमान तद्ब्रह्म अभिमुखाभवति लोकवत् । काऽसावित्याह — अहरिति । अहरिति चैतद्रूपं हतेर्जहातेश्चेति यो वेद, स हन्ति जहाति च पाप्मान य एवं वेद ॥

योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एक शिर एकमेतदक्षर भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति हन्ति पाप्मान जहाति च य एवं वेद ॥४॥ इति पंचमं ब्राह्मणम् ॥

एवं योऽय दक्षिणेऽक्षन्पुरुष तस्य भूरिति शिर इत्यादि सर्व समानम् । तस्योपनिषदहमिति । प्रत्यगात्मभूतत्वात् । पूर्ववद्धतेर्जहातेश्चेति ॥ इति पचम ब्राह्मणम् ॥ ५५ —

उपाधीनामनेकत्वादनेकविशेषणत्वाच्च तस्यैव प्रकृतस्य ब्रह्मणो मनउपाधिविशिष्टस्योपासनं विधित्सन्नाह—

मनोमयोऽयं पुरुषो भा सत्यस्तस्मिन्तर्हृदये यथा व्रीहिर्वा यवो वा

स एष सर्वस्येशान सर्वस्याधिपति सर्वमिद प्रशास्ति यदिद किच ॥१॥ इति षष्ठ ब्राह्मणम् ॥

मनोमयो मन प्रायो, मनस्युपलभ्यमानत्वात् । मनसा चोपलभत इति मनोमयोऽय पुरुषो, भा सत्यो भा एव सत्य सद्भाव स्वरूप यस्य सोऽयं भा-सत्यो भास्वर इत्येतत । मनस सर्वार्थावभासकत्वान्मनोमयत्वाच्चास्य भास्वर-त्वम् । तस्मिन्नतर्हृदये हृदयस्यान्तस्तस्मिन्नित्येतत । यथा व्राहिर्वा यवो वा पारि-माणत एव परिमाण तस्मिन्नतर्हृदये योगिभिर्दृश्यत इत्यर्थ । स एष सर्व-स्येशान सर्वस्य स्वभेदजातस्येशान स्वामी । स्वामित्वेऽपि सति कश्चिदमात्यादि-तत्रोऽय तु न तथा । कि तर्ह्यधिपतिरधिष्ठाय पालयिता । सर्वमिद प्रशास्ति यदिद किच यत्किञ्चित्सर्व जगत्तत्सर्व प्रशास्ति । एव मनोमयस्योपासनात्तथा-रूपापत्तिरेव फलम् । त यथा यथोपासते तदेव भवति' इति ब्राह्मणम् ॥ इति षष्ठ ब्राह्मणम् ॥ ५ ६ —

विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येन पाप्मनो य एव वेद विद्युद्ब्रह्मेति विद्युद्धेव ब्रह्म ॥१॥ इति सप्तम ब्राह्मणम् ॥

तयेवोपासनान्तर सत्यस्य ब्रह्मणो विशिष्टफलमारभ्यते— विद्युद्ब्रह्मेत्याहु । विद्युतो ब्रह्मणो निर्वचनमुच्यते— विदानादवखडनात्तमसो मेघावकार विदार्य ह्यवभासतेऽतो विद्युत् । एवगुण विद्युद्ब्रह्मेति यो वेद, असौ विद्यत्यवखडयति विनाशयति पाप्मन , एनमात्मान प्रति प्रतिकूलभूता पाप्मानो ये तान्सर्वा-न्पाप्मनोऽवखडयतीत्यर्थ । य एव वेद विद्युद्ब्रह्मेति तस्यानुरूप फलम् । विद्युद्धि यस्माद्ब्रह्म ॥ इति सप्तम ब्राह्मणम् ॥ ५ ७ —

वाच धेनुमुपासीत तस्याश्चत्वार स्तना: स्वाहाकारो वषट्कारो हतकार. स्वधाकारस्तस्ये द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकार च वषट्कार च हंत-कारं मनुष्या स्वधाकार पितरस्तस्या प्राण ऋषभो मनो वत्स: ॥१॥ इति अष्टमं ब्राह्मणम् ॥

पुनरुपासनान्तर तस्यैव ब्रह्मणो वाग्वै ब्रह्मेति । वागिति शब्दस्त्रयी । ता वाचं धेनुं धेनुरिव धेनु , यथा धेनुश्चतुर्भि स्तनै स्तन्यं पय क्षरति

वत्साय एव वाग्वेनुर्वक्ष्यमाणे स्तनै पय इवान्न क्षरति देवादिभ्य । के पुनस्ते स्तना ? के वा ते येभ्य क्षरति ? तस्या एतस्या वाचो वेन्वा द्यौ स्तनो देवा उपजीवन्ति वत्सस्थानीया । कौ तौ ? स्वाहाकार च वषट्कार च । आभ्या हि हविर्दीयते देवेभ्य । हतकार मनुष्या । हतेति मनुष्येभ्योऽन्न प्रयच्छन्ति । स्वधाकारं पितर । स्वधाकारेण हि पितृभ्य स्वधा प्रयच्छन्ति । तस्या वेन्वा वाच प्राण ऋषभ । प्राणेन हि वाक्प्रसूयते । मनो वत्स । मनसा हि प्रस्राव्यते । मनसा ह्यालोचिते विषये वाक्प्रवर्तते । तस्मान्मनो वत्सस्थानीयम् । एव वाग्वेनूपासक ताद्भाव्यमेव प्रतिपद्यते ॥ इति अष्टम ब्राह्मणम् ॥ ५.८—

अयमग्निर्वैश्वानरो योऽयमत पुरुषे येनेदमन्न पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैन घोष शृणोति ॥१॥ इति नवम ब्राह्मणम् ॥

अयमग्नि वैश्वानर पूर्ववदुपासनान्तरमयमग्नि वैश्वानर । कोऽयमग्नि इत्याह— योऽयमत पुरुषे । कि शरीरारभक ? नेत्युच्यते— येनाग्निना वैश्वानराख्येनेदमन्न पच्यते । कि तदन्नम् ? यदिदमद्यते भुज्यतेऽन्न प्रजाभिर्जाठरोऽग्निरित्यर्थ । तस्य साक्षादुपलक्षणार्थमिदमाह— तस्याग्ने अन्न पचतो जाठरस्यैष घोषो भवति । कोऽसौ ? य घोष, एतदिति क्रियाविशेषण, कर्णावपिधाय अगुलीभ्यामपिधान कृत्वा शृणोति । त प्रजापतिमुपासीत वैश्वानरमग्निम् । अत्रापि ताद्भाव्य फलम् । तत्र प्रासगिकं इदमरिष्टलक्षणमुच्यते— सोऽत्र शरीरे मोक्ष्यन् यदोत्क्रमिष्यन्भवति, नैन घोषं शृणोति ॥ इति नवम ब्राह्मणम् ॥ ५.९—

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य ख तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा लबरस्य ख तेन स ऊर्ध्व आक्रमते स चंद्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुंदुभे ख तेन स ऊर्ध्व

आक्रमते स लोकमागच्छत्यशोकमहिम तस्मिन्वसति शाश्वती: समा ॥१॥ इति दशम ब्राह्मणम् ॥

सर्वेषामस्मिन्प्रकरणे उपासनाना गतिरिय फल चोच्यते— यदा वै पुरुषो विद्वानस्माल्लोकात्प्रैति शरीर परित्यजति स तदा वायुमागच्छति, अंतरिक्षे तिर्यग्भूतो वायु स्तिमितोऽभेद्यस्तिष्ठति । स वायुस्तत्र स्वात्मनि तस्मै संप्राप्ताय विजिहीते स्वात्मावयवान्विगमयति च्छिद्रीकरोत्यात्मानमित्यर्थ । किंपरिमाण छिद्रमिति । उच्यते— यथा रथचक्रस्य ख छिद्र प्रसिद्धपरिमाणम् । तेन च्छिद्रेण स विद्वानूर्ध्व आक्रमते ऊर्ध्व सन्गच्छति स आदित्यमागच्छति । आदित्यो ब्रह्मलोक जिगमिषोर्मार्गनिरोध कृत्वा स्थित । सोऽप्येवविदे उपासकाय द्वार प्रयच्छति । तस्म स तत्र विजिहीते । यथा लवरस्य ख वादित्रविशेषस्य च्छिद्रपरिमाणम् । तेन स ऊर्ध्व आक्रमते, स चद्रमसमागच्छति । सोऽपि तस्म तत्र विजिहीते । यथा दुदुभे ख प्रसिद्ध तेन स ऊर्ध्व आक्रमते, स लोक प्रजापतिलोकमागच्छति । किंविशिष्टम ? अशोक मानसेन दु खेन विवर्जितमित्येतत् । अहिम हिमवर्जित शारीरदु खवर्जितमित्यर्थ । त प्राप्य तस्मिन्वसति शाश्वतीर्नित्या समा सवत्सरानित्यर्थ । ब्रह्मणो बहून्कल्पान्वसतीत्येतत् ॥ इति दशम ब्राह्मणम् ॥

एतद्वै परम तपो यद्व्याहितस्तप्यते परम हैव लोक जयति य एव वेदैतद्वै परम तपो य प्रेतमरण्य हरन्ति परम हैव लोकं जयति य एव वेदैतद्वै परमं तपो य प्रेतमग्नावभ्यादधति परम हैव लोक जयति य एव वेद ॥१॥ इति एकादश ब्राह्मणम् ॥

एतद्वै परम तप । कि तत् ? यद्व्याहितो व्याधितो ज्वरादिपरिगृहीत सन्यत्तप्यते तदेतत्परम तप इत्येवं चिंतयेत् । दु खसामान्यात् । तस्यैवं चिंतयतो विदुष कर्मक्षयहेतुस्तदेव तपो भवत्यनिदतोऽविषीदत । स एव च तेन विज्ञानतपसा दग्धकिल्बिष परम हैव लोक जयति य एवं वेद । तथा मुमूर्षुरादावेव कल्पयति । कि ? एतद्वै परमं तपो यं प्रेत मा ग्रामादरण्य हरन्ति ऋत्विजोऽन्त्यकर्मणे, तत् ग्रामादरण्यगमनसामान्यात्परम मम तत्तपो भविष्यति । ग्रामादरण्यगमनं परमं तप इति हि प्रसिद्धम् । परमं हैव

लोक जयति य एव वेद । तथैतद्वै परमं तपो य पेतमग्नावन्वादधति । अग्निप्रवेशसामान्यात् । परम हैव लोक जयति य एवं वेद ॥ इति एकादश ब्राह्मणम् ॥ ५.११ —

अन्न ब्रह्मेत्येक आहुस्तन्न तथा पूयति वा अन्नमृते प्राणात्प्राणो ब्रह्मेत्येक आहुस्तन्न तथा शुष्यति वे प्राण ऋतेऽन्नादेते ह त्वेव देवते एकधाभूय भूत्वा परमता गच्छतस्तद्ध स्माह प्रातृद पितर किं स्विदेवैव विदुषे साधु कुर्या किमेवास्मा असाधु कुर्यामिति स ह स्माह पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूय भूत्वा परमता गच्छतीति तस्मा उ हैतदुवाच वीत्यन्न वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै र प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एव वेद ॥१॥ इति द्वादश ब्राह्मणम् ॥

अन्नं ब्रह्मेति । तयेतदुपासनानन्तर विधित्सन्नाह— अन्न ब्रह्म, अन्नमद्यते यत्तद्ब्रह्मेत्येक आचार्या आहु , तन्न तथा ग्रहीतव्यमन्न ब्रह्मेति । अन्ये चाहु प्राणो ब्रह्मेति । तच्च तथा न ग्रहातव्यम् । किमर्थ पुनरन्न ब्रह्मेति न ग्राह्यम्[1] यस्मात्पूयति क्रियते पूतिभावमापद्यते ऋते प्राणात्तत्कथं ब्रह्म भवितुमर्हति । ब्रह्म हि नाम तदविनाशि । अस्तु तर्हि प्राणो ब्रह्म । नैवम् । यस्माच्छुष्यति वै प्राण शोषमुपैति ऋतेऽन्नात् । अत्ता हि प्राण । अतोऽन्नेनान्नेन विना न शक्नोत्यात्मान धारयितुम् । तस्माच्छुष्यति वै प्राण ऋतेऽन्नात् । अत एकैकस्य ब्रह्मता नोपपद्यते यस्मात्तस्मादेते ह त्वेवान्नप्राणदेवते एकधाभूयमेकधाभाव भूत्वा गत्वा परमता परमत्वं गच्छतो ब्रह्मत्वं प्राप्नुत ।

तदेतदेवमध्यवस्य ह स्माह— स्म प्रातृदो नाम पितरमात्मन । किंस्वित्स्विदिति वितर्के । यथा मया ब्रह्म परिकल्पितमेव विदुषे किंस्वित्साधु कुर्या साधु शोभनं पूजा का त्वस्मै पूजा कुर्यामित्यभिप्राय । किमेवास्मै विदुषेऽसाधु कुर्या, कृतकृत्योऽसावित्यभिप्राय । अन्नप्राणौ सहभूतौ ब्रह्मेति विद्वान्नासावसाधुकरणेन खडितो भवति । नापि साधुकरणेन महीकृत । तमेवंवादिनं स पिता ह स्माह पाणिना हस्तेन निवारयन्मा प्रातृद मैव वोचः ।

कस्त्वेनयोरन्नप्राणयो एकधाभूयं भूत्वा परमता कस्तु गच्छति। न कश्चिदपि विद्वाननेन ब्रह्मदर्शनेन परमता गच्छति। तस्मान्नेव वक्तुमर्हसि कृतकृत्योऽसाविति। यद्येव ब्रवीतु भवान्कथ परमता गच्छतीति। तस्मा उ हैतद्वक्ष्यमाण वच उवाच। कि तत्। वीति। कि तद्वीति। उच्यते— अन्न वै वि। अन्ने हि यस्मादिमानि सर्वाणि भूतानि विष्टान्याश्रितान्यतोऽन्न वीत्युच्यते। किच रमिति। रमिति चोक्तवान्पिता। कि पुनस्तद्रम्। प्राणो वै रम्। कुत इत्याह। प्राणे हि यस्माद्वुलाश्रये सति सर्वाणि भूतानि रमन्ते अतो २ प्राण। सर्वभूताश्रयगुणमन्न सर्वभूतरतिगुणश्च प्राण। न हि कश्चिदनायतनो निराश्रयो रमते। नापि सत्यप्यायतनेऽप्राणो दुर्बलो रमते। यदा त्वायतनवान्प्राणी बलवाश्च तदा कृतार्थमात्मान मन्यमानो रमते लोक। 'युवा स्यात्साधुयुवाऽध्यायक' इत्यादिश्रुते। इदानीमेवविद फलमाह— सर्वाणि ह वा अस्मिन्भूतानि विशन्त्यन्नगुणज्ञानात्सर्वाणि भूतानि रमन्ते प्राणगुणज्ञानात य एव वेद॥ इति द्वादश ब्राह्मणम्॥ ५.१२—

उक्थ प्राणो वा उक्थ प्राणो हीद सर्वमुत्थापयत्युद्धास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यं सलोकता जयति य एव वेद॥१॥

उक्थं तयोपासनान्तरम्। उक्थ शस्त्रम्। तद्धि प्रधान महाव्रते क्रतौ। कि पुनस्तदुक्थम्। प्राणो वा उक्थम्। प्राणश्च प्रधान इद्रियाणामुक्थं च शस्त्राणामत उक्थमित्युपासीत। कथ प्राण उक्थमित्याह— प्राणो हि यस्मादिद सर्वमुत्थापयति। उत्थापनादुक्थ प्राण। न ह्यप्राण कश्चिदुत्तिष्ठति। तदुपासनफलमाह— उद्धास्मादेवविद उक्थवित्प्राणविद्वीर पुत्र उत्तिष्ठति ह दृष्टमेतत्फल, अदृष्टं तु उक्थस्य सायुज्य सलोकता जयति य एव वेद॥

यजु प्राणो वै यजु प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुष सायुज्यं सलोकतां जयति य एवं वेद॥२॥

यजुरिति चोपासीत प्राणम्। प्राणो वै यजु। कथं यजु प्राण। प्राणे हि यस्मात्सर्वाणि भूतानि युज्यन्ते। न ह्यसति प्राणे केनचित्कस्यचिद्योगसामर्थ्यम्। अतो युनक्तीति प्राणो यजु। एवविद फलमाह— युज्यन्ते

उद्यच्छन्ते इत्यर्थ । हास्मै एवंविदे सर्वाणि भूतानि श्रैष्ठ्य श्रेष्ठभावस्तस्मै श्रैष्ठ्याय श्रेष्ठभावाय, अय न श्रेष्ठो भवेदिति । यजुष प्राणस्य सायुज्य-मित्यादि सर्व समानम् ॥

साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यचि सम्यंचि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्न सायुज्य सलोकता जयति य एव वेद ॥३॥

सामेति चोपासीत प्राणम् । प्राणो वै साम । कथ प्राण साम ? प्राणे हि यस्मात्सर्वाणि भूतानि सम्यचि सगच्छन्ते, सगमनात्साम्यापत्तिहेतुत्वात्साम प्राण । सम्यंचि सगच्छन्ते हास्मै सर्वाणि भूतानि । न केवल सगच्छन्त एव, श्रेष्ठभावाय चास्मै कल्पन्ते सम्पद्यन्ते । साम्न सायुज्य इत्यादि पूर्ववत् ॥

क्षत्र प्राणो वै क्षत्र प्राणो हि वै क्षत्र त्रायते हैन प्राण क्षणितो प्र क्षत्रमत्रमाप्नोति क्षत्रस्य सायुज्य सलोकता जयति य एव वेद ॥४॥ इति त्रयोदशं ब्राह्मणम् ॥

त प्राण क्षत्त्रमित्युपासीत । प्राणो व क्षत्र प्रसिद्धमेतत्प्राणो हि वै क्षत्त्रम् । कथ प्रसिद्धतेत्याह— त्रायते पालयत्येन पिउ देहं प्राण क्षणितो शस्त्रादिहिंसि-तात्पुनर्मासेन आपूरयति यस्मात्तस्मात्क्षतत्राणात्प्रसिद्ध क्षत्रत्व प्राणस्य । विद्वत्फल-माह— प्र क्षत्रमत्र न त्रायतेऽन्येन केनचिदित्यत्र क्षत्र प्राणस्तमत्र क्षत्र प्राण प्राप्नोतीत्यर्थ । शाखान्तरे वा पाठात्क्षत्रमात्र प्राप्नोति, प्राणो भवतीत्यर्थ । क्षत्त्रस्य सायुज्य सलोकता जयति य एव वेद ॥ इति त्रयोदश ब्राह्मणम् ॥

——— ५.१३ ———

भूमिरतरिक्ष द्यौरित्यष्टावक्षराण्यष्टाक्षर ह वा एक गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेव पद वेद ॥१॥

ब्रह्मणो हृदयाद्यनेकोपाधिविशिष्टस्य उपासनमुक्तम् । अथेदानी गायत्र्यु-पाधिविशिष्टस्योपासनं वक्तव्यमित्यारभ्यते । सर्वच्छदसा हि गायत्रीछद प्रधान-भूतम् । तत्प्रयोक्तृगयनाणाद्गायत्रीति वक्ष्यति । न चान्येषा छदसा प्रयोक्तृ-प्राणत्राणसामर्थ्यम् । प्राणात्मभूता च सा । सर्वच्छदसा चात्मा प्राण । प्राणश्च क्षतत्राणात्क्षत्त्रमित्युक्तम् । प्राणश्च गायत्री । तस्मात्तदुपासनमेव विधित्स्यते ।

द्विजोत्तमजन्महेतुत्वाच्च । "गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्य जगत्या वैश्य" इति द्विजोत्तमस्य द्वितीय जन्म गायत्रीनिमित्तम् । तस्मात्प्रधाना गायत्री । "ब्राह्मणा व्युत्थाय ब्राह्मणा अभिवदन्ति, स ब्राह्मणो विपापो विरजोऽविचिकित्सो ब्राह्मणो भवति" इत्युत्तमपुरुषार्थसंबध ब्राह्मणस्य दर्शयति । तच्च ब्राह्मणत्व गायत्रीजन्ममूल, अतो वक्तव्य गायत्र्या सतत्त्वम् । गायत्र्या हि य सृष्टो द्विजोत्तमो निरंकुश एवोत्तमपुरुषार्थसाधनेऽधिक्रियते । अतस्तन्मूल परमपुरुषार्थसबध । तस्मात्तदुपासनविधानायाह— भूमिरतरिक्ष द्यौरित्येतान्यष्टावक्षराणि । अष्टाक्षरमष्टावक्षराणि यस्य तदिदमष्टाक्षरम् । ह वै प्रसिद्धावद्योतकौ । एक प्रथम गायत्र्ये गायत्र्या पदम् । यकारेणैवाष्टत्वपूरणम् । एतदु हैवैतदेवास्या गायत्र्या पद पाद प्रथमो भूम्यादिलक्षणस्त्रैलोक्यात्मा । अष्टाक्षरत्वसामान्यात् । एवमेतत्त्रैलोक्यात्मक गायत्र्या प्रथम पद यो वेद तस्येतत्फलम्— स विद्वान्यावत्किंचिदेषु त्रिषु लोकेषु जेतव्य तावत्सर्व ह जयति योऽस्या एतदेव पद वेद ॥

ऋचो यजूषि सामानीत्यष्टावक्षराण्यष्टाक्षर ह वा एक गायत्र्यै पदमेतदु हैवास्या एतत्स यावतीय त्रयी विद्या तावद्ध जयति योऽस्या एतदेव पद वेद ॥२॥

तयचो यजूषि सामानीति त्रयीविद्यानामाक्षराण्येतान्यपि अष्टाववं । तयैवाष्टाक्षरं ह वा एक गायत्र्यै पद द्वितीयमेतदु हैवास्या एतद्यजु सामलक्षण अष्टाक्षरत्वसामान्यादेव । स यावतीय त्रयी विद्या त्रय्या विद्यया यावत्फलजातमाप्यते तावद्ध जयति योऽस्या एतद्गायत्र्या त्रैविद्यलक्षण पद वेद ॥

प्राणोऽपानो व्यान इत्यष्टावक्षराण्यष्टाक्षरं ह वा एक गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिद प्राणि तावद्ध जयति योऽस्या एतदेव पद वेदाथास्या एतदेव तुरीय दर्शत पद परोरजा य एष तपति यद्वै चतुर्थं तत्तुरीय दर्शतं पदमिति ददश इव ह्येष परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपत्येवं ह्येव श्रिया यशसा तपति योऽस्या एतदेव पदं वेद ॥३॥

तथा प्राणोऽपानो व्यान एतान्यपि प्राणाद्यभिधानाक्षराण्यष्टौ । तच्च गायत्र्यास्तृतीयं पद, यावदिदं प्राणिजात तावद्ध जयति योऽस्या एतदेव गायत्र्यास्तृतीयं पदं वेद । अथानंतरं गायत्र्यास्त्रिपदाया शब्दात्मिकायास्तुरीय

पदमुच्यतेऽभिधेयभूतं, अस्याः प्रकृताया गायत्र्या एतदेव वक्ष्यमाणं तुरीयं दर्शतं पदं परोरजा य एष तपति । तुरीयमित्यादिवाक्यपदार्थं स्वयमेव व्याचष्टे श्रुतिः यद्वै चतुर्थं प्रसिद्धं लोके तदिदं तुरीयशब्देनाभिधीयते । दर्शतं पदमित्यस्य कोऽर्थ इत्युच्यते— ददृश इव दृश्यत इव ह्येष मंडलांतर्गतः पुरुषः । अतो दर्शतं पदमुच्यते । परोरजा इत्यस्य पदस्य कोऽर्थ इत्युच्यते— सर्वं समस्तमु ह्येवैष मंडलस्थः पुरुषो रजो रजोजातं समस्तं लोकमित्यर्थः । उपर्युपर्याधिपत्यभावेन सर्वं लोकं रजोजातं तपति । उपर्युपरीति वीप्सा सर्वलोकाधिपत्यख्यापनार्था । ननु सर्वशब्देनैव सिद्धत्वाद्वीप्साऽनर्थिका । नैष दोषः । येषामुपरिष्टात्सविता दृश्यते तद्विषय एव सर्वशब्दः स्यादित्याशंकानिवृत्त्यर्था वीप्सा । 'ये चामुष्मात्परांचो लोकास्तेषां चेष्टे देवकामानां च' इति श्रुत्यंतरात् । तस्मात्सर्वावरोधार्था वीप्सा । यथाऽसौ सविता सर्वाधिपत्यलक्षणया श्रिया यशसा च ख्यात्या तपति, एवं ह्येव श्रिया यशसा च तपति योऽस्या एतदेवं तुरीयं दर्शतं पदं वेद ॥

सैषा गायत्र्येतस्मिंस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत्सत्यं बले प्रतिष्ठितं प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्माद्बाहुबलं सत्यादेवीय इत्येवन्वेषा गायत्र्यध्यात्मं प्रतिष्ठिता सा हैषा गयांस्तत्रे प्राणा वै गयास्तत्प्राणांस्तत्रेतद्यद्गयांस्तत्रे तस्माद्गायत्री नाम स यामेवामूं सावित्रीमन्वाहैषैव सा स यस्मा अन्वाह तस्य प्राणांस्त्रायते ॥४॥

सैषा त्रिपदोक्ता या त्रैलोक्यत्रैविद्यप्राणलक्षणा गायत्री एतस्मिंश्चतुर्थे तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता । मूर्तामूर्तरसत्वादादित्यस्य । रसापाये हि वस्तु नीरसमप्रतिष्ठितं भवति । यथा काष्ठादि दग्धसारं तद्वत् । तथा मूर्तामूर्तात्मकं जगत्त्रिपदा गायत्र्यादित्ये प्रतिष्ठिता तद्रसत्वात्सह त्रिभिः पादैः । तद्वै तुरीयं पदं सत्ये प्रतिष्ठितम् । किं पुनस्तत्सत्यमित्युच्यते— चक्षुर्वै सत्यम् । कथं चक्षुः सत्यमित्याह— प्रसिद्धमेतच्चक्षुर्हि वै सत्यम् । कथं प्रसिद्धतेत्याह— तस्मात्— यद्यदीदानीमेव द्वौ विवदमानौ विरुद्धं वदमानावेयातामागच्छेयातामहमदर्शं दृष्टवानस्मीत्यन्य आहाहमश्रौषं त्वया दृष्टं न तथा तद्वस्त्विति ।

तयोर्य एव ब्रूयादहमद्राक्षमिति, तस्मा एव श्रद्दध्याम । न पुनर्यो ब्रूयादहमश्रौषमिति । श्रोतुर्मृषा श्रवणमपि समवति । न तु चक्षुषो मृषा दर्शनम् । तस्मान्नाश्रौषमित्युक्तवते श्रद्दध्याम । तस्मात्सत्यप्रतिपत्तिहेतुत्वात्सत्य चक्षु । तस्मिन्सत्ये चक्षुषि सह त्रिभिरितरै पादैस्तुरीय पदं प्रतिष्ठितमित्यर्थ । उक्त च 'स आदित्य कस्मिन्प्रतिष्ठित इति चक्षुषीति' ॥

तद्वै तुरीयपदाश्रयं सत्यं बले प्रतिष्ठितम् । किं पुनस्तद्बलमित्याह— प्राणो वै बल, तस्मिन्प्राणे बले प्रतिष्ठितं सत्यम् । तथाचोक्त 'सूत्रे तदोत च प्रोत च' इति । यस्माद्बले सत्य प्रतिष्ठित, तस्मादाहुर्बल सत्यादोगीय ओजीय ओजस्तरामित्यर्थ. । लोकेऽपि यस्मिन्हि यदाश्रित भवति तस्मादाश्रितादाश्रयस्य बलवत्तरत्वं प्रसिद्धम् । न हि दुर्बल बलवत क्वचिदाश्रयभूत दृष्टम् । एवमुक्तन्यायेन उ एषा गायत्र्यध्यात्ममध्यात्मे प्राणे प्रतिष्ठिता । सैषा गायत्री प्राण । अतो गायत्र्या जगत्प्रतिष्ठितम् । यस्मिन्प्राणे सर्वे देवा एक भवन्ति । सर्वे वेदा कर्माणि फल च । सैव गायत्री प्राणरूपा सती जगत आत्मा । सा हैषा गयास्तत्रे त्रातवती । के पुनर्गया ? प्राणा वागादयो वै गया । शब्दकरणात् । तास्तत्रे सैषा गायत्री । तत्तत्र यद्यस्मात् गयास्तत्रे तस्मात् गायत्री नाम । गयत्राणाद्वायत्रीति प्रथिता । स आचार्य उपनीय माणवकमष्टवर्ष यामेवाम् गायत्री सावित्री सवितृदेवताकामन्वाह पच्छोऽर्धर्चश समस्ता च, एषैव सा साक्षात्प्राणो जगत आत्मा माणवकाय समर्पिता इहेदानी व्याख्याता, नान्या । स आचार्यो यस्मै माणवकायान्वाहानुवक्ति, तस्य माणवकस्य गयान् प्राणास्त्रायते नरकादिपतनात् ॥४॥

तां हैतामेके सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूम इति न तथा कुर्याद्वायत्रीमेव सावित्रीमनुब्रूयाद्यदि ह वा अप्येवंविद्बह्विव प्रतिगृह्णाति न हैव तद्वायत्र्या एकचन पद प्रति ॥५॥

तामेता सावित्री हैके शाखिनोऽनुष्टुभमनुष्टुप्प्रभवामनुष्टुप्छदस्का अन्वाहुरुपनीताय । तदभिप्रायमाह— वागनुष्टुप् । वाक्च शरीरे सरस्वती तामेव हि वाच सरस्वतीं माणवकायानुब्रूम इत्येतद्वदन्त । न तथा कुर्यान्न तथा विद्याद्यत्त आहुर्मृषैव तत् । किं तर्हि गायत्रामेव सावित्रीमनुब्रूयात् । कस्मात् ? यस्मात्प्राणो गायत्रीत्युक्तम् । प्राण उक्ते वाक्च सरस्वती चान्ये च प्राणा सर्व

माणवकाय समर्पितं भवति। किंचेद प्रासंगिकमुक्त्वा गायत्रीविदं स्तौति— यदि ह वै अप्येवविद्बह्विव, न हि तस्य सर्वात्मनो बहु नामास्ति किंचित्सर्वात्मकत्वाद्विदुष प्रतिगृह्णाति, न हैव तत्प्रतिग्रहजात गायत्र्या एकंचनैकमपि पदं प्रति पर्याप्तम् ॥

स य इमाल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽस्या एतत्प्रथम पदमाप्नुयादथ यावतीय त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीय पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीय पदमाप्नुयादथास्या एतदेव तुरीय दर्शत पद परोरजा य एष तपति नैव केनचनाप्यं कुत उ एतावत्प्रतिगृह्णीयात् ॥६॥

स य इमाल्लोकान्स यो गायत्रीविदिमान्भूरादील्लोकान्गोअश्वादिधनपूर्णाल्लोकान्प्रतिगृह्णीयात्स प्रतिग्रहोऽस्या गायत्र्या एतत्प्रथम पद यद्व्याख्यात आप्नुयात्प्रथमपदविज्ञानफलं, तेन भुक्त स्यान्न त्वधिकदोषोत्पादक स प्रतिग्रह। अथ पुनर्यावतीय त्रया विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत् द्वितीय पद आप्नुयात्। द्वितीयपदविज्ञानफल तेन भुक्त स्यात्। तथा यावदिद प्राणि, यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयात्। तेन तृतीयपदविज्ञानफल भुक्तं स्यात्। कल्पयित्वेदमुच्यते। पादत्रयसममपि यदि कश्चित्प्रतिगृह्णीयात् तत्पादत्रयविज्ञानफलस्यैव क्षयकारण, न त्वन्यस्य दोषस्य कर्तृत्वे क्षमम्। न चैव दाता प्रतिग्रहीता वा गायत्रीविज्ञानस्तुतये कल्प्यते। दाता प्रतिग्रहीता च यद्यप्येव सभाव्यते, नासौ प्रतिग्रहोऽपराधक्षम। कस्मात्? यतोऽभ्यधिकमपि पुरुषार्थविज्ञानमवशिष्टमेव चतुर्थपादविषय गायत्र्या। तद्दर्शयति— अथास्या एतदेव तुरीय दर्शतं पद परोरजा य एष तपति। यद्यैतन्नैव केनचन केनचिदपि प्रतिग्रहेणाप्य नैव प्राप्यमित्यर्थ। यथा पूर्वोक्तानि त्रीणि पदानि। एतान्यपि नैवाप्यानि केनचित्। कल्पयित्वैवमुक्त, परमार्थत कुत उ एतावत्प्रतिगृह्णीयात्त्रैलोक्यादिसमम्। तस्माद्गायत्री एवंप्रकारोपास्येत्यर्थ ॥

तस्या उपस्थान गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे। नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥७॥

तस्या उपस्थान तस्या गायत्र्या उपस्थानमुपेत्य स्थानं नमस्करणमनेन मन्त्रेण । कोऽसौ मन्त्र इत्याह— हे गायत्र्यसि भवसि त्रैलोक्यपादेनैकपदी । त्रयीविद्यारूपेण द्वितीयेन द्विपदी । प्राणादिना तृतीयेन त्रिपद्यसि । चतुर्थेन तुरीयेण चतुष्पद्यसि । एव चतुर्भि पादैरुपासकै पद्यसे ज्ञायसे । अत परं परेण निरुपाधिकेन स्वेनात्मनाऽपदसि । अविद्यमान पद यस्यास्तव येन पद्यसे सा त्वमपदसि यस्मान्नहि पद्यसे, नेति नेत्यात्मत्वात् । अतो व्यवहारविषयाय नमस्ते तुरीयाय दर्शताय पदाय परोरजसे । असौ शत्रु पाप्मा त्वत्प्राप्तिविघ्नकरोऽदस्तदात्मन कार्य यत्त्वत्प्राप्तिविघ्नकर्तृत्व मा प्रापन्मैव प्राप्नोतु । इतिशब्दो मन्त्रपरिसमाप्त्यर्थ । य द्विष्याद्यं प्रति द्वेष कुर्यात्स्वयं विद्वास्त प्रत्यनेनोपस्थानम् । असौ शत्रुरमुकनामेति नाम गृह्णीयादस्मै यज्ञदत्तायाभिप्रेत कामो मा समृद्धि समृद्धि मा प्राप्नोत्विति वोपतिष्ठते । न ह्येवास्मै देवदत्ताय स काम समृध्यते । कस्मै ? यस्मा एवमुपतिष्ठते । अहमदो देवदत्ताभिप्रेत प्रापमिति वोपतिष्ठते । असावदो मा प्रापदित्यादित्रयाणा मन्त्रपदाना यथाकाम विकल्प ॥

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्वायत्रीविदब्रूथा अथ कथ हस्तीभूतो वहसीति मुख ह्यस्या सम्राण्न विदाचकारेति होवाच तस्या अग्निरेव मुख यदि ह वा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्सदहत्येव हैवैवविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्सप्साय शुद्ध. पूतोऽजरोऽमृत संभवति ॥८॥ इति चतुर्दश ब्राह्मणम् ॥

गायत्र्या मुखविधानायार्थवाद उच्यते— एतद्ध किल वै स्मर्यते । तत्तत्र गायत्रीविज्ञानविषये । जनको वैदेहो बुडिलो नामतोऽश्वतराश्वस्यापत्य आश्वतराश्विस्तं किलोक्तवान् । यन्नु इति वितर्के, हो अहो इत्येतत् तद्यत्त्व गायत्रीविदब्रूथा गायत्रीविदस्मीति, यदब्रूथा , किमिद तस्य वचसोऽननुरूपम् । अथ कथ यदि गायत्रीवित्प्रतिग्रहदोषेण हस्तीभूतो वहसीति । स प्रत्याह राज्ञा स्मारितो मुखं गायत्र्या हि यस्मादस्या हे सम्राण्न विदाचकार न विज्ञातवानस्मीति होवाच । न एकागविकलत्वाद्गायत्रीविज्ञानं ममाफलं जातम् । शृणु तर्हि । तस्या गायत्र्या अग्निरेव मुखम् । यदि ह वा अपि बह्विवेधन अग्नावभ्यादधति लौकिका सर्वमेव तत्संदहत्येवेधनमग्नि एव हैवैवविद्गायत्र्या अग्निर्मुखमित्येवं वेत्तीत्येवंवित्स्यात्स्वयं गायत्र्यात्माऽग्निमुख सन् । यद्यपि

बह्विव पाप कुरुते प्रतिग्रहादिदोष, तत्सर्व पापजातं संप्राय भक्षयित्वा शुद्धोऽग्निवत्पूतश्च तस्मात्प्रतिग्रहदोषाद्वायव्यात्मा अजरोऽमृतश्च सभवति ॥ इति चतुर्दश ब्राह्मणम् ॥ ५ १४ —

हिरण्मयेन पात्रेण सत्यस्यापिहित मुखम् । तत्त्व पूषन्नपावृणु सत्यधर्माय दृष्टये । पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् । समूह तेजो यत्ते रूप कल्याणतम तत्ते पश्यामि । योऽसावसौ पुरुष. सोऽहमस्मि । वायुरनिलममृतमथेद भस्मान्त शरीरम् । ॐ क्रतो स्मर कृत स्मर क्रतो स्मर कृत स्मर । अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठा ते नमउक्ति विधेम ॥१॥ इति पचदश ब्राह्मणम् ॥ इति पचमोऽध्याय ॥

यो ज्ञानकर्ममसुच्चयकारी सोऽन्तकाले आदित्य प्रार्थयति । अस्ति च प्रमगो, गायत्र्यास्तुरीय पादो हि स । तदुपस्थान प्रकृतमत स एव प्रार्थ्यते । हिरण्मयेन ज्योतिर्मयेन पात्रेण, यथा पात्रेणेष्ट वस्त्वपिधीयते एवमिद सत्याख्य ब्रह्म ज्योतिर्मयेन मडलेनापिहितमिव असमाहितचेतसामदृश्यत्वात् । तदुच्यते— सत्यस्यापिहित मुख मुख्य स्वरूप, तदपिधान पात्रमपिधानमिव दर्शनप्रतिबधकारण तत्त्व हे पूषञ्जगत पोषणात्पूषा सविताऽपावृण्वपावृत कुरु दर्शनप्रतिबधकारणमपनयेत्यर्थ । सत्यधर्माय सत्यं धर्मोऽस्य मम सोऽह सत्यधर्मा तस्मै त्वदात्मभूतायेत्यर्थ । दृष्टये दर्शनाय । पूषन्नित्यादीनि नामान्यामत्रणार्थानि सवितु । एकर्षे, एकश्चासावृषिश्चैकर्षिर्दर्शनादृषि । स हि सर्वस्य जगत आत्मा चक्षुश्च सन्सर्वं पश्यति । एको वा गच्छतीत्येकर्षि "सूर्य एकाकी चरति" इति मत्रवर्णात् । यम, सर्व हि जगत सयमनं त्वत्कृतम् । सूर्य, सुष्ठु ईरयते रसान् रश्मीन्प्राणान्वियो वा जगत इति । प्राजापत्य, प्रजापतेरीश्वरस्यापत्यं हिरण्यगर्भस्य वा हे प्राजापत्य । व्यूह विगमय रश्मीन् । समूह संक्षिप आत्मनस्तेजो येनाह शक्नुया द्रष्टुम् । तेजसा ह्यपहतदृष्टिर्न शक्नुया त्वत्स्वरूपमजसा द्रष्टुम् । विद्योतन इव रूपाणामत उपसहर तेज । यत्ते तव रूपं सर्वकल्याणानामतिशयेन कल्याण कल्याणतमं तत्ते पश्यामि । पश्यामो वय वचनव्यत्ययेन । योऽसौ भूर्भुव स्वर्योहित्यवयव. पुरुष पुरुषाकृ-

तित्वात्पुरुष सोऽहमस्मि भवामि। अहरहमिति चोपनिषद उक्तत्वादादित्यचाक्षुषयो तंदेवेद परामृश्यते। सोऽहमस्म्यमृतमिति सबध। ममामृतस्य सत्यस्य शरीरपाते शरीरस्थो य प्राणो वायु सोऽनिलं बाह्यं वायुमेव प्रतिगच्छतु। तथान्या देवता स्वा स्वा प्रकृतिं गच्छन्तु। अथेदमपि भस्मान्तं सत्पृथिवी यातु शरीरम्॥

अथेदानीमात्मन सकल्पभूता मनसि व्यवस्थितामग्निदेवता प्रार्थयते—ॐ क्रतो। ॐमिति क्रतो इति च संबोधनार्थावेव। ॐकारप्रतीकत्वादोम्। मनोमयत्वाच्च क्रतु। हे ॐ हे क्रतो स्मर स्मर्तव्यम्। अतकाले हि त्वत्स्मरणवशादिष्टा गति प्राप्यते। अत प्रार्थ्यते यन्मया कृतं तत्स्मर। पुनरुक्तिरादरार्था। किच हेऽग्ने नय प्रापय सुपथा शोभनेन मार्गेण, राये धनाय कर्मफलप्राप्तये इत्यर्थ। न दक्षिणेन कृष्णेन पुनरावृत्तियुक्तेन कि तर्हि शुक्लेनैव सुपथा। अस्मान्विश्वानि सर्वाणि हे देव वयुनानि प्रज्ञानानि सर्वप्राणिना विद्वान्। किच युयोध्यपनय वियोजयास्मदस्मत्तो जुहुराण कुटिलमेन पाप पापजात सर्वम्। तेन पापेन वियुक्ता वयमेष्याम उत्तरेण पथा त्वत्प्रसादात्। किंतु वय तुभ्यं परिचर्यां कर्तु न शक्नुम। भूयिष्ठा बहुतमा ते तुभ्य नमउक्ति नमस्कारवचन विधेम नमस्कारोक्त्या परिचरेमेत्यर्थ, अन्यत्कर्तुमशक्ता सन्त इति॥ इति पंचमोऽध्याय॥

॥ षष्ठोऽध्यायः ॥

ॐ यो ह वै ज्येष्ठं च श्रेष्ठ च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद॥१॥

ॐ प्राणो गायत्रीत्युक्तम्। कस्मात्पुन. कारणात्प्राणभावो गायत्र्या न पुनर्वागादिभाव इति। यस्माज्ज्येष्ठश्च श्रेष्ठश्च प्राणो, न वागादयो ज्यैष्ठयश्रैष्ठयभाज। कथ ज्येष्ठत्वं श्रेष्ठत्वं च प्राणस्येति तन्निर्दिधारयिषयेदमारभ्यते। अथवोक्तयजुःसामक्षत्रादिभावै प्राणस्यैवोपासनमाभिहितं सत्स्वप्यन्येषु चक्षुरादिषु। तत्र हेतुमात्रमिह आनंतर्येण संबध्यते। न पुन. पूर्वशेषता। विव-

क्षित तु खिलत्वादस्य काडस्य पूर्वत्र यदनुक्त विशिष्टफलं प्राणविषयमुपासनं तद्वक्तव्यमिति ।

य कश्चिद्ध वा इत्यवधारणार्थो । यो ज्येष्ठश्रेष्ठगुण वक्ष्यमाणं यो वेदासौ भवत्येव ज्येष्ठश्च श्रेष्ठश्च । एव फलेन प्रलोभित सन्प्रश्नाय अभिमुखीभूत, तस्मै चाह— प्राणो वै ज्येष्ठश्च श्रेष्ठश्च । कथ पुनरवगम्यते प्राणो ज्येष्ठश्च श्रेष्ठश्चेति । यस्मान्निषेककाल एव शुक्रशोणितसबध प्राणादिकलापस्याविशिष्ट । तथापि नाप्राण शुक्र विरोहतीति प्रथमो वृत्तिलाभ प्राणस्य चक्षुरादिभ्य । अतो ज्येष्ठो वयसा प्राण । निषेककालादारभ्य गर्भ पुष्यति प्राण । प्राणे हि लब्धवृत्तौ पश्चाच्चक्षुरादीना वृत्तिलाभ । अतो युक्त प्राणस्य ज्येष्ठत्व चक्षुरादिषु । भवति तु कश्चित्कुले ज्येष्ठो, गुणहीनत्वात्तु न श्रेष्ठ । मध्यम कनिष्ठो वा गुणाढ्यत्वाद्भवेच्छ्रेष्ठो न ज्येष्ठ न तु तथेहेत्याह— प्राण एव तु ज्येष्ठश्च श्रेष्ठश्च । कथ पुनः श्रैष्ठ्यमवगम्यते प्राणस्य ? तदिह सवादेन दर्शयिष्याम । सर्वथापि तु प्राण ज्येष्ठश्रेष्ठगुण यो वेदोपास्ते, स स्वाना ज्ञातीना ज्येष्ठश्च श्रेष्ठश्च भवति । ज्येष्ठश्रेष्ठगुणोपासनसामर्थ्यात् । स्वव्यतिरेकेणापि च येषा मध्ये ज्येष्ठश्च श्रेष्ठश्च भविष्यामीति बुभूषति भवितुमिच्छति, तेषामपि ज्येष्ठश्रेष्ठप्राणदर्शी ज्येष्ठश्च श्रेष्ठश्च भवति । ननु वयोनिमित्त ज्येष्ठत्व तदिच्छात कथ भवतीत्युच्यते— नैष दोष । प्राणवत् वृत्तिलाभस्यैव ज्येष्ठत्वस्य विवक्षितत्वात् ॥

यो ह वै वसिष्ठा वेद वसिष्ठ स्वाना भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥२॥

यो ह वै वसिष्ठा वेद वसिष्ठ स्वाना भवति । तद्दर्शनानुरूप्येण फलम् । येषा च ज्ञातिव्यतिरेकेण वसिष्ठो भवितुमिच्छति तेषा च वासिष्ठो भवति । उच्यता तर्हि कासौ वसिष्ठेति । वाग्वै वसिष्ठा । वासयत्यतिशयेन वस्ते वेति वसिष्ठा । वाग्मिनो हि धनवन्तो वसन्त्यतिशयेन । आच्छादनार्थस्य वा वसेर्वसिष्ठा । अभिभवन्ति हि वाचा वाग्मिनोऽन्यान् । तेन वसिष्ठगुणवत्परिज्ञानाद्वसिष्ठगुणो भवतीति दर्शनानुरूपं फलम् ॥

यो ह वै प्रतिष्ठां वेद पतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥३॥

यो ह वै प्रतिष्ठा वेद, प्रतितिष्ठत्यनयेति प्रतिष्ठा ता प्रतिष्ठा प्रतिष्ठागुणवतीं यो वेद तस्यैतत्फलं— प्रतितिष्ठति समे देशे काले च। तथा दुर्गे विषमे च दुर्गमने च देशे दुर्भिक्षादौ वा काले विषमे। यद्येवमुच्यता कासौ प्रतिष्ठा। चक्षुर्वै प्रतिष्ठा। कथ चक्षुष प्रतिष्ठात्वमित्याह— चक्षुषा हि समे च दुर्गे च दृष्ट्वा प्रतितिष्ठति। अतोऽनुरूपं फल प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेदेति ॥

यो ह वै संपद वेद स हास्मै पद्यते य काम कामयते श्रोत्रं वै संपच्छ्रोत्रे हीमे सर्वे वेदा अभिसपन्ना स हास्मै पद्यते य काम कामयते य एव वेद ॥४॥

यो ह वै सपद वेद सपद्गुणयुक्त यो वेद तस्यैतत्फल— अस्मै विदुषे संपद्यते ह। किं? य काम कामयते स काम। कि पुन सपद्गुणकम्? श्रोत्र वै सपत्। कथ पुन श्रोत्रस्य सपद्गुणत्वमिति। उच्यते— श्रोत्रे सति हि यस्मात्सर्वे वेदा अभिसपन्ना श्रोत्रेंद्रियवतोऽध्येयत्वात्। वेदविहितकर्मायत्ताश्च कामा। तस्माच्छ्रोत्र सपत्। अतो विज्ञानानुरूप फलम्। सं हास्मै पद्यते यं काम कामयते य एव वेद ॥

यो ह वा आयतन वेदायतन स्वाना भवत्यायतन जनानां मनो वा आयतनमायतन स्वाना भवत्यायतनं जनानां य एव वेद ॥५॥

यो ह वा आयतनं वेद। आयतनमाश्रयस्तद्यो वेद आयतनं स्वाना भवत्यायतन जनानामन्येषामपि। कि पुनस्तदायतनमिति। उच्यते— मनो वा आयतनमाश्रय इद्रियाणा विषयाणा च। मनआश्रिता हि विषया आत्मनो भोग्यत्व प्रतिपद्यन्ते। मन सकल्पवशानि चेद्रियाणि प्रवर्तन्ते निवर्तन्ते च। अतो मन आयतनमिद्रियाणाम्। अतो दर्शनानुरूप्येण फल आयतन स्वाना भवत्यायतन जनाना य एव वेद ॥

यो ह वै प्रजाति वेद प्रजायते ह प्रजया पशुभी रेतो वै प्रजातिः प्रजायते ह प्रजया पशुभिर्य एव वेद ॥६॥

यो ह वै प्रजाति वेद प्रजायते ह प्रजया पशुभिश्च संपन्नो भवति। रेतो वै प्रजाति। रेतसा प्रजननेंद्रियमुपलक्ष्यते। तद्विज्ञानानुरूपं फल प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥

ते हेमे प्राणा अहश्रेयसे विवदमाना ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व उत्क्रान्त इद शरीर पापीयो मन्यते स वो वसिष्ठ इति ॥७॥

ते हेमे प्राणा वागादयोऽहंश्रेयसेऽहं श्रेयानित्येतस्मै प्रयोजनाय विवदमाना विरुद्धं वदमाना ब्रह्म जग्मुर्ब्रह्म गतवन्तो, ब्रह्मशब्दवाच्यं प्रजापतिम् । गत्वा च तद्ब्रह्म होचुरुक्तवन्त — को नोऽस्माक मध्ये वसिष्ठ, कोऽस्माकं मध्ये वसति च वासयति च । तद्ब्रह्म तै पृष्ट सद्धोवाचोक्तवद्यस्मिन्वो युष्माकं मध्य उत्क्रान्ते निर्गते शरीरादिदं शरीरं पूर्वस्मादतिशयेन पापीय पापतरं मन्यते लोक । शरीर हि नाम अनेकाशुचिसघातत्वाज्जीवतोऽपि पापमेव, ततोऽपि कष्टतर यस्मिन्नुत्क्रान्ते भवति । वैराग्यार्थमिदमुच्यते— पापीय इति । स वो युष्माकं मध्ये वसिष्ठो भविष्यति । जानन्नपि वसिष्ठं प्रजापतिर्नोवाचाय वसिष्ठ इति इतरेषामप्रियपरिहाराय ॥

वाग्घोच्चक्राम सा संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽकला अवदन्तो वाचा प्राणन्त प्राणेन पश्यन्तश्चक्षुषा शृण्वन्त. श्रोत्रेण विद्वासो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥८॥

त एवमुक्ता ब्राह्मणा प्राणा आत्मनो वीर्यपरीक्षणाय क्रमेणोच्चक्रमु । तत्र वागेव प्रथमं हास्माच्छरीरादुच्चक्रामोत्क्रान्तवती । सा चोत्क्रम्य संवत्सरं प्रोष्य प्रोषिता भूत्वा पुनरागत्योवाच— कथमशकत शक्तवन्तो यूय मदृते मा विना जीवितुमिति । त एवमुक्ता ऊचुर्यथा लोकेऽकला मूका अवदन्तो वाचा प्राणन्त प्राणनव्यापारं कुर्वन्त प्राणेन, पश्यन्तो दर्शनव्यापारं चक्षुषा कुर्वन्त, तथा शृण्वन्त श्रोत्रेण, विद्वासो मनसा कार्याकार्यादिविषयं, प्रजायमाना रेतसा पुत्रनुत्पादयन्त, एवमजीविष्म वयम् । इत्येवं प्राणैर्दत्तोत्तरा वागात्मनोऽस्मिन्नवसिष्ठत्वं बुद्ध्वा प्रविवेश ह वाक् ॥

चक्षुर्होच्चक्राम तत्संवत्सर प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽन्धा अपश्यन्तश्चक्षुषा प्राणन्त. प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥९॥

श्रोत्र होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्त श्रोत्रेण प्राणन्त. प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥१०॥

मनो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अविद्वांसो मनसा प्राणन्त. प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्त श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥११॥

रेतो होच्चक्राम तत्संवत्सर प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वांसो मनसैवमजीविष्मेति प्रविवेश ह रेत ॥१२॥

तथा चक्षुर्होच्चक्रामेत्यादि पूर्ववत्। श्रोत्रं मन प्रजातिरिति ॥ ९—१२॥

अथ ह प्राण उत्क्रमिष्यन्यथा महासुहय सैंधव· पड्वीशशकून्सवृहेदेवं हैवेमान्प्राणान्सववर्ह ते होचुर्मा भगव उत्क्रमीर्न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥१३॥

अथ ह प्राण उत्क्रमिष्यन्नुत्क्रमणं करिष्यंस्तदानीमेव स्वस्थानात्प्रचलिता वागादय। किमिवेत्याह—यथा लोके महाश्वासौ सुहयश्च महासुहय शोभनो हयो लक्षणोपेतो महान्परिमाणत सिधुदेशे भव सैधवोऽभिजनत पड्वीशशंकून्पादबंधनशंकून् पड्वीशाश्च ते शकवश्च तान्संवृहेदुद्यच्छेद्युगपदुत्खनेदश्वारोहे आरूढे परीक्षणाय। एव हैवेमान्वागादीन्प्राणान्संववर्ह उद्यतवान्स्वस्थानात् भ्रंशितवान्। ते वागादयो होचुर्हे भगवो भगवन्मोत्क्रमीर्यस्मान्न वै शक्ष्यामस्त्वदृते त्वा विना जीवितुमिति। यद्येवं मम श्रेष्ठता विज्ञाता भवद्भि, अहमत्र श्रेष्ठस्तस्य उ मे मम बलिं करं कुरुत प्रयच्छतेति। अयं च प्राणसंवाद कल्पितो विदुष श्रेष्ठपरीक्षणप्रकारोपदेश। अनेन हि प्रकारेण विद्वान्को नु खल्वत्र श्रेष्ठ इति परीक्षणं करोति। स एष परीक्षणप्रकार संवादभूत कथ्यते। न ह्यन्यथा संहत्यकारिणा सतामेषामंजसैव संवत्सरमात्रमेव एकैकस्य निर्गमनाद्युपपद्यते।

तस्माद्विद्वानेवानेन प्रकारेण विचारयति वागादीना प्रवानबुभुत्सुरुपासनाय । बलि प्रार्थिता सन्त प्राणास्तथेति प्रतिज्ञातवन्त ॥

सा ह वागुवाच यद्वा अह वसिष्ठास्मि त्व तद्वसिष्ठोऽसीति यद्वा अह प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अह सपदस्मि त्व तत्सपदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनो यद्वा अह प्रजाति-रस्मि त्वं तत्प्रजातिरसीति रेतस्तस्यो मे किमन्न कि वास इति यदिद किचा श्वभ्य आ कृमिभ्य आ कीटपतगेभ्यस्तत्तेऽन्नमापो वास इति म ह वा अस्या-नन्न जग्ध भवति नानन्न प्रतिगृहीत य एवमेतदनस्यान्न वेद तद्विद्वास श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाऽऽचामन्त्येतमेव तदनमनन्न कुर्वन्तो मन्यन्ते ॥१४॥ इति षष्ठाध्यायस्य प्रथम ब्राह्मणम् ॥

सा ह वाक्प्रथम बलिदानाय प्रवृत्ता ह किलोवाचोक्तवती— यद्वा अहं वसिष्ठाऽस्मि यन्मम वसिष्ठत्व तत्तवैव । तेन वसिष्ठगुणेन त्व तद्वसिष्ठोऽसीति । यद्वा अह प्रतिष्ठाऽस्मि, त्व तत्प्रतिष्ठोऽसि, या मम प्रतिष्ठा सा त्वमसीति चक्षु । समानमन्यत् । संपदायतनप्रजातित्वगुणान्क्रमेण समर्पितवन्त । यद्येव साधु बलि दत्तवन्तो भवन्तो, ब्रूत तस्य उ म एवगुणविशिष्टस्य किमन्न कि वास इति । आहुरितरे— यदिदं लोके किंच किंचिदन्न नामाप्या श्वभ्य आ कृमिभ्य आ कीट-पतगेभ्य । यच्च श्वान्न कृम्यन्न कीटपतगान्नं च तेन सह सर्वमेव यत्किंचिन्प्राणि-भिरद्यमानमन्न तत्सर्व तवान्नम् । सर्व प्राणस्य अन्नमिति दृष्टिरत्र विधीयते ॥

केचित्तु सर्वभक्षणे दोषाभाव वदन्ति प्राणान्नविद । तदसत् । शास्त्रातरेण प्रतिषिद्धत्वात् । तेनास्य विकल्प इति चेत् । न । अविधायकत्वात् । न ह वा अस्यानन्न जग्ध भवतीति सर्वं प्राणस्यान्नमित्येतस्य विज्ञानस्य विहितस्य स्तुत्यर्थ-मेतत् । तेनैकवाक्यतापत्ते । न तु शास्त्रान्तरविहितस्य बाधने सामर्थ्य, अन्यपरत्वादस्य । प्राणमात्रस्य सर्वमन्नमित्येतद्दर्शनमिह विधित्सितं, न तु सर्व भक्षयेदिति । यत्तु सर्वभक्षणे दोषाभावज्ञान तन्मिथ्यैव, प्रमाणाभावात् । विदुष प्राणत्वात्सर्वान्नोपपत्ते सामर्थ्यादोष एवेति चेत् । न । अशेषान्नत्वानुपपत्ते । सत्यं यद्यपि विद्वान्प्राणो, येन कार्यकरणसघातेन विशिष्टस्य विद्वत्ता तेन कार्य-करणसंघातेन कृमिकीटदेवाद्यशेषान्नभक्षण नोपपद्यते । तेन तत्राशेषान्नभक्षणे दोषाभावज्ञापनमनर्थकम् । अप्राप्तत्वादशेषान्नभक्षणदोषस्य । ननु प्राण सन्भक्ष-

यत्येव कृमिकीटाद्यन्नमपि । बाढम् । किंतु न तद्विषय प्रतिषेधोऽस्ति । तस्मादैवरक्तं किंशुक तत्र दोषाभाव । अतस्तद्रूपेण दोषाभावज्ञापनमनर्थकम् । अप्राप्तत्वादशेषान्नभक्षणदोषस्य । येन तु कार्यकरणसंघातसंबंधेन प्रतिषेध क्रियते तत्संबंधेन त्विह नैव प्रतिप्रसवोऽस्ति । तस्मात्तत्प्रतिषेधातिक्रमे दोष एव स्यादन्यविषयत्वात् 'न ह वै' इत्यादे ॥

न च ब्राह्मणादिशरीरस्य सर्वान्नत्वदर्शनमिह विधीयते किंतु प्राणमात्रस्यैव । यथा च सामान्येन सर्वान्नस्य प्राणस्य किंचिदन्नजात कस्यचिज्जीवनहेतु, यथा विष विषजस्य क्रिमे, तदेवान्यस्य प्राणान्नमपि सत् दृष्टमेव दोषमुत्पादयति मरणादिलक्षणम् । तथा सर्वान्नस्यापि प्राणस्य प्रतिषिद्धान्नभक्षणे ब्राह्मणत्वादिदेहसबन्धाद्दोष एव स्यात् । तस्मान्मिथ्याज्ञानमेव अभक्ष्यभक्षणे दोषाभावज्ञानम् ॥

आपो वास इति । आपो भक्ष्यमाणा वास स्थानीयास्तव । अत्र च प्राणस्यापो वास इत्येतद्दर्शन विधीयते । न तु वास कार्ये आपो विनियोक्तुं शक्या । तस्माद्यथाप्राप्तेऽब्भक्षणे दर्शनमात्रं कर्तव्यम् । न ह वा अस्य सर्व प्राणस्यान्नमित्येवविद अनन्नमनदनीयं जग्ध भुक्त न भवति ह । यद्यप्यनेनानदनीयं भुक्तमदनीयमेव भुक्त स्यान्न तु तत्कृतदोषेण लिप्यते, इत्येतद्विद्यास्तुतिरित्यवोचाम । तथा नानन्न प्रतिगृहीतम् । यद्यप्यप्रतिग्राह्य हस्त्यादि प्रतिगृहीत स्यात्तदप्यन्नमेव प्रतिग्राह्यं प्रतिगृहीतं स्यात्, तत्राप्यप्रतिग्राह्यप्रतिग्रहदोषेण न लिप्यत इति स्तुत्यर्थमेव । य एवमेतदनस्य प्राणस्यान्न वेद । फल तु प्राणात्मभाव एव । न त्वेतत्फलाभिप्रायेण कि तर्हि स्तुत्यभिप्रायेणेति । नन्वेतदेव फल कस्मान्न भवति ? न, प्राणात्मदार्शन प्राणात्मभाव एव फलम् । तत्र च प्राणात्मभूतस्य सर्वात्मनोऽनदनीयमप्याद्यमेव । तथाऽप्रतिग्राह्यमपि प्रतिग्राह्यमेवेति यथाप्राप्तमेवोपादाय विद्या स्तूयते । अतो नेव फलविधिसरूपता वाक्यस्य ॥

यस्मादापो वास प्राणस्य, तस्माद्विद्वासो ब्राह्मणा श्रोत्रिया अधीतवेदा अशिष्यन्तो भोक्ष्यमाणा आचामन्त्यप । अशित्वाऽऽचामन्ति भुक्त्वा चोत्तरकालमपो भक्षयन्ति । तत्र तेषामाचामता कोऽभिप्राय इत्याह— एतमेवानं प्राणमनग्नं कुर्वन्तो मन्यन्ते । अस्ति चैतद्यो यस्मै वासो ददाति स तमनग्नं करोमीति हि मन्यते । प्राणस्य चापो वास इति ह्युक्तम् । यदपः पिबामि तत्प्राणस्य वासो ददामीति विज्ञानं कर्तव्यमित्येवमर्थमेतत् ॥

ननु भोक्ष्यमाणो भुक्त्वाश्च प्रयतो भविष्यामीत्याचामति। तत्र च प्राणस्यानम्रताकरणार्थत्वे च द्विकार्यताऽऽचमनस्य स्यात्। न च कार्यद्वयं आचमनस्यैकस्य युक्तम्। यदि प्रायत्यार्थं, नानम्रतार्थ, अथानम्रतार्थं न प्रायत्यार्थम्। यस्मादेवं तस्मात् द्वितीयमाचमनान्तरं प्राणस्यानम्रताकरणाय भवतु। न। क्रियाद्वित्वोपपत्ते। द्वे ह्येते क्रिये। भोक्ष्यमाणस्य भुक्तवतश्च यदाचमन स्मृतिविहितं तत्प्रायत्यार्थं भवति क्रियामात्रमेव। न तु तत्र प्रायत्य दर्शनाद्यपेक्षते। तत्र च आचमनागभूतास्वप्सु वासोविज्ञानं प्राणस्य इतिकर्तव्यतया चोद्यते। न तु तस्मिन्क्रियमाणे आचमनस्य प्रायत्यार्थता बाध्यते, क्रियान्तरत्वादाचमनस्य। तस्मात् भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं, तत्र आपो वास प्राणस्येति दर्शनमात्रं विधीयते। अप्राप्तत्वादन्यत ॥१४॥ इति प्रथमं ब्राह्मणम्

———— ६ १ ——

श्वेतकेतुर्ह वा आरुणेय इत्यस्य सबध.। खिलाधिकारोऽयम्। तत्र यदनुक्त तदुच्यते। सप्तमाध्यायान्ते ज्ञानकर्मसमुच्चयकारिणा अग्नेर्मार्गयाचन कृतं 'अग्ने नय सुपथा' इति। तत्रानेकेषा पथा सद्भावो मन्त्रेण सामर्थ्यात्प्रदर्शित। सुपथेति विशेषणात्। पंथानश्च कृतविपाकप्रतिपत्तिमार्गा। वक्ष्यति च 'यत्कृत्वा' इत्यादि। तत्र च कति कर्मविपाकप्रतिपत्तिमार्गा इति सर्वससारगत्युपसहारार्थोऽयमारभ — एतावर्ता हि ससारगति। एतावान्कर्मणो विपाक स्वाभाविकस्य शास्त्रीयस्य च सविज्ञानस्येति। यद्यपि 'द्वया ह प्राजापत्या' इत्यत्र स्वाभाविक पाप्मा सूचित न च तस्येद कार्यमिति विपाक प्रदर्शित। शास्त्रीयस्यैव तु विपाक प्रदर्शित, व्यक्तात्मप्रतिपत्त्यर्थेन। ब्रह्मविद्यारभे तद्वैराग्यस्य विवक्षितत्वात्। तत्रापि केवलेन कर्मणा पितृलोको, विद्यया विद्यासयुक्तेन च कर्मणा देवलोक इत्युक्तम्। तत्र केन मार्गेण पितृलोकं प्रतिपद्यते, केन वा देवलोकमिति नोक्तम्। तच्चेह खिलप्रकरणेऽशेषतो वक्तव्यमित्यत आरभ्यते। अंते च सर्वोपसंहार शास्त्रस्येष्ट.॥

अपि च एतावदमृतत्वमित्युक्तं, न कर्मणोऽमृतत्वाशास्तीति च। तत्र हेतुर्नोक्त, तदर्थश्चायमारभ। यस्मादिय कर्मणो गतिर्न नित्येऽमृतत्वे व्यापारोऽस्ति, तस्मादेतावदेवामृतत्वसाधनमिति सामर्थ्याद्धेतुत्वं संपद्यते। अपि चोक्तमग्निहोत्रे— न त्वेवैतयोस्त्वमुत्क्रांतिं न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न

लोक प्रत्युत्थायिनं वेत्थेति । तत्र प्रतिवचने 'ते वा एते आहुती हुते उत्क्रामत' इत्यादिना आहुते कार्यमुक्तम् । तच्चैतत्कर्तु' आहुतिलक्षणस्य कर्मण फलम् । न हि कर्तारमनाश्रित्य आहुतिलक्षणस्य कर्मण स्वातन्त्र्येणोत्क्रान्त्यादिकार्यारभ उपपद्यते । कर्त्रर्थत्वात्कर्मण कार्यारभस्य । साधनाश्रयत्वाच्च कर्मण । तत्र अग्निहोत्रस्तुत्यर्थत्वादग्निहोत्रस्यैव कार्यमित्युक्त षट्प्रकारमपि । इह तु तदेव कर्तु फलमित्युपदिश्यते षट्प्रकारमपि, कर्मफलविज्ञानस्य विवक्षितत्वात् । तद्-द्वारेण च पचाग्निदर्शन इहोत्तरमार्गप्रतिपत्तिसाधन विधित्सितम् । एव अशेष-ससारगत्युपसहार । कर्मकाण्डस्येषा निष्ठेत्येतत् द्वयं दिदर्शयिषुराख्यायिका प्रणयति ॥

श्वेतकेतुर्ह वा आरुणेय पचालाना परिषदमाजगाम स आजगाम जैवालि प्रवाहण परिचारयमाण तमुदीक्ष्याभ्युवाद कुमारा३ इति स भो३ इति प्रतिशुश्रावानुशिष्टोऽन्वसि पित्रेत्योमिति होवाच ॥१॥

श्वेतकेतुर्नामतोऽरुणस्यापत्यमारुणि तस्यापत्यमारुणेय । ह शब्द ऐति-ह्यार्थ । वै निश्चयार्थ । पित्राऽनुशिष्ट सन्नात्मनो यश प्रथनाय पंचालाना परिषदमाजगाम । पचाला प्रसिद्धा तेषा परिषदमागत्य जित्वा राज्ञोऽपि परिषद जेष्यामीति गर्वेण स आजगाम । जीवलस्यापत्य जैवलि पचालराज प्रवाहण-नामान स्वभृत्यै परिचारयमाणमात्मन परिचरण कारयन्तमित्येतत् । स राजा पूर्वमेव तस्य विद्याभिमानगर्व श्रुत्वा विनेतव्योऽयमिति मत्वा तमुदीक्ष्योत्प्रेक्ष्य आगतमात्रमेव अभ्युवादाभ्युक्तवान्कुमारा३ इति संबोध्य । भर्त्सनार्था प्लुति । एवमुक्त स प्रतिशुश्राव भो३ इति । भो३ इत्यप्रतिरूपमपि क्षत्रिय प्रत्युक्तवा न्कुद्ध सन् । अनुशिष्टोऽनुशासितोऽसि भवसि कि पित्रा इत्युवाच राजा । प्रत्याहेतर ॐ इति । बाढमनुशिष्टोऽस्मि पृच्छ यदि सशयस्ते ॥

वेत्थ यथेमा. प्रजा प्रयत्यो विप्रतिपद्यन्ता३ इति नेति होवाच वेत्थो यथेमं लोक पुनरापद्यन्ता३ इति नेति हैवोवाच वेत्थो यथासौ लोक एव बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता३ इति नेति हैवोवाच वेत्थो यतिथ्यामाहुत्या हुतायामाप पुरुषवाचो भूत्वा सत्समुत्थाय वदन्ती३ इति नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपद पितृयाणस्य वा यत्कृत्वा देवयानं वा पंथानं प्रतिपद्यन्ते पितृयाणं वापि हि न ऋषेर्वच. श्रुतं द्वे

सृती अश्रृणव पितृणामह देवानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति यदतरा पितरं मातरं चेति नाहमत एकचन वेदेति होवाच ॥२॥

यद्येव, वेत्थ विजानासि किं यथा येन प्रकारेणेमा प्रजा प्रसिद्धा प्रयत्नो म्रियमाणा विप्रतिपद्यन्ता३ इति विप्रतिपद्यन्ते । विचारणार्था प्लुति । समानेन मार्गेण गच्छन्तीना मार्गद्वैविध्य यत्र भवति तत्र काश्चित्प्रजा अन्येन मार्गेण गच्छन्ति काश्चिदन्येनेति विप्रतिपत्ति । यथा ता प्रजा विप्रतिपद्यन्ते तत्किं वेत्थेत्यर्थ । नेति होवाचेतर । तर्हि वेत्थ उ यथेमं लोक पुनरापद्यन्ता३ इति पुनरापद्यन्ते यथा पुनरागच्छन्तीम लोकम् । नेति हैवोवाच श्वेतकेतु । वेत्थ उ यथासौ लोक एव प्रसिद्धेन न्यायेन पुन. पुनरसकृत्प्रयाद्भिर्म्रियमाणैर्यथा येन प्रकारेण न संपूर्यता३ इति न संपूर्यतेऽसौ लोकस्तत्किं वेत्थ । नेति हैवोवाच । वेत्थो यतिथ्या यत्सख्याकायामाहुत्यामाहुतौ हुतायामाप पुरुषवाच पुरुषस्य या वाक्सैव यासा वाक्ता पुरुषवाचो भूत्वा पुरुषशब्दवाच्या वा भूत्वा । यदा पुरुषाकारपरिणतास्तदा पुरुषवाचो भवन्ति । समुत्थाय सम्यगुत्थायोद्भूता सत्यो वदन्ती३ इति । नेति हैवोवाच । यद्येव वेत्थ उ देवयानस्य पथो मार्गस्य प्रतिपदं, प्रतिपद्यते येन सा प्रतिपत्ता प्रतिपद पितृयाणस्य वा प्रतिपदं प्रतिपच्छब्दवाच्यमर्थमाह— यत्कर्म कृत्वा यथाविशिष्ट कर्म कृत्वेत्यर्थ । देवयानं वा पथानं मार्ग प्रतिपद्यन्ते, पितृयाण वा यत्कर्म कृत्वा प्रतिपद्यन्ते, तत्कर्म प्रतिपदुच्यते, ता प्रतिपदं किं वेत्थ, देवलोकपितृलोकप्रतिपत्तिसाधन किं वेत्थेत्यर्थ ॥

अप्यत्रास्यार्थस्य प्रकाशकमृषे मंत्रस्य वचो वाक्यं न· श्रुतमस्ति । मन्त्रोऽप्यस्यार्थस्य प्रकाशको विद्यत इत्यर्थ । कोऽसौ मत्र इति । उच्यते— द्वे सृती द्वौ मार्गावश्रृणवं श्रुतवानस्मि, तयोरेका पितृणा प्रापिका पितृलोकसबद्धा तया सृत्या पितृलोक प्राप्नोतीत्यर्थ । अहमश्रृणवमिति व्यवहितेन सबधः । देवानामुतापि देवाना सबंधिन्यन्या देवान्प्रापयति सा । के पुनरुभाभ्या सृतिभ्या पितृन्देवाश्च गच्छन्तीति उच्यते— उतापि मर्त्याना मनुष्याणा संबंधिन्यौ । मनुष्या एव हि सृतिभ्या गच्छन्तीत्यर्थ । ताभ्या सृतिभ्यामिद विश्व समस्तमेजद्गच्छत्समेति संगच्छते । ते च द्वे सृती यदतरा ययोरंतरा यदंतरा, पितरं मातरं च, मातापित्रोरंतरा मध्य इत्यर्थ । कौ तौ मातापितरौ ? द्यावापृथिव्या-

वंडकपाले । 'इय वै माताऽसौ पिता' इति हि व्याख्यातं ब्राह्मणेन । अड-कपालयोर्मध्ये ससारविषये एवैते सृती नात्यतिकामृतत्वगमनाय । इतर आह— नाहमतोऽस्मात्प्रश्नसमुदायादेकचनैकमपि प्रश्न न वेद नाह वेदेति होवाच श्वेतकेतु ॥

अथैन वसत्योपमन्त्रयाचक्रेऽनादृत्य वसति कुमार प्रदुद्राव स आज-गाम पितर त होवाचेति वाव किल नो भवान्पुरानुशिष्टानवोच इति कथं सुमेध इति पंच मा प्रश्नान्राजन्यबधुरप्राक्षीत्ततो नैकचन वेदेति कतमे त इतीम इति ह प्रतीकान्युदाजहार ॥३॥

अथानतरमपनीय विद्याभिमानगर्वमेन प्रकृत श्वेतकेतु वसत्या वसति-प्रयोजनेनोपमन्त्रयाचक्रे । इह वसन्तु भवन्त पाद्यमर्घ्य चानीयता इत्युपमन्त्रण कृतवान्राजा । अनादृत्य ता वसतिं कुमार श्वेतकेतु प्रदुद्राव प्रतिगतवान्पितरं प्रति । स चाजगाम पितरमागत्य चोवाच त कथमिति, वाव किलैव किल नोऽस्मान्भवान्पुरा समावर्तनकालेऽनुशिष्टान्सर्वाभिर्विद्याभि अवोचोऽवोचदिति । सोपालभ पुत्रस्य वच श्रुत्वाह पिता— कथ केन प्रकारेण तव दु खमुपजात हे सुमेध शोभना मेधा यस्येति सुमेधा । शृणु मम यथा वृत्तं— पच पच-सख्याकान्प्रश्नान्मा मा राजन्यबधू राजन्या बधवो यस्येति । परिभववचन-मेतद्राजन्यबधुरिति । अप्राक्षीत्पृष्टवास्ततस्तस्मान्नैकचनैकमपि न वेद न विज्ञात-वानस्मि । कतमे ते राज्ञा पृष्टा प्रश्ना इति पित्रोक्त पुत्र इमे त इति ह प्रती-कानि मुखानि प्रश्नानामुदाजहारोदाहृतवान् ॥

स होवाच तथा नस्त्व तात जानीथा यथा यदह किंच वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्य वत्स्याव इति भवानेव गच्छत्विति स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास तस्मा आसनमाहृत्योदक-माहारयांचकाराथ हास्मा अर्घ्यं चकाराथ त होवाच वर भगवते गौतमाय दद्म इति ॥४॥

स होवाच पिता पुत्रं क्रुद्धमुपशमयन्– तथा तेन प्रकारेण नोऽस्मास्त्वं हे तात वत्स जानीथा गृह्णीथा, यथा यदह किंच विज्ञानजातं वेद सर्वं तत्तुभ्य-मवोचमित्येव जानीथा । कोऽन्यो मम प्रियतरोऽस्ति त्वत्तो, यदर्थ रक्षिष्ये? अहमप्येतन्न जानामि यद्राज्ञा पृष्टम् । तस्मात्प्रेह्यागच्छ तत्र प्रतीत्य गत्वा राज्ञि

ब्रह्मचर्य वत्स्यावो विद्यार्थमिति । स आह— भवानेव गच्छत्विति, नाह तस्य मुख निरीक्षितुमुत्सहे । स आजगाम गौतमो गोत्रतो गौतम आरुणिर्यत्र प्रवाहणस्य जैवलेरास आसनमास्थायिका । षष्ठीद्वयं प्रथमास्थाने । तस्मै गौतमाय आगताय आसनमनुरूपमाहृत्योदकं भृत्यैराहारयाचकार । अथ हास्मा अर्घ्यं पुरोवसा कृतवान्मंत्रवन्मधुपर्कं च । कृत्वा चैवं पूजा त होवाच वरं भगवते गौतमाय तुभ्यं दद्म इति गोअश्वादिलक्षणम् ॥

स होवाच प्रतिज्ञातो म एष वरो यां तु कुमारस्यान्ते वाचमभाषथास्ता मे ब्रूहीति ॥५॥

स होवाच गौतम प्रतिज्ञातो मे ममैष वरस्त्वयाऽस्या प्रतिज्ञाया दृष्टीकुर्वात्मानम् । या तु वाच कुमारस्य मम पुत्रस्यांते समीपे वाचमभाषथाः प्रश्नरूपा तामेव मे ब्रूहि । स एव नो वर इति ॥

स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणा ब्रूहीति ॥६॥

स होवाच राजा देवेषु वरेषु तद्वै गौतम यत्त्व प्रार्थयसे । मानुषाणामन्यतम प्रार्थय वरम् ॥

स होवाच विज्ञायते हास्ति हिरण्यस्यापात्त गोअश्वानां दासीनां प्रवाराणा परिदानस्य मा नो भवान्बहोरनतस्यापर्यंतस्याभ्यवदान्यो भूदिति स वै गौतम तीर्थमेच्छासा इत्युपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति स होपायनकीर्त्योवास ॥७॥

स होवाच गौतमो— भवतापि विज्ञायते ह ममास्ति स. । न तेन प्रार्थितेन कृत्य मम य त्व दित्सुसि मानुष वरम । यस्मान्ममाप्यस्ति हिरण्यस्य प्रभूतस्यापात्त प्राप्त, गोअश्वानामपात्तमस्तीति सर्वत्रानुषग । दासीना प्रवाराणा परिवाराणा परिधानस्य च । न च यन्मम विद्यमानं तत्त्वत्त प्रार्थनीयं त्वया वा देयम् । प्रतिज्ञातश्च वरस्त्वया । त्वमेव जानीषे यदत्र युक्त प्रतिज्ञा रक्षणीया तवेति । मम पुनरयमभिप्रायो मा भून्नोऽस्मानभि, अस्मानेव केवलान्प्रति भवान्सर्वत्र वदान्यो भूत्वाऽवदान्यो मा भूतकदर्यो मा भूदित्यर्थ. । बहो प्रभूतस्य अनतस्यानतफलस्येत्येतत् । अपर्यंतस्य अपरिसमाप्तिकस्य पुत्रपौत्रादिगामिकस्य इत्येतत् । ईदृशस्य वित्तस्य मा प्रत्येव केवलमदाता मा भूद्भवान् । नचान्यत्रादेयमस्ति भवत । एवमुक्त आह— स त्वं वै हे गौतम तीर्थेन न्यायेन शास्त्रवि-

हितेन विद्या मत्त इच्छासै इच्छान्वाप्तुम् । इत्युक्तो गौतम आह— उपैम्युपगच्छामि शिष्यत्वेनाहं भवन्तमिति । वाचा ह स्मैव किल पूर्वे ब्राह्मणा क्षत्रियान्विद्यार्थिन सन्तो वैश्यान्वा, क्षत्रिया वा वैश्यानापद्युपयन्ति, शिष्यवृत्त्या ह्युपगच्छन्ति, नोपायनशुश्रूषादिभि । अत स गौतमो होपायनकीर्त्योपगमनकीर्तनमात्रेणैव उवासोषितवान्नोपायनं चकार ॥

स होवाच तथा नस्त्वं गौतम माऽपराधास्तव च पितामहा यथेयं विद्येत. पूर्वं न कस्मिंश्चन ब्राह्मण उवास ता त्वह तुभ्य वक्ष्यामि को हि त्वैव ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥८॥

एव गौतमेनापदतरे उक्ते, स होवाच राजा पीडित मत्वा क्षामयंस्तथा नोऽस्मान्प्रति माऽपराधा अपराधं मा कार्षी । अस्मदीयोऽपराधो न ग्रहीतव्य इत्यर्थ । तव च पितामहा अस्मत्पितामहेषु यथाऽपराध न जगृहु , तथा पितामहाना वृत्तमस्मास्वपि भवता रक्षणीयमित्यर्थ । यथेय विद्या त्वया प्रार्थिता इतस्त्वत्सप्रदानात्पूर्वं प्राङ्न कस्मिन्नपि ब्राह्मणे उवासोषितवती, तथा त्वमपि जानीषे, सर्वदा क्षत्रियपरपरयेय विद्या आगता । सा स्थितिर्मयाऽपि रक्षणीया यदि शक्यत इत्युक्त 'देवेषु गौतम तद्वरेषु मानुषाणा ब्रूहि' इति । न पुनस्त्वादेयो वर इतीत परं न शक्यते रक्षितुम् । तामपि विद्यामह तुभ्यं वक्ष्यामि । को ह्यन्योऽपि हि यस्मादेव ब्रुवन्त त्वामर्हति प्रत्याख्यातुं न वक्ष्यामीति । अह पुन कथ न वक्ष्ये तुभ्यमिति ॥

असो वै लोकोऽग्निर्गौतम तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिर्दिशोऽगारा अवान्तरदिशो विस्फुलिगास्तस्मिन्नेतस्मिन्नग्नौ देवा. श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा सभवति ॥९॥

असो वै लोकोऽग्निर्गौतमेत्यादि । चतुर्थ प्रश्न प्राथम्येन निर्णीयते । क्रमभंगस्त्वेतन्निर्णयायत्तत्वादितरप्रश्ननिर्णयस्य । असौ द्यौर्लोकोऽग्निर्हे गौतम । द्युलोकेऽग्निदृष्टिरनग्नौ विधीयते यथा योषित्पुरुषयो । तस्य द्युलोकाग्नेरादित्य एव समित्समिधनात् । आदित्येन हि समिध्यतेऽसौ लोक. । रश्मयो धूम., समिध उत्थानसामान्यात् । आदित्याद्धि रश्मयो निर्गता । समिधश्च धूमो लोके उत्तिष्ठति । अहरर्चिः प्रकाशसामान्यात् । दिशोऽगारा उपशमसामान्यात् । अवान्तरदिशो विस्फुलिंगा विस्फुलिंगवद्विक्षेपात् । तस्मिन्नेतस्मि-

नेवंगुणविशिष्टे द्युलोकाग्नौ देवा इद्रादय श्रद्धा जुह्वत्याहुतिद्रव्यस्थानीया प्रक्षिपन्ति। तस्या आहुत्या आहुते सोमो राजा पितृणा ब्राह्मणाना च संभवति ॥

तत्र के देवा कथ जुह्वति कि वा श्रद्धाख्य हविरित्यत उक्तमस्माभि. सबधे। "नत्वेवैनयोस्त्वमुत्क्रान्ति" इत्यादिपदार्थषट्कनिर्णयार्थ अग्निहोत्रे उक्तम्। 'ते वा एते अग्निहोत्राहुती हुते सत्यावुत्क्रामत "। "ते अंतरिक्षमाविशत "। "ते अतरिक्षमाहवनीय कुर्वाते वायुं समिधं मरीचीरेव शुक्रामाहुतिम्"। "ते अंतरिक्षं तर्पयत "। "ते तत उत्क्रामत·"। "ते दिवमाविशत "। 'ते दिवमाहवनीय कुर्वाते आदित्य समिध" इत्येवमाद्युक्तम्। तत्राग्निहोत्राहुती समाधने एवोत्क्रामत । यथेह यै. साधनैर्विशिष्टे ये ज्ञायेते आहवनीयाग्निसमिद्धूमागारविस्फुलिगाहुतिद्रव्ये ते तथैवोत्क्रामतो अस्माल्लोकादमुं लोकम्। तत्राग्निरग्नित्वेन समित्समित्त्वेन धूमो धूमत्वेन अगारा अंगारत्वेन विस्फुलिंगा विस्फुलिंगत्वेन आहुतिद्रव्यमपि पयआद्याहुतिद्रव्यत्वेनैव सर्गादावव्याकृतावस्थायामपि परेण सूक्ष्मेणात्मना व्यवातिष्ठते। तद्विद्यमानमेव समाधनमग्निहोत्रलक्षण कर्म अपूर्वेणात्मना व्यवस्थितं सत्तत्पुनर्व्याकरणकाले तथैव अंतरिक्षादीनामाहवनीयाद्यग्न्यादिभाव कुर्वद्विपरिणमते। तथैवेदानीमप्यग्निहोत्राख्य कर्म ॥

एवं अग्निहोत्राहुत्यपूर्वविपरिणामात्मक जगत्सर्वमित्याहुलोरेव स्तुत्यर्थत्वेनोत्क्रान्त्याद्या लोक प्रत्युत्थायिंतान्ता षट् पदार्था कर्मप्रकरणेऽधस्तान्निर्णीता । इह तु कर्तु कर्मविपाकविवक्षाया द्युलोकाग्न्याद्यारभ्य पचाग्निदर्शन उत्तरमार्गप्रतिपत्तिसाधन विशिष्टकर्मफलोपभोगाय विवित्सितमिति द्युलोकाग्न्यादिदर्शन प्रस्तूयते। तत्र ये आध्यात्मिका प्राणा इहाग्निहोत्रस्य होतार त एव आधिदैविकत्वेन परिणता सन्त इंद्रादयो भवन्ति। त एव तत्र होतारो द्युलोकाग्नौ। ते चेहाग्निहोत्रस्य फलभोगायाग्निहोत्र हुतवन्तः। त एव फलपरिणामकालेऽपि तत्फलभोक्तृत्वात्तत्र तत्र होतृत्व प्रतिपद्यन्ते, तथा तथा विपरिणममाना देवशब्दवाच्या ·सन्त । अत्र च यत्पयोद्रव्यं अग्निहोत्रकर्माश्रयभूतं इह आहवनीये प्रक्षिप्तमग्निना भक्षितमदृष्टेन सूक्ष्मेण रूपेण विपरिणत सह कर्त्रा यजमानेनामुं लोकं धूमादिक्रमेणान्तरिक्ष अंतरिक्षात् द्युलोकमाविशति। ताः सूक्ष्मा आपः आहुतिकार्यभूता अग्निहोत्रसमवायेन्य कर्तृसहिता श्रद्धाशब्दवाच्या सोमलोके कर्तु शरीरांतरारंभाय

द्युलोकं प्रविशन्त्यो हूयन्त इत्युच्यन्ते । तास्तत्र द्युलोकं प्रविश्य सोममंडले कर्तुं शरीरमारभन्ते । तदेतदुच्यते— 'देवा श्रद्धा जुह्वति तस्या आहुत्यै सोमो राजा सभवति' इति । 'श्रद्धा वा आप ' इति श्रुते ॥

'वेत्थ यतिथ्यामाहुत्या हुतायामाप पुरुषवाचो भूत्वा समुत्थाय वदन्ति' इति प्रश्न । तस्य च निर्णयविषयेऽसौ वै लोकोऽग्निरिति प्रस्तुतम् । तस्मादाप कर्मसमवायिन्य कर्तुं शरीरारभिका श्रद्धाशब्दवाच्या इति निश्चीयते । भूयस्त्वादाप पुरुषवाच इति व्यपदेशो न त्वितराणि भूतानि न सन्तीति । कर्मप्रयुक्तश्च शरीरारंभ । कर्म चाप्समवायि । ततश्चापा प्राधान्य शरीरकर्तृत्वे । तेन चाप पुरुषवाच इति व्यपदेश । कर्मकृतो हि जन्मारंभ सर्वत्र । तत्र यद्यप्यग्निहोत्राहुतिस्तुतिद्वारेणोत्कान्त्यादय प्रस्तुता षटपदार्था अग्निहोत्रे, तथापि वैदिकानि सर्वाण्येव कर्माण्यग्निहोत्रप्रभृतीनि लक्ष्यन्ते । दाराग्निसबद्ध हि पाक्त कर्म प्रस्तुत्योक्त— 'कर्मणा पितृलोक ' इति । वक्ष्यति च— 'अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति' इति ॥९॥

पर्जन्यो वा अग्निर्गौतम तस्य सवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरंगारा ह्रादुनयो विस्फुलिगास्तस्मिन्नेतस्मिन्नग्नौ देवा सोमं राजान जुह्वति तस्या आहुत्यै वृष्टि सभवति ॥१०॥

पर्जन्यो वा अग्निर्गौतम द्वितीय आहुत्याधार आहुत्योरावृत्तिक्रमेण । पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवतात्मा । तस्य सवत्सर एव समित् । सवत्सरेण हि शरदादिभिर्ग्रीष्मान्तै स्वावयवै विपरिवर्तमानेन पर्जन्योऽग्निर्दीप्यते । अभ्राणि धूम । धूमप्रभवत्वात् धूमवदुपलक्ष्यत्वाद्वा । विद्युदर्चि । प्रकाशसामान्यात् । अशनिरगारा । उपशान्तकाठिन्यसामान्याभ्याम् । ह्रादुनयो ह्रादुनय स्तनयित्नुशब्दा विस्फुलिगा । विक्षेपानेकत्वसामान्यात् । तस्मिन्नेतस्मिन्नित्याहुत्याधिकरणनिर्देश । देवा इति त एव होतार सोमं राजानं जुह्वति । योऽसौ द्युलोकाग्नौ श्रद्धाया हुतायामाभिनिर्वृत्त सोम , स द्वितीये पर्जन्याग्नौ हूयते । तस्याश्च सोमाहुतेर्वृष्टि संभवति ॥

अय वै लोकोऽग्निर्गौतम तस्य पृथिव्येव समिदग्निर्धूमो रात्रिरर्चिश्चंद्रमा अंगारा नक्षत्राणि विस्फुलिगास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टि जुह्वति तस्या आहुत्या अन्न संभवति ॥११॥

अय वै लोकोऽग्निर्गौतम । अयं लोक इति प्राणिजन्मोपभोगाश्रय-क्रियाकारकफलविशिष्ट स तृतीयोऽग्नि । तस्याग्ने पृथिव्येव समित् । पृथिव्या ह्ययं लोकोऽनेकप्राण्युपभोगसपन्नया समिध्यते । अग्निर्धूम । पृथिव्याश्रयोत्थानसामान्यात् । पार्थिवं हीधनद्रव्यमाश्रित्याग्निरुत्तिष्ठति । यथा समिदाश्रयेण धूम । रात्रिरार्चि । समित्सबधप्रभवसामान्यात् । अग्ने समित्सबधेन ह्यर्चि सभवति । तथा पृथिवीसमित्सबंधेन शर्वरी । पृथिवी-छाया हि शार्वरं तम आचक्षते । चद्रमा अंगारा । तत्प्रभवत्वसामान्यात् । अर्चिषो ह्यगारा प्रभवन्ति तथा रात्रौ चद्रमा । उपशान्तत्वसामान्याद्वा । नक्षत्राणि विस्फुलिंगा । विस्फुलिंगवद्विक्षेपसामान्यात् । तस्मिन्नेतास्मिन्नित्यादि पूर्ववत् । वृष्टि जुह्वति तस्या आहुतेरन्न सभवति । वृष्टिप्रभवत्वस्य प्रसिद्धत्वात् व्रीहियवादेरन्नस्य ॥

पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चि-श्चक्षुरगारा श्रोत्र विस्फुलिगास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्न जुह्वति तस्या आहुत्यै रेत· सभवति ॥१२॥

पुरुषो वा अग्निर्गौतम । प्रसिद्ध शिर पाण्यादिमान्पुरुषश्चतुर्थोऽग्नि तस्य व्यात्तं विवृत मुख समित् । विवृतेन हि मुखेन दीप्यते पुरुषो वचनस्वा-ध्यायादौ । यथा समिधाऽग्नि । प्राणो धूमस्तदुत्थानसामान्यात् । मुखाद्धि प्राण उत्तिष्ठति । वाक्शब्दोऽर्चि व्यंजकत्वसामान्यात् । अर्चिश्च व्यजकम् । तथा वाक्शब्दोऽभिधेयव्यंजक । चक्षुरंगारा उपशमसामान्यात्प्रकाशाश्रय-त्वाद्वा । श्रोत्र विस्फुलिंगा विक्षेपसामान्यात् । तस्मिन्नन्नं जुह्वति । ननु नैव देवा अन्नमिह जुह्वतो दृश्यन्ते । नैष दोष । प्राणाना देवत्वोपपत्ते । अवि-दैवमिद्रादयो देवा , त एवाध्यात्मं प्राणा , ते चान्नस्य पुरुषे प्रक्षेप्तारः । तस्या आहुते रेत संभवति । अन्नपरिणामो हि रेत ॥

योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनि-रर्चिर्यदंत करोति तेऽगारा अभिनंदा विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः संभवति स जीवति यावज्जीवत्यथ यदा म्रियते ॥१३॥

योषा वा अग्निर्गौतम । योषेति स्त्री पचमो होमाधिकरणोऽग्नि । तस्या

उपस्थ एव समित् तेन हि सा समिध्यते । लोमानि धूमस्तदुत्थानसामान्यात् । योनिरर्चिर्वर्णसामान्यात् । यदत. करोति तेऽगारा । अंत करणं मैथुनव्यापारस्तेऽगारा वीर्योपशमहेतुत्वसामान्यात् । वीर्याद्युपशमकारण मैथुनम् । तथा अगारभाव अग्नेरुपशमकारणम् । अभिनंदा सुखलवा क्षुद्रत्वसामान्याद्विस्फुलिंगा । तस्मिन्रेतो जुह्वति । तस्या आहुते पुरुष सभवति । एवं द्युपर्जन्यायलोकपुरुषयोषाग्निषु क्रमेण हूयमाना श्रद्धासोमवृष्टयन्नरेतोभावेन स्थूलतारतम्यक्रममापद्यमाना श्रद्धाशब्दवाच्या आप पुरुषशब्दमारभन्ते । य प्रश्नश्रुतुर्थो 'वेत्थ यतिथ्यामाहुत्या हुतायामाप पुरुषवाचो भूत्वा समुत्थाय वदन्ती३' इति, स एष निर्णीत — पंचम्यामाहुतौ योषाग्नौ हुताया रेतोभूता आप पुरुषवाचो भवन्तीति । स पुरुष एव क्रमेण जातो जीवति । कियन्त कालमिति । उच्यते— यावज्जीवति यावदस्मिञ्छरीरे स्थितिनिमित्त कर्म विद्यते तावदित्यर्थ । अथ तत्क्षये यदा यस्मिन्काले म्रियते ॥

अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोऽर्चिरर्चिरगारा अगारा विस्फुलिगा विस्फुलिगास्तस्मिन्नेतस्मिन्नग्नौ देवा पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्ण संभवति ॥१४॥

अथ तदैन मृतं अग्नयेऽग्न्यर्थमेवान्त्याहुत्यै हरन्ति ऋत्विज । तस्य आहुतिभूतस्य प्रसिद्धोऽग्निरेव होमाधिकरण, न परिकल्प्योऽग्नि. । प्रसिद्धैव समित्समित् धूमो धूमोऽर्चिरर्चिरगारा अंगारा, विस्फुलिंगा विस्फुलिगा । यथाप्रसिद्धमेव सर्वमित्यर्थ । तस्मिन्पुरुषमंत्याहुति जुह्वति, तस्या आहुत्या आहुते पुरुषो भास्वरवर्णोऽतिशयदीप्तिमान्निषेकादिभि अंत्याहुत्यंत कर्मभि संस्कृतत्वात्संभवति निष्पद्यते ॥

ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धा सत्यमुपासते तेऽर्चिरभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युत तान्वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु परा. परावतो वसन्ति तेषां न पुनरावृत्तिः ॥१५॥

इदानी प्रथमप्रश्ननिराकरणार्थमाह—"ते । के? य एव यथोक्तं पंचाग्निदर्शनमेतद्विदु । एवंशब्दादग्निसमिद्धूमार्चिरंगारविस्फुलिंगश्रद्धादिविशिष्टा पंच

अग्नयो निर्दिष्टा , तानेवमेतान्पंचाग्नीन्विदुरित्यर्थ ॥

ननु अग्निहोत्राहुतिदर्शनविषयमेवैतद्दर्शनम् । तत्र युक्त अनुत्क्रान्त्यादिपदार्थषट्कनिर्णये 'दिवमेवाहवनीयं कुर्वाते' इत्यादि । इहाप्यमुष्य लोकस्याग्नित्वमादित्यस्य च समित्त्वमित्यादि बहु साम्यम् । तस्मात्तच्छेषमेवैतद्दर्शनमिति । न । यतिथ्यामिति प्रश्नप्रतिवचनपरिग्रहात् । यतिथ्यामित्यस्य प्रश्नस्य प्रतिवचनस्य यावदेव परिग्रह , एतावदेव एवशब्देन परामृष्टुं युक्तम् । अन्यथा प्रश्नानर्थक्यात् । निर्ज्ञातत्वाच्च संख्याया अग्नय एव वक्तव्या । अथ निर्ज्ञातमप्यनूद्यते । यथाप्राप्तस्यैवानुवदन युक्त न तु 'असौ लोकोऽग्नि.' इति । अथोपलक्षणार्थ । तथाऽप्याद्येनात्येन चोपलक्षण युक्तम् । श्रुत्यंतराच्च । समाने हि प्रकरणे छादोग्यश्रुतौ पचाग्नीन्वेदेति पचसख्याया एवोपादानादनग्निहोत्रशेषं एतत्पंचाग्निदर्शनम् । यत्त्वग्निसमिदादिसामान्य तदग्निहोत्रस्तुत्यर्थमित्यवोचाम । तस्मान्न उत्क्रान्त्यादिपदार्थषट्कपरिज्ञानादर्चिरादिप्रातिपत्ति । एवमिति प्रकृतोपादानेन अर्चिरादिप्रातिपत्तिविधानात् ॥

के पुनस्ते य एवं विदु ? गृहस्था एव । ननु तेषा यज्ञादिसाधनेन धूमादिप्रतिपत्तिर्विधित्सिता । न । अनेवविदामपि गृहस्थाना यज्ञादिसाधनोपपत्ते । भिक्षुवानप्रस्थयोश्च अरण्यसबधेन ग्रहणात् । गृहस्थकर्मसबद्धत्वाच्च पंचाग्निदर्शनस्य । अतो नापि ब्रह्मचारिण एव विदुरिति गृह्यन्त । तेषा तूत्तरे पथि प्रवेश स्मृतिप्रामाण्यात्— "अष्टाशीतिसहस्राणामृषीणामूर्ध्वरेतसाम् । उत्तरेणार्यम्णः पंथास्तेऽमृतत्वं हि भेजिरे" इति ॥ तस्माद्ये गृहस्था एव अग्निजोऽहमन्यपत्यमित्येव क्रमेणाग्निभ्यो जातोऽग्निरूप इत्येव ये विदुस्ते च, ये चामी अरण्ये वानप्रस्था परिव्राजकाश्चारण्यनित्याः श्रद्धा श्रद्धायुक्ता सन्तः सत्यं ब्रह्म हिरण्यगर्भात्मानमुपासते न पुन श्रद्धा चोपासते ते सर्वेऽर्चिरभिसंभवन्ति ॥

यावत् गृहस्था पचाग्निविद्या सत्यं वा ब्रह्म न विदु तावच्छ्रद्धाद्याहुतिक्रमेण पचम्यामाहुतौ हुताया ततो योषाग्नेर्जाता पुनर्लोक प्रत्युन्थायिनोऽग्निहोत्रादिकर्मानुष्ठातारो भवन्ति । तेन कर्मणा धूमादिक्रमेण पुन पितृलोकं पुन पर्जन्यादिक्रमेणेममावर्तन्ते । तत पुनर्योषाग्ने जाता पुन कर्म कृत्वा इत्येवमेव घटीयंत्रवद्गत्यागतिभ्या पुन पुनरावर्तन्ते । यदा त्वेवं विद् ततो

घटीयंत्रभ्रमणाद्विनिर्मुक्ता सन्तोऽर्चिं आभिसभवन्ति । अर्चिरपि नाग्निज्वाला-मात्र किं तर्ह्यर्चिरभिमानिनी अर्चि शब्दवाच्या देवतोत्तरमार्गलक्षणा व्यवस्थितैव । तामभिसभवन्ति । न हि परिव्राजकानामग्न्यर्चिषैव साक्षात्संबंधोऽस्ति । तेन देवतेव परिगृह्यतेऽर्चि शब्दवाच्या । अतोऽहर्देवताम् । मरणकालनियमानुपपत्ते अह शब्दोऽपि देवतैव । आयुष क्षये हि मरणम् । नह्येवविदाऽहन्येव मर्तव्य-मित्यह मरणकालो नियतु शक्यते । न च रात्रौ प्रेता सन्तोऽह प्रतीक्षन्ते । 'स यावत्क्षिप्येन्मनस्तावदादित्य गच्छति' इति श्रुत्यतरात् ॥

अह्न आपूर्यमाणपक्ष अहर्देवतयाऽतिवाहिता आपूर्यमाणपक्षदेवता प्रति-पद्यन्ते, शुक्लपक्षदेवतामित्येतत् । आपूर्यमाणपक्षाद्यान्षण्मासान् उदङ्ङुत्तरा दिशमादित्य सवितैति, तान्मासान्प्रतिपद्यन्ते शुक्लपक्षदेवतयाऽतिवाहिता सन्त । मासानिति बहुवचनात्सघचारिण्य षडुत्तरायणदेवता । तेभ्यो मासेभ्य षण्मासदेवताभिरतिवाहिता देवलोकाभिमानिनी देवता प्रतिपद्यन्ते । देवलोकादादित्य आदित्याद्वैद्युत विद्युदभिमानिनी देवता प्रतिपद्यन्ते । विद्युद्देवता प्राप्तान्ब्रह्मलोकवासी पुरुषो ब्रह्मणा मनसा सृष्टो मानस कश्चिदे-त्यागत्य ब्रह्मलोकान्गमयति । ब्रह्मलोकानिति अपरोत्तरभूमिभेदेन भिन्ना इति गम्यन्ते । बहुवचनप्रयोगात् । उपासनतारतम्योपपत्तेश्च । ते तेन पुरुषेण गमिता सन्तस्तेषु ब्रह्मलोकेषु परा प्रकृष्टा सन्त स्वय परावत प्रकृष्टा समा सवत्सरानेकान्वसन्ति । ब्रह्मणोऽनेकान्कल्पान्वसन्तीत्यर्थ । तेषा ब्रह्मलोक गताना नास्ति पुनरावृत्तिरस्मिन्ससारे न पुनरागमन 'इह' इति शाखान्तरपाठात् । इहेत्याकृतिमात्रग्रहणमिति चेत् "श्वोभूते पौर्णमासी" इति यद्वत् । न । इहेतिविशेषणानर्थक्यात् । यदि हि नावर्तन्त एव इहग्रहण अनर्थकमेव स्यात् । "श्वोभूते पौर्णमासी" इत्यत्र पौर्णमास्या श्वोभूतत्वं अनुक्तं न ज्ञायत इति युक्त विशेषयितुम् । न हि तत्र श्वआकृति शब्दार्थो विद्यत इति श्व शब्दो निरर्थक एव प्रयुज्यते । यत्र तु विशेषणशब्दे प्रयुक्तेऽन्विष्यमाणे विशेषणफलं चेन्न गम्यते, तत्र युक्तो निरर्थकत्वेनोत्सृष्टुं विशेषणशब्द । न तु सत्या विशेषणफलावगतौ । तस्मादस्मात्कल्पादूर्ध्वं आवृत्तिर्गम्यते ॥१५॥

अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसंभवन्ति

धूमाद्रात्रि रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति मासेभ्य पितृलोकं पितृलोकाच्चद्र ते चद्र प्राप्यान्न भवन्ति तांस्तत्र देवा यथा सोम राजानमाप्यायस्वापक्षीयस्वेत्येवमेनास्तत्र भक्षयन्ति तेषा यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यन्त आकाशाद्वायु वायोर्वृष्टि वृष्टे पृथिवी ते पृथिवीं प्राप्यान्न भवन्ति ते पुन. पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते लोकान्प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्तेऽथ य एतौ पंथानौ न विदुस्ते कीटा पतगा यदिद ददशूकम् ॥१६॥ इति द्वितीय ब्राह्मणम् ॥

अथ पुनर्ये नैव विदु उत्क्रान्त्याद्यग्निहोत्रसंबंधपदार्थषट्कस्यैव वेदितार केवलकर्मिणो यज्ञेनाग्निहोत्रादिना दानेन बहिर्वेदि भिक्षमाणेषु द्रव्यसविभागलक्षणेन, तपसा बहिर्वेद्येव दीक्षादिव्यतिरिक्तेन कृच्छ्र चाद्रायणादिना लोकाजयन्ति । लोकानिति बहुवचनात्तत्रापि फलतारतम्यमभिप्रेतम् । ते धूममभिसभवन्ति । उत्तरमार्ग इवेहापि देवता एव धूमादिशब्दवाच्या । धूमदेवता प्रतिपद्यन्त इत्यर्थ । आतिवाहिकत्व च देवताना तद्वदेव । धूमाद्रात्रि रात्रिदेवता, ततोऽपक्षीयमाणपक्ष अपक्षीयमाणपक्षदेवता, ततो यान्षण्मासान्दक्षिणा दिशमादित्य एति तान्मासदेवताविशेषान्प्रतिपद्यन्ते । मासेभ्य पितृलोकं पितृलोकाच्चद्रम् । ते चद्र प्राप्यान्न भवन्ति । तास्तत्रान्नभूतान्यथा सोम राजानमिह यज्ञ ऋत्विज आप्यायस्वापक्षायस्वेति भक्षयन्त्येवमेनाश्चद्र प्राप्तान्कर्मिणो भृत्यानिव स्वामिनो भक्षयन्त्युपभुजते देवा । 'आप्यायस्वापक्षीयस्व' इति न मंत्र , किं तर्हि आप्याप्य आप्याप्य चमसस्थं, भक्षणेनापक्षय च कृत्वा, पुन पुनर्भक्षयन्तीत्यर्थ । एव देवा अपि सोमलोके लब्धशरीरान्कर्मिण उपकरणभूतान्पुन पुनर्विश्रामयन्त कर्मानुरूप फल प्रयच्छन्त । तद्धि तेषामाप्यायनं सोमस्य आप्यायनमिवोपभुंजत उपकरणभूतान्देवा । तेषा कर्मिणा यदा यस्मिन्काले तद्यज्ञदानादिलक्षण सोमलोकप्रापकं कर्म पर्यवैति परिगच्छति परिक्षीयत इत्यर्थ । अथ तदेममेव प्रसिद्धमाकाशमभिनिष्पद्यन्ते । यास्ता श्रद्धाशब्दवाच्या द्युलोकाग्नौ हुता आप सोमाकारपरिणता, याभि सोमलोके कर्मिणामुपभोगाय शरीरमारब्धं अम्मय, ता कर्मक्षयाद्धिमपिंड इव आतपसंपर्कात्प्राविलीयन्ते । प्रविलीना सूक्ष्मा आकाशभूता इव भवन्ति । तदिदमुच्यते **'इममेवाकाशमभिनिष्पद्यन्ते'** इति ॥

ते पुनरपि कर्मिण तच्छरीरा सन्त पुरोवातादिना इतश्चामुतश्च नीयन्ते ऽन्तरिक्षगा । तदाह— आकाशाद्वायुमिति । वायोर्वृष्टिं प्रतिपद्यन्ते । तदुक्त— पर्जन्याग्नौ सोम राजान जुह्वतीति । ततो वृष्टिभूता इमा पृथिवी पतन्ति । ते पृथिवी प्राप्य व्रीहियवाद्यन्नं भवन्ति । तदुक्त— अस्मिंल्लोकेऽग्नौ वृष्टि जुह्वति तस्या आहुत्या अन्न सभवतीति । ते पुन पुरुषाग्नौ हूयन्तेऽन्नभूता रेतस्सचि । ततो रेतोभूता योषाग्नौ हूयन्ते । ततो जायन्ते । लोक प्रत्युत्थायिनस्ते लोक प्रत्युत्तिष्ठन्तोऽग्निहोत्रादिकर्म अनुतिष्ठन्ति । ततो धूमादिना पुन पुन सोमलोकं पुनरिमं लोकमिति । त एव कर्मिणोऽनुपरिवर्तन्ते घटीयंत्रवच्चक्रीभूता ब्रम्रमतीत्यर्थ । उत्तरमार्गाय सद्योमुक्तये वा यावद्ब्रह्म न विदु । 'इति नु कामयमान ससरति' इत्युक्तम् ॥

अथ पुनर्ये उत्तर दक्षिण चैतौ पंथानौ न विदु उत्तरस्य दक्षिणस्य वा पथ प्रतिपत्तये ज्ञान कर्म वा नानुतिष्ठन्तीत्यर्थ । ते कि भवन्तीति । उच्यते— ते कीटा पतगा यदिदं यच्चेद ददशूकं दशमशकमित्येतद्भवन्ति । एवं हीय ससारगति कष्टाऽस्या निमग्नस्य पुनरुद्धार एव दुर्लभ । तथाच श्रुत्यतर— 'तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्व' इति । तस्मात्सर्वोत्साहेन यथाशक्ति स्वाभाविककर्मज्ञानहानेन दक्षिणोत्तरमार्गप्रतिपत्तिसाधन शास्त्रीय कर्म ज्ञान वाऽनुतिष्ठेदिति वाक्यार्थ । तथा चोक्त 'अतो वै खलु दुर्निष्प्रपतर तस्माज्जुगुप्सेत' इति श्रुत्यतरान्मोक्षाय प्रयतेतेत्यर्थ ॥

अत्राप्युत्तरमार्गप्रतिपत्तिसाधन एव महान्यत्न कर्तव्य इति गम्यते । 'एवमेवानुपरिवर्तन्ते' इत्युक्तत्वात् । एवं प्रश्ना सर्वे निर्णाता । 'असौ वै लोक'इत्यारभ्य, 'पुरुष संभवति' इति चतुर्थ प्रश्नो 'यतिथ्यामाहुत्या' इत्यादि प्राथम्येन । पंचमस्तु द्वितीयत्वेन देवयानस्य वा पथ प्रतिपदं पितृयाणस्य वेति दक्षिणोत्तरमार्गप्रतिपत्तिसाधनकथनेन । तेनैव च प्रथमोऽपि अग्नेरारभ्य केचिदार्चि प्रतिपद्यन्ते केचित् धूममिति विप्रतिपत्ति । पुनरावृत्तिश्च द्वितीय प्रश्न आकाशादिक्रमेणेमं लोकमागच्छन्तीति । तेनैव असौ लोको न सपूर्यते कीटपतगादिप्रतिपत्तेश्च केषाचिदिति, तृतीयोऽपि प्रश्नो निर्णीत ॥१६॥ इति द्वितीयं ब्राह्मणम् ॥

———— ६२ —

स य कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुंबरे कसे चमसे वा सर्वौषध फलानीति संभृत्य परिसमुह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्याऽऽवृताज्य सस्कृत्य पुसा नक्षत्रेण मंथ संनीय जुहोति। यावन्तो देवास्त्वयि जातवेदस्तिर्यंचो घ्नन्ति पुरुषस्य कामान्। तेभ्योऽह भागधेय जुहोमि ते मा तृप्ता सर्वै कामैस्तर्पयन्तु स्वाहा। या तिरश्ची निपद्यतेऽह विधरणी इति तां त्वा घृतस्य धारया यजे सराधनीमह स्वाहा ॥१॥

स य कामयेत। ज्ञानकर्मणोर्गतिरुक्ता। तत्र ज्ञानं स्वतंत्र, कर्म तु दैवमानुषवित्तद्वयायत्तम्। तेन कर्मार्थं वित्तमुपार्जनीयम्। तच्च अप्रत्यवायकारिणोपायेनेति तदर्थ मथाख्य कर्म आरभ्यते महत्त्वप्राप्तये। महत्त्वे च सत्यर्थसिद्धं हि वित्तम्। तदुच्यते—स य कामयेत स यो वित्तार्थी। कर्मण्यधिकृतो य कामयेत। किं? महन्महत्त्व प्राप्नुया, महान्स्यामितीत्यर्थ। तत्र मथकर्मणो विधित्सितस्य कालोऽभिधीयते—उदगयने आदित्यस्य। तत्र सर्वत्र प्राप्तावापूर्यमाणपक्षस्य शुक्लपक्षस्य। तत्रापि सर्वत्र प्राप्ते पुण्याहेऽनुकूल आत्मन कर्मसिद्धिकर इत्यर्थ। द्वादशाहं यस्मिन्पुण्येऽनुकूले कर्म चिकार्षति तत प्राक्पुण्याहमेवारभ्य द्वादशाहमुपसद्व्रती। उपसत्सु व्रतं, उपसद प्रसिद्धा ज्योतिष्टोमे। तत्र च स्तनोपचयापचयद्वारेण पयोभक्षण तत् व्रतम्। अत्र च तत्कर्मानुपसंहारात्केवलमितिकर्तव्यताशून्य पयोभक्षणमात्रमुपादीयते। ननु उपसदो व्रतमिति यदा विग्रह तदा सर्वमितिकर्तव्यतारूपं ग्राह्य भवति, तत्कस्मान्न परिगृह्यत इति। उच्यते—स्मार्तत्वात्कर्मण। स्मार्त हीदं मंथकर्म। ननु श्रुतिविहित सत्कथ स्मार्त भवितुमर्हति? स्मृत्यनुवादिनी हि श्रुतिरियम्। श्रौतत्वे हि प्रकृतिविकारभाव। ततश्च प्राकृतधर्मग्राहित्वं विकारकर्मणो, न त्विह श्रौतत्वम्। अत एव च आवसथ्याग्नावेतत्कर्म विधीयते। सर्वा चात्रत्स्मार्तैवेति ॥

उपसद्व्रती भूत्वा पयोव्रती सन्नित्यर्थ। औदुंबर उदुबरवृक्षमये कसे चमसे वा तस्यैव विशेषणं करकाकारे चमसाकारे वौदुंबर एव। आकारे तु विकल्पो नौदुबरत्वे। अत्र सर्वौषधं सर्वासामोषधीना समूहं यथासंभवं यथाशक्ति च सर्वा ओषधी समाहृत्य। तत्र ग्राम्याणा तु दश नियमेन ग्राह्या व्रीहि-

यवाद्या वक्ष्यमाणा । अधिकग्रहणे तु न दोष । ग्राम्याणा फलानि च यथा-सभवं यथाशक्ति च । इतिशब्द समस्तसभारोपचयप्रदर्शनार्थ । अन्यदपि यत्संभरणीय तत्सर्व सभृत्येत्यर्थ । क्रमस्तत्र गृह्योक्तो द्रष्टव्य । परिसमूहन-परिलेपने भूमिसस्कार । अग्निमुपसमाधायेति वचनादावसथ्येऽग्नाविति गम्यते । एकवचनादुपसमाधानश्रवणाच्च । विद्यमानस्यैव उपसमाधानम्। परिस्तीर्य दर्भान । आवृता स्मार्तत्वात्कर्मण स्थालीपाकावृत्परिगृह्यते तया आज्य सस्कृत्य। पुंसा नक्षत्रेण पुनाम्ना नक्षत्रेण पुष्याहसयुक्तेन मंथ सर्वौषधफलपिष्ट तत्रौदुंबरे चमसे दधनि मधुनि घृते चोपसिच्य एकयोपमंथन्योपसंमथ्य सनीय मध्ये संस्थाप्य, औदुबरेण स्रुवेण आवापस्थान आज्यस्य जुहोत्येतै मन्त्रै 'यावन्तो देवा' इत्याद्यै ॥१॥

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मथे संस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मथे संस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मथे सस्रवमवनयति चक्षुषे स्वाहा सपदे स्वाहेत्यग्नौ हुत्वा मथे सस्रवमवनयति श्रोत्राय स्वाहाऽऽयतनाय स्वाहेत्यग्नौ हुत्वा मथे सस्रवमवनयति मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मथे सस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मथे संस्रवमवनयति ॥२॥

अग्नये स्वाहेत्यग्नौ हुत्वा मथे सस्रवमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मथे संस्रवमवनयति भू स्वाहेत्यग्नौ हुत्वा मथे संस्रवमवनयति भुव स्वाहेत्यग्नौ हुत्वा मंथे सस्रवमवनयति स्व स्वाहेत्यग्नौ हुत्वा मंथे सस्रव-मवनयति भूर्भुव स्व स्वाहेत्यग्नौ हुत्वा मंथे सस्रवमवनयति ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मथे सस्रवमवनयति क्षत्राय स्वाहेत्यग्नौ हुत्वा मथे संस्रवमवनयति भूताय स्वाहेत्यग्नौ हुत्वा मंथे सस्रवमवनयति भविष्यते स्वाहेत्यग्नौ हुत्वा मथे सस्रवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा मंथे सस्रवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा मथे संस्रवमवनयति प्रजापतये स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति ॥३॥

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यारभ्य द्वे द्वे आहुती हुत्वा मंथे संस्रवम-वनयति । स्रुवावलेपनमाज्यं मंथे सस्रावयति । एतस्मादेव ज्येष्ठाय श्रेष्ठाये-त्यादिप्राणलिगाज्ज्येष्ठश्रेष्ठादिप्राणविद एवास्मिन्कर्मण्यधिकार । रेतस इत्या-

रभ्य एकैकामाहुति हुत्वा मथे सस्रवमवनयति अपरयोपमंथन्या पुनर्मथ्नाति ॥

अथैनमभिमृशति भ्रमदसि ज्वलदसि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिंकृतमसि हिंक्रियमाणमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे सदीप्तमसि विभूरसि प्रभूरस्यन्नमसि ज्योतिरसि निधनमसि संवर्गोऽसीति ॥४॥

अथैनमभिमृशति भ्रमदसीत्यनेन मन्त्रेण ॥

अथैनमुद्यच्छत्याम स्याम हि ते महि स हि राजेशानोऽधिपति स मा राजेशानोऽधिपति करोत्विति ॥५॥

अथैनमुद्यच्छति सह पात्रेण हस्ते गृह्णात्याम स्याम हि ते महीत्यनेन ॥

अथैनमाचामति तत्सवितुर्वरेण्यम् । मधु वाता ऋतायते मधु क्षरन्ति सिंधव । माध्वीर्न सन्त्वोषधी । भू स्वाहा । भर्गो देवस्य धीमहि । मधु नक्तमुतोषसो मधुमत्पार्थिव रज । मधु द्यौरस्तु न पिता । भुव. स्वाहा । धियो यो न प्रचोदयात् । मधुमान्नो वनस्पतिर्मधुमॉ अस्तु सूर्य. माध्वीर्गावो भवन्तु नः । स्व स्वाहेति । सर्वा च सावित्रीमन्वाह सर्वाश्च मधुमतीरहमेवेद सर्वं भूयास भूर्भुव स्व. स्वाहेत्यतत आचम्य पाणी प्रक्षाल्य जघनेनाग्नि प्राक्शिरा सविशति प्रातरादित्यमुपतिष्ठते दिशामेकपुडरीकमस्यह मनुष्याणामेकपुडरीक भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वश जपति ॥६॥

अथैनमाचामति भक्षयति गायत्र्या प्रथमपादेन मधुमत्येकया व्याहृत्या च प्रथमया प्रथमग्रासमाचामति । तथा गायत्रीद्वितीयपादेन मधुमत्या द्वितीयया द्वितीयया च व्याहृत्या द्वितीय ग्रासम् । तथा तृतीयेन गायत्रीपादेन तृतीयया मधुमत्या तृतीयया च व्याहृत्या तृतीय ग्रासम् । सर्वा सावित्री सर्वाश्च मधुमतीरुक्त्वाऽहमेवेद सर्वं भूयासमिति चान्ते भूर्भुव स्व स्वाहेति समस्तं भक्षयति । यथा चतुर्भिर्ग्रासैस्तत् द्रव्यं सर्वं परिसमाप्यते, तथा पूर्वमेव निरूपयेत् । यत्पात्रावलिप्तं तत्पात्रं सर्वं निर्णिज्य तूष्णी पिबेत् । पाणी प्रक्षाल्याप आचम्य जघनेनाग्निं पश्चादग्ने प्राक्शिरा संविशति । प्रात - संध्यामुपास्य आदित्यमुपतिष्ठते दिशामेकपुंडरीकमित्यनेन मंत्रेण । यथेतं यथागतमेत्यागत्य जघनेनाग्निमासीनो वंश जपति ॥

तं हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाचापि य एन शुष्के स्थाणौ निषिचेज्जायेरञ्छाखा. प्ररोहेयु. पलाशानीति ॥७॥

एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैंग्यायान्तेवासिन उक्त्वोवाचापि य एन शुष्के स्थाणौ निषिचेज्जायेरञ्छाखा प्ररोहेयु पलाशानीति ॥८॥

एतमु हैव मधुक पैंग्यश्चूलाय भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य एन शुष्के स्थाणौ निषिंचेज्जायेरञ्छाखा. प्ररोहेयुः पलाशानीति ॥९॥

एतमु हैव चूलो भागवित्तिर्जानकाय आयस्थूणायान्तेवासिन उक्त्वोवाचापि य एन शुष्के स्थाणौ निषिचेज्जायेरञ्छाखा. प्ररोहेयुः पलाशानीति ॥१०॥

एतमु हैव जानकिरायस्थूण सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिचेज्जायेरञ्छाखा प्ररोहेयु. पलाशानीति ॥११॥

एतमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिचेज्जायेरञ्छाखा. प्ररोहेयु. पलाशानीति तमेत नापुत्राय वाऽनतेवासिने वा ब्रूयात् ॥१२॥

त हैतमुद्दालक इत्यादि । सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाच— अपि य एनं शुष्के स्थाणौ निषिचेज्जायेरन्नेवास्मिञ्छाखा प्ररोहेयु पलाशानील्येवमतमेन मथमुद्दालकात्प्रभृत्येकैकाचार्यक्रमागत सत्यकाम आचार्यो बहुभ्योऽन्तेवासिभ्य उक्त्वोवाच । किमन्यदुवाचेत्युच्यते— अपि य एन शुष्के स्थाणौ गतप्राणेऽप्येनं मंथं भक्षणाय सस्कृतं निषिंचेत्प्रक्षिपेज्जायेरन्नुत्पद्येरन्नेवास्मिन्स्थाणौ शाखा अवयवा वृक्षस्य, प्ररोहेयुश्च पलाशानि पर्णानि, यथा जीवत स्थाणो । किमुतानेन कर्मणा काम सिध्येदिति । ध्रुवफलमिदं कर्मेति कर्मस्तुत्यर्थमेतत् । विद्याधिगमे षट्तीर्थानि । तेषा इह सप्राणदर्शनस्य मथविज्ञानस्याधिगमे द्वे एव तीर्थे अनुज्ञायेते पुत्रश्चान्तेवासी च ॥७—१२॥

चतुरौदुंबरो भवत्यौदुंबरः स्रुव औदुंबरश्चमस औदुंबर इध्म औदुंबर्यौ उपमथन्यौ दश ग्राम्याणि धान्यानि भवन्ति व्रीहियवास्तिलमाषा अणुप्रियंगवो

गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्पिष्टान्दधनि मधुनि घृत उपसिंचत्याज्यस्य जुहोति ॥१३॥

चतुरौदुबरो भवतीति व्याख्यातम् । दश ग्राम्याणि धान्यानि भवन्ति, ग्राम्याणा तु धान्याना दश नियमेन ग्राह्या इत्यवोचाम । के त इति निर्दिश्यन्ते— व्रीहियवा , तिलमाषा, अणुप्रियगवोऽणवश्चाणुशब्दवाच्या । क्वचिद्देशे प्रियगव प्रसिद्धा कगुशब्देन । खल्वा निष्पावा वल्लशब्दवाच्या लोके खलकुला कुलत्था । एतद्व्यतिरेकेण यथाशक्ति सर्वौषधयो ग्राह्या फलानि चेत्यवोचाम, अयाज्ञिकानि वर्जयित्वा ॥ इति तृतीय ब्राह्मणम् ॥ ६ ३ —

एषा वै भूताना पृथिवी रस पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणा फलानि फलाना पुरुष पुरुषस्य रेत. ॥१॥

यादृग्जन्मा ययोत्पादितो यैर्वा गुणैर्विशिष्ट पुत्र आत्मन पितुश्च लोक्यो भवतीति, तत्सपादनाय ब्राह्मणमारभ्यते । प्राणदर्शन श्रौमय कर्म कृतवत. पुत्रमंथेऽधिकार । यदा पुत्रमथ चिकीर्षति तदा श्रौमय कृत्वर्तुकाल पत्न्या प्रतीक्षत इत्येतद्रेतस ओषध्यादिरसतमत्वस्तुत्या अवगम्यते । एषा वै चराचराणा भूताना पृथिवा रस सारभूत । सर्वभूताना मध्विति ह्युक्तम् । पृथिव्या आपो रस । अप्सु हि पृथिव्योता च प्रोता च । अपामोषधयो रस । कार्यत्वाद्रसत्वमोषध्यादीनाम् । ओषधीना पुष्पाणि । पुष्पाणा फलानि । फलाना पुरुष । पुरुषस्य रेत । 'सर्वेभ्योऽगेभ्यस्तेज सभूतं' इति श्रुत्यतरात् ॥

स ह प्रजापतिरीक्षाचक्रे हताऽस्मै प्रतिष्ठा कल्पयानीति स स्त्रिय ससृजे ता सृष्ट्वाऽध उपास्त तस्मात्स्त्रियमध उपासीत स एत प्राच ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत् ॥२॥

यत एवं सर्वभूताना सारतममेतद्रेत , अत का नु खल्वस्य योग्या प्रतिष्ठेति स ह स्रष्टा प्रजापतिरीक्षाचक्रे । ईक्षां कृत्वा स स्त्रियं ससृजे । ता च सृष्ट्वाऽध उपास्त मैथुनाख्यं कर्माधउपासनं नाम कृतवान् । तस्मात्स्त्रियमध उपासीत । श्रेष्ठानुश्रयणा हि प्रजा । अत्र वाजपेयसामान्यकल्पमिमाह— स एत प्राचं प्रकृष्टगतियुक्तमात्मनो ग्रावाणं सोमाभिषवोपलस्थानीयं काठिन्यसामान्यात्प्रजन-

नेंद्रियं उदपारयदूत्पूरितवान्स्त्रीव्यंजनं प्रति । तेनैना स्त्रियमभ्यसृजदभिससर्ग कृतवान् ॥

तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति य एवं विद्वानधोपहासं चरत्यासा स्त्रीणां सुकृत वृक्तेऽथ य इदमविद्वानधोपहास चरत्याऽस्य स्त्रियः सुकृतं वृजते ॥३॥

तस्या वेदिरित्यादि सर्व सामान्य प्रसिद्धम् । समिद्धोऽग्निर्मध्यत स्त्रीव्यजनस्य । तौ मुष्कावधिषवणफलके इति व्यवहितेन सबध्यते । वाजपेययाजिनो यावाल्लोक प्रसिद्धस्तावान्विदुषो मैथुनकर्मणो लोक फलमिति स्तूयते । तस्माद्वीभत्सा नो कार्यति । य एव विद्वानधोपहास चरत्यासा स्त्रीणा सुकृत वृंक्ते आवर्जयति । अथ पुनर्यो वाजपेयमपात्ति न जानात्यविद्वान्रेतसो रसतमत्व चाधोपहासं चरति । आऽस्य स्त्रिय सुकृतमावृजतेऽविदुष ॥

एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै तद्विद्वान्कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिंद्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति य इदमविद्वासोऽधोपहास चरन्तीति बहु वा इद सुप्तस्य वा जाग्रतो वा रेत स्कदति ॥४॥

एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहाधोपहासाख्य मैथुनकर्म वाजपेयसपन्न विद्वानित्यर्थ । तथा नाको मौद्गल्य कुमारहारितश्च । कि त आहु इत्युच्यते— बहवो मर्या मरणधर्मिणो मनुष्या ब्राह्मणा अयन येषा ते ब्राह्मणायना ब्रह्मबधवो जातिमात्रोपजीविन इत्येतत् । निरिंद्रिया विश्लिष्टेंद्रिया, विसुकृतो विगतसुकृतकर्माण, अविद्वासो मैथुनकर्मासक्ता इत्यर्थ । ते कि अस्माल्लोकात्प्रयन्ति परलोकात्परिभ्रष्टा इति । मैथुनकर्मणोऽत्यंतपापहेतुत्व दर्शयति— य इदमविद्वासोऽधोपहास चरन्तीति ॥

श्रीमंथ कृत्वा पत्न्या ऋतुकालं ब्रह्मचर्येण प्रतीक्षते । यदीद रेत स्कंदति बहु वाल्प वा सुप्तस्य वा जाग्रतो वा रागप्राबल्यात्—

तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः । इदमहं तद्रेत आददे पुनर्मामैत्विंद्रिय पुनस्तेजः पुनर्भगः

पुनरग्निर्धिष्ण्या यथास्थान कल्पन्तामित्यनामिकांगुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥५॥

तदभिमृशेदनुमन्त्रयेत वाऽनुजपेदित्यर्थ । यदाऽभिमृशति तदाऽनामिकागुष्ठाभ्या तद्रेत आदत्ते 'आददे' इत्येवमतेन मन्त्रेण । पुनर्मामित्येतेन निमृज्यादतरेण मध्ये भ्रुवौ भ्रुवोर्वा, स्तनौ स्तनयोर्वा ॥

अथ यद्युदक आत्मान पश्येत्तदभिमन्त्रयेत मयि तेज इंद्रियं यशो द्रविण सुकृतमिति श्रीर्ह वा एषा स्त्रीणा यन्मलोद्वासारतस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमंत्रयेत ॥६॥

अथ यदि कदाचिदुदक आत्मानमात्मच्छाया पश्येत्तत्राप्यभिमन्त्रयेतानेन मन्त्रेण 'मयि तेज' इति । श्रीर्ह वा एषा पत्नी स्त्रीणा मध्ये यद्यस्मान्मलोद्वासा उद्वृतमलवद्वासा तस्मात्ता मलोद्वासस यशस्विनी श्रीमतीमभिक्रम्याभिगत्योपमन्त्रयेतेदमद्यावाम्या कार्य यत्पुत्रोत्पादनमिति, त्रिरात्रान्ते आप्लुताम् ॥

सा चेदस्मै न दद्यात्काममेनामवक्रीणीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेदिंद्रियेण ते यशसा यश आदद इत्ययशा एव भवति ॥७॥

सा चेदस्मै न दद्यान्मैथुन कर्तुं काममेनामवक्रीणीयादाभरणादिना ज्ञापयेत् । तथापि सा नैव दद्यात्काममेना यष्ट्या वा पाणिना वोपहत्यातिक्रामन्मैथुनाय । शप्स्यामि त्वा दुर्भगा करिष्यामीति प्रख्याप्य तामनेन मंत्रेणोपगच्छेत् 'इंद्रियेण ते यशसा यश आदद' इति । सा तस्मात्तदभिशापाद्बध्या दुर्भगेति ख्याताऽयशा एव भवति ॥

सा चेदस्मै दद्यादिंद्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः ॥८॥

सा चेदस्मै दद्यादनुगुणैव स्याद्भर्तु , तदाऽनेन मन्त्रेणोपगच्छेत् 'इंद्रियेण ते यशसा यश आदधामि' इति । तदा यशस्विनावेवोभावपि भवत ॥

स यामिच्छेत्कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुख सधायोपस्थमस्या अभिमृश्य जपेदंगादंगात्संभवसि हृदयादधिजायसे । स त्वमंगकषायोऽसि दिग्धविद्धमिव मादयेमाममू मयीति ॥९॥

स या स्वभार्यामिच्छेदिय मा कामयेतेति, तस्यामर्थ प्रजननेंद्रियं निष्ठाय निक्षिप्य मुखेन मुखं संधायोपस्थमस्या अभिमृश्य जपेदिमं मंत्रं अंगादंगादिति ॥

अथ यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखं संधायाभिप्राण्यापान्यार्दिंद्रियेण ते रेतसा रेत आदद इत्यरेता एव भवति ॥१०॥

अथ यामिच्छेन्न गर्भं दधीत न धारयेद्गर्भिणी मा भूदिति तस्यामर्थमिति पूर्ववत् । अभिप्राण्याभिप्राणनं प्रथमं कृत्वा पश्चादपान्यार्दिंद्रियेण ते रेतसा रेत आदद इत्यनेन मंत्रेण । अरेता एव भवति न गर्भिणी भवतीत्यर्थ ॥

अथ यामिच्छेद्दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखं संधायापान्याभिप्राण्यादिंद्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति ॥

अथ यामिच्छेद्दधीत गर्भमिति तस्यामर्थमित्यादि पूर्ववत् । पूर्वविपर्ययेणापान्याभिप्राण्यादिंद्रियेण ते रेतसा रेत आदधामीति । गर्भिण्येव भवति ॥

अथ यस्य जायायै जार स्यात्तं चेद्द्विष्यादग्निपात्रेऽग्निमुपसमाधाय प्रतिलोमं शरबर्हिस्तीर्त्वा तस्मिन्नेता. शरभृष्टीः प्रतिलोमा सर्पिषाऽक्ता जुहुयान्मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति मम समिद्धेऽहौषी· पुत्रपशूंस्त आददेऽसाविति मम समिद्धेऽहौषीरिष्टापूर्तसुकृते आददेऽसाविति मम समिद्धेऽहौषीराशापराकाशौ त आददेऽसाविति स वा एष निर्रिंद्रियो विसुकृतोऽस्माल्लोकात्प्रैति यमेवंविद्ब्राह्मण शपति तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति ॥१२॥

अथ पुनर्यस्य जायायै जार उपपति स्यात्त चेत् द्विष्यादभिचरिष्यान्येनमिति मन्येत तस्येदं कर्म । आमपात्रेऽग्निमुपसमाधाय सर्वं प्रतिलोमं कुर्यात् । तस्मिन्नग्नावेता शरभृष्टी शरेषीका प्रतिलोमा सर्पिषा अक्ता घृताभ्यक्ता जुहुयान्मम समिद्धेऽहौषीरित्याद्या आहुतीः । अंते सर्वासामसौ इति नामग्रहणं प्रत्येकम् । स एष एवंविद्यं ब्राह्मण शपति, स विसुकृतो विगतपुण्यकर्मा प्रैति । तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेन्नर्मापि न कुर्यात्किमुताधोपहासम् । हि यस्मादेवंविदपि तावत्परो भवति शत्रुर्भवतीत्यर्थः ॥

अथ यस्य जायामार्तवं विंदेत्स्यहं कंसेन पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥१३॥

अथ यस्य जायामार्तव विदेहतुभाव प्राप्नुयादित्येवमादिग्रंथ 'श्रीर्ह वा एषा स्त्रीणा' इत्यत पूर्व द्रष्टव्य । सामर्थ्यात् । व्यह कंसेन पिबेदहतवासाश्च स्यात् । नैना स्नातामस्नाता च वृषलो वृषली वा नोपहन्यान्नोपस्पृशेत् । त्रिरात्रान्ते त्रिरात्रव्रतसमाप्तावाप्लुत्य स्नात्वाऽहतवासा स्यादिति व्यवहितेन संबंध. । तामाप्लुता व्रीहीनवघातयेत् व्रीह्यवघाताय तामेव विनियुञ्जयात् ॥

स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदन पाचयित्वा सर्पिष्मतमश्नीयातामीश्वरौ जनयितवै ॥१४॥

स य इच्छेत्पुत्रो मे शुक्लो वर्णतो जायेत, वेदमेकमनुब्रुवीत, सर्वमायुरियाद्वर्षशत क्षीरौदन पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ समर्थौ जनयितवै जनयितुम् ॥

अथ य इच्छेत्पुत्रो मे कपिल पिगलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदन पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥१५॥

दध्योदन दध्ना चरु पाचयित्वा । द्विवेद चेदिच्छति पुत्र तदेवमशनियम ॥

अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रुवीत सर्वमायुरियादित्युदौदन पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥१६॥

केवलमेव स्वाभाविकमोदनम् । उदग्रहणमन्यप्रसंगनिवृत्त्यर्थम् ॥

अथ य इच्छेद्दुहिता मे पडिता जायेत सर्वमायुरियादिति तिलौदन पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥१७॥

दुहितु पाडित्य गृहतत्रविषयमेव । वेदेऽनधिकारात् । तिलौदन कृशरम् ॥

अथ य इच्छेत्पुत्रो मे पंडितो विगीतः समितिंगम शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रुवीत सर्वमायुरियादिति मासौदन पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा औक्षेण वाऽऽर्षभेण वा ॥१८॥

विविधं गीतो विगीत प्रख्यात इत्यर्थ । समितिंगम सभा गच्छतीति प्रगल्भ इत्यर्थ । पाडित्यस्य पृथग्ग्रहणात् । शुश्रूषितां श्रोतुमिष्टा रमणीया वाचं भाषिता संस्कृताया अर्थवत्या वाचो भाषितेत्यर्थ । मासमिश्रमोदन

मासौदनम् । तन्मासनियमार्थमाह— औक्षेण वा मासेन । उक्षा सेचनसमर्थ पुंगवस्तदीय मासम् । ऋषभस्ततोऽप्याधिक्यवया. तदीयमार्षभं मासम् ॥

अथाभिप्रातरेव स्थालीपाकावृताज्य चेष्टित्वा स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहाऽनुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्वृत्य प्राश्नाति प्राश्येतरस्या प्रयच्छति प्रक्षाल्य पाणी उदपात्र पूरयित्वा तेनैना त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रपूर्य्यां स जाया पत्या सहेति ॥१९॥

अथाभिप्रातरेव कालेऽवघातानिवृत्तास्तण्डुलानादाय स्थालीपाकावृता स्थालीपाकविधिना आज्य चेष्टित्वा आज्यसंस्कारं कृत्वा चरु श्रपयित्वा स्थालीपाकस्याहुतीर्जुहोति, उपघातमुपहत्योपहत्याग्नये स्वाहेत्याद्या । गार्ह्य सर्वो विधिर्द्रष्टव्योऽत्र । हुत्वोद्वृत्य चरुशेष प्राश्नाति । स्वय प्राश्येतरस्या पत्न्यै प्रयच्छत्युच्छिष्टम् । प्रक्षाल्य पाणी आचम्योदपात्र पूरयित्वा तेनोदकेनैना त्रिरभ्युक्षत्यनेन मन्त्रेणोत्तिष्ठात इति, सकृन्मंत्रोच्चारणम् ॥

अथैनामभिपद्यतेऽमोऽहमस्मि सा त्व सा त्वमस्यमोह सामाहमस्मि ऋक्त्व द्यौरह पृथिवी त्व तावेहि सरभावहै सह रेतो दधावहै पुसे पुत्राय वित्तय इति ॥२०॥

अथैनामभिमंत्र्य क्षीरोदनादि यथापत्यकामं भुक्त्वेति क्रमो द्रष्टव्य । संवेशनकालेऽमोऽहमस्मीत्यादिमन्त्रेणाभिपद्यते ॥

अथास्या ऊरू विहापयति विजिहीथा द्यावापृथिवी इति तस्यामर्थं निष्टाय मुखेन मुख सधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनि कल्पयतु त्वष्टा रूपाणि पिशतु । आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥२१॥

अथास्या ऊरू विहापयति 'विजिहीथा द्यावापृथिवी' इत्यनेन । तस्या मर्थमित्यादि पूर्ववत् । त्रिरेना शिर प्रभृत्यनुलोमामनुमार्ष्टि विष्णुर्योनिमित्यादि प्रतिमंत्रम् ॥

हिरण्मयी अरणी याभ्यां निर्मंथतामश्विनौ । तं ते गर्भं हवामहे

दशमे मासि सूतये। यथाग्निगर्भा पृथिवी यथा द्यौरिंद्रेण गर्भिणी। वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥२२॥

अंते नाम गृह्णात्यसाविति तस्या ॥

सोष्यन्तीमद्भिरभ्युक्षति। यथा वायु. पुष्करिणी समिंगयति सर्वतः। एवा ते गर्भ एजतु सहावेतु जरायुणा। इंद्रास्याय व्रजः कृत· सार्गलः सपरिश्रय.। तमिंद्र निर्जहि गर्भेण सावरांसहेति ॥२३॥

सोष्यन्तीमद्भिरभ्युक्षति प्रसवकाले सुखप्रसवनार्थमनेन मंत्रेण। 'यथा वायु पुष्करिणी समिगयति सर्वत । एवा ते गर्भ एजतु' इति ॥

जातेऽग्निमुपसमाधायांक आधाय कंस पृषदाज्यं संनीय पृषदाज्यस्योपघातं जुहोत्यस्मिन्सहस्र पुष्यासमेधमान. स्वे गृहे। अस्योपसन्द्यां मा च्छैत्सीत्प्रजया च पशुभिश्च स्वाहा। मयि प्राणांस्वयि मनसा जुहोमि स्वाहा। यत्कर्मणाऽत्यरीरिच यद्वा न्यूनमिहाकरम्। अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्ट सुहुतं करोतु न स्वाहेति ॥२४॥

अथ जातकर्म। जातेऽग्निमुपसमाधायाके आधाय पुत्र, कसे पृषदाज्य संनीय सयोज्य दधि घृते, पृषदाज्यस्योपघात जुहोति अस्मिन्सहस्र इत्याद्यावापस्थाने ॥

अथास्य दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथ दधि मधु घृतं संनीयानतर्हितेन जातरूपेण प्राशयति। भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भूर्भुव.स्व. सर्वं त्वयि दधामीति ॥२५॥

अथास्य दक्षिणं कर्णमाभिनिधाय स्वं मुखं वाग्वागिति त्रिर्जपेत्। अथ दधि मधु घृतं संनीय अनंतर्हितेनाव्यवहितेन जातरूपेण हिरण्येन प्राशयत्येतैर्मंत्रै प्रत्येकम् ॥

अथास्य नाम करोति वेदोऽसीति तदस्य तद्गुह्यमेव नाम भवति ॥२६॥

अथास्य नामधेयं करोति वेदोऽसीति। तदस्य तद्गुह्यं नाम भवति वेद इति ॥

अथैनं मात्रे प्रदाय स्तन प्रयच्छति यस्ते स्तन शशयो यो मयोभूर्यो रत्नधा वसुविद्य· सुदत्र.। येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे करिति ॥२७॥

अथैनं मात्रे प्रदाय स्वाकस्थं स्तनं प्रयच्छति यस्ते स्तन इत्यादिमंत्रेण ॥

अथास्य मातरमभिमंत्रयते । इलासि मैत्रावरुणी वीरे वीरमजीजनत् । सा त्व वीरवती भव याऽस्मान्वीरवतोऽकरदिति । त वा एतमाहुरतिपिता बताभूरतिपितामहो बताभूः परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन य एवविदो ब्राह्मणस्य पुत्रो जायत इति ॥२८॥ इति चतुर्थं ब्राह्मणम् ॥

अथास्य मातरमभिमंत्रयते इलाऽतीत्यनेन । त वा एतमाहुरिति—अनेन विधिना जात पुत्र पितर पितामह चातिशेते इति श्रिया यशसा ब्रह्मवर्चसेन परमा निष्ठा प्रापदित्येव स्तुत्यो भवतीत्यर्थ । यस्य चैवंविदो ब्राह्मणस्य पुत्रो जायते, स चैवं स्तुत्यो भवतीत्याहार्यम् ॥ ६ ४ —

अथ वश.। पौतिमाषीपुत्र कात्यायनीपुत्रात्कात्यायनीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्र पाराशरीपुत्रात्पाराशरीपुत्र औपस्वस्तीपुत्रादौपस्वस्तीपुत्र पाराशरीपुत्रात्पाराशरीपुत्र. कात्यायनीपुत्रात्कात्यायनीपुत्र कौशिकीपुत्रात्कौशिकीपुत्र आलंबीपुत्राच्च वैयाघ्रपदीपुत्राच्च वैयाघ्रपदीपुत्र काण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्र· ॥१॥

आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्र. पाराशरीपुत्रात्पाराशरीपुत्रो वात्सीपुत्राद्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्र शौंगीपुत्राच्छौंगीपुत्र· सांकृतीपुत्रात्सांकृतीपुत्र आलंबायनीपुत्रादालंबायनीपुत्र आलंबीपुत्रादालंबीपुत्रो जायन्तीपुत्राज्जायन्ती पुत्रो मांडूकायनीपुत्रान्मांडूकायनीपुत्रो मांडूकीपुत्रान्मांडूकीपुत्रः शांडलीपुत्राच्छांडलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः क्रौंचिकीपुत्राभ्यां क्रौंचिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रः काशकेयीपुत्रात्काशकेयीपुत्र प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्र सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादासुरिवासिन· प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरि. ॥२॥

याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रे. कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाभ्योगाज्जिह्वावान्बाभ्योगोऽसिताद्धार्षगणादसितो धार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्प कश्यपः कश्यपो नैध्रुवे कश्यपो नैध्रुविर्वाचो वागंभिण्या अंभि-

ण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥३॥

समानमा सांजीवीपुत्रात्सांजीवीपुत्रो मांडूकायनेर्मांडूकायनिर्मांडव्यान्मांडव्य कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायण. शांडिल्याच्छांडिल्यो वात्स्याद्वात्स्य कुश्रेः कुश्रिर्यज्ञवचसो राजस्तंबायनाद्यज्ञवचा राजस्तबायनस्तुरात्कावषेयात्तुर कावषेय. प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयभु ब्रह्मणे नम ॥

इति वाजसनेयके बृहदारण्यकोपनिषदि षष्ठोऽध्याय. ॥

अथेदानी समस्तप्रवचनवंश । स्त्रीप्राधान्यात् । गुणवान्पुत्रो भवतीति प्रस्तुतम् । अत स्त्रीविशेषणेनैव पुत्रविशेषणादाचार्यपरंपरा कीर्त्यते । तानीमानि शुक्लानीत्यव्यामिश्राणि ब्राह्मणेन । अथवा यानीमानि यजूषि तानि शुद्धानीत्येतत् । प्रजापतिमारभ्य यावत्पौतिमाषीपुत्र , तावदधोमुखो नियताचार्यपूर्वक्रमो वश समानमा सांजीवीपुत्रात् । ब्रह्मण प्रवचनाख्यस्य । तच्चैतद्ब्रह्म प्रजापतिप्रबधपरपरयाऽऽगत्य अस्मास्वनेकधा विप्रसृतमनाद्यनतं स्वयंभु ब्रह्म नित्यम् । तस्मै ब्रह्मणे नम । नमस्तदनुवर्तिभ्यो गुरुभ्य ॥ ६ ५ —

इति श्रामत्परमहसपरिव्राजकाचार्यस्य श्रीगोविदभगवत्पूज्यपादशिष्यस्य श्राशकरभगवत कृतौ बृहदारण्यकोपनिषद्भाष्यं समाप्तम् ॥

———

उपनिषद्भाष्ये प्रमाणतया उदाहृतानां श्रुतिस्मृतीत्यादि वाक्यानां वर्णानुक्रमः ।

ॐकार एवेद सर्वम् छा २ २३ ३
अकारो वै सर्वा वाक्सैषास्य स्पर्शातस्थोष्मभिर्व्यज्यमाना बह्वी नानारूपा
अक्षरात्परत पर मु २ १ २
अगृह्यो न हि गृह्यते बृ ४ २ ४
अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ दिश श्रोत्रे वाग्विवृताश्च वेदा मु २ १ १४
अग्निर्वै होता
अचक्षुष्कमश्रोत्रमवागमन बृ ३ ८ ८
अजायमानो बहुधा विजायते
अत्याश्रमिभ्य परम पवित्र श्वे ६ २१
अत्र ब्रह्म समश्नुते कठ ६ १४ बृ ४ ४ ७
अत्रायं पुरुष स्वयज्योतिर्भवति बृ ४ ३ ९
अत्रैष देव स्वप्नान्न पश्यत्यथ यदेतास्मिञ्छरीरे सुख भवति प्र ४ ६
अथ केन ब्रह्मत्वमित्यनयैव त्रय्या विद्यया
अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परज्योतिरुपसपद्य छा ८ ३ ४
अथ य एषोऽतरक्षिणि पुरुषो दृश्यते छा १ ७ ५
अथ य एषोऽतरादित्ये हिरण्मय पुरुषो दृश्यते छा १ ६ ६
अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभि छा ८ ६ ५
अथ यदत परो दिवो ज्योतिर्दीप्यते विश्वत पृष्ठेतु सर्वत छा ३ १३ ७
अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुडरीक वेश्म छा ८ १ १
अथ यदु चैवास्मिच्छव्य कुर्वन्ति यदि च नार्चिषमेव छा ४ १५ ५
अथाऽस्यायं द्रष्टा छां. ७.९.१
अथैतयो पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि छा ५ १० ८
अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्य प्रश्न. १.१०
अदृष्टो द्रष्टाऽश्रुत श्रोताऽमतो मंताऽविज्ञातो विज्ञाता बृ ३ ७ २३

अनश्वगा अश्वसु पारयिष्णव
अनत बै मनोऽनंता विश्वे देवा अनतमेव स तेन लोक जयति बृ ३ १ ९
अनंतमपारम् बृ २ ४ १२
अनंतरमबाह्यम् बृ २ ५,१९, ३ ८ ८
अनन्वागत पुण्येनानन्वागत पापेन तीर्णो हि तदा बृ ४ ३ २२
अनन्वागतस्तेन भवत्यसंगो ह्यय पुरुष बृ ४ ३ १५
अनश्नन्योऽभिचाकशीति मु ३ १ १
अनिरुक्तेऽनिलयने तै २ ७
अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि छा ६ ३ २
अन्नं दाम
अन्योंऽतर आत्मानदमय तै २ ५
अन्येऽन्तर आत्मा मनोमय तै २ ३
अन्योंऽतर आत्मा विज्ञानमय तै २ ४
अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु बृ १ ४ १०
अपागादग्नेरग्नित्व छा ६ ४ १
अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षु स शृणोत्यकर्ण श्वे ३ १९
अपुण्यपुण्योपरमे यं पुनर्भयनिर्भया । शान्ता संन्यासिनो यान्ति तस्मै मोक्षात्मने नम ॥
अभय वै जनक प्राप्तोऽसि बृ ४ २ ४
अमृतत्वं हि विंदते केन २.४
अयमग्निर्वैश्वानरो योऽयमंत पुरुषे येनेदमन्न पच्यते बृ ५ ९
अयमात्मा ब्रह्म सर्वानुभू बृ २ ५ १९
अयं पुरुष प्राज्ञेनात्मना संपरिष्वक्तो न बाह्य बृ ४ ३ २१
अयं वै यज्ञो योऽय पवते
अय शारीर आत्मा प्राज्ञेनात्मनान्वारूढ. बृ. ४.३ ३५
अर्वाग्बिलश्चमस ऊर्ध्वबुध्न बृ २ २ ३
अविकार्योऽयमुच्यते गी २ २५
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् गी १३ १६

अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत छा ८ १२ १
अश्वमेधसहस्रं च सत्यं च तुलया धृतम्। अश्वमे मभा आ ७४.१०२
असक्तं सर्वभृत् गी १३ १४
असंगो न हि सज्यते बृ ३ ९ २६
असगो ह्ययं पुरुष बृ ४ ३ १५
असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत् छा ३ १९ १
असद्वा इदमग्र आसीत्ततो वै सदजायत ते २ ७
असौ वा आदित्यो देवमधु छा ३ १ १
अस्थूलमनणु बृ ३ ८ ८
अस्य महतो भूतस्य नि श्वसितमेतद्यदृग्वेद बृ २ ४ १०, ४ ५ ११
अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह छा १ ९ १
अस्य लोकस्य सर्वावतो मात्रामपादाय बृ ४ ३ ९
अह ब्रह्मास्मि बृ १ ४ १०
अहिंसन्सर्वभूतान्यन्यत्र तार्थेभ्य छा ८ १५ १
आकाशवत्सर्वगतश्च नित्य
आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदतरा तद्ब्रह्म छा ८ १४ १
आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न छा ६ १४ २
आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदिति छा ४ ९ ३
आत्मत एवेदं सर्वम् छा ७ २६ १
आत्मत प्राणः छा ७ २६ १
आत्मन आकाश सभूत ते २ १
आत्मन एष प्राणो जायते प्रश्न ३ ३
आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इद बृ ४ ५ ६
आत्मनैवात्मानं पश्यति बृ ४ ४.२३
आत्मनैवायं ज्योतिषास्ते बृ ४ ३ ६
आत्मानमेव लोकमुपासीत बृ १ ४ १५
आत्मा वा अरे द्रष्टव्य बृ २ ४ ५
आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किंचन मिषत्। ऐ. १.१.१.

आत्मेत्येवोपासीत बृ १ ४ ७
आत्मेद्रियमनोयुक्त भोक्तेत्याहुर्मनीषिण कठ ३ ४
आत्मैवाभूद्विजानत ईश ७
आत्मैवेदमग्र आसीत् बृ १ ४ १
आत्मैवेद सर्व छा ७ २५ २
आदित्याच्चद्रमसं चद्रमसो विद्युतं तत्पुरुषोऽमानव स छा ४ १५ ५
आदित्यो ब्रह्मेत्यादेश छा ३ १९ १
आनंदाद्ध्येव खल्विमानि भूतानि जायन्ते । आनदेन जातानि तै ३ ६
आनदो ब्रह्मेति व्यजानात तै ३ ६
आनंद ब्रह्मणो विद्वान्न बिभेति कुतश्चन तै २ ९
आभूतसप्लव स्थानममृतत्व हि भाष्यते
इद वाव तद्यदिदमस्मिन्नत पुरुषे ज्योति छा ३ १३ ७
इदं सर्वं यदयमात्मा बृ २ ४ ६
इंद्रो मायाभि पुरुरूप ईयते बृ २ ५ १९ ऋ ६ ४७ १८
इंधो ह वै नामैष योऽय दक्षिणेऽक्षन्पुरुष
इमं मानवमावर्त नावर्तन्ते छा ४ १५ ६
इमा सर्वा प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं छा ८ ३ २
इय वेदि परोऽत पृथिव्या
उत्पत्तिं प्रलयं चैव भूतानामागति गतिम् । वेत्ति विद्यामविद्या च
उभे ह्येते साध्यसाधनलक्षणे एषणे एव । बृ ३ ५ १
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे ऋ १ १६४ ३९
एकमेवाद्वितीयं छा ६ २ १
एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास छा ८ ११ ३
एको देव सर्वभूतेषु गूढ सर्वव्यापी सर्वभूतातरात्मा श्वे ६ ११
एतद्ध स्म वै तत्पूर्वे विद्वासोऽग्निहोत्रं न जुहवाचक्रु कौ २ ५
एतं त्वेव ते भूयोऽनुव्याख्यास्यामि छा ८ ९ ३
एतदमृतमभयमेतद्ब्रह्म छा ८ ११ १
एतमानंदमयमात्मानमुपसंक्रामति तै २ ८

एतमित प्रेत्याभिसभवितास्मि छा ३ १४ ४
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । इंद्रमेकेऽपरे मनु १२ १२३
एतं वै तमात्मान विदित्वा बृ ३ ५ १
एतं संयद्वाम इत्याचक्षते छा ४ १५ २
एतास्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च बृ ३ ८ ११
एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचद्रमसौ विधृतौ बृ ३ ८ ९
एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति बृ ४ ३ ३२
एत ह्येव बहवृचा महत्युक्थे मीमासन्त ऐ आ ३ २ ३ १२
एतावान्वै काम बृ १ ४ १७
एतेन प्रतिपद्यमाना इम मानवमावर्त नावर्तन्ते छा ४ १५ ६
एतेनैवायतनेनैकतरमन्वेति प्रश्न ५ २
एवविदो ह वा उदेति सूर्य एवंविद्यस्तमेति
एव सोम्य स आदेशो भवति छा ६ १ ३
एव हास्य सर्वे पाप्मान प्रदूयन्ते छा ५ २४ ३
एष नित्यो महिमा ब्राह्मणस्य बृ ४ ४ २३
एष पंथा एतत्कर्मैतद्ब्रह्मैतत्सत्य
एषोऽस्य परम आनंद एतस्यैवानदस्यान्यानि भूतानि बृ ४ ३ ३२
कतम आत्मेति योऽयं विज्ञानमय प्राणेषु बृ ४ ३ ७
कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षते बृ ३ ९ ९
कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा छा १ ११ ५
कर्ता भोक्ता विज्ञाता नियता प्रशासिता
कर्मणा बध्यते जतुर्विद्यया च प्रमुच्यते । तस्मात्कर्म मभा शा २४० ७
कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति स होवाचैतद्वै बृ ३ ८ ७
काम संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृति बृ १ ५ ३
कामा येऽस्य हृदि श्रिता । कठ. ६ १४
किं प्रजया करिष्यामो येषा नोऽयमात्माय लोक बृ ४ ४ २२
कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसत छा ६ १ २
को न आत्मा किं ब्रह्म छा ५ ११ १

को अद्धा वेद ऋ १० १२९ ६
को ह्येवान्यात्क. प्राण्याद्यदेष आकाश आनदो न स्यात् तै २ ७
क्रियापथश्चैव पुरस्तात्संन्यासश्च तयो सन्यास एवात्य तै आ १० ६२ १२
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे मु २ २ ८
क्षेत्र क्षेत्री तथा कृत्स्न प्रकाशयति भारत गी १३ ३३
क्षेत्रज्ञ चापि मा विद्धि सर्वक्षेत्रेषु भारत गी १३ २
गायत्री वा इद सर्वं भूत यदिदं किच छा ३ १२ १
गुहाहितं गह्वरेष्ठ पुराणम् कठ २ १२
गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा जाबा ४
चक्षुष· श्रुतो भवति य एवं वेद छा ३ १३ ८
जीवति वागपेतो मूकान्हि पश्यामो जीवति चक्षुरपेतो मनोऽपेतो कौ ३ ३
जीवापेत वाव किलेद म्रियते न जीवो म्रियते छा ६ ११ ३
ज्ञाते द्वैत न विद्यते मा का १ १८
ज्ञात्वा नैष्कर्म्यमाचरेत् स्मृ ?
ज्ञानमुत्पद्यते पुंसा क्षयात्पापस्य कर्मण । स्मृ ?
ज्ञानाग्नि सर्वकर्माणि भस्मसात्कुरुते तथा गी ४ ३७
ज्यायान्पृथिव्या ज्यायानतरिक्षाज्जायान्दिवो छा ३ १४ ३ , बृ ३ ९ २८
त इमे सत्या कामा छा ८ ३ १
त एते सर्व एव समा सर्वेऽनता श्रुति ?
ततोऽन्यदार्तम् बृ ३ ४ २
ततो मा तत्त्वतो ज्ञात्वा विशते तदनतरम् । गी १८ ५५
तत्केन कं पश्येत् बृ २ ४ १३
तत्कन कं विजानीयात् बृ ४ ५ १५
तत्तेज ऐक्षत छा ६ २ ३
तत्तेजोऽसृजत छा ६ २ ३
तत्त्वमसि छा ६ ८ ७
तत्र को मोह क शोक एकत्वमनुपश्यत ईश ७
तत्सृष्ट्वा तदेवानुप्राविशत् तै २ ६

तं त्वौपनिषद पुरुष पृच्छामि बृ ३ ९ २६
तदपराजिता पूस्तदैरं मदीयं सर· छा ८ ५ ३
तदप्येष श्लोको भवति तै २ ६
तदस्येदं वाचा तंत्या नामभिर्दामभि सर्वं सितम् श्रुति १
तदात्मान स्वयमकुरुत तै २ ७
तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् बृ १ ४ १०
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते कठ ६ १
तदैक्षत तत्तेजोऽसृजत छा ६ २ ३
तदैक्षत बहु स्या प्रजायेयेति तत्तेजोऽसृजत छा ६ २ ३
तद्देवा ज्योतिषा ज्योतिरायुर्होपासतेऽमृतम् बृ ४ ४ १६
तद्धेदं तर्ह्यव्याकृतमासीत् बृ १ ४ ७
तद्धैक आहुरसदेवेदमग्र आसीत् छा ६ २ १
तद्धैतत्पश्यन्नृषिर्वामदेव प्रतिपेदेऽहं मनुरभव सूर्यश्चेति बृ १ ४ १०
तद्ध्यग्न्य सर्वविद्याना प्राप्यते ह्यमृत तत स्मृति १
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणा । गी ५ १७
तद्ब्रह्म तदमृत स आत्मा छा ८ १४
तद्य इमे वीणाया गायन्त्येतं ते गायन्ति तस्मात्ते धनसनय छा १ ७ ६
तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो बृ ५ ५ २
तद्यथा रथस्यारेषु नेमिरर्पितो नाभावरा अर्पिता एवमेवैता कौ ३ ९
तद्यथाहिनिर्ल्वयनी वाल्माके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं बृ ४ ४ ७
तद्यथेह कर्मचितो लोक क्षीयत एवमेवामुत्र पुण्यचितो छा ८ १ ६
तद्यो यो देवाना प्रत्यबुध्यत स एव तदभवत् बृ १ ४ १०
तद्वा एतदक्षरं गार्ग्यदृष्ट द्रष्ट्रश्रुतं श्रोत्रमत मत्रविज्ञात बृ ३ ८ ११
तद्विद्धि प्रणिपातेन गी ४ ३४
तपसा ब्रह्म विजिज्ञासस्व तै ३ २
तम श्वभ्रनिभं दृष्टं वर्णबुद्बुदसंनिभम् । नाशप्रायं सुखाद्धीनं व्यासस्मृतिः १
तं मा भगवाञ्छोकस्य पारं तारयतु छा ७ १ ३
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण बृ. ४ ४ २१

तमेव विदित्वाऽतिमृत्युमेति श्वे ३ ८, ६ १५
त यथा यथोपासते तदेव भवति
तयोरन्य पिप्पलं स्वाद्वत्यनश्नन्योऽभिचाकशीति मुं ३ १ १
तयोर्ध्वमायन्नमृतत्वमेति छा ८ ६ ६ कठ ६ १६
तरति शोकमात्मवित् छा ७ १ ३
तस्मात्कर्म न कुर्वन्ति यतय पारदर्शिन मभा शा २४० ७
तस्मात्तत्सर्वमभवत्
तस्मात्तेनोभय जिघ्रति सुरभि च दुर्गधि च छा १ २ २
तस्माद्वा एतस्मादात्मन आकाश सभूत । आकाशाद्वायु तै २ १
तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽतर आत्मानदमय तै २ ५
तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे बृ ४ ४ ६
तस्मै मृदितकषायाय तमस पार दर्शयति भगवान्सनत्कुमार छा ७ २६ २
तस्य भासा सर्वमिद विभाति कठ ५ १५, श्वे ६ १४, मु २ २ १०
तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा छा ५ १८ २
तावानस्य महिमा ततो ज्यायाश्च पूरुष । पादोऽस्य सर्वा छा ३ १२ ६
तासा त्रिवृतं त्रिवृतमेकैका करवाणि छा ६ ३ ३
ते क्षय्यलोका भवन्ति छा ७ २५ २
तेज एव तत्पीत नयते छा ६ ८ ५
ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् श्वे १ ३
तेनो एतस्यै देवतायै सायुज्य सलोकता जयति बृ १ ५ २३
ते वा एते आहुती हुते उत्क्रामतस्ते अतरिक्षमाविशत
तेषा न पुनरावृत्ति बृ ६ २ १५
तेषा सर्वेषु लोकेषु कामचारो भवति छा ७ २५ २, ८ १ ६
त्यज धर्ममधर्मं च मभा
त्रिपादस्यामृत दिवि छा ३ १२ ६
त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी । त्व जीर्णो श्वे. ४ ३
त्वं हि न पिता योऽस्माकमविद्याया परं पार तारयसि प्रश्न ६ ८
दशाक्षरा विराट्

दहरोऽस्मिन्नंतराकाश छा ८ १ १
दिव्यो ह्यमूर्त पुरुष सबाह्याभ्यंतरो ह्यज मु २ १ २
दृष्टेर्द्रष्टा श्रुते श्रोता मतेर्मंता विज्ञातेर्विज्ञाता बृ ३ ४ २
द्वादश मासा पंचर्तवस्त्रय इमे लोका असावादित्य एकविंश
द्वाविमावथ पथानौ यत्र वेदा प्रतिष्ठिता प्रवृत्तिलक्षणो मभा शा २४० ६
द्वितीयाद्वै भय भवति बृ १ ४ २
धर्माविरुद्धो भूतेषु कामोऽस्मि गी ७ ११
न्यायतीव लेलायतीव बृ ४ ३ ७
न कर्मणा वर्धते नो कनीयात् बृ ४ ४ २३
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु कै २
न जीविते मरणे वा गृधि कुर्वीतारण्यमियादिति पदं इति संन्यासशासनं ।
न तत्र दक्षिणा यन्ति नाविद्वासस्तपस्विन
न तस्य कार्य करण च विद्यते न तत्समश्चाभ्यधिकश्च श्वे ६ ८
न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति बृ ४ ४ ६
न दृष्टेर्द्रष्टार पश्ये बृ ३ ४ २
न मतेर्मतार मन्वीथा न विज्ञातेर्विज्ञातार विजानीया बृ ३ ४ २
न येषु जिह्ममनृत न माया प्र १ १६
न लिप्यते लोकदु खेन बाह्य क ५ ११
न वा अरे पत्यु कामाय न वा अरे सर्वस्य बृ ४ ५ ६
न विज्ञातेर्विज्ञातार विजानीया बृ ३ ४ २
न सत्तन्नासदुच्यते गी १३ १२
न सदृशे तिष्ठति रूपमस्य कठ ६ ९
न हि द्रष्टुर्दृष्टे बृ ४ ३ २३
नहि वक्तुर्वक्तेर्विपरिलोपो विद्यते बृ ४ ३ २६
नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात् बृ ४ ३ ३०
न हिंस्यात्सर्वभूतानि
नाकृतेनेह कश्चन गी ३ १८
नादत्ते कस्यचित्पापं गी ५ १५

नान्यदतोऽस्ति विज्ञातृ बृ ३ ८ ११
नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति विज्ञाता बृ ३ ७ २३
नान्य पंथा विद्यतेऽयनाय श्वे ६ १५
नामरूपे सत्यं ताभ्यामयं प्राणश्छन्न बृ १ ६ ३
नाह खल्वयमेव सप्रत्यात्मानं जानात्ययमहमस्मीति छा ८ ११ २
नाहमत्र भोग्य पश्यामि छा ८ ९ १
नाहं प्रकाश सर्वस्य योगमायासमावृत गी ७ २५
नित्य विभु सर्वगत मु. १ १ ६
निराशिषमनारंभं निर्नमस्कारमस्तुतिम् ।
निष्कल निष्क्रियं शान्त निरवद्य निरंजनम् श्वे ६ १९
निस्तुतिर्निर्नमस्कार मा का २ ३ ७
नेति नेति बृ २ ३ ६
नैतदब्राह्मणो विवक्तुमर्हति समिध सोम्याहरोप छा ४ ४ ५
नैतादृशं ब्राह्मणस्यास्ति वित्तं
नैव तस्य कृतेनार्थ गी ३ १८
न्यास इति ब्रह्मा ब्रह्मा हि पर परो हि ब्रह्मा तानि वा नारा ७८
न्यास एवात्यरेचयत् तै आ १० ६२ १२
पंच ब्रह्मपुरुषा छा ३ १३ ६
पचम्यामाहुतावाप पुरुषवाचो भवन्ति छा ५ ३ ३
पतिर्जाया प्रविशति
परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृत कृतेन मुं १ २ १२
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृत दिवि छा ३ १२ ५
पित्रानुशिष्टोऽहं ब्रह्माहं यज्ञ इत्यादि प्रतिपद्यते
पुण्यो गंध पृथिव्या गी ७ ९
पुरुष एवोक्थमयमेव महान्प्रजापति
पुरुषो वाव गौतमाग्नि छा ५.७.१
पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योति बृ ३ ९.१०
प्रज्ञानघन एव बृ ४ ५.१३

प्रज्ञानं ब्रह्म ऐ ५ ३
प्रपदाभ्या प्रापद्यत ब्रह्मेमं पुरुषम्
प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नातरम् बृ ४ ३ २१
प्राणस्येव प्राणो नाम भवति बृ १ ४ ७
प्राणबधन हि सोम्य मन छा ६.८ २
प्राणस्य प्राणम् बृ. ४ ४ १८
प्राणाग्नय एवैतस्मिन्पुरे जाग्रति प्र ४ ३
प्राणाद्वा एष उदेति प्राणेऽस्तमेति बृ १ ५ २३
प्राणापानपरिचलनवत्या हि वाचश्चित्तस्य चोत्तरोत्तरक्रमो यद्यज्ञ
प्राणा वै सत्यं तेषामेष सत्यम् बृ २ १ २०, २ ३ ६
प्राणो वा आशाया भूयान् छा ७ १५ १
प्राणो वाव संवर्ग छा ४ ३ ३
प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राण स्वसा छा ७ १५ १
प्राणो ह्येवैतान्सर्वान्संवृंक्ते छां ४ ३ ३
प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवर येषु कर्म मु १ २ ७
बहु स्या प्रजायेय तै २ ६
बुद्धेरात्मा महान्पर कठ ३ १०
ब्रह्मचर्य समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा जा ४
ब्रह्मचारी धनदायी मेधावी श्रोत्रिय प्रिय । विद्यया वा विद्यां
ब्रह्मपरा ब्रह्मनिष्ठा परं ब्रह्मान्वेषमाणा एष ह वै प्र १ १
ब्रह्मलोकमभिसंपद्यते छा ८.१५ १
ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म श्वे १ १
ब्रह्मविदाप्नोति परम् तै २.१
ब्रह्मवृक्ष सनातन मभा अश्व. ४७ १४
ब्रह्म वेद ब्रह्मैव भवति मुं ३ २ ९
ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च । उत्तमा सात्त्विकी मनु १२.५०
ब्रह्मैव सन्ब्रह्माप्येति बृ ४.४.६
ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्माद्ब्रह्म दक्षिणतश्चोत्तरेण मुं २ २.११

ब्रह्मैवेद सर्वं मु २ २ ११
भारूप सत्यसंकल्प छा ३ १४ २
भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशया मु २ २ ८
भीषास्माद्वात पवते भीषोदेति सूर्य तै २ ८
भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास छा ७ २३
भूः प्रपद्येऽसुनामुनामुना छा ३ १५ ५
भृगुर्वै वारुणि वरुण पितरमुपससार तै ३ १
मत्त स्मृतिर्ज्ञानमपोहन च गी १५ १५
मनसश्चेद्रियाणा च ह्यैकाग्र्यं परम तप । स्मृति
मनसा ह्येव पश्यति मनसा शृणोति हृदयेन हि रूपाणि बृ ३ ९ २७
मनो ब्रह्मेत्युपासीत छा ३ १८ १
मनोमय प्राणशरीरो भारूप छा ३ १४ २
मंत्रेषु कर्माणि कवयो यान्यपश्यन मुं १ २ १
महान्तं विभुमात्मान कठ २ २७
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु । यज्ञो दान तपश्चैव पावनानि
महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा बृ ३ ९ २
माया तु प्रकृति विद्यान्मायिन तु महेश्वरम् श्वे ४ १०
मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति कठ ४ ११, बृ ४ ४ १९
मृल्लोहविस्फुलिंगाद्यै सृष्टिर्या चोदितान्यथा । मा ३ १५
मोक्षमिच्छन्सदा कर्म त्यजेदेव समाचनम् त्यजतैव हि तज्ज्ञेयं त्यक्तु
य आत्मापहतपाप्मा छा ८ ७ १
य आत्मा सर्वांतर बृ ३ ४.१
य आदित्ये तिष्ठन्नादित्यादंतरो यमादित्यो न वेद यस्यादित्य बृ ३ ७ ९
य इम च लोकं परं च लोकं सर्वाणि च भूतान्यंतरो यमयति बृ ३ ७ १
य एतामेवं ब्रह्मोपनिषदं वेद छा ३ ११ ३
य एष विज्ञानमय पुरुष कैष तदाभूत्कुत एतदागात् बृ २ १ १६
य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मा छा ८ ७ ४
यज्ञेन दानेन बृ ४ ४ २२

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । ते ३ १
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान् तै २ ९
यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षु श्रोत्र मु १ १ ६
यत्र त्वस्य सर्वमात्मैवाभूत् बृ २ ४ १४, ४ ५ १५
यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा छा ७ २४ १
यत्र सुप्तो न कंचन काम कामयते न कंचन स्वप्न बृ ४ ३ १९ मा ५
यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति बृ २ ४ १३ ४ ५ १५
यत्रैतत्पुरुष स्वपिति नाम सता सोम्य तदा सपन्नो भवति छा ६ ८ १
यत्साक्षादपरोक्षाद्ब्रह्म बृ ३ ४ १ ३ ५ १
यथाक्रतुरस्मिल्लोके पुरुषो भवति तथेत प्रेत्य भवति छा ३ १४ १
यथा पृथिव्यामोषधय सभवन्ति मु १ १ ७
यथाप्रज्ञ हि सभवा
यथा सकृद्विद्युत
यदंतरा पितर मातर च बृ ६ २ २
यदादित्यगत तेजो जगद्भासयतेऽखिलम् । यच्चद्रमसि गी १५ १२
यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभय प्रतिष्ठा तै २ ७
यदेष आकाश आनदो न स्यात् तै २ ७
यद्गत्वा न निवर्तन्ते गी १५ ६
यद्भूतयोनि परिपश्यन्ति धीरा मु १ १ ६
यद्वाव क तदेव ख यदेव ख तदेव क छा ४ १० ५
यद्वै किंच मनुरवदत्तद्भेषजम् तै स २ २ १० २
य यं वापि स्मरन्भावं त्यजत्यते कलेवरम् । त तमेवेति कातेय गी ८ ६
यश्चायमस्या पृथिव्या तेजोमयोऽमृतमय पुरुष बृ २ ५ १
यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मान वैश्वानरमुपास्ते छा ५ १८ २
य पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत प्र ५ ५
य पृथिव्या तिष्ठन्पृथिव्या अंतरो य पृथिवी न वेद यस्य बृ. ३ ७ २
यस्माद्भूयो न जायते कठ ३ ८
यस्य ज्ञानमयं तप मुं १ १ ९

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्था श्वे ६ २३
यान्नत्सपातमुषित्वा छा ५ १० ५
या वाक्पुरुषेषु सा घोषेषु प्रतिष्ठिता कश्चित्ता वेद ब्राह्मण
या वेदबाह्या स्मृतयो याश्च काश्च कुदृष्टय मनु १२ ९५
येन सूर्यस्तपति तेजसेद्ध तै ब्रा ३ १२ ९ ७
येनाक्षर पुरुष वेद सत्य प्रोवाच ता तत्त्वतो ब्रह्मविद्याम् मुं १ २ १३
येनावृत खं च दिवं मही च
येनेद सर्वं विजानाति त केन विजानीयात् बृ २ ४ १३
ये प्रजामीषिरेऽधीरास्ते श्मशानानि भेजिरे । ये प्रजा नेषिरे
यो ब्रह्माण विदधाति पूर्वं यो वे वेदाश्च प्रहिणोति तस्मै श्वे ६ १८
यो योनिं योनिमधितिष्ठत्येक. श्वे ४ ११
यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण
यो वाचमतरो यमयति बृ ३ ७ १
यो विज्ञाने तिष्ठन् बृ ३ ७ २२
यो वेद निहितं गुहाया परमे व्योमन् तै २ १
यो वै प्राण सा प्रज्ञा या वै प्रज्ञा स प्राण कौ ३ ३
यो वै भूमा तत्सुखम् छा ७ २३
यो वै भूमा तदमृतम् छा ७.२४.१
योषा वाव गौतमाग्नि छा ५ ८ १
योऽसावतीद्रियोऽग्राह्य सूक्ष्मोऽव्यक्तः सनातन
रश्मिभिरेषोऽस्मिन्प्रतिष्ठित बृ ५ ५ २
रसो वै स रसं ह्येवायं लब्ध्वानंदी भवति तै. २ ७
वंध्यापुत्रो न तत्त्वेन मायया वापि जायते । मा का ३.२८
वाक्पतिश्चक्षुष्पति श्रोत्रपतिर्विज्ञानपतिश्च भवति तै १ ६ २
वाचारंभणं विकारो नामधेयं छा ६ १ ४
वाचैवायं ज्योतिषास्ते बृ ४ ३ ५
वाचो ह वाचश्चक्षुषश्चक्षु· श्रोत्रस्य श्रोत्रं मनसो मन·
वात एव यज्ञस्यारंभको वात प्रतिष्ठा

वायुर्वाव संवर्ग छा ४ ३ १
वायुर्वै गौतम तत्सूत्र वायुना वै गौतम सूत्रेणाय च लोक बृ ३ ७ २
विज्ञातारमरे केन विज्ञानीयात् बृ २ ४ १४
विज्ञानमानदं ब्रह्म बृ. ३ ९.२८
विद्यया तदारोहन्ति
विद्यया देवलोक कर्मणा पितृलोक बृ १ ५ १६
विद्यया विदतेऽमृतम् केन २ ४
विद्यासहायवानीश्वर स्मृति ।
विद्याभीप्सिन नचिकेतस मन्ये कठ २ ४
विद्वान्न बिभेति कुतश्चन तै २ ९
विराडन्न छा ४ ३ ८
वीरहा वा एष देवाना योऽग्निमुद्वासयते
वेद कृत्स्नोऽधिगंतव्य सरहस्यो द्विजन्मना । स्मृति
वेदाहमेतं पुरुषं महान्त श्वे ३ ८
व्युत्थायाथ भिक्षाचर्य चरन्ति बृ ४ ४ २२
शत वर्षाणि सर्वमायु पुरुषस्य
शान्तो दान्त बृ ४ ४ २३
शुद्धमपापविद्धम् ईश ८
शुनि चैव श्वपाके च गी ५ १८
शुष्यति वै प्राण ऋतेऽन्नात् बृ ५.१२ १
शूद्रश्चतुर्थो वर्ण एकजाति मनु. १० ४
श्रद्धा वा आप श्रद्धामेवारभ्य प्रणीय प्रचरन्ति
श्रद्धावाल्लभते ज्ञान तत्पर संयतेद्रिय । गी ४ ३९
श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽह भगव छा. ७.१३
श्रोतव्यो मंतव्यो निदिध्यासितव्य बृ २.४.५
स एतं देवयानं पंथानमासाद्याग्निलोकमागच्छति कौ १ ३
स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत एतमेव पुरुषम् ऐ. ३.१२
स एतस्माज्जीवघनात्परात्परं पुरिशयमीक्षते प्र. ५.५

स एनमविदितो न भुनक्ति बृ १ ४ १५
स एष नेति नेत्यात्मा बृ ३ ९ २६
स एष परोवरीयानुद्गीथ म एषोऽनत छा १ ९ २
स एष ये चामुष्मात्पराचो लोकास्तेषा चेष्टे देवकामाना च छा १.६ ८
स एष ये चैतस्मादर्वाचो लोकास्तेषा चेष्टे मनुष्यकामाना च छा १ ७ ६
सच्च त्यच्चाभवत् तै २ ६
सता सोम्य तदा सपन्नो भवति छा ६ ८ १
सत्यं ज्ञानमनतं ब्रह्म तै २ १
सत्य त्वेव विजिज्ञासितव्यम् छा ७ १६ ८ ४१
स दाधार पृथिवीं द्यामुतेमा
सदेव सोम्येदमग्र आसीदेकमेवाद्वितायम् छा ६ २ १
सन्मूला सोम्येमा सर्वा प्रजा सदायतना सत्प्रतिष्ठा छा ६ ८ ४
स प्राणमसृजत प्राणाच्छद्धाम् प्र ६ ४
सबाह्याभ्यंतरो ह्यज मु २ १ २
स ब्रह्मविद्या सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह मु १ १ १
स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोऽतर्हृदय आकाश छा ८ १ ३
स भगव कस्मिन्प्रतिष्ठित इति स्वे महिम्नि छा ७ २४ १
स मनसा वाच मिथुन समभवत बृ १ २ ४
सम सर्वेषु भूतेषु तिष्ठन्त परमेश्वर गी १३ २७
स य एषोऽणिमैतदात्म्यमिद सर्व तत्सत्य स आत्मा छा ६ १४ ३
स यथा दुदुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयात् बृ ४ ५ ८
स यथा सैंधवघनोऽनंतरोऽबाह्य कृत्स्नो रसघन एवैव वा अरे बृ ४ ५ १३
स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति मुं ३ २ ९
सर्वकर्मा सर्वकाम सर्वगध सर्वरस छा ३ १४ २
सर्वं खलविद ब्रह्म तज्जलानिति शान्त उपासीत । अथ छा ३ १४ १
सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसविशन्ति छा १ ११ ५
सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते छा १ ९ १
सर्वेभ्योऽगेभ्यस्तेज. सभूतम् ऐ ४ १

स वा एष पुरुषोऽन्नरसमय तै २ १
स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म बृ ४ ४ २५
स वा एष महानज आत्मा योऽय विज्ञानमय प्राणेषु बृ ४ ४ २२
स वेत्ति वेद्य न च तस्यास्ति वेत्ता श्वे ३ १९
सैषानंदस्य मीमासा भवति तै २ ८
सैषा भार्गवी वारुणी विद्या परमे व्योमन्प्रतिष्ठिता तै ३ ६
सोऽकामयत बहु स्या प्रजायेय स तपोऽतप्यत स तपस्तप्त्वा तै २ ६
सोऽय मनुष्यलोक पुत्रेणैव बृ १ ५ १६
स्वकर्मणा तमभ्यर्च्य सिद्धिं विदति मानव गी १८ ४६
स्वप्नेन शारीरं बृ ४ ३ ११
स्वमात्मानमपीतो भवति छा ६ ८ १
स्वयमेवात्मनात्मानं वेत्थ त्व पुरुषोत्तम गी १० १५
हिरण्यगर्भं जनयामास पूर्वं श्वे ३ ४
हिरण्यगर्भं पश्यत जायमानम्

संक्षेपस्पष्टीकरणम् ।

ईश –ईशावास्योपनिषत् ।
ऋ –ऋग्वेद ।
ऐ –ऐतरेयोपनिषत् ।
ऐ आ –ऐतरेयारण्यकम् ।
कठ –कठोपनिषत् ।
के , केन –केनोपनिषत् ।
कौ , कौ ब्रा –कौषीतकिब्राह्मणोपनिषत् ।
गा –भगवद्गीता ।
छा –छादोग्योपनिषत् ।
जाबा –जाबालोपनिषत् ।
तै –तैत्तिरीयोपनिषत् ।
तै ब्रा –तैत्तिरीयब्राह्मणम् ।
नारा –नारायणोपनिषत् ।
प्र प्रश्न –प्रश्नोपनिषत् ।
बृ –बृहदारण्यकोपनिषत् ।
ब्रह्मबिंदु –ब्रह्मबिंदूपनिषत् ।
मनु –मनुस्मृति ।
मभा –महाभारतम् ।
मा का –माण्डूक्यकारिका ।
मु –मुंडकोपनिषत् ।
श ब्रा –शतपथब्राह्मणम् ।
श्वे श्वेताश्वतरोपनिषत् ।

